महाकविश्रीकालिदासविरचितं

ज्योतिर्विदाभरणम्

भावरत्नविरचितसुखबोधिकासमेतम् ।

जांभेकरोपाह्व श्रीकृष्णात्मज-

सीतारामशर्मणा यथामति संशोधितम्

टिप्पण्यादियुक्तीकृतं च ।

G. JETLEY

प्रथमं संस्करणम्

तच्च

मुम्बय्याख्यराजधान्यां सुवर्णाख्यमुद्रणयन्त्रालये

पण्डितमूलजीतनुजनुषा पण्डितनारायणशर्मणा

मुद्रयित्वा प्रकाशितम्

शकाब्दाः १८३० खिस्ताब्दाः १९०८

मूल्यं सार्धरूपकद्वयम्

आपुस्तकनु मळवानु ठेकाणु
पंडीत नारायण मुळजी
कालकादेवी पोस्ट मुबई नं. २

॥ अथ ज्योतिर्विदाभरणस्थविषयानुक्रमणिका ॥

विषयांका	विषयनामानि	पृष्ठांका
	मानप्रकरणम् १	
१	मंगलाचरणम्	१
२	ग्रंथनामकीर्तनम्	३
३	सौरादिमानम्	,,
४	नक्षत्रमानम्	,,
५	सावनसौरमाने	४
६	स्वस्वमासवर्षमानपैत्र्यमानच	,,
७	गुरुमानम्	,
८	संवत्सरनामानि	,,
९	गतवत्सरानयनम्	५
१०	ग्रहाणांरात्रिदिनमानम्	६
११	अयनांशकमानम्	
१२	अयनफलम्	,
१३	षड्ऋतव	७
१४	असन्मतनिराकरणम्	,,
१५	मानानांकर्मसुग्राह्याग्राह्यविचार	,,
१६	सौरसावनविवेक	,
१७	वर्षमध्ये चांद्रदिनसंख्या	८
१८	नक्षत्रदिनसावनदिनसंख्या	,
१९	सौरदिनसंख्या	,
	योगोत्पत्तिप्रकरणम् २	
२०	तिथिसंज्ञा	९
२१	वारसिद्धा	,,
२२	वारनेष्टा	१०
२३	पक्षरंध्रतिथय	,
२४	कर्कियोग	
२५	सर्वतयोग	,
२६	क्रूराक्रांततिथय	११
२७	दग्धतिथय	
२८	प्रतिपदादितिथीनांसंज्ञा	१२
२९	नक्षत्राणामीशा	,
३०	स्थिरचरसंज्ञमानि	१३
३१	मृदुलघुनक्षत्राणि	,,
३२	तीक्ष्णोग्रमानि	१४
३३	मिश्रमेतनक्षत्राणांफलंच	,
३४	स्थिरादीनांसङ्ग्रान्तरम्	,
३५	धनिष्ठापंचकम्	,,
३६	पंचकेत्याज्यम्	१५
३७	अधोमुखनक्षत्राणि	,,
३८	तिर्यङ्मुखनक्षत्राणि	,,
३९	ऊर्ध्वमुखनक्षत्राणि	१६
४०	वृद्धनक्षत्राणि	,,
४१	समाननक्षत्राणि	,,
४२	कुलोदयमानि	,,
४३	उपकुलकुलाकुलमानि	१७
४४	अन्यकादिभानि	,
४५	एषायोग्यता	,,
४६	पुष्यमहत्त्ववर्णनम्	,,
४७	त्रिपुष्करयोग	१८
४८	आनंदादियोगा	,,
४९	एषामुत्पत्ति	१९
५०	अमृतसिद्धियोग	,,
५१	उत्पातादियोगचतुष्कम्	,,
५२	यमघंटयोग	२०
५३	अडलयोग	,,
५४	अडलयोगफलम्	,,
५५	विडलयोग	,,
५६	विद्युत्कंपनादियोगा	२१
५७	चंडायुधपात	,,
५८	कालचक्रक्रम	२२
५९	कथ्वेतेविलोकनीया	,,
६०	विष्कंभादियोगा	२३
६१	अशुभयोगा	,,
६२	एकार्गलोपपत्ति	२४
६३	एकार्गलनामानि	,,
६४	एकार्गलस्यदृष्टपुरुषस्वरूपता	,,
६५	एकार्गलस्यदुष्टता	२५
६६	चंडायुधयोग	,
६७	एकार्गलचंडायुधयोर्वैपरत्यानम्	

विषयाङ्का विषयनामानि.	पृष्ठाङ्काः
भद्राप्रकरणम् ३	
६८ सप्तकरणानि	२६
६९ स्थिरकरणचतुष्कम्	,,
७० करणानयनम्	,,
७१ एषांफलम्	२७
७२ विष्टेराकारस्तदुत्पत्तिश्च	,,
७३ विष्ट्यांशुभकृत्यानिषेध	२८
७४ विष्टिभोग्यकाल	,,
७५ विष्टे पुच्छविवेक	,,
७६ विष्टेर्देहविभाग	२९
७७ न्यूनाधिकभद्रायांभागविवेकता	,,
७८ भद्राङ्गविभागफलं	,,
७९ विष्टे स्थितिवर्णनम्	,,
८० विष्टिगत्यभिमुखम्	३०
८१ तत्रविशेष	,,
८२ यामार्धम्	,,
८३ पूजाविशेषादौविष्टे शुभत्व	३१
८४ पूजादिहेतुनाविष्टे शुभत्व	,,
पर्वप्रकरणम् ४	
८५ पर्वाणि	३२
८६ ग्रहणम्	३३
८७ ग्रहणकाल	,,
८८ ग्रहणनक्षत्रकियत्पर्यंतत्याज्य	,
८९ न्यूनाधिकग्रहणहर्पदिनविवेकता	,,
९० क्रूराक्रांतनक्षत्रम्	३४
९१ तारकाणा तारकासंख्या	,,
९२ नक्षत्रस्वरूपम्	,,
९३ तारकतारकाणाख्यानम्	३५
९४ नक्षत्रध्रुवकाणांशा	३६
९५ नक्षत्रशरांशा	३७
९६ भिन्नमण्डलेनक्षत्रोत्पत्ति	३८
९७ ग्रहनक्षत्रसमागमाधिकार	,,
९८ भंगमगतनक्षत्रदूषणम्	३९
९९ क्रांतिसाम्यम्	,,
१०० क्रांतिचक्रम्	,,
१०१ क्रांतिचक्रस्पष्टस्पष्टम्	४०
१०२ क्रांतपातिरूपता	,,
१०३ क्रांतिगणितम्	,

विषयाङ्का विषयनामानि.	पृष्ठाङ्का
१०४ गंडांतयोग	४१
१०५ संधिगतदिनानि	,,
१०६ अर्धोदयपर्व	,,
१०७ पद्मकपर्व	,,
१०८ कपिलाषष्ठी	४२
१०९ अष्टकाष्टमी	,,
११० द्विसप्ततिश्राद्धानि	,,
१११ युगादितिथय	,,
११२ मन्वादितिथय	,,
११३ पक्षश्राद्धानि	४३
११४ अनतिकास्तिथय	,
११५ संक्रांतिन्यूनाधिकमासा	,
११६ कतिमासैरधिकआयातितन्निर्णयः	,
११७ कतिवर्षै क्षयमासआयातितन्निर्णय	४४
११८ अधिकक्षयमासानियम.	,
११९ क्षयमासेऽधिकमासद्वयम्	,
१२० अधिकक्षययो साध्यस्थानम्	,
१२१ ब्रह्मसूर्यसिद्धांतयोर्मतभेद.	,
१२२ सौरब्राह्मयोर्ग्राह्यस्थानम्	४५
१२३ अधिमासेत्याज्यम्	,
१२४ रविसंक्रमणपुण्यकाल	,
१२५ संक्रमकालकोदरसाधनम्	,,
१२६ चन्द्रादिग्रहसंक्रमोदरम्	४६
१२७ संक्रमेकालविवेक	,,
१२८ हरिपदादिपर्वाणि	,,
१२९ षडशीतिमुखपर्व	,,
१३० एतत्पर्वदिनमाहात्म्यम्	,,
१३१ विषुवदादि	४७
१३२ हरिपदम्	,,
१३३ अयनादिविशेषगत शुभतकाल	,,
१३४ उत्तरदक्षिणायनयोर्विशेषशुभत-काल	४८
१३५ द्वादशसंक्रांत्यधिकार	,,
१३६ नक्षत्राश्रितसंक्रांतिसंज्ञा	,
१३७ मंदादिसंज्ञाया फलम्	,,
१३८ प्रथमादिप्रहरेसंक्रांतिफलम्	४९
१३९ तैतिलादिकरणेशुभादिरविसंक्रांति.	,,
१४० संक्रातेर्मुहूर्तनियम.	,,
१४१ जघन्यादिशुभान्यस्वरूपविवेक	५०

LIBRARY.

विषयांका विषयनामानि.	पृष्ठांका
१४२ दर्शरविसंक्रांत्योरेकवारेफलम्	,
१४३ विवाहादौग्रहसंक्रमादिदिननिषेध	,,
१४४ उपसंहार	५१
१४५ सुयोगकुयोगयोर्बलम्	,,
१४६ अस्मिन्कस्यचिन्मतेदूषण	,,
१४७ बहुदोषोऽल्पगुणपरिहरतितदाह	,,
१४८बहुगुणेप्येकदोषांशस्यापित्याज्यता	,,
१४९ गुणदोषयो समानतानिषेध	५२
१५० तत्रदृष्टांत	,,
१५१ विक्रमार्कवर्णनम्	,,
ग्रहगोचरप्रकरणम् ५	
१५२ ग्रहगोचरफलसंधानम्	५३
१५३ शन्यादीनाभ्रमणविधि	,,
१५४ ग्रहाणालघुमहद्भ्रमणभेद	,,
१५५ ग्रहाणाराशिभोगकालप्रमाणम्	,,
१५६ ग्रहाणांगतिहेतु	५४
१५७ ग्रहाणांसप्तधागति	,,
१५८ गतिलक्षणम्	,,
१५९ ग्रहाणावक्रातिचारेफलनिषेध	५५
१६०भौमादिपंचकस्यवक्रगतिदिननियम	५६
१६१ मार्गगतिदिननियम	,,
१६२ भौमादीनामस्तोदयौ	,,
१६३ ग्रहाणांकालांशका	,,
१६४ भौमादीनामस्तदिननियम	५७
१६५ भौमादिनामुदयदिनानियम	,,
१६६वक्रोदितशुक्रबुधयोरस्तोदयदिनानियमः	
१६७ एतन्मतदृढीकरणम्	५८
१६८ उत्पातहतग्रहलक्षणम्	,,
१६९ ग्रहाणांवयोवस्था	,,
१७० तत्रविशेष	,,
१७१ प्रकारान्तरम्	,,
१७२ ग्रहाणांराशिभोगा	५९
१७३ मरुजानांराशि	,,
१७४ खलसौम्यग्रहा	,,
१७५ सूर्यस्यसिंहगृहस्थापनम्	,,
१७६ रविचन्द्रयो षड्राशिस्वामित्वम्	६०
१७७ शेषग्रहाणांराशिगृहाणि	,,
१७८ सूर्यादीनामुच्चनीचराशय	,,
१७९ राहुकेत्वोरुच्चनीचाभाव	६१
१८० तत्रमतान्तरम्	,,
१८१ राहुकेत्वोर्भेदः	
१८२ तस्यप्रमाणता	,
१८३ ग्रहाणांमैत्रीचक्रम्	६२
१८४ तात्कालिकग्रहाणामैत्रीचक्रम्	६३
१८५ सद्वृत्तयःमतान्तरनिषेध	
१८६ फलदायिग्रह	,,
१८७ विफलग्रहः	६४
१८८ द्वादशभवनानि	,,
१८९ ग्रहाणाफलानि	६४-६६
१९० अनिष्टग्रहेकरणीयनिषेध	६७
१९१ यस्मिन्वारेयत्करणीयंतदाह	,
१९२ चन्द्रबलस्यविशेष	,,
१९३ क्षीणचन्द्रेताराबलम्	६८
१९४ शुभाशुभतारा	,,
१९५ ताराबलेनग्रहाणांबलित्वम्	,
१९६ चन्द्रस्यशुभाशुभफलम्	,,
१९७ सर्वग्रहेषुशक्तिरूपेणचन्द्रफलम्	,,
१९८ वर्धमानचन्द्रबलादानता	६९
१९९ चन्द्रबलग्रहणेविवक्ता	,,
२००कन्यावरयो पूर्वापरचन्द्रबलग्रहणेहेतु	,,
२०१,चन्द्रबलविलोकनीयस्थानम्	,,
२०२ चन्द्रबलस्यानवलोकनीयस्थानम्	७०
२०३ पुरुषाणांकालचन्द्र	,,
२०४ स्त्रीणांकालचन्द्र	,,
२०५ कालचन्द्रस्यहेयस्थानम्	७१
२०६ शेषषड्ग्रहाणांकालसंज्ञा	,,
२०७ ग्रहस्यागामिकराशिफलम्	,
२०८ युतिग्रहणाधिकारविवेक	,,
२०९ ग्रहणसमयेवर्तमानचन्द्रराशिशुभाशुभम्	७२
२१० एतादृग्राशीनांफलम्	,,
२११ ग्रहाणामनिष्टफलेशांतिस्नानम्	,,
२१२ अनिष्टसूर्येशान्तिस्नानम्	,,
२१३ अनिष्टचन्द्रेशान्तिस्नानम्	,,
२१४ अनिष्टभौमेशान्तिस्नानम्	७३
२१५ अनिष्टबुधेशान्तिस्नानम्	,
२१६ अनिष्टगुरौशान्तिस्नानम्	,,

विषयाङ्का विषयनामानि.	पृष्ठाङ्का
२१७ अनिष्टशुक्रेशान्तिस्नानम्	,,
२१८ अनिष्टशनौशान्तिस्नानम	७४
२१९ अनिष्टराहौशान्तिस्नानम्	,
२२० अनिष्टकेतौशान्तिस्नानम	,,
२२१ सूर्यग्रहणेशान्तिस्नानम्	,,
२२२ चन्द्रग्रहणेशान्तिस्नानम्	७५
२२३ अनिष्टदायांग्रहयुतौशान्तिस्नानम्	,
२२४ सामान्यतःशान्तिस्नानम्	,,
२२५ नवग्रहाणांहोमेन्धनानि	,,
२२६ ग्रहाणांपूजनदानाधिकारः	७६
२२७ सूर्यदानम्	,,
२२८ चन्द्रदानम्	,
२२९ भौमदानम्	,,
२३० बुधदानम्	७७
२३१ गुरुदानम्	,,
२३२ शुक्रदानम्	,,
२३३ शनिदानम्	,,
२३४ राहुदानम्	,,
२३५ केतुदानम्	७८
२३६ दुष्टेनवग्रहेधार्यम्	,,
२३७ उपसंहारः	,,
२३८ ग्रहाणांफलधारकपुरुषः	,
२३९ ग्रहाणामरिष्टनिवर्तकशान्तिप्रकारः	७९
उत्पातप्रकरणम् ६	
२४० भौमोत्पातेभ्योग्रहगतोत्पात	८०
२४१ प्रसूतिवैकृतम्	,,
२४२ वडवादीनांकालविशेषगतप्रसूतिस्वरूपम्	,,
२४३ भाद्रपदादौहस्तिनीप्रसूतिस्वरूपम्	८१
२४४ छत्रगृहप्रवेशकाद्युत्पात	,,
२४५ गेहेमधुपिंडादिजननफलम्	,,
२४६ दुर्गशीर्षादिपतनदोष	८२
२४७ निजासनोपविष्टकाकादिदोष	,,
२४८ आसनादिभङ्गदोष	८३
२४९ जलाशयादौसञ्जातज्वालापादपदुर्दोष	,
२५० जलकुम्भादिभङ्गदोष	,,
२५१ कपोतादिमैथुनदर्शनदोष	८४
२५२ मूर्ध्निस्थितकाकादिदोष	,,
२५३ कूपादिगर्जनेदोष	,,
२५४ भूकम्पनादिदोष	८५
२५५ दर्पणादिविनाशदोष	,,
२५६ अकालेनदीपूरादौदोष	,,
२५७ प्रतिमाभङ्गादौदोष	८६
२५८ रविचन्द्रयोरुदितबिंबद्वयदोष	,,
२५९ ग्रहयुद्धदोष	,,
२६० नक्षत्रमन्दद्युतिदोष	८७
२६१ रोहिणीशकटभेद	,,
२६२ केतुवैकृतम्	,,
२६३ चन्द्रसूर्यकनक्षत्रयोगदोष	८८
२६४ छायापुरुषादिवैकृतम्	,,
२६५ पश्चात्प्रागग्न्यादिवैकृतम	८९
२६६ प्रारब्धकार्येउत्पातसंभवहेयता	,
२६७ उत्पातानांशान्ति	
संस्कारप्रकरणम् ७	
२६८ गर्भाधानेसमयशुद्धि	९०
२६९ प्रथमाधानेवारा	९१
२७० आधानेवर्ज्यनक्षत्राणि	,,
२७१ आधानेराशिबलम्	,,
२७२ आधानेपर्वादिनिषेध	,
२७३ आधानेजन्मदिनादिनिषेध	९२
२७४ आधानेशुभलग्नम्	,,
२७५ गर्भस्थदशमासानांपतय	,,
२७६ आधानेमासेश्वरादिबलग्राह्यता	९३
२७७ पुंसवनसीमन्तयोःकर्म	,
२७८ एतयोर्वारशुद्धि	,
२७९ एतयोर्नक्षत्रशुद्धि	,
२८० सीमन्तेऽपिमतम्	९४
२८१ सीमन्तेलग्नशुद्धि	,
२८२ जातकृत्यम्	,
२८३ जातकर्मणिनक्षत्रादीनि	,
२८४ नामविधानेमतान्तरम्	९५
२८५ विपादीनांनामविवेचनता	
२८६ नामकथनेलग्नशुद्धि	
२८७ ज्येष्ठामूलजातापत्येदुष्टफलम्	,
२८८ मूलजातस्यकृत्यम्	
२८९ मूलजातस्यफलम्	९

विषयांकाः	विषयनामानि.	पृष्ठांकाः
२९०	ज्येष्ठाफलम्	,,
२९१	पालणकबंधनमुहूर्तं.	,,
२९२	आंदोलकबंधनेनक्षत्रशुद्धिः	,,
२९३	आंदोलकचक्रेनक्षत्रस्यापनम्	९७
२९४	पूर्वादिस्थनक्षत्रफलम्	,,
२९५	आंदोलकेनक्षत्रशुद्धि	,,
२९६	बालकस्यनिष्क्रमणम्	,,
२९७	निष्क्रमणेनक्षत्राणि	,,
२९८	बालस्यान्नप्राशनम्	९८
२९९	अन्नप्राशनेवारनक्षत्राणि	,,
३००	अन्नऋषिमतम्	,,
३०१	अन्नप्राशनेलग्नफलम्	,,
३०२	चौलकर्म	९९
३०३	गुरुशुक्रदोषेचौलनिषेधः	,,
३०४	मासादिदोष	,,
३०५	चौलेनक्षत्राणि	,,
३०६	चौलेपर्वादिप्रतिषेध	१००
३०७	अन्नगोचरशुद्धि	,,
३०८	लग्नशुद्धिः	,,
३०९	चौलेकंटकादिस्थितखग्यादिफलम्	,,
३१०	नृपाणांक्षौरकर्म	,,
३११	मुहूर्तविनापित्रतादौक्षौरकर्म	१०१
३१२	सन्यासिकादीनांक्षौरकर्म	,,
३१३	केशान्तकर्म	,,
३१४	कर्णवेध.	,,
३१५	कर्णवेधेनक्षत्रादि	१०२
३१६	तत्रमतान्तरम्	,,
३१७	कर्णवेधेलग्नादि	,,
३१८	कुमारीघ्राणवेधः	,,
	उपवीतप्रकरणम् ८	
३१९	उपवीतेवर्णाणि	१०३
३२०	तत्रमतान्तरम्	,,
३२१	क्षत्रियाणांव्रतबंधः	,,
३२२	वैश्यानांव्रतबंध	,,
३२३	व्रतबंधेऋषिमतम्	१०४
३२४	उत्तरायणादौव्रतबंध	,,
३२५		,,
३२७	मूकंपनादौमासत्रयंव्रतबंधनिषेध	,,
३२८	केतूदयेवर्षपर्यंतव्रतबंधनिषेध	,,
३२९	क्षयमासादौव्रतबंधनिषेध.	१०५
३३०	लुप्ताधिकवर्षलक्षणम्	,,
३३१	राशिगतगुरोः फलम्	,,
३३२	वयोतीतिगुरुपूजा	,,
३३३	दुष्टगुरुचन्द्रयोर्विप्रादीनांपूजाधिक्य	,,
३३४	दुष्टगुरौचंद्रादौव्रतबंध	,,
३३५	व्रतबंधेगोचरादिशुद्धिः	
३३६	तत्रऋषिमतम्	,,
३३७	पुनर्मतान्तरम्	,,
३३८	माघादौव्रतबंधफलम्	,,
३३९	तत्रमतान्तरम्	१४६
३४०	चर्मदंडमौंजीधारणेमतान्तरम्	,,
३४१	वसंतादौविप्रादीनांव्रतबंधः	१४७
३४२	शुक्लकृष्णपक्षयोर्व्रतबंध	,,
३४३	व्रतबंधेगलग्रहनिषेध	,,
३४४	व्रतबंधेतिथय	
३४५	व्रतबंधे विष्ट्यादिनिषेध	,,
३४६	वेदस्वामिन.	
३४७	गुर्वादीनांवर्णसज्ञा	१४८
३४८	ऋग्वेदव्रतनक्षत्राणि	,,
३४९	यजुर्वेदव्रतनक्षत्राणि	,,
३५०	सामवेदव्रतनक्षत्राणि	१४९
३५१	अथर्ववेदव्रतनक्षत्राणि	,,
३५२	तत्रमतान्तरम्	,,
३५३	पुनर्मतान्तरम्	,,
३५४	अस्तंगतेचेदविप्रोतदभावफलम्	१५०
३५५	तनुभावादिगतवेदपते	
३५६	व्रतेगुरुशुक्रयोर्वेदवर्ण	,,
३५७	व्रतेगुरुशुक्रचंद्राणांशु	,,
३५८	व्रतेसूर्यांशानांफल	१५१
३५९	व्रते	
३६०		
३६१		

रत्न- ...पनम् ... त्र- ... त्र ... ापनम् ... ग्रहणम् ... मयुद्धम् ... मगता ... प्रपद्ये सर्वः ... क्षयः ... माशुभग्र- ... हाणांफलम् ... मापुरस्सोधः ... फलम्

विषयांका	विषयनामानि	पृष्ठाङ्का
३६३	तत्रमतान्तरम्	,,
३६४	उक्तेपूर्वोक्तकालस्यदृढीकरणम्	११४
३६५	अतीतेकालेविवादीनांव्रतनिषेध	,,
३६६	उक्तकालशुद्धेर्ग्राह्यस्थानम्	,,
३६७	वटोर्वनगमनशुद्धि	,,
...	पुनर्गृहानयनेमातुलकृतगौरव	११५

...यारंभविवेकप्रकरणम् ९

विषयांका	विषयनामानि	पृष्ठाङ्का
२..	...धारणविद्यारंभशुद्धि	११७
२२.	...मतान्तरम्	,,
२२८	...धारणविद्यारम्भदिनानि	११८
२२९	...धारणविद्यारम्भनक्षत्राणि	,,
२३०	...ारणविद्यारंभवारा	,,
२३१	...ारमेऽयनादिसन्धिनिषेध	,,
२३२	...रंभेसमवर्पनिषेध	११९
२३३	...रंभेलग्नशुद्धि	,
२३४	रा...णविद्यारंभोपसंहार	,,
२३५	के...शास्त्रारंभ	,,
२३६	दुष्टे...ादिनिषेध	१२०
२३७	उप...णप्रारंभशुद्धि	,
२३८	ग्रहा...शास्त्रादिप्रारंभशुद्धि	,,
२३९	ग्रहा...विद्यामुहूर्त	,,
	...स्त्रमुहूर्त	१२१
	उ...तिशास्त्रमुहूर्तः	,,
२४०	मौमोत...पठणमुहूर्त	,,
२४१	प्रसूति...पठणमुहूर्त	,
२४२	वढवार्द...ान्तरम्	१२२
	मुहूर्त.	,
२४३	भाद्रपदाक्...	,,
२४४	छन्नगृहप्र...पनम्	१२३
२४५	गेहेमधुपिं...फलम्	,
२४६	दुर्गशीर्षादि...	,,
२४७	निजासनोपरि...	,,
२४८	आसनादिभं...शुद्धि	१२४
२४९	जलाशयादी...र्णनम्	,,
२५०	जलकुम्भादिभ...मुहूर्त	,,
...१	कपोतादिमैथुनदिनिषेध	,
...२	मूर्ध्निस्थितका...म-	

विषयांका	विषयनामानि	पृष्ठाङ्का
३९९	महादेवादीनांपूजादौविशिष्टग्रपुराणाम-नियता	,,
४००	शुभाशुभकालग्रहणेनिजमतस्य दृढीकरणम्	,,
४०१	मन्त्रदेवशरीरम्	,,
४०२	मंत्रशरीरावयवफलम्	१२६
४०३	मन्त्रोद्यापनकालशुद्धि	,,
४०४	अग्निचक्रम्	,,
४०५	अग्निचक्रेनक्षत्रस्थापनम्	,,
४०६	अत्रमतान्तरम्	१२७
४०७	जन्मादिविधानहोमेऽस्यचक्रस्य निर्दोषत्वम्	,,
४०८	उपसंहार	,,

राजसभाप्रकरणम् १०

विषयांका	विषयनामानि	पृष्ठाङ्का
४०९	राजाभिषेकमुहूर्त	,,
४१०	गुरुशुक्रशुद्धौचक्रवर्त्यभिषेचनम्	१२८.
४११	देशस्वामिनोभिषेकशुद्धि	,
४१२	दुर्गस्वामिनोभिषेकशुद्धि	,
४१३	भूपाभिषेकेपक्षशुद्धि	१२९
४१४	अभिषेकेदिनशुद्धि	,,
४१५	तत्रऋषिमतम्	,,
४१६	अभिषेकेनक्षत्राणि	,,
४१७	अभिषेकेगोचरशुद्धि.	,,
४१८	अभिषेकेलग्नशुद्धि	१३०
४१९	उचितभावगतग्रहैरभिषेकफलम्	,,
४२०	शीर्षोदयैरभिषेकफलम्	,,
४२१	राजमुद्राचक्रम्	,,
४२२	चक्रेनक्षत्रस्थापनम्	१३१
४२३	छत्रयोगप्रदनक्षत्रशुद्धि	१३२
४२४	अकस्माद्राज्यप्राप्तनरस्यतत्कालाभिषेक	,,
४२५	नीचकुलोत्पन्ननृपाभिषेकविधि	,,
४२६	छत्रासनध्वजचामरशुद्धौमतान्तरम्	१३३
४२७	राजमुद्रावलयस्योपसंहार	,,
४२८	सभारचना	,,
४२९	सभाप्रवेशविधि	,,

विषयांका	विषयनामानि	पृष्ठांका.
४३१	सिंहासनाधिरूढनृपस्य दान-कर्तव्यता	,,
४३२	गजादिराज्यांगानांसन्धानम्	,,
४३३	ग्रामादिपुदामबन्धनशुद्धि	,,
४३४	गुरुशुक्रास्तादिदोषेराज्यांगकर्मणा निषेध	१३५
४३५	गजकर्ममुहूर्त	,
४३६	गजचक्रम्	,,
४३७	गजचक्रगतनक्षत्रफलम्	१३६
४३८	गजबन्धमुहूर्त	,,
४३९	अश्वकर्मशुद्धि	,,
४४०	अश्वचक्रेनक्षत्रस्थापनम	,,
४४१	रथकम	१३७
४४२	रथचक्रनक्षत्रस्थापनम्	,,
४४३	चक्रगतनक्षत्रफलम्	,,
४४४	वृषभसमस्तकर्म	,,
४४५	शिविकासमस्तकर्म	१३८
४४६	शिबिकाचक्रेनक्षत्रस्थापनम्	,,
४४७	चक्रगतनक्षत्रफलम्	,,
४४८	राजसेवामुहूर्त	,,
४४९	सेवायांलग्नशुद्धि	१३९
४५०	महिषोष्ट्रादीनांकर्मारंभ	,,
४५१	सिंहादीनांपालनमुहूर्त	,,
४५२	वानरप्रमुखानांखेलनादिमुहूर्त	,
४५३	कुक्कटादीनांसेवनमुहूर्त	१४०
४५४	मत्स्यग्रहणमुहूर्त	,
४५५	पटमंडपादिसैन्यरचनामुहूर्त	,,
४५६	चंद्रोदयादीनांबन्धनमुहूर्त	,,
४५७	राजसेवामुहूर्त	१४१
४५८	छत्रसन्नाहखेटकधारणमुहूर्त	,
४५९	सन्नाहधारणेलग्नशुद्धि	,,
४६०	सछत्रचामरधारणमुहूर्त	,,
४६१	बाणधनुर्भिंदिपालादिधारणमुहूर्त	१४२
४६२	बाणादिधारणेतिथिवारशुद्धि	,
४६३	नलिकादिशस्त्रविधानेनक्षत्रवारशुद्धि	,
४६४	वन्हिमुक्तास्त्रतिथिलग्नशुद्धि	,,
४६५	नूतनभेरीवादने तिथिवारनक्षत्रशुद्धि	१४३
४६६	भेरीधारणेकालशुद्धि	
४६७	सर्ववाद्यानांकर्मशुद्धि	
४६८	पूर्वोक्तकालशुद्धेर्दृढीकरणम्	१४४
४६९	सैन्यरचनायांनक्षत्रवारशुद्धि	,
४७०	नृपप्रयाणेनक्षत्रवारशुद्धि	,,
४७१	दिग्विजयगमनेपर्वादिनिषेध	,,
४७२	निघ्नकालचक्रम्	१४५
४७३	सन्मुखेनिघ्नकालपरिहार	,,
४७४	निघ्नकालचक्रेज्वालादिनक्षत्र-स्थापनम्	,
४७५	ज्वालादियुक्तादिशाफलम्	,
४७६	मृतजीवितपक्षा	,,
४७७	जीवितपक्षेदक्षिणार्कफलम्	१४६
४७८	जीवितपक्षेनक्षत्रवारशुद्धोयुद्धारंभ	,
४७९	जीवितपक्षेकुलभादिमवारफलम्	१४७
४८०	कोटचक्रसन्धानम्	,,
४८१	कोटचक्रस्थापना	,,
४८२	कोटचक्रस्य उपरितनकोष्ठेनक्षत्र-स्थापनम्	,
४८३	चक्रस्यद्वितीयेन्तरालके नक्षत्र-स्थापनम्	१४८
४८४	चक्रस्यतृतीयकोष्टकनक्षत्रस्थापनम्	,
४८५	प्रवेशनिर्गमस्तमस्थानानि	
४८६	शालचक्रेग्रहस्थानफलम्	१४९
४८७	अंतर्गतग्रहचतुष्कणकोटग्रहणम्	,,
४८८	मध्यबाह्ययो पापसौम्ये समयुद्ध	,,
४८९	स्वमध्यगा पापसौम्ये पूरोभगता	,,
४९०	बाह्यमध्यपापसौम्यमिश्रफलम्	१५०
४९१	उक्तवैपरीत्येफलम्	,
४९२	मध्यवर्त्येयुगपत्च्छुभाशुभग्रहे सर्व क्षय	,,
४९३	स्वमध्येसमभागस्थितशुभाशुभग्र-हाणांफलम्	,
४९४	भौमबुधचन्द्रनक्षत्रसयोगेपुररोध	१५१
४९५	पूर्वादिदिक्षुस्थितगुरुभौमबुधशुक्राणा फलम्	
४९६	क्रूरग्रहावलोकितस्थानफलम्	,
४९७	वक्रिग्रहाश्रितस्थानफलम्	

LIBRARY

विषयांकाः　विषयनामानि.	पृष्ठांकाः
४९८ स्तंभनक्षत्राश्रितक्रूरग्रहफलम्	
४९९ कोटचक्रोपसंहार	१५२
५०० शुद्धेनगरपुरादिप्रवेशोतिथिवारशुद्धिः	,,
५०१ प्रवेशेशुभाशुभवारा	,,
५०२ प्रवेशेलग्नादिशुद्धिः	,,
५०३ चन्द्रस्यद्वादशावस्था	१५३
५०४ अवस्थाफलम्	,,
५०५ भांडारभरणशुद्धिः	,,
५०६ कलौराजाभिषेक	१५४
५०७ म्लिलादिजातिनृपाणामभिषेकादिनिषेधः	,,
५०८ शाककर्तृत्वम्	
५०९ शाककारकनामानि	,,
५१० युधिष्ठिरादीनामन्तरालवर्षाणि	१५५
५११ एषांजन्मभूमयः	
५१२ एषांसदाकालप्रयाणम्	
५१३ एषांबलवर्णनम्	

त्रिविधयात्राप्रकरणम्　११

विषयांकाः　विषयनामानि.	पृष्ठांकाः
५१४ वृहत्प्रयाणेव्यापदादिनिषेध	,,
५१५ प्रयाणेशुक्रादिशुद्धि	१५७
५१६ अनिष्टगुरौतीर्थप्रयाणनिषेध	,,
५१७ अनिष्टगुरौतीर्थप्रयाणनिष्फलता	,,
५१८ गमनेऋतुशुद्धिः	१५८
५१९ वर्षासुप्रयाणनिषेधः	,,
५२० प्रयाणेशरदृतोरौचित्यम्	१५९
५२१ प्रयाणेहेमततोरनिष्टता	,
५२२ शिशिरर्तौ प्रयाणेश्रेष्ठता	१६०
५२३ वसन्तेसर्वदिक्षुप्रयाणरम्यता	,,
५२४ उष्णकालेप्रयाणनिषेध	१६१
५२५ अयनदिक्शूलचक्रम्	,,
५२६ चातुर्मासकालेप्रयाणनिषेध.	,,
५२७ विषमग्रहे प्रयाणनिषेध	,,
५२८ दिक्स्थमायादिरूर्ध्वादृदप्रयाणादिनिषेधः	१६२
५२९ मदृष्टयादौर्दृष्टप्रयाणादिनिषेधः	,,
५३० प्रयाणेकुयोगनिषेध	,,
५३१ प्रयाणेस्त्वद्दिरानिमानविचारत्याग	,,
५३२ गुर्वादिषुशुभादिप्रयाणम	१६३
५३३ प्रयाणेसिद्धियोगादिश्रेष्ठता	,,
५३४ प्रयाणेशुभादिमानि	,,
५३५ प्रथमातारादियुक्तप्रयाणनक्षत्रस्य नेष्टता	१६४
५३६ प्रयाणेदिगादिशुद्धि	,,
५३७ योगिनीचक्रम्	,,
५३८ वारदिक्शूलः	१६५
५३९ योगिनीशूलयोःसम्मुखेत्याग	,,
५४० शनिबुधयो कालपाशवत्त्वम्	,,
५४१ पूर्वादिषुमेषादिस्थचंद्रगृहकल्पना	,,
५४२ सम्मुखदक्षिणगतचन्द्रगृहस्थलाभदत्वम्	१६६
५४३ सम्मुखानांतिथिपाशादीनांत्यागः	,,
५४४ कृत्तिकादिदिक्स्थितग्रहाणांसम्मुखत्वम्	,,
५४५ संग्रामादौशुक्रबुधसम्मुखत्वानवलोकनम्	१६७
५४६ भृग्वादिगोत्राणांशुक्रादिसम्मुखत्वनिषेध	,,
५४७ देशविशेषेणशुक्रादिसम्मुखत्वावगणना	,,
५४८ सम्मुखनक्षत्रकीलात्याग	१६८
५४९ प्रयाणेललाटयोगनिषेध	,,
५५० परिघचक्रम्	,,
५५१ आवश्यकेपरिघोल्लंघनम्	,,
५५२ प्रयाणशुद्धि	,,
५५३ त्रिविधप्रयाणेऽपवहादित्रिविधफलशुद्धि	१६९
५५४ विप्रादीनांमुख्यप्रयाणशुद्धि	,,
५५५ प्रयाणेजन्मादिस्वामिवर्णनम्	,,
५५६ प्रयाणेलग्नशुद्धिः	१७०
५५७ निषिद्धलग्नम्	,,
५५८ जन्मराजयोगवर्णनम्	,,
५५९ प्रयाणलग्नग्रहभावशुद्धि	१७१
५६० राजयोगप्रशंसा	१७२
५६१ राजयोगा	१७४
५६२ राजयोगोपसंहार	,,
५६३ द्वादशभावनामानि	,,
५६४ प्रयाणप्रथमभावफल	

विषयांकाः	विषयनामानि.	पृष्ठांकाः
५६५	द्वितीयतृतीयभावफलम्	१७७
५६६	चतुर्थपंचमषष्ठभावफलम्	,,
५६७	सप्तमाष्टमभावफलम्	,,
५६८	नवमदशमभावफलम्	१७८
५६९	एकादशद्वादशभावफलम्	,,
५७०	न्यूनाधिकयोगेन्यूनाधिकफलम्	,,
५७१	शकुसन्धानम्	,,
५७२	सप्तवाराणांयामाधीनि	१७९
५७३	दिनेपंचदशमुहूर्ताधिपा	,,
५७४	रात्रौपंचदशमुहूर्ताधिपा	१८०
५७५	रव्यादिषुत्याज्यमुहूर्त	,,
५७६	पर्यांव्यवहार	,,
५७७	प्रयाणेक्षणनक्षत्रैःकालनिर्णयः	,,
५७८	मतान्तरम्	१८१
५७९	दक्षिणगतानिशुभसूचकशकुनानि	,,
५८०	घात्रशकुनानि	१८२
५८१	वामभागगतशकुनानि	,,
५८२	दक्षिणगतशुभशकुनानि	,,
५८३	निर्गमेप्रवेशेचशकुनविवेक	,,
५८४	विषमसंख्याशकुनानि	१८३
५८५	अशुभशकुनानि	,,
५८६	विरुद्धस्वप्नादीनि	१८४
५८७	अंगारादिदिगाश्रितशकुननिष्फलता,	
५८८	शुभस्थानेषुप्राप्तशकुनानि	१८६
५८९	अशुभस्थानप्राप्तशकुननिष्फलता	,,
५९०	पोतकीशकुनम्	,,
५९१	श्यामाद्वचेष्टितम्	१८७
५९२	दुष्टेशकुनेकर्तव्यता	,,
५९३	उत्पातादौप्रयाणविलंब·	१८८
५९४	इष्टवस्तुसमागमेप्रयाणविलंब	,,
५९५	उदितकेतुदिशिप्रयाणविलंब	,,
५९६	प्रस्थानमोचनम्	,,
५९७	प्रस्थानमोचनमर्यादा	,,
५९८	नृपादीनांभिन्नप्रस्थानविधि	१८९
५९९	नृपादीनांप्रयाणविधि	,,
६००	उत्तरादिषुप्रयाणवेला	,,
६०१	प्रयाणेनक्षत्रप्राशयस्यदूषणंवारदिक्प्राशयस्यदृढीकरणम्	
६०२	अर्कादिषुप्राशयम्	१९०
६०३	दिक्प्राशयम्	,,
६०४	दिग्योग्यवाहनानि	,,
६०५	जलपात्रशुद्धि	
६०६	प्रयाणेसुक्येनसफलता	१९१
६०७	गमनसमयव्यवहारः	,,
६०८	प्रथमप्रयाणवासस्थानम्	,,
६०९	अन्यप्रयाणशुद्धिः	,,
६१०	निजपुरप्रवेश·	१९२
६११	पुरप्रवेशेदुष्टतिथ्यादिनिषेधः	,,
६१२	सूर्यवंशयनृपस्यप्रवेशविधिः	,,
६१३	चद्रवंशयनृपस्यप्रवेशविधिः	,,
६१४	सामान्यविशेषपुरुषयो सामान्यविशेषविधि,	१९३
६१५	त्रिविधप्रयाणप्रमाणम्	,,
६१६	प्रयाणाध्यायोपसंहारः	,,

विवाहप्रकरणम् १२

विषयांकाः	विषयनामानि.	पृष्ठांकाः
६१७	विवाहवर्णनम्	१९४
६१८	कृतादिषुविवाहयोग्यवरः	,,
६१९	विवाहेषष्ठाष्टमपुरपोषत्रवधूवरयोर्योग्यता	
६२०	वयसात्रिविधवर·	१९५
६२१	विवाहेत्याज्यकन्या	,,
६२२	शुभवधूवरसंयोग·	,,
६२३	विवाहेगर्भाधानकालग्रहणाय कन्यायाः समविषमवर्षदूषणम्	१९६
६२४	मतान्तरदर्शनतन्निषेधश्च	,,
६२५	विवाहेकन्यायाः सप्तमाष्टमवर्षनिषेध	,,
६२६	चंद्रादिमुक्तकन्याकाल	,,
६२७	कृतादिषुविवाहयोग्यकन्यावय	१९७
६२८	अष्टमवर्षकन्याविवाहेऋषिमतम्	,,
६२९	विवाहेहीनवलग्रहैःकन्यायाः पंचमादिवर्षनिषेध	,,
६३०	उद्वाहेग्राह्यवर्षविवेकता	,,
६३१	चांद्रमानात्वर्षग्रहणविवेकता	१९८
६३२	गलितदानफलकन्यापरिहार·	,,
६३३	विषादिपृक्तकालस्यदृढीकरणम्	,,

विषयांकाः	विषयनामानि.	पृष्ठांकाः
७०७	सूर्यादीनांजन्मदेशा	,,
७०८	देशांतरसाधनम्	२२२
७०९	वारप्रवृत्तिः	,,
७१०	कालहोराः	,,
७११	होराफलम्	,,
७१२	तिथ्यादीनामाद्यन्तयोस्त्यागः	२२३
७१३	आद्यन्तयो फलम्	,,
७१४	अशनियोगः	,,
७१५	उपसंहार.	,,

विवाहप्रकरणोत्तरार्धम् १२

विषयांकाः	विषयनामानि.	पृष्ठांकाः
७१६	विवाहेवर्ज्यावर्ज्यदिनानि	२२४
७१७	गोधूलिकादिलग्नशुद्धिः	,,
७१८	कार्तिकीमाश्रयनक्रपिमतदूषणम्	२२५
७१९	शन्यादिवारत्यागपूर्वकंकस्यचिन्मतेदूषणम्	२२६
७२०	उद्वाहनक्षत्राणि	,,
७२१	उद्वाहेकलियुगेउत्तराश्रयाश्रयणनश्रुतिदोषः	,,
७२२	उद्वाहेपुष्यनिषेधः	,,
७२३	उद्वाहेशाधिननक्षत्रद्वयनिषेध'	,,
७२४	अश्विन्यादित्याग	,,
७२५	विवाहेमूलनक्षत्रौचित्यम्	२२७
७२६	मघाफलम्	,,
७२७	उद्वाहेसोत्पातनक्षत्रत्याग	,,
७२८	ज्योतिषशास्त्रस्यश्रेष्ठत्ववर्णनम्	,,
७२९	चौलादिकार्येशुभाशुभयोगा	२२८
७३०	विष्कमादीनांदुष्टविभागत्याग	२२९
७३१	निरुद्धयोग'	,,
७३२	उद्वाहेचबादिदोष	,,
७३३	उद्वाहेलग्नशुद्धि.	,,
७३४	दिवारात्रिलग्नानि	२३०
७३५	देशविशेषेणकिंचिद्दोष	,,
७३६	चंद्रणशुभाशुभग्रहयोग	,,
७३७	निजस्वामिदृष्टिहीनाहीनलग्नादिफलम्	,,
७३८	तन्वादिभावेशन्यादियोगत्यागः	२३१
७३९	भावगतग्रहफलानि	२३४
७४०	कर्तरीयोगः	,,
७४१	खलांतरगतचंद्रादिफलम्	,,
७४२	ग्रहाणांदृष्टयः	२३५
७४३	दृष्टिजातकताजकयोर्विशेषः	२३६
७४४	मावेग्रहविलोकनफलम्	,,
७४५	केंद्रयोगः	२३७
७४६	गोधूलिकलग्नम्	,,
७४७	गोधूलिकलग्नप्रामाण्यम्	,,
७४८	गोधूलिकलग्नसमयस्वरूपवर्णनम्	,,
७४९	गोधूलिकग्रहणेविशेषः	२३८
७५०	घटिकागोधूलिकयोर्विवेक	,,
७५१	कार्तिकादौघटिकालग्नत्याग.	,,
७५२	वारविशेषेगोधूलिकलग्नशुद्धिविवेक.	२३९
७५३	दोषयुक्तगोधूलिकम्	,,
७५४	गोधूलिकेग्रहगतदोषाः	,,
७५५	गोधूलिकेक्रूरग्रहलग्नादिनिषेधः	
७५६	गोधूलिकेउत्तरायणादिकाल.	२४०
७५७	सिंहराशिगततन्वादिषुविवाहनिषेध.	,,
७५८	एतन्मतदूषणम्	,,
७५९	अष्टध.विवाहा	,,
७६०	उत्तममध्यमाधमपाणिग्रहशुद्धि.	२४१
७६१	शास्त्रनीतितोलौकिकधर्मस्यवलवत्त्वम्	,,
७६२	देशधर्मा	,,
७६३	वेदादिधर्मतोबाहिर्लोकधर्मदर्शनम्	२४२
७६४	ज्येष्ठाद्वाहेकानिष्ठोद्वाहनिषेध.	,,
७६५	यमलादिप्रसवेउद्वाहविवेक	२४३
७६६	अदत्तकुमारयुद्वाहदोष	,,
७६७	कालधर्म.	,,
७६८	कृतादिषुविवादीनाविधय	,,
७६९	उचितकालेउचितविवाह.	२४४
७७०	नीतिदर्शनम्	,,
७७१	खड्गमगलम्	,,
७७२	खड्गमंगलकालशुद्धि	,,
७७३	पुनर्विवाहादिशुद्धिः	,,
७७४	पुनर्विवाहपट्टकचक्रम्	२४५
७७५	पुनर्विवाहेत्याज्यादिनादि	,,
७७६	कन्यादानयोग्यस्थानम्	,,
७७७	वधूप्रवेशेवारशुद्धिः	,,

विषयांकाः	विषयनामानि.	पृष्ठांकाः
७७८	वधूप्रवेशनक्षत्राणि	२४६
७७९	वधूप्रवेशेधनुरर्कादिनिषेध.	,,
७८०	विवाहमंडपोत्थानशुद्धिः	,,
७८१	भर्तृगृहान्नवोढायाःपितृगृहागमनशुद्धिः	,,
७८२	दीपवृद्धापनम्	२४७
७८३	दीपोत्सवस्त्रीगृहप्रवेशेगुरुपस्तादिकनिर्दोषता	,,
७८४	दैवाद्दीपवृद्धापनाभावेवधूप्रवेशविवेकः	,,

वस्त्रालंकारपरिधानप्रकरणम् १४

विषयांकाः	विषयनामानि.	पृष्ठांकाः
७८५	वस्त्रादिधारणेचंद्रबलम्	२४८
७८६	वस्त्रधृतौभद्रादियोगत्यागः	,,
७८७	वस्त्रोत्पादनशुद्धिः	,,
७८८	उद्वाहादौसकृद्धौतवस्त्रस्यपरिधानयोग्यता	,,
७८९	श्वेतवस्त्रधारणशुद्धिः	२४९
७९०	रक्तवस्त्रधारणशुद्धिः	,,
७९१	पीतरक्तपीतवस्त्रधारणशुद्धिः	,
७९२	नीलश्यामवस्त्रधारणशुद्धिः	,,
७९३	पट्टकूलधारणशुद्धि.	,,
७९४	कौशेयधारणशुद्धि	२५०
७९५	लोमपट्टधारणशुद्धिः	,,
७९६	क्षयमासादिषुस्त्रीणांचूडादिधारणनिषेधः	
७९७	स्वर्णादिभूषणधारणशुद्धिः	,,
७९८	कौसुंभकधारणशुद्धिः	२५१
७९९	सन्नूपात्रादिकार्येशुद्धि.	,,
८००	ताम्रादिकर्म	,,
८०१	वस्त्रनूपुरधारणेलग्नशुद्धि	,,
८०२	कटकाद्यलंकृतिधारणशुद्धिः	,,
८०३	मुकुटधारणमुहूर्तः	२५२
८०४	घनसारादिकृत्यशुद्धि	,,
८०५	कुसुमकार्यशुद्धिः	,,
८०६	कवचादिधारणशुद्धि	,,
८०७	कवचादिकार्यशुद्धिः	२५३
८०८	पर्यंकर्मशुद्धि	,,
८०९	भूपादिभ्योलब्धवस्त्रादीनांतत्कालधारणम्	,,

प्राकारप्रकरणम् १५

विषयांकाः	विषयनामानि	पृष्ठांकाः
८१०	पर्वतादिस्थानगतशालभेदाः	२५४
८११	पाषाणादिनिर्मिताउत्तममध्यमाधमशालाः	,,
८१२	कोटकरणकालः	२५५
८१३	द्विस्वभावराश्यादौशालप्रारंभनिषेधः	,,
८१४	मार्गादिष्वयेराहुनिवासस्थानंतत्साम्मुख्यनिषेधश्च	,,
८१५	शालारंभेकुतिथिवारनिषेध.	,,
८१६	प्राकारारंभेनक्षत्रादिशुद्धिः	२५६
८१७	दुर्गचक्रम्	,,
८१८	शालचक्रगतनक्षत्रादिफलम्	,,
८१९	खातगतभौमादिफलम्	,,
८२०	प्रवेशादिगतमेषशालफलम्	२५७
८२१	सर्पपरिभ्रम.	,,
८२२	अहिचक्रेखात.	,,
८२३	अहिभ्रमेजैनमतम्	,,
८२४	अहिभ्रमेजैनमतविवेक.	,,
८२५	जैनमतस्याप्रामाण्यम्	२५८
८२६	पुनःकस्यचिन्मतेदोषोद्घाटनम्	,,
८२७	वास्तुशास्त्रोदिताष्टपदचक्रदोषोद्घाटनम्	,,
८२८	ऋषिमतपूर्वकंस्वमतदृढीकरणम्	,,
८२९	खातकरणशुद्धिः	२५९
८३०	आयव्ययांशादिबलवर्णनम्	,,
८३१	क्षेत्रफलसाधनम्	,,
८३२	ग्रहादीनामंगुलादिज्ञानम्	,,
८३३	भजांगुलादीनांग्राह्यस्थानानि	२६०
८३४	भट्टावापरा	,,
८३५	भाषानांग्राह्यस्थानानि	,,
८३६	वास्तुनक्षत्रादिज्ञानम्	२६१
८३७	क्षेत्रफलादिभिरंशकसाधनम्	,,
८३८	पर्वतप्राकारादिष्वायपयोग्यता	,,
८३९	धमादिनक्षत्रकर्तृनक्षत्रमेलापकेनशालपूरणम्	

LIBRARY

विषयांकाः	विषयनामानि	पृष्ठांकाः
८४०	प्रतोलिकाकरणशुद्धिः	,,
८४१	प्रतोलिकाचक्रेनक्षत्रस्थापनतत्फलंच	२६२
८४२	नक्षत्रचक्रस्यभेदाः	,,
८४३	दिग्वत्सचक्रम्	,,
८४४	प्रतोलीकरणेसन्मुखराहुचद्रयोस्त्यागः	,,
८४५	निर्दोषशालवर्णनम्	२६३
८४६	शैलस्थशालवर्णनम्	,,
८४७	जलस्थशालवर्णनम्	,,
८४८	भूमिस्थशालवर्णनम्	,,
८४९	गह्वरशालवर्णनम्	२६४
८५०	श्रीविक्रमार्कबलवर्णनम्	,,
८५१	शालशुद्ध्युपसंहारः	,,
८५२	पुरेऽनुक्तशुद्धिदर्शनम्	,,
८५३	पुरवासेसंक्रांत्यादिशुद्धिः	,,
८५४	गुर्वादिदोषेपुरारम्भनिषेधः	२६५
८५५	ग्रामकरणशुद्धिः	,,
८५६	ग्रामवत्सचक्रम्	,,
८५७	पुररचनेवत्सादिनक्षत्रशुद्धिः	,,
८५८	पुरप्रतोलीकरणशुद्धिः	२६६
८५९	पुरकरणेलग्नशुद्धिः	,,
८६०	पुरप्रवेशशुद्धिः	,,
८६१	पुरादिप्रवेशेनक्षत्रवारशुद्धिः	,,
८६२	पुरप्रवेशेलग्नशुद्धिः	२६७
८६३	पुरप्रवेशेऽशेषशुद्धिः	,,
८६४	प्रवेशेभूपस्यवदान्यता	,,

गृहारंभप्रकरणम् १६

विषयांकाः	विषयनामानि	पृष्ठांकाः
८६५	गृहकरणेदिग्योग्यता	२६८
८६६	दिग्राश्योरमेलनेदूषणम्	,,
८६७	दिङ्नरराश्योर्मेलनेगृहसम्मुखस्यशुभत्वम्	,,
८६८	गृहारम्भेमासादिशुद्धिः	२६९
८६९	गृहारम्भेऽयनादिशुद्धिः	,,
८७०	उचितदिशिगृहसम्मुखत्वम्	,,
८७१	गृहकरणेमासप्रमाणता	२७०
८७२	गृहकरणेवारनक्षत्रशुद्धिः	,,
८७३	मतभेदनवत्सचक्रम्	,,
८७४	वत्सचक्रेशालादिविभागभेदाः	२७१
८७५	गृहेदिग्द्वारचक्रम्	
८७६	गृहस्यत्रिविधत्वम्	,,
८७७	हर्म्यादीनांदर्शनीयदोषः	,,
८७८	गृहेइष्टिकादिचयनसुधालेपशुद्धिः	,,
८७९	पर्णकुटकार्यशुद्धिः	२७२
८८०	ऊर्ध्वसूत्रारम्भः	२७४
८८१	गृहकरणेलग्नशुद्धिः	,,
८८२	गृहारम्भेगणकादेशः	२७५
८८३	सूत्रधारैर्गृहकरणम्	,,
८८४	दुष्टवृक्षसामीप्यदोषः	,,
८८५	गृहसमीपस्थबोधिवृक्षादिफलम्	२७६
८८६	गृहाश्रितशुष्कवृक्षादिदोषः	,,
८८७	गृहारम्भेऽग्निज्वालादिदोषः	,,
८८८	गृहारम्भेसूत्रकीलच्छेददोषः	,,
८८९	खातिदृष्टवस्तुफलम्	२७७
८९०	गृहारम्भेउत्तरायणादिशुद्धिः	,,
८९१	शुभायस्यग्राह्यस्थानम्	,,
८९२	क्रूरायस्यग्राह्यस्थानम्	,,
८९३	आयव्ययोर्न्यूनाधिक्येफलम्	२७८
८९४	गृहाणांषोडशभेदाः	,
८९५	प्रस्तारः	,,
८९६	लघुप्रधानस्थानम्	,
८९७	षोडशगेहनामानि	२७९
८९८	वर्णभेदेमतान्तरम्	,,
८९९	गृहभेददर्शनम्	,,
९००	दिगाश्रितभित्तिमूलफलम्	,,
९०१	द्वारेनवांशादिशुद्धिद्वारम्	,,
९०२	द्वारद्वारिकामोचनविवेकः	,,
९०३	दुर्गादिद्वारेवेधत्यागः	२८०
९०४	द्वारवेधस्यनिर्दोषता	,,
९०५	द्वारकरणेनक्षत्रशुद्धिः	,,
९०६	द्वारचक्रम्	,,
९०७	गोमेनक्षत्रादिशुद्धिः	२८१
९०८	गृहेदुष्टलेख्यादिनिषेधः	,,
९०९	गृहदुष्टपशुपक्षिचिह्ननिषेधः	,,
९१०	मत्स्यप्रासादिप्वनिषेधः	२८२

विषयांकाः विषयनामानि. पृष्ठांकाः

९११ इष्टकाचयनादिकृत्यम् ,,
९१२ सौधादौचित्रकर्मशुद्धिः ,,
९१३ धनन्यासादिगृहाणि ,,

गृहप्रवेशदेवताप्रतिष्ठाप्रकरणम् १७

९१४ गृहप्रवेशेऽयनादिशुद्धिः २८३
९१५ बलहीनचन्द्रादिदोषेप्रवेशनिषेधः ,,
९१६ गृहप्रवेशेवारशुद्धिः २८४
९१७ गृहप्रवेशेनक्षत्रशुद्धिः ,,
९१८ जैनमतेनस्वमतदृढीकरणम् ,,
९१९ कलशचक्रम् ,,
९२० तत्रकिंचित्विशेषः ,,
९२१ गृहप्रवेशेलग्नशुद्धि २८५
९२२ अन्यमतेनस्वमतदृढीकरणम् ,,
९२३ गृहप्रवेशेभावगतग्रहफलानि ,,
९२४ सूतिकागृहकर्मशुद्धिः २८६
९२५ नृपमतुरगादीनांशालाकर्म ,,
९२६ देवगृहादिकर्मशुद्धिः ,,
९२७ जलगृहादिकर्मशुद्धिः २८७
९२८ उपसंहारः ,,
९२९ गृहप्रवेशेसापवादान्युग्रादिभानि ,,
९३० प्रवेशेउल्कादिदोषः ,,
९३१ प्रवेशेयोगिन्यादिदोषत्यागः ,,
९३२ गृहप्रवेशविधिः २८८
९३३ प्रवेशानन्तरकृत्यम् ,,
९३४ गृहेभांडादिनिवेशशुद्धिः ,,
९३५ गृहोपस्करस्थापनशुद्धिः ,,
९३६ गृहेजलस्थानस्थापनम् २८९
९३७ गृहेदेवमूर्तिस्थापनशुद्धिः ,,
९३८ कृष्णमूर्तिस्थापनशुद्धिः ,,
९३९ शिवलिंगस्थापनम् ,,
९४० ब्रह्मस्थापनशुद्धिः २२०
९४१ भवान्यादिदेवगणस्थापनशुद्धि ,,
९४२ रामकृष्णादिगणस्थापनशुद्धिः ,,
९४३ स्कंदगणेशादिशिवगणस्थापनशुद्धिः ,,
९४४ हनूमत्स्थापनशुद्धिः ,,
९४५ कपिलगमप्रतिष्ठा २९१
९४६ लोकपालस्थापनशुद्धिः ,,
९४७ समुच्चयदेवप्रतिष्ठा ,,
९४८ पूर्वजगणस्थापनशुद्धिः ,,
९४९ जैनादिबिंबप्रतिष्ठा २९२
९५० वारादिग्राह्यता ,,
९५१ देवगृहेदेवस्थापनम् ,,
९५२ विक्रमनृपवर्णनम् ,,

अग्न्याधानादिविशेषसंस्कारप्रकरणम् १८

९५३ अग्न्याधानसमयः २९३
९५४ अग्निपरिग्रहेकुयोगादिनिषेधः २९४
९५५ अग्निपरिग्रहेनक्षत्रशुद्धिः ,,
९५६ नूतनाग्निपरिग्रहेकुंभादिलग्ननिषेधः ,,
९५७ अग्निपरिग्रहेलग्नादिशुद्धि ,,
९५८ अग्निपरिग्रहेकालशुद्धिः २९५
९५९ कस्यचिन्मतेदोषः २९६
९६० संस्थाविकरस्यसेव्यता ,,
९६१ पाकयज्ञेशुक्रास्तादिदोषः २९७
९६२ होमविधानशुद्धि ,,
९६३ होमेनक्षत्रशुद्धिः ,,
९६४ यज्ञांतस्नानशुद्धि ,,
९६५ यज्ञान्तस्नानराजमुद्राचक्रम् ,,
९६६ सचक्रप्रयेनशत्रस्थापनम् ,,
९६७ विशेषतःपंचभेदंसिंहासनत्रयचक्रम् ,,
९६८ चक्रस्थितनक्षत्रफलम् २९९
९६९ पापग्रहविद्धनक्षत्रफलम् ,,
९७० अश्वाधिपादीनांमुख्यशुद्धिः ३००
९७१ तुरगचक्रम् ,,
९७२ चक्रगतनक्षत्रफलम् ,,
९७३ अश्वावयवशनिफलम् ,,
९७४ गजचक्रम् ,,
९७५ चक्रगतनक्षत्रफलम् ,,
९७६ गजचक्रशनिफलम् ,,
९७७ रथचक्रम् ३०२
९७८ रथचक्रशनिफलम् ,,
९७९ चक्रोपसंहारः ,,
९८० यानप्रशस्यता ,,
९८१ तत्रलग्नशुद्धिः ३०३
९८२ सन्यासेनक्षत्रादिशुद्धिः ,,

ATIYA VIDYA S. LIBRARY

विषयांकाः	विषयनामानि.	पृष्ठांकाः
९८३	दीक्षाग्रहणशुद्धिः	,,
९८४	धर्मकर्मारंभः	३०४
९८५	समग्राध्ययनेवारादिशुद्धिः	,,
९८६	पुराणकथाश्रवणशुद्धिः	,,
९८७	ऋत्वादिस्नानशुद्धिः	,,
९८८	उपसंहारः	३०५
	मिश्रप्रकरणम् १९	
९८९	क्रियाविधानशुद्धिः	,,
९९०	गोकर्मशुद्धिः	,,
९९१	चतुष्पदानांप्रवेशादिकर्म	३०६
९९२	अजादीनांकृत्यशुद्धिः	,,
९९३	वडवादीनांकर्मशुद्धिः	,,
९९४	क्रयविक्रयकरणशुद्धिः	,,
९९५	जलाशयकरणशुद्धिः	३०७
९९६	कूपकरणेदिक्शुद्धिः	,,
९९७	शीघ्रजलव्यंजकदेशः	,,
९९८	नीचगतजलदेशः	३०८
९९९	शुभजलज्ञानम्	,,
१०००	कूपादिकरणेकालशुद्धिः	,,
१००१	कूपचक्रम्	,,
१००२	वापीचक्रगतनक्षत्रफलम्	३०९
१००३	तडागचक्रम्	,,
१००४	परिखादिखननेनक्षत्रशुद्धिः	३१०
१००५	परिखाचक्रम्	,,
१००६	खारिकाचक्रम्	,,
१००७	मीनार्कादौखारिकाकर्मनिषेधः	,,
१००८	तरीघटनकर्मशुद्धिः	,,
१००९	जलेतरीमोचनशुद्धिः	३११
१०१०	नौकायंत्रणेलग्नादिशुद्धिः	,,
१०११	नौकाचक्रम्	,,
१०१२	नौकायांवस्तुपपूरणशुद्धिः	,,
१०१३	जलेसेतुबंधनशुद्धिः	३१२
१०१४	सेतुबंधचक्रम्	,,
१०१५	सेतुबंधनेलग्नशुद्धिः	,,
१०१६	अरघट्टकयंत्रणकर्म	,,
१०१७	तन्मतान्तम्	३१३
१०१८	अरघट्टकचक्रम्	,,
१०१९	कूपचक्रेदृष्टांशकदर्शनम्	,,
१०२०	तैलिकयंत्रकर्मशुद्धिः	,,
१०२१	तैलिकयंत्रचक्रम्	३१४
१०२२	चऊरोचक्रम्	,,
१०२३	अलिंदकृत्यशुद्धिः	,,
१०२४	पाषाणकाष्ठविदारणशुद्धिः	,,
१०२५	पाषाणादिविदारणेनक्षत्राणि	३१५
१०२६	वस्त्रक्रियायंत्रविधौनक्षत्रादिशुद्धिः	,,
१०२७	कुंभकारकर्मणिमादिशुद्धिः	,,
१०२८	कुलालचक्रम्	३१६
१०२९	वंशारोहणयंत्रचक्रम्	,,
१०३०	उपलदारुविदारणेवारादिशुद्धिः	,,
१०३१	चर्मकार्येमादिशुद्धिः	,,
१०३२	नवीनकर्महलौजलभरणशुद्धिः	३१७
१०३३	जलकार्यशुद्धिः	,,
१०३४	वल्ल्यादिरोपणेवारादिशुद्धिः	,,
१०३५	हलप्रवाहेवारादिशुद्धिः	,,
१०३६	अडलादौहलकर्षणनिषेधः	,,
१०३७	हलचक्रम्	३१८
१०३८	कस्यचिन्मतेदोषः	,,
१०३९	क्षेत्रकर्षणशुद्धिः	,,
१०४०	योक्त्रादिसाधनशुद्धिः	३१९
१०४१	बीजवापनेमादिशुद्धिः	,,
१०४२	कूपजलवापकार्येमतान्तरम्	३२०
१०४३	बीजवापविषयेफणिचक्रम्	,,
१०४४	धान्यच्छेदनशुद्धिः	,,
१०४५	क्षेत्रकरोपादिक्षेपणम्	,,
१०४६	गवादीनांव्यवहारशुद्धिः	,,
१०४७	नूतनधूपस्यपक्वत्यम्	३२१
१०४८	मेषादीनांकृत्यशुद्धिः	,,
१०४९	पशूनांनिर्गमप्रवेशशुद्धिः	,,
१०५०	क्रयविक्रयशुद्धिः	३२२
१०५१	वस्तूनांविनिमयशुद्धिः	,,
१०५२	कालान्तरधनार्पणशुद्धिः	,,
१०५३	त्रिपुष्करयोगः	,,
१०५४	नवीनपुष्पादीनांसंग्रहः	३२३
१०५५	नवीनजलादीनांप्राशनम्	,,
१०५६	हरीतक्यादिसेवनशुद्धिः	,,

विषयांका	विषयनामानि	पृष्ठांका
१०५७	रसांगसाधनशुद्धि	,,
१०५८	रसांगसेवनम्	३२४
१०५९	रोगोत्पत्तितद्गतनक्षत्रफलम्	,,
१०६०	रोगोत्पन्नेषुरोगावधि	,,
१०६१	सर्पदष्टतद्गतनक्षत्रफलम्	३२५
१०६२	रोगिभ्यऔषधदानमुहूर्त	,
१०६३	हिमप्रतिक्रिया	,,
१०६४	रोगमुक्तस्नानम्	,,
१०६५	रोगमुक्तस्यबाह्यगमनशुद्धि	३२६
१०६६	मांससेवनशुद्धि	,
१०६७	विपाशनेमादिशुद्धि	,,
१०६८	निषद्धादिप्रोक्तव्यतिरिक्तानांद्रव्याणामक्षणनिषेध	,,
१०६९	तैलस्नानेतिथ्यादिनिषेध	३२७
१०७०	जन्मादिदिनेस्नानस्यनिर्दोषत्वकथनम्	,,
१०७१	क्रूरवारेनित्यस्नाननिर्दोषता	,,
१०७२	अष्टम्यादिषुनालीकेरादिभक्षणशुद्धि	३२८
१०७३	तिथीशा	,,
१०७४	वारस्वामिन	,,

वर्णाश्रमकर्मसाधनप्रकरणम् २०

विषयांका	विषयनामानि	पृष्ठांका
१०७५	जलाशयप्रतिष्ठा	३२९
१०७६	प्रतिष्ठायामासशुद्धि	
१०७७	तन्त्रमतान्तरम्	,,
१०७८	सिंहगुर्वादौप्रतिष्ठानिषेध	३३०
१०७९	प्रतिष्ठायांतिथ्यादिशुद्धि	,,
१०८०	प्रतिष्ठायामादिशुद्धि	,,
१०८१	जलप्रतिष्ठायालग्नशुद्धि	,,
१०८२	नीलोद्वाहमाश्रित्यप्रतिष्ठा	,,
१०८३	चतुर्वर्णानांकृत्यसधानम	३३१
१०८४	वर्णविवेक	,
१०८५	विप्रक्षत्रियकृत्यम्	,,
१०८६	वैश्यशूद्रकृत्यम्	,,
१०८७	स्ववर्णेस्वकृत्यासिद्धिदर्शनम	३३२
१०८८	विप्राणानिसर्गकृत्यम्	,
१०८९	क्षत्रियवैश्यनिसर्गकृत्यम्	,
१०९०	शूद्राणांनिसर्गकृत्यम्	,,
१०९१	विप्रकृत्येमादिशुद्धि	,
१०९२	क्षत्रियकार्यारंभेमादिशुद्धि	३३३
१०९३	वैश्यकार्यारंभेमादिशुद्धि	,
१०९४	शूद्रकार्यारंभेमादिशुद्धि	,,
१०९५	स्वकार्येलग्नशुद्धि	,,
१०९६	हालिनांकार्येमादिशुद्धि	३३४
१०९७	वणिककार्येमादिशुद्धि	,,
१०९८	कर्षकादिकर्मसुलग्नशुद्धि	,,
१०९९	लिपिकारकार्येमादिशुद्धि	,,
११००	गोपकर्मारंभेमादिशुद्धि	,,
११०१	रथकृत्कर्मारंभेमादिशुद्धि	३३५
११०२	स्वर्णकारकार्यारंभेमादिशुद्धि	,
११०३	मणिकारकर्मारंभेमादिशुद्धि	,,
११०४	नापितकर्मारंभेमादिशुद्धि	,
११०५	मालिककर्मारंभेमादिशुद्धि	३३६
११०६	कुलालकर्मारंभेमादिशुद्धि	,,
११०७	सुनाराणांकर्मारंभेमादिशुद्धि	,,
११०८	तन्तुवायकार्यारंभेमादिशुद्धि	,,
११०९	चित्रकारकार्यारंभेमादिशुद्धि	३३७
१११०	रजककर्मारंभेमादिशुद्धि	,,
११११	चर्मकारकार्यारंभेमादिशुद्धि	,
१११२	नटवेशपकर्मारंभेमादिशुद्धि	,,
१११३	व्याधादीनांकार्यारंभेमादिशुद्धि	,,
१११४	म्लेच्छकार्यारंभेमादिशुद्धि	३३८
१११५	शिलादकादीनांकृत्यमादिशुद्धि	,
१११६	क्षौरकर्मणिमादिशुद्धि	,
१११७	लिंगिप्रमुखकृत्येमादिशुद्धि	,
१११८	स्वधर्मदंडकरणपूर्वकांकर्मार्कवर्णनम्	३३९

कालनिर्णयप्रकरणम् २१

विषयांका	विषयनामानि	पृष्ठांका
१११९	नवरात्रिव्रतम्	,,
११२०	व्रतेघटस्थापनकाल	३४०
११२१	कुंभस्थानेमादिशुद्धि	
११२२	व्रतेहोमपारणाशुद्धि	,,
११२३	रेवत्यादिषुहोमादिसर्वाधिकुंभस्थापनानिषेध	,
११२४	गुर्वस्तादिषुप्रथमनवरात्रिकव्रतारंभनिषेध	,
११२५	नित्यानित्यव्रतविवेक	३४

विषयांकाः	विषयनामानि.	पृष्ठांकाः
११२६	शिवरात्रिकालशुद्धिः	,,
११२७	न्यूनाधिकतिथौविवेकः	,,
११२८	देव्यादिव्रतेतिथिशुद्धिः	,,
११२९	गणेशचतुर्थीव्रतशुद्धिः	३४२
११३०	एकादशीव्रतम्	,,
११३१	अधिकावमतिथिवेकादशीविवेक·	,,
११३२	एकादश्यांविशेषः	,,
११३३	तिथिनक्षत्रयोगान्नांशादिक्षप-नियमः	३४३
११३४	नक्षत्राश्रितद्वादश्यांपारणानिषेध·	,,
११३५	नक्षत्रचरणगतविशेष·	,,
११३६	रामनवमीव्रतम्	३४४
११३७	तस्याःपारणादिनम्	,,
११३८	गोकुलाष्टमीव्रतम्	,,
११३९	वृद्धीक्षयेवाउपोषणविचारः	,,
११४०	वैष्णवमतम्	३४५
११४१	नरसिंहजन्मचतुर्दशीव्रतम्	,,
११४२	तत्रवृद्धौक्षयेवाउपोषणविचार·	३४६
११४३	दीपमालिका	,,
११४४	पंचधादिवसांशः	,,
११४५	त्रिधाकालः	३४७
११४६	विजयादशमी	,,
११४७	होलिकाधिकारः	३४८
११४८	श्रावणपूर्णिमायांमुनितर्पणं	,,
११४९	तत्रमतांतरम्	३४९
११५०	ऋषिपंचमीव्रतम्	,,
११५१	हरितालिकापूजनम्	,,
११५२	दूर्वाष्टमीव्रतम्	,,
११५३	तत्रमतांतरम्	,,
११५४	पार्वतीव्रतम्	३५०
११५५	गौरीतिथि·	,,
११५६	शीतलासप्तमीव्रतम्	,,
११५७	कज्जलीतृतीया	,,
११५८	अमयाद्वादशीव्रतम्	३५१
११५९	अनंतचतुर्दशीव्रतम्	,,
११६०	सूर्यव्रतम्	,,
११६१	चंद्रादिग्रहाणांव्रतम्	,,
११६२	सूर्यादिग्रहणेपुण्यफलम्	,,
११६३	गर्भवत्याग्रहणावलोकननिषेधः	३५२
११६४	सूतकादौतिथिशुद्धिः	,,
११६५	क्षणादिकालज्ञानम्	,,
११६६	श्राद्धेकालनियामकम्	३५३
११६७	नीलोद्वाहादिश्राद्धम्	,,
११६८	नीलोद्वाहसमयः	,,
११६९	गुर्वस्तादौनीलोद्वाहनिषेधः	,,
११७०	क्षयाधिकवर्षलक्षणम्	३५४
११७१	क्षयवर्षेत्याज्यकालनियमः	,,
११७२	मार्गीगुरोर्लुप्तवर्षेकर्मादौमंगळ-कार्यनिषेधः	,,
११७३	श्राद्धकालशुद्धिः	

ग्रंथाध्यायनिरूपणप्रकरणम् २२

११७४	बीजकम्	३५६
११७५	श्रीविक्रमार्कवर्णनम्	३५७
११७६	सभास्थपण्डितवर्गवर्णनम्	
११७७	पण्डितनवकवर्णनम्	३५८
११७८	सभापरिजनवर्णनम्	,,
११७९	सैन्यवर्णनम्	,,
११८०	शाकप्रवृत्तिः	३५९
११८१	दिग्विजयः	,,
११८२	विक्रमस्यप्रभुत्वादिगुणवर्णनम्	,,
११८३	पुरवर्णनम्	,,
११८४	पराक्रमवर्णनम्	३६०
११८५	ग्रंथारंभसमाप्तिकालौ	,,
११८६	सुखबोधिकाकृतप्रशस्तिः	३६१

॥ श्रीः ॥

॥ श्रीः ॥

भावमुनिविरचितसुखबोधिकाव्याख्यया समलंकृतम्.

ज्योतिर्विदाभरणम् ।

मानप्रकरणम् ।

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुचरणकमलेभ्यो नमः ॥ अविघ्नमस्तु ॥

श्रीमान्पार्श्वजिनोतिशेषकगणंप्राप्तःप्रभु.पूर्णगद्रीक्षिप्रचलत्कुयोगकमवप्रौढिःप्रजानाम्पुरः॥
सत्कीर्त्यानकनादपूरितजगत्साकल्यइष्टार्थदो गीर्वाणेश्वरसेवितो विजयते विश्वैकचिंतामणिः॥१॥
नत्वा गुरुं गिरमपीभमुखं च खेटान् श्रीकालिदासकविशक्रविनिर्मितस्य ॥
ज्योतिर्विदाभरणनामवरागमस्य संतन्यते गुरुकृपं सुखबोधिकेयम् ॥ २ ॥
श्रीपत्तने प्रवरपौर्णिमिकाङ्कगच्छेढंढेरपाठकशुभाश्रयसंश्रितानाम् ॥
श्रीयुक्तपूज्यमहिमाप्रभसूरिराज्ञां शिष्येण भावमुनिना रचिता यथाचित् ॥ ३ ॥

रैभ्याऽत्रिहारितवसिष्ठपराशराद्यैर्नत्वोदितं, जनघनव्यवहारसिद्ध्यै ॥ ग्रथ्नाम्यहं ननु तदेव गिरं यदाख्यं ज्योतिर्विदाऽभरणनाम्नि महश्च शैवम् ॥ १ ॥

युग्मम् ॥ अथ ग्रंथारंभे ग्रंथकृत् श्रीकालिदासकविशक्रो वसंततिलकावृत्तेन समुचितेष्टदेवतानमस्काररूपमंगलमाचरन्ननुबंधचतुष्टयमाह—रैभ्येति । ननु इति ग्रंथप्रारंभे निश्चितं वा यदुक्तम् । 'ननु । निश्चये च विरोधे च क्षमायां प्राश्निकाक्षिपे । पक्षांतरे च स्वीकारे प्रारंभे प्रश्नतर्कयोः' इतिविश्वप्रकाशबृहट्टिप्पनके । अहं कालिदासनामा कविर्गिरं नत्वा प्रणम्य जनघनव्यवहारसिद्ध्यै जनानां विप्रादीनां घनो गात्रं तस्य व्यवहारः गर्भाधानसंस्कारादारभ्य अंत्यसमयं यावदनेन व्यवहारेण व्यवह्रियते तदीक्षितं स्यादितिकथनात् । तस्य सिद्ध्यै सम्यक् फललाभाय । अथवा जनानां घनः समुदायस्तस्य व्यवहारेण व्यवहारः । अथवा जनानां घनो दृढोऽवश्यंकर्त्तव्यएव इति सचासौ व्यवहारश्च । अथवा घनो बहुश्चासौ व्यवहारश्च घनव्यहारः जनानां घनव्यवहारस्तस्य सिद्धिस्तस्यै 'घनः सांद्रे दृढे दार्ढ्ये विस्तारे मुद्गरेंबुदे । संघे मुस्ते घनं मध्यं नृत्यवाद्यप्रकारयो.' इतिहैमोनेकार्थः । 'घनो बंधः पुरं पिंडो वपुः' इत्यभिधानचिंतामणिः । रैभ्यादिभिरितिनामभिर्ऋषीश्वरैरुदितं कथितं वचनगोचरीकृतं वचनगोचरतया प्रकटीकृतं वा एतद्विशेषणेन स्वाभिमानापनयनाय वज्रोत्कीर्णमणौ सूत्रगतिवदत्र मम मतिप्रवेशइति सूचितम् । एवंविधंतदेवइतिकर्म्मभूतम् । अत्रैवकारेण स्वमतिसंकल्पजन्यमपास्तम् । ज्योतिर्विदाभरणनाम्नि ग्रंथे ग्रथ्नामि गुंफयामीत्यन्वय. । ज्योतिर्ज्योतिषं विदु-

रितिज्योतिर्विदो दैवज्ञास्तेषामाभरण भूषणमिव भूषण तन्नाम यस्यासौ तस्मिन् । अथवा ज्योतिष शास्त्रस्य या विद् विद्या ज्ञान वा तस्याभरण अत्र निमित्तार्थे सप्तमी एतादृशग्रथप्रयोजनायेत्यर्थ । ग्रथ्नामीतिसमीपभविष्यति च वर्त्तमानो वेति । तत्किं यत्तदोर्नित्यसबन्ध । यद्वार्क्य अर्कसबधि यत्तेज । च पुन शैव शिवसबधि तेजो भुवने विजयते । अत्र गिर नत्वेति वाचिको नमस्कार । तदार्क्यं शैव च तेजइतिविषय सूचित १ व्यवहारसिद्धयै इतिप्रयोजन सूचित २ ज्योतिर्विदइत्यधिकारिण सूचिता ३ ज्योतिर्विदन्तीतिज्योतिर्विदस्तेषामाभरणमित्यादियदस्यानया व्युत्पत्त्या प्रतिपाद्यप्रतिपादकभाव सबध सूचित । प्रतिपाद्या पदार्था प्रतिपादको ग्रथइतिदिक् । ननु ग्रथादौ रैम्येतिरेफग्रहण विघ्नहेतु 'हानिकारो हकार स्यात्' इत्यादिवर्णपक्तौ छदश्शास्त्रेण रोगोत्पत्तिकृद्रेफस्योक्तत्वान्नैव । ऋषिवाचिना मत्वाद्द्रव्यवाचित्वाच्च निर्विघ्नतैवहेतुरिति । अत्र सुखबोधिकाया यत्र सधिविधान न दृश्यते तत्सुबोधहेतु । न सधि विरामे सधिर्न स्यादितिहैमसूत्रेण सिद्धिश्च । अत्र ग्रथे श्रीकालिदास कविना वराहमिहिरादिप्रोक्तमार्गानुगामिनाऽपि वराहमिहिरादिदैवज्ञमदगदौषधप्रायो बहुशाब्दिकमतमिश्रिता विषमसधयो विषमान्वयदुर्घटशब्दागुफिता । परचास्य ग्रथस्य वृत्त्याद्युपजीवन न दृष्ट तथापि श्रीमता सर्वस्वसमयपरसमयविदा श्रीमहिमाप्रभुसूरीश्वरगुरूणा प्रसादावनान्ममैष उपक्रम । अत्र हि मयाऽभिधानचिंतामणि । हैमोऽनेकार्थ । हैमशेषकोश । महीपकोश । अनेकार्थध्वनिमंजरी । नानाविधैकाक्षरकोश । शब्दरत्नाकरनामशब्दप्रभेद । हैमलिंगानुशासनम् । हैमबृहद्वृत्ति । धातुरत्नाकरवृत्तिरित्यादिग्रथा यथामति स्मृता । अतो ह्यव्यक्तमतिना विभ्रमो न कार्य । सुधिया तु खलता विहाय शोध्य । तत्र तावच्छब्दशुद्धिस्मृतये किंचिच्छब्दविवेको लिख्यते । अश्लेषा हस्ताश्रवणा तिथि तारा स्वातिरेते शब्दा पुस्त्रीलिंगा । तारकशब्दोत्रिलिंग । उडु स्त्रीक्लीबलिंग । अश्वयुक् स्त्रीलिंगा । पुनर्वसू द्विवचनान्त पुल्लिंग । मघा बहुला कृत्तिका एते नित्य बहुवचनान्ता स्त्रीलिंगा । अब्द हायन वर्ष मुहूर्त दिन दिवस वासर कुतप अहोरात्र मूल एतेशब्दा पुक्लीबलिंगा । भरणीस्त्रीलिंग । ज्ञाति पुल्लिंग । समा स्त्रीरिव गोविकल्पेन बहुवचनात शरद्स्त्रीलिंग । ज्येष्ठाधनिष्ठाश्रविष्ठा एते तृतीयवर्गद्वितीयान्ता । ज्योतिषशास्त्रेन्यथापि दृश्यते तदाह । पुनर्वसु एकवचनात । मघाकृत्तिकाचैकवचनातइति । शुक्रे भृगु भृगुज कवि कविज काव्यइति । आदिशब्दपर्याया । मिथुनराशौ जितुम जितमइतिशब्दप्रभेद । बुध वित् ज्ञ बो धनश्रेतिशब्दपर्याया । अथ द्वादशराशीना विशेषसज्ञामाह-क्रिय१ ताबुरि २ जितुम ३ कुलीर ४ लेय ५ पाथेन ६ जूक ७ कौर्प्योख्या ८ तौक्षिक ९ आकोकेरो १० हृद्रोग ११ चात्थ १२ चेत्थइति अथैषामध्ये सज्ञान्तरमाह-मिथुनसिंहकन्यातुलवृश्चिककुंभाना शीर्षोदयसज्ञाइति । अथ भावकुण्डलीगतसज्ञामाह-कोण नव ९ पचम ५ इति । केंद्रकटक १।४।७।१० इति । अथ पणफरसज्ञामाह २।५।८।११ इति । अथापोक्लिमसज्ञामाह-३।६।९।१२ इति । अथ द्वादशभावसज्ञामाह—क १ दृक् २।१२ । श्रोत्र ३।११ ।

नासिका ४।१० । कपोलः ९।९ । हनुः ६ ।८ मुखं ७ इति । उपचयसंज्ञा ३।६।१०।११ इति । विशेषतो बृहज्जातकतः संज्ञा ज्ञेयाइतिदिक् ॥ १ ॥

अन्यासदुक्तिविहितोद्गमपक्षराशीन्व्यर्थानहं विरचयामि वरोतियुक्तैः ॥
मत्वा वराहमिहिरादिमतैरनेकैर्ज्योतिर्विदाभरणमप्यनसन्मतार्हम् ॥ २ ॥

अथ विशेषतोऽभिधेयशुद्धतयाऽस्य मतं परिहरन् ग्रंथनामोत्कीर्तनमाह—अन्यासदि- ति । अपिरिति युक्तं 'प्रश्ने युक्तपदार्थेषु' इतिहैमोनेकार्थे । अहं ज्योतिर्विदाभरणं विरचयामि करोमीत्यन्वयः । किंकृत्वा । अनेकैर्वरोक्तियुक्तैः सत्यवचनाश्रितैर्वराहमिहिरादिमतैरन्याऽसदुक्तिविहितोद्गमपक्षराशीन् व्यर्थान् सत्यज्ञानरहितान् मत्वा ज्ञात्वा असत्योऽक्तिकाश्च ता उक्तयोन्येषामसदुक्तयोऽन्यासदुक्तयस्ताभिर्विहितो निर्मायितोऽतएव उद्गमः प्रादुर्भूत एवंविधो यः पक्षः कुहेवाकस्तस्य राशयो गणास्तान् । कथंभूतं ज्योति । अनसन्मतार्हम् न सन्मतं असन्मतं, असन्मतं न भवतीति अनसन्मतं शुद्धमतं तस्मै अर्हं योग्यम् । अथवा असंतो दुर्ज्जना न असंतोऽनसंतः सज्जनास्तेषांमतं सन्मतं तेन योग्यमित्यर्थः ॥ २ ॥

सौरं च सावनकमैंदवमार्क्षमानं पैत्र्यं गुरोरथमनोर्मरुतामनेन ॥
मानं विधेरिति न वाखिलकर्मसिद्धेर्मानानि माननवकेन सुनिश्चयः स्यात्

अथ प्रथमं नवधा मानमाह—सौरमिति । सौरं सूर्यसंबंधिमानं १ चकारः समुच्चयार्थः सावनकं तदेव सूर्यसंबंधि अयनांशसहितमानं २ ऐंदवं चंद्रसंबंधिमानं ३ आर्क्षं भसंबंधि मानं ४ पैत्र्यं पूर्वजसंबंधिमानं ५ गुरोर्गिरापतेर्मानम् ६ मनोर्मानम् ७ मरुतां देवानां मानं ८ विधेर्ब्रह्मणोमानम् ९ इति नव मानानि संति अनेन माननवकेन अखिलकर्मसिद्धेः सुनिश्चयः स्यात् । अत्र संबंधे षष्ठी । 'मानं प्रमाणे प्रस्थादौ मनश्चित्तोन्नतौ ग्रहे' इत्यनेकार्थः । 'मानशब्दो महाकारे विपभेदे क्रियामितौ ॥ आढके कोलभेदे च प्रतिष्ठायां नगुर्बुधाः' इति महीप ॥ ३ ॥

गुर्व्वक्षराणामुदितं च षष्ट्या पलं पलानां घटिका किलैका ॥
षष्ट्या घटीनां भदिनं तथार्यैस्तिथ्यैकया चंद्रमसो दिनं स्यात् ॥ ४ ॥

अथोपजातिछंदसैतेषु लघुमानत्वात्प्रथमं भमानमाह—गुर्वेति । आर्यैः पंडितैः 'आर्यो ज्ञे बुधपूज्ययोः' इतिमहीपः । गुर्वक्षराणां दीर्घवर्णानां षष्ट्याऽऽवृत्त्या पलमुदितं कथितं । पलानां षष्ट्या एत्वेका घटिका कथिता । तथा घटीनां षष्ट्या भं दिनं नक्षत्रदिनं कथितं। एकया तिथ्या चंद्रमसोर्विधोर्दिनं स्यात् ॥ ४ ॥

खरमरीच्युदयद्वयजांतरं यदिह सावनसंज्ञदिनं स्फुटम् ॥
प्रतिदिनं स्फुटभुक्तिमितिः सदा खरगभस्तिदिनं विबुधैः स्मृतम् ॥५॥

अथ द्रुतविलंबितेन पूर्वार्द्धेन सावनमुत्तरार्द्धेन सौरमानमाह—खरेति । इह सावनी खरमरीचेः सूर्यस्योदयद्वयं तस्माज्जायते इति जातमेवंविधमंतरं विचाले यत् स्यात् विबुधैः प्रकटं तत् सावनसंज्ञादिनं स्मृतं । सदा सर्वस्मिन्काले प्रतिदिनेदिने ... भवति । कोर्थः । सूर्यः प्रतिदिनं स्पष्टां यां गतिं गच्छेत् इत्यर्थः । सैव खरगभस्तिदिनं स्मृतं खरास्तीक्ष्णाः गभस्तयः किरणा यस्य सस्तस्य दिनमित्यर्थः ॥ ५ ॥

स्वमितिमाः स्वखवह्नि३०मितैर्दिनैर्भवति माभिरिनैः १२ स्वसमास्तथा। द्युनिशमैंदवमासमितं सदा पितृषु चासितपक्षदलादितः ॥ ६ ॥

अथ पूर्वार्द्धेन स्वस्वमासवर्षमानमाह—स्वमिति । स्वखवन्हिमितैर्निजशून्यरामप्रमितैर्दिनैः ३० कृत्वा स्वमितिमाः स्वकीयमासो भवति माशब्दोकारांतो हसांतश्च । 'मास्तु मासे' इतिहैमः । तथाइनैर्मासैर्द्वादशभिः स्वकीयसमाः स्वकीयं वर्षं भवति ... बहुवचनांतः । अत्र सर्वत्र स्वशब्दग्रहणाद्यथा त्रिंशद्दिनैः सूर्यस्य मासः स्यात् तथा षण्मासैः देवानां दिनं तैस्त्रिंशन्मितैर्दिनैर्मासइत्यादि । एवं सर्वेषामपि स्वकीयमानेन ज्ञेयमिति अथोत्तरार्द्धेन पैत्र्यमानमाह । च पुनः पितृपूर्वजेषु असितपक्षदलादितः ... सदा ऐंदवमासमितं चांद्रमासप्रमितं द्युनिशं अहोरात्रं भवति पितॄणां कृष्णपक्षो दिनं रात्रिरित्यर्थः । यतः 'उदेति सूर्यः खलु कृष्णखंडे दिनोदयः स्यात्पितॄणां दिनार्द्धम् दर्शास्तमेत्यर्कइतीह शौक्ले दले च संध्या पितॄणां निशीथम् ॥' इतिसिद्धांतशिरोमणौ ॥ ६ ॥

माने गुरोरगभिदः परिवत्सराणां षष्टिः ६० स्मृता मुनिवरैः प्रभवादिकानाम् ॥ स्यादेकवत्सरमितिर्गुरुम-ध्यमैकराशेस्तु भोगमितिरेव सदा तथाहि ॥ ७ ॥

अथ वसंततिलकया गुरुमानमाह—मानइति । अगान्पर्वतान् भिनत्ति छिनत्ति भित्तस्यागभिदो वज्रिणोगुरोर्बृहस्पतेः माने मुनिवरैः प्रभवादिकानां परिवत्सराणां स्मृता 'संपर्यनुद्भ्योऽब्दे वत्सरे'इति अभिधानचिंतामणिः । तु पुनर्गुरुमध्यमैकराशेर्भोगप्रमाणमेकवत्सरमेकं वर्षप्रमाणं सैव स्यात् ॥ ७ ॥

प्रभवो विभवः शुक्लः प्रमो... ...पतिः ॥
अंगिराः श्रीमुखो भावो ... ॥ ८ ॥
...
चित्रभानुसुभान्... च विग
सर्वजित्... च तारण
...नंदन ...विरोधी ।
...यो जय...

दुर्मुखस्तदनु प्रोक्तो हेमलंबकसंज्ञकः ॥
विलंबाख्यो विकारी स्याच्छर्वरीप्लवसंज्ञकौ ॥ ११ ॥
उक्तः शुभकृतस्तस्मादब्दः शोभनकृत्स्मृतः ॥
क्रोधी विश्वावसुर्ज्ञेयो वत्सरो हि पराभवः ॥ १२ ॥
प्लवंगः कीलकाख्योथ सौम्यः साधारणाह्वयः ॥
ततो विरोधकृन्नामा परिधाविप्रमाथिनौ ॥ १३ ॥
आनंदो राक्षसः प्रोक्तो नलः पिंगलसंज्ञकः ॥
कालयुक्ताख्यसिद्धार्थौ रौद्रो दुर्मतिदुंदुभी ॥ १४ ॥
रुधिरोद्गारिरक्ताक्षौ क्रोधनः क्षयकृत्स्मृतः ॥
वत्सराणां गुरोर्माने षष्टिसंख्येयमीरिता ॥ १५ ॥

तथाहि अथानुष्टभामष्टकेन षाष्टिसंवत्सराणा नामान्याह—प्रभवइत्याद्यारभ्याष्टश्लोकी सुगमा स्पष्टम् ॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥ ॥

नगै७र्नखैः २० संनिहतो द्विधा शकः सखत्रिशक्रोऽ
१४३० क्षयमांगभाजितः ६२५ ॥ गताः सतल्लब्धशकोऽ
भ्रषड् ६० हृतोवशेषके स्युः प्रभवादिवत्सराः ॥ १६ ॥

अथ वंशस्थेन गतवत्सरानाह—नगैरिति । शको द्विधा स्थाप्यते तयोर्मध्ये य उपरिस्थ शाक सप्तभि ७ र्गण्यतेऽधस्तनवर्ती य शक नखैर्विंशत्या संनिहतो गुणित ततो विंशति-गुणितशाक षष्ट्या विभजेदुपरिसप्तघ्नशके संयोजयेत् इतिश्लोके अस्पष्टमपि ज्ञेय अन्यथा-ग्रंथविरोधोभवेत् पश्चात्सखत्रिशक्र सह खत्रिशक्रेण वर्तते य सत्रिंशदधिकचतुर्दशशतस-हित क्रियते पुन पश्चात्सोऽक्षयमागभाजित पचविंशत्यधिकषट्शतेन हृत पुन पश्चात्स-तल्लब्धशाक तस्माल्लब्धं तल्लब्धेन सह वर्तते य सतल्लब्ध सतल्लब्धश्चासौ शकश्च सतल्लब्धशक । कोर्थ । सप्तघ्नशाकाद्धरभक्ताद्यल्लब्धं तत्केवलशके योज्यते इत्यर्थ । पश्चा-त्ससतल्लब्धशकोऽभ्रषड्हृत षष्ट्या ह्रियते विशेषके प्रभवादिवत्सरा गता स्युरित्यर्थ । अत्रोदाहरणम् । यथा शको १६३३ द्विस्थाने स्थाप्य उपरि सप्तभिर्गुणिते जात ११४३१ पश्चादध स्थापितशाक विंशत्या गुणित ३२६६० तदा एवं जात । एतत्षष्ट्या ६० विभज्य लब्ध ५४४।२० सप्तघ्नशके संयोज्य जातम् ११९७५।२० पश्चात्त्रिंशद-धिकचतुर्दशशतेन युक्त क्रियते १३४०५।२० तदा एव जात । पश्चात् पंचविंशत्य-धिकषट्शतेन भाजितस्ततोलब्ध फलं २१ शेष २८०।२० लब्धे फलं २१ केवलशके १६३३ योज्यते तदा १६५४ एव जातोय षष्ट्या हृत शेष ३४ क्रमशः गताः

मभितावत्सरागतास्ततः प्लवनामसंवत्सरः पंचत्रिंशत्तमो वर्तमानो भवतीति रत्नमालाद्यानीतम एव शेषतोऽपि रत्नमालाद्युक्त्या वर्तमानवत्सरस्याभुक्तमासादिकं च भवेदिति स्पष्टम् ॥ १६ ॥

अथायने कीटमृगादिपट्के क्रमेण ते दक्षिणसौम्यसंज्ञे ॥
तमीदिने सायनभागभास्वदुत्थे स्फुटे नाकसदामुभे स्तः ॥१७॥

अथोपजात्या दिवौकसां रात्रिदिनमानमाह—अथेति । क्रमेण दक्षिणसौम्यसंज्ञे कीटमृगादिपट्के अयने । कोऽर्थः । द्वंद्वेऽप्येकं संयोजनात् कीटादिपट्कं कर्कादिपट्कं दक्षिणायनं मृगादिपट्कं मकरादिपट्कं उत्तरायणं ते उभे कर्तृपदे नाकसदां दिवौकसां तमीदिने रात्रिदिवमे स्फुटे प्रकटे स्तः भवतः । किंलक्षणे ते सायनभागभास्वदुत्थे । अयनांशसहितो यो भास्वान् रविस्तस्मादुत्थे प्रादुर्भूते कर्कादि दक्षिणायनं देवानां रात्रिः । मकरादि उत्तरायणं दिनमिति । सोम स्वाम्यस्यास्तीति सौम्या उत्तरा तस्या जातं सौम्यायनमिति ॥ १७ ॥

शाकः शरांभोधियुगो ४४५ नितो हृतो मानं
खतर्कै ६० रयनांशकाः स्मृताः ॥ नोक्तं मया वाऽव्य-
वहारिकत्वतो मनो जगत्कर्तुरथेह मत्कृतौ ॥ १८ ॥

अथोपजात्याऽयनांशमानमाह—शाकइति । शर पंच अंभोधिश्चत्वारो युगाश्चत्वारः एभिरूनीकृतो य शाकः पुनः खतर्कैः षष्ट्याहृतो भक्तः फलं तेऽयनांशकाः स्मृताः यच्छेषं तत्कलाश्च स्मृताः । अथानन्तरे मया इह मत्कृतौ मदग्रन्थे न च पुनर्जगत्कर्तुर्ब्रह्मणो मानं नोक्तं । अव्यवहारिकत्वात्तस्य व्यवहारो हि लोके नास्ति ॥ १८ ॥

चौलोपयाममखमेखलबंधकूपक्षूपाभिषेकग्रहसंवमथा
दिकानाम् ॥ आरंभउष्णवपुषि ह्ययने हि सौम्ये
स्यादन्यथा कविगुरूदयगो न शस्तः ॥ १९ ॥

अथोपजात्या षड्ऋतूनाह—सौम्येति । सौम्यायनादुत्तरायणाच्छिशिरस्ततोमधुर्वसंतस्ततोनिदाघोग्रीष्म क्रमेण ऋतुः स्यात् । अपागयनानानाद्दक्षिणायनमुखात् क्रमेण वर्षास्ततः शरत् ततोहिमसंवचान् हैमंतऋतुः स्यात् इत्येते पूर्वोक्ताः षड्ऋतवो दिवौकसां देवानां द्युरात्रकेऽहोरात्रके काले स्युः ॥ २० ॥

मानेन कश्चिद्धिमरोचिषोमधोर्मध्वाननानेवमृतूनभापत ॥
मासैस्तुसार्द्धैरदनैः२२।१६र्यदाधिकोमितैस्तैदेतत्किमतोभवेदसत् ॥२१॥

अथोपजात्याऽसन्मतमपाकरोति—मानेनेति। कश्चित्ज्ञोहिमरोचिषश्चंद्रस्य मानेन मधोश्चैत्रान्मध्वाननान् मधुर्वसंतआननं मुखं येषां ते तानृतूनेवमभापत अकथयत् । तुरित्यवधारणे । यदा रदनैर्मितैर्द्वात्रिंशैर्मितैर्मासैः सार्द्धैः पक्षसहितैः पंचषष्टिप्रमितैपक्षैराधिकोमासोभवेत् । तदाकिं क्रियते अतएतन्मतमसत् ॥ ११ ॥

तिथ्यर्धमुंडनकरग्रहपितृकर्मयात्राव्रतोपवसनाद्यखिलक्रियासु ॥
ग्राह्यं बुधैरनिशमैंदवमानमेव नाड्यादिकं भवति चाखिलमार्क्षमानात् ॥

अथ वसंततिलकया केषु कर्मसु किं मानं ग्राह्यं तदाह—तिथ्यर्धेति । बुधैरनिशं निरंतरं तिथ्यर्द्धाद्यखिलक्रियास्वैंदवमानं चांद्रमानमेव ग्राह्यं तिथ्यर्द्धं बवादिकरणम् । मुंडनं चौलादि करग्रहो विवाहः पितृकर्म पूर्वजकर्म्म यात्रा प्रयाणं व्रतमुपनयनं उपवसनमुपवासइत्यादि येषां तानि तेषां द्वंद्वे एषामखिलक्रियासु च पुनराधानादिकं घट्यादिकमानमार्क्षमानान्नक्षत्रमानाद्भवति । पूर्वोक्ततिथ्यर्द्धादिक्रियासु इत्यर्थः ॥ २२ ॥

वर्षायनर्तुयुगपूर्वकमेव देवमानादिमानमखिलं किल सौरमानात् ॥ स्यात्कृच्छ्रसूतकचिकित्सितवासराद्यं भुक्त्यादिकं द्विविपदां खलु सावनाच्च ॥ २३ ॥

अथ सौरसावनाविवेकतामाह—वर्षायनेति । किलेतिसंभावनायाम् वर्षादिपूर्वकं देवमानादिमानं सकलसौरमानादेव स्यात् वर्षं वत्सरो अयनं प्रतीतं ऋतुः शिशिरादिः युगं सत्ययुगादिकं एतानि पूर्वं यस्मिंस्तत् । खलु निश्चितं । कृच्छ्रादिकं द्विविपदा ग्रहाणां भुक्त्यादिकं च मानं सकलं सावनादेव भवेत् । भुक्तिः स्पष्टा गतिः । कृच्छ्रं चांद्रायणादि । यतः 'त्र्यहं प्रातः त्र्यहं सायं त्र्यहमद्यादयाचितम् । त्र्यहं परं च नाश्नीयात्कृच्छ्रं सांतपनं स्मृतं ॥' 'कृच्छ्रं सातपनादिकम्' इत्यभिधानचिंतामणिः । सूतकं जन्ममरणादागतं । चिकित्सितं वैद्यकर्म्म । वासर दिनं इत्याद्यं यस्मिंस्तत् द्विविपदामित्यलुक्समासः ॥ २३ ॥

वर्षेकमध्ये शशिनो दिनानि हिमांशुसप्तमि३७१मितानि तज्ज्ञः ॥
सार्द्धं ३ द्विबाणांबु५२पलैर्युतेन घटीत्रयेणैव युतान्यथाहुः ॥ २४ ॥

चान्द्रनाक्षत्रसावनसौरवर्षम.

३७१	३६६	३६५	३६०	दि.
३	१५	१५	०	घटी
५२	३०	३०	०	पल
३०	२२	२२	०	अ.
०	३०	३०	०	व.

अथोपजातिकयैकवर्षमध्ये चंद्रदिनसंख्यामाह—वर्षैकमध्ये इति। तज्ज्ञा दैवज्ञा वर्षैकमध्ये शशिनश्चंद्रस्य सार्द्धैर्द्विबाणांत्रुपलैस्त्रिंशदक्षरान्वितद्विपंचाशत्पलै ५२।३० युतैरेवंविधेन घटीत्रयेण युतानि युक्तानि हिमांशुसप्ताग्निमितानि एकसप्तत्यधिकशतत्रयप्रमितान्येवंविधानि ३७१ दिनानि आहुः कथयन्ति २४

भवासरास्तत्र रसांगरामा ३६६ सार्द्ध ३० द्विदस्रा२२न्वितखाग्नि३०तुल्यैः ॥ पलैर्युताभिस्तिथिनाडिकाभि १५ र्युक्ताविधू१ना रविसावनाः ३६५ स्युः ॥ २५ ॥

अथोपजात्या भदिनसावनदिनसंख्यामाह—भवासरा इति। तत्र वर्षैकमध्ये सार्द्धद्विदस्रान्वितखाग्नि तुल्यैः पलैस्त्रिंशदक्षरान्वितद्वाविंशत्यक्षराधिकत्रिंशत्पलैर्युताभिर्युक्ताभिरेवंविधाभिस्तिथिनाडिकाभिस्तिथिघटीभिः पंचदशप्रमितघटिकाभिर्युक्ताः रसांगरामसंख्याः षट्षष्ट्यधिकशतत्रयप्रमिताः ३६६ भवासराः नक्षत्रदिनाः स्युः ततो नक्षत्रवासरा विधूनाः विधुश्चंद्रस्तेन ऊनाहीना रहीता एकेन न्यूनाः कृताः रविसावनवासराः स्युः ॥ २५ ॥

सौरा नभोंगाग्निमिता हि वासराः३६०स्मृता बुधैः सर्वसु कर्मसु ध्रुवम्॥ यत्सौरचांद्रांतरमेकहायनेऽधिकं तदेवाऽव्यवहारिकं भवेत् ॥ २६ ॥

इतिश्रीकविकालिदासोदिते ज्योतिर्विदाभरणे मानाध्यायः प्रथमः ॥ १ ॥

अथोपजात्या सौरदिनसंख्यामाह—सौरेति। ध्रुवं निश्चितं सर्वेषु कर्मसु समस्तशुभकार्येषु बुधैर्नभोंगाग्निमिताः षष्ट्यधिकशतत्रयप्रमिताः सौराः वासराः सौरदिनाः स्मृताः। एकहायने एकवर्षे सौरचांद्रांतरं यदधिकं स्यात् तदधिकमेवाऽव्यवहारिकं भवेत्क्षयादिककाले शुभकार्य न स्यादित्यर्थः ॥ २६ ॥

इतिश्रीपौर्णमीयगच्छाधिराजभट्टारकपुरंदरश्रीमहिमाप्रभुसूरेश्चरणसरोरुहचंचरीकायमानभावरत्नविरचितायां कालिदासकृतज्योतिर्विदाभरणस्य सुखबोधिकायां मानाध्यायः प्रथम. ॥ १ ॥

नव्यः श्रीश्रितमहिमाप्रभाख्यसूरेः सर्वत्राऽस्खलतनयाप्रबोधपूषा।
पुण्णात्युग्रतरतया कुले कुवादिघूकानां तदपि न चित्रमत्र लोके ॥ १ ॥

॥ अथ योगोत्पत्तिप्रकरणम् ॥ २ ॥

तावत्सर्वेषामसौम्याखलानां पंचांगेभ्योऽनेककृत्यांगकालम् ॥
वक्ष्येऽथाहं चोपपत्तिः प्रवक्तुं लोकानामग्रे युजामेव संज्ञाम् ॥ १ ॥

श्रीगुरवे नमोनमः ॥ अथ द्वितीयाध्यायं प्रथमं शालिनीवृत्ताष्टकेनाह—तावदिति । अथानंतरं तावदादौ अहं पंचांगेभ्यास्तिथिवारादिभ्यः सकाशात् युजां योगानां कर्किंयमघंटादीनां संज्ञामाह च पुनरुपपत्तिमुद्भवं सम्यक् ज्ञानं वा वक्ष्ये कथयिष्यामि । किंकर्तुम् । लोकानामग्रेऽनेककृत्यांगकालं बहुविधविवाहादिकार्याणामंगानि तदवयवभूतानि तेषां कालं समयं प्रवक्तुं कथनार्थं । कथंभूतानां युजा सर्वेषां समग्राणां । पुनःकथंभूतानां असौम्याखलानां । असौम्याः पापाश्च ते अखलाः सौम्याश्च ते तेषां । 'अंगमंतिकगात्रयोः॥ उपसर्जनभूते स्यादभ्युपायप्रतीकयोः' इतिहेमः । इत्यर्थः ॥ १ ॥

नंदा भद्राख्या जया चेति रिक्ता पूर्णाः सर्वाः
पक्षतेः स्यात्क्रमेण ॥ शुक्लेऽथान्या नेष्टमध्योत्तमाः
स्युर्व्यस्ताकृष्णेऽपास्य रिक्ता हि सौम्याः ॥ २ ॥

अथ प्रथमं तिथिसंज्ञामाह—नंदेति । पक्षतेः प्रतिपत्सकाशात् क्रमेण सर्वास्तिथयो नंदादिपंच संज्ञाः स्युश्चकारः समुच्चयार्थः । कोर्थः । प्रतिपत्षष्ठ्येकादश्यो नंदाः । द्वितीयासप्तमीद्वादश्यो भद्राः । तृतीयाष्टमीत्रयोदश्यो जयाः । चतुर्थीनवमीचतुर्दश्यो रिक्ताः । पंचमीदशमीपंचदश्यः पूर्णाइति नामसदृक्फलाः। अथ शुक्लपक्षे नंदादितिथयो नेष्टमध्योत्तमाः स्युः । कृष्णपक्षे व्यस्ता विपरिताः स्युः । अयं भावार्थः । शुक्लपक्षे नंदादिपंचसु आद्या प्रतिपत्द्वितीयातृतीयाचतुर्थीपंचमीरूपाः पंचतिथयः नेष्टाः । एवंद्वितीयाः पंच तिथयः मध्याः । तृतियाः पंच तिथयः उत्तमाः। कृष्णपक्षे आद्याः पंच तिथयः उत्तमा । द्वितीयाः पंच तिथयःमध्याः । तृतीयाः पंच तिथयः नेष्टाइति । हिइतियुक्तार्थे । रिक्तामपास्य हित्वाऽन्याः सर्वास्तिथयः सौम्याः शुभाः स्युः यतः सामान्येन रिक्तादिवर्जं प्रायआसु शुभकृत्यं कुर्यादित्यर्थः ॥ २ ॥

वारे नंदा पूर्वदेवार्चितांघ्रेर्भद्रा विद्वारे जया सैनिरिक्ता ॥
पूर्णागीर्वाणेशवंद्येऽखिलेषु कर्मस्वेवं दोषवत्यस्ति सिद्धा ॥ ३ ॥

अथेना एवं वारसिद्धाआह—वारइति । पूर्वदेवा दैत्याः 'पूर्वदेवाः शुक्रशिष्याः' इत्यभिधानचिंतामणौ । तैरर्चितावंघ्री पादौ यस्य शुक्रस्य तस्य वारे नंदा दोषवती दोषयुक्ताऽपि सिद्धा सिद्धिकृदस्ति केषु अखिलेषु समस्तेषु कर्मसु कार्येषु एवममुना प्रकारेण विदि बुधवारे भद्रा आरे भौमे जया । इनस्य सूर्यस्याऽपत्यं ऐनिः शनिः सह ऐनिना वर्तते वा स सैनिः सैनिश्चासौ रिक्ता च सैनिरिक्ता शनिवारे रिक्ता । गीर्वाणानां देवानामीशइंद्रस्तस्य वंद्यो गुरुस्तस्य वारे पूर्णा 'इनः स्वामिसूर्ययोः' इतिकोशः ॥ ३ ॥

सर्वारंभे भूमिदायादभान्वोर्नंदागुर्विंदोश्च भद्रा जया ज्ञे ॥
रिक्ता धिष्ण्ये हेलिसूनौ च पूर्णे ज्ञेया याम्यागारदा कालविद्भिः ॥४॥

अथैता एव भौमादिवारैर्नेष्टाआह—सर्वेति। कालविद्भिर्दैवज्ञैः सर्वारंभेषु सर्वकार्यमारंभेषु भूमिदायादभान्वोर्भूमेर्दायादः पुत्रो भौमः स च भानुश्च तयोर्मंगले रवौ च नंदा तिथिर्याम्यागारदा यमस्येदं याम्यं तच्चागारं गृहं च तद्ददातीति मृत्युदा ज्ञेया। चः समुच्चयार्थः। एवं सर्वत्रापि योज्यं। गुर्विंदोर्गुरौ चंद्रे च भद्रा। ज्ञे बुधे जया। धिष्ण्ये शुक्रे रिक्ता। हेलिसूनौ सूर्यसुते पूर्णाइति। 'दायादौ सुतसपिंडौ' इति हैमोनेकार्थः। 'धिष्ण्योग्नौ शुक्रे च' इति तत्रैव॥४॥

व्याशा.२।१० तुल्ये पक्षरंध्रे तिथी स्याद्युग्माऽपास्या
या.तिथिश्चाप्ययुग्मा ॥ तासां सौम्या १५ गोमितं ९
प्रोह्य सर्वाः शस्ताः सर्वासु क्रियास्वेव घस्रम् ॥ ५ ॥

अथ पक्षरंध्रतिथीनाह—व्याशाइति। युग्मा समसंख्या तिथिः पक्षरंध्र मितिनाम स्यात्। किंकृत्वा तासां समतिथीनां मध्ये व्याशातुल्ये द्विः द्वौ आशा दिक् ताभ्यां तुल्ये द्वितीयादशम्यौ तिथी अपास्य त्यक्त्वा च पुनरेव अयुग्मापि विषमसंख्यापि अमाऽमावास्या पक्षरंध्रं स्यात् अत्र पक्षरंध्रे गोमितं घस्रं नवमी च प्रोह्य विहाय सर्वाः सौम्यास्तिथयः सर्वासु क्रियास्वेव सर्वकार्येषु शस्ताः स्युः। अत्र यद्यपि पक्षरंध्रमध्ये नवमी नोक्ता न कार्ये निषिद्धा तथापि ग्रंथांतरे प्रोक्ता। पक्षछिद्राणि यदाहुः 'षष्ठ्यष्टमी चतुर्थी चतुर्दशी द्वादशी कुहू नवमी ॥ पक्षछिद्राण्याहुर्लभते नैतेषु संसिद्धिं' इति ॥ ५ ॥

योगः कर्कीसंज्ञकोऽथो तिथेस्तद्वारस्यैते मानयोगेनिशं स्यात् ॥
विश्वा१३भिन्ने सूरिभिर्गर्हितोयं यानोद्वाहाद्येषु कार्येषु नूनम्॥६॥

अथ कर्कियोगमाह—योगइति। अथो अनंतरमनिशं सदा कर्कीसंज्ञको योगः स्यात् कस्मिन् सति। विश्वाभिन्ने त्रयोदशसंख्याविछिन्ने तिथेस्तद्वारस्य तस्य तिथ्यावारस्तद्वारस्तस्य च मानयोगे इतिप्राप्ते सति। अयमभिप्रायो यत्संख्या तिथिर्यावत्संख्याको वारस्तयोः संख्यामेलने त्रयोदशपाताति तद्यथा। यथाच। द्वादश्यां रविस्तदा कर्किः स्यात्। एवमेकादश्यां चंद्रः दशम्यां मंगलः नवम्यां बुधः अष्टम्यां गुरुः सप्तम्यां शुक्रः षष्ठ्यां शनिरिति। अयं योगो नूनं सूरिभिः प्राज्ञैर्यानोद्वाहाद्येषु प्रयाणविवाहादिषु कार्येषु गर्हितस्तिरस्कृतः ॥ ६ ॥

संवर्तः स्याद्त्रिद्वक्जातमनुस्तिथ्यां चारं पक्षमूला १ श्रितायाम् ॥
सप्तम्यामंशुर्यदायं क्रियासु प्राज्ञैर्योगो वर्जनीयोऽखिलासु ॥ ७ ॥

अथ संवर्ताख्ययोगमाह—संवर्त्तइति। यदा पक्षमूलाश्रितायां पक्षमूलं पक्षादिः तामाश्रितायां तिथ्यां प्रतिपद्युक्तद्वितीयायां तिथौ अत्रिदृग्जातमनुरत्रेर्दृग्भ्यां जातो विधुस्तस्य सूनुर्बुधः

स्यात्। च पुनर्यदांऽशु· सूर्य· सप्तम्यां स्यात् तदा सः संवर्ताख्ययोगः स्यात्। माङ्गैररं शीघ्रम-खिलासु क्रियास्वयं योगो वर्जनीयो हेयः॥ ७॥

देया मेषात्पक्षतेराशिचक्रे पूर्णामुक्त्वा चाखिला या क्रमेण॥
स्यात्सा तद्वत्पूर्णतिथ्यंघ्रयोत्र क्रूराक्रांता सर्वकर्मस्वनिष्टा॥ ८॥

अथ क्रूराक्रांततिथीराह—देयाइति। अत्र राशिचक्रे सुधीर्मेषाच्च पुनः पक्षतेः प्रतिपत्तः सकाशात्क्रमेणाखिलास्तिथयो देया. स्थापनीया.। किंकृत्वा। पूर्णा मुक्त्वा या तिथिः क्रूराक्रांता क्रूरग्रहैराक्रमिता स्यात् सा सर्वकर्मस्वनिष्टदा दोषदा स्यात्। च पुनस्तद्वत् तिथिवत् पूर्णतिथ्यंघ्रयः पंचमीदशमीपौर्णमासीना चरणा स्थाप्याः क्रूराग्रहैर्योधिराक्रमितः सोप्यनिष्टः स्यादित्यर्थः॥ ८॥

क्रूराक्रांततिथिचक्रम्.

मे.	वृ.	मि.	क.	सि.	क.	तु.	वृ.	ध.	म.	कु.	मीरा
१–२	३	४	६	७	८	९	११	१२	१३	१४	तिथिय
पच घटी १५	पच घटी १५	पच घटी १५	दश घटी १५	दश घटी १५	दश घटी १५	दश घटी १५	पूर्णा घटी १५	पूर्णा घटी १५	पूर्णा घटी १५	पूर्णा घटी १५	तिथि चर णा
१	२	३	४	१	२	३	४	२	३	४	श्री

ध्वांतध्वंसविधिर्वलाहकरसागारं १२ गृहं चैति वा कोदंडं हरमौ-लिसंस्थितकला दग्धा द्वितीया तदा॥ झषैकांतरराशिगेंबरमणावेकांतरैवं तिथिर्दग्धातो भवति क्रमेण सकलारंभेषु नेष्टप्रदा॥ ९॥

अथ शार्दूलविक्रीडितेन दग्धतिथीराह—ध्वांतेति। ध्वांतध्वंसविधि. ध्वांतध्वंसमंधकार विनाशं विधाति सृजति इति विधि. विधन् विधाने धातो रूपं। अथवांधकारविनाशो विधीयतेऽनेनेतिविधिरंधकारध्वंशविधानो रवि.। बलाहकेति। बलाहको मेघस्तस्य रसेषु जलेषु अगारं गेहं यस्य स मीनस्तस्य गृहमालयोराशिस्तं बलाहकरसागारर्क्षकमित्यपिपाठे बलाहकरसेषु अगारं यस्य स मनिश्चाऽमो वृश्चिकराशिश्चेत्यर्थ। तमेति प्राप्नोति 'वनरमो यादोनिवासोऽमृतम्' इतिहेम.। च पुनर्वाऽथवा रवि. कोदंडधनुराशिमेति तदा हरमौलिसं-स्थितकला द्वितीया तिथिर्दग्धा स्यात्। हरमौलौ स्थीना कलाइव कला यस्यां सा द्वितीया तिथिर्दग्धेति अनेन विशेषणेन शंभुमूर्द्धस्थितकलाप्रमितचंद्रेणोपलक्षितेति विशिष्टवाचकाना पदाना पृथक्विशेषणे समवधाने विशेष्यमात्रपरता। द्वितीयेति। 'सकीचकैर्मारुतपूर्णरंध्रै.' इत्यादिवत्। मीनार्के धनुरर्के च द्वितीया दग्धेतिस्पष्टार्थ। एवममुना प्रकारेण मीनराशितो धनूराशित एकांतरराशिगेंबरमणौ सूर्ये सति द्वितीयातः एकांतरा तिथिर्दग्धा ज्ञेया। स्पष्टमाह।

वृषकुंभार्के चतुर्थी मेषकर्के षष्ठी मिथुनकन्यार्केऽष्टमी सिंहवृश्चिकार्के दशमी तुलामकरार्के द्वादशीति यदुक्तमारंभसिद्धौ दग्धार्केति। 'द्वंद्वकन्ये २।६ मृगेंद्रालौ १०।८ तुलेणे ७।१०।१।१२ झ्यादियुक् तिथिः' इति अतःकारणाद्दग्धा तिथिः सकलारंभेषु नेष्टप्रदा वांछितदायिनी न भवति ॥ ९ ॥

वृद्धिर्मंगलदा बलात्वथ खला लक्ष्मीवती स्याद्यशा-
मित्राख्या निजनाम प्रख्यफलदा तद्वद्धतोग्राह्वया ॥
सौम्यानंदपदा यशोगुणवती तस्माज्जयोग्राह्वया सौ-
म्याख्या तिथितस्त्विमा निगदिताः संज्ञा बुधैः पक्षतेः॥१०॥

अथ शार्दूलविक्रीडितेन प्रतिपदादितिथीनां संज्ञामाह—वृद्धिरिति। बुधैः पक्षते प्रतिपत्तिथितो निजनामाख्यतुल्यफलदा इमाः संज्ञा ज्ञेया निगदिताः कथिताः। प्रतिपदः वृद्धिरितिसंज्ञा। क्रमादेव द्वितीयादितिथीनां मंगलदादिसंज्ञा ज्ञेयाइति स्पष्टम्। 'स्युरुत्तरपदैः प्रख्यः प्रकारं प्रतिमो निभ'इतिहैमः। अत्र प्रसंयोगोवर्णेत्वेपि प्राक् पूर्वमक्षरो न दीर्घो लघुप्रयत्नत्वात्। छन्दोनुशासनोक्तं तेन छंदोभंगोनेति ॥ १० ॥

अथोच्यते दस्रभतो भनायका दस्रौ यमो वह्निकसोमशंभवः ॥
मयादितीज्योरगपूर्वजा भगोर्यमोष्णकृत्त्वष्टसमीरणाह्वयाः ॥ ११ ॥
वृत्रासुरप्राणहरकृपीटजौ मित्रो मरुत्वानथ यातु पुष्करम् ॥
विश्वेविधिर्विष्णुवसूप्रचेतसश्चाजांघ्र्यहिर्बुध्नविदन्तखेचराः ॥ १२ ॥

अथ वसंततिलकेनेंद्रवंशाभ्यामष्टाविंशतिनक्षत्राणामीशानाह—अथोच्येति। अथानन्तरं मया दस्रभतोऽश्विनीनक्षत्रतो भनायका नक्षत्रस्वामिनः एतेइतिउच्यन्ते। अश्विनौ देववैद्यौ द्विवचनातोयंशब्दः१ भ० यम२ कृ० वन्हिः३ रो० कौ० ब्रह्मा४ मृ० सोमः ५ आ० शंभूरुद्र. ६ पु०अदितिर्देवमाता७ पु०इज्योगुरु८ 'इज्या स्यात्संगमे दाने यागेर्च्चायां गुरौ गवि'। इतिकोश श्ले० उरग. ९ म० पूर्वजा पितरः १० पू० भगोयोनि ११ उ० फा० अर्यमा सूर्यभेदः१२ ह०उष्णकृत् सूर्यः१३ चि०त्वष्टा विश्वकर्मा १४ स्वा० समीरणाह्वयो वायुनामा १५ ॥११॥ वृत्रेति। वि० वृत्राऽसुरप्राणहरो वृत्रदैत्यारिरिन्द्रः कृपीटमोऽग्निः कृपीटं जलं तस्माज्जातः इति विग्रहः 'कृपीटयोनिरंमुनाः' इत्यभिधानचिन्तामणि 'कृपीटं जलं' हेमशेषे कोशे। इमौ द्वावीशौ शक्राग्नीइत्यर्थः। विशाखायाआद्यर्द्धे इंद्रापरेऽग्निर्देवता अतएवास्याद्वैदैवतसंज्ञा मिश्रसंज्ञा च। अतएवोक्तं दैवज्ञवल्लभे 'पूर्वार्द्धे मृदु कर्म चास्य सकलं तीक्ष्णं द्वितीये दले' इति १६ अ० मित्रः सूर्यभेद. १७ ज्ये०मरुत्वानिंद्र.१८ मू० यातु राक्षसः यातुशब्दोनपुंसकः१९ पू०पुष्करं जलं 'पुष्करं द्वीपतीर्थाहि खगरागौषधांतरे॥ तूर्यास्ये मफलेकांडे शुंडाग्रे खे जलेंबुदे' इतिहेम. २० उ० विश्वेदानि विश्वेदेवाःत्रदेवताः मर्षादित्याख्यम' शीभारः। नन्वत्र

संज्ञावाचिनो विश्वशब्दस्य कथं सर्वादित्वम्। असंज्ञायां सर्वादिरितिवचनात्। उच्यते छांदसोयं प्रयोगस्तेन संज्ञायामपि सर्वादित्वम्२१ अभि० विधिर्ब्रह्मा २२ श्र० विष्णुः केशव. २३ध० वसवो-ऽष्टौ। यदुक्तम्। 'धरा ध्रुवश्च सोमश्च आपश्चैवानलोऽनिलः॥ प्रत्यूषश्च प्रदोषश्च वसवोऽष्टौ प्रकीर्तिता.' इति २४ श० प्रचेता वरुणः २५ पू० अनाग्निः वास्तुशास्त्रप्रसिद्धो हृदयकोष्ठस्थो देवो रुद्राणामन्यतमोजपादः २६ उ० भा० अहिर्बुध्नोरुद्रभेदः। यदाहुः। अजपादोऽथाहिर्बुध्नः पिनाकीहररैवताः॥ शंभुः शर्वो मृगव्याधः कपाली त्र्यंबको भवः' इत्येकादशरुद्रनामानि २७ रे० विदंतखेचरइति विगता नष्टा दंता रदा यस्य सचासौ खेचरश्च पूषेत्यर्थः। २८अयं च 'यज्ञे नष्टदन्तोऽभवत्' इतिश्रुतिः यतोदक्षाध्वरध्वंसने हि पूष्णो दंता महेश्वरेण पातिताः यद्वा-युपुराणे। 'तत. क्रोधाभिभूतेन पूष्णो वेगेन शंभुना। मुष्टिमाहत्य दशनाः पातिता धरणीतले' इतिपूषा रविभेदः यदाहुः। धातृ १ अर्यम २ मित्र ३ वरुण ४ अंशु ५ भग ६ इंद्र ७ विवस्वन् ८ पूषन् ९ पर्जन्य १० विष्णुः ११ त्वष्टा १२ संज्ञा द्वादशसूर्याइति। प्रयोजनं चैतेषा तु देवतानाम्ना नक्षत्रव्यवहारइति। अत्र वन्हिश्च कश्च सोमश्च शंभुश्चैतेषां द्वंद्वः अदितिश्च इज्यश्च उरगश्च पूर्वजाश्चेषां द्वंद्व.। उष्णरुच्च त्वष्टा च समीरणाह्वयश्चैतेषां द्वंद्वः। विष्णुश्च वसवश्च प्रचेताश्चैतेषां द्वंद्वः। अनाग्निश्च अहिर्बुध्नश्च विदंतखेचरश्चेषां द्वंद्वः। चकारः समुच्चयार्थइति। समासादिकं स्वयमप्यूह्यमित्यर्थः॥ १२॥

सनिर्जरज्येष्ठभमुत्तरात्रयं स्थिरं जगुश्चानिशमाद्यसूरयः॥
समारुतं सादिति भं गदाग्रजज्योतिः श्रविष्ठांबुपभान्वितं चरम्॥१३॥

अथोपजात्या स्थिरचरसंज्ञमान्याह—सनिर्जरेति। अनिशं निरंतरमाद्यसूरयः पूर्वाचार्याः सनिर्जरज्येष्ठभं निर्जरज्येष्ठोब्रह्मा। 'सुरज्येष्ठे विरिंचने' इतिहेमः। तस्य भं रोहिणी तेन सह वर्त्तमानमुत्तरात्रिकं स्थिरं स्थिरसंज्ञं जगुरूचु.। रोहिणीउत्तराफल्गुनीउत्तराषाढा उत्तरा-भाद्रपदा इति भचतुष्कं स्थिरं। च पुनराद्यसूरयः समारुतं स्वातिसहितं सादितिभं पुनर्व-सुसहितं श्रविष्ठा धनिष्ठा अंबुपो वरुणस्तस्य भं शतभिषक् आभ्यामान्वितं सहितं गदाग्रजो वि-ष्णुस्तस्य ज्योतिर्भं श्रवणं विशेष्यकर्मपदं चरं चरसंज्ञं जगुरिति भपंचकं चरं। 'ज्योतिर्दि-नाधिपे वह्नौ नक्षत्रेऽक्षिमकाशयोः' इतिमहीपः। इत्यर्थ॥ १३॥

मनीषिणो निर्जरवर्द्धकींदुभे समैत्रपौष्णेमृदुसंज्ञके विदुः।
दास्राभिजिद्धंससुरेज्यदैवतान्यथो लघूनीह पुराणविग्रहाः॥१४॥

अथोपजात्यामृदुलघुनक्षत्राण्याह—मनीषीणइति। मनीषिणः पंडिताः समैत्रपौष्णेऽनुराधारे वतीयुक्ते निर्जरवर्द्धकींदुभे निर्जराणां देवानां सूत्रधारो विश्वकर्मा तस्य भं चित्रा इंदुभं मृग-शिर. द्वंद्वे कृते तेभ्यः कर्मपदे मृदुसंज्ञके विदुः अवधारयन्ति। इतिभचतुष्कं मृदुसंज्ञं। अथो अनतरं पुराणविग्रहा. पुरातनशरीरा वृद्धाइहाधिकारे दस्रोश्विनी अभिजित् हंसोरविस्तस्य

भं हस्तः सुरेज्यो गुरुर्दैवतं यस्य तद्भं पुष्यः एषां द्वंद्व । तानि भानि लघूनि विदुर्जानंति इदं भचतुष्कं लघु 'पुराणः मत्नशास्त्रयोः' इति हैमः 'वेधोहंस' इतिहेमः ॥ १४ ॥

सरिद्वराकार्द्रकपर्दिभोगिनोर्भाभ्यां युते गोपतिनैकपेयभे ॥
तीक्ष्णाह्वयेऽथांतकपित्र्यभान्वितं पूर्वात्रयं चोग्रमुशंति कृष्टयः॥१५॥

अथोपजात्या तीक्ष्णोग्रभान्याह—सरिद्वरेति । कृष्टयः पंडिताः सरितां नदीनां मध्ये वरा गंगा तस्याः कानि जलानि तैरार्द्रः 'क्लिन्नः कपर्दो जटाजूटो यस्य स रुद्रश्च भोगी सर्पश्च तयोर्भाभ्यामार्द्राश्लेषाभ्यां युते युक्ते एवंविधे गोः स्वर्गस्य पतिरिंद्रः निकषाया अपत्यं नैकेयो राक्षसस्तयोर्भे ज्येष्ठामूले इतिकर्मपदं तीक्ष्णाव्हये उशन्ति इच्छंति । इदं भचतुष्कं तीक्ष्णम् । अथ च पुनः कृष्टयोंतको यमः पितरः पूर्वजा एतयोर्भान्वितं भरणीमघायुक्त पूर्वात्रयं पूर्वाफल्गुनीपूर्वाषाढापूर्वाभाद्रपदेति त्रिकमुग्रसंज्ञमुशंति । इदं भपंचकमुग्रम् 'कृतिकृष्टयभिरूपधीरा.' इति हैमः ॥ १५ ॥

तनूनपादंगनया युतं बुधैर्द्विदैवतं मिश्रमथ प्रकीर्तितम् ॥
निजाभिधानप्रतिमोक्तकर्मणां स्मृतानि सर्वाण्यपि साधने सदा ॥१६॥

अथ वंशस्थेन मिश्रभं तेषां फलं चाह—तनूनपादिति । बुधैः तनूनपादग्निः अंगना चंद्रस्त्रीनक्षत्रं कृत्तिका । 'अष्टाविंशतिरश्विन्यादयः सर्वाः शशिप्रिया'इतिहेमवचनात् । एवं यत्र चंद्रवाचकशब्दादंगनाशब्दपर्यायोदृश्यते तत्र नक्षत्रमितिज्ञातव्यम् । वक्ष्यमाणाऽधिकारेसर्वत्र तया युतं। द्विदैवतं विशाखामिश्रं मिश्रसंज्ञं प्रकीर्तितम् । इदं भयुग्मं मिश्रम् । अथैषां फलमाह सदा एतानि सर्वाणि स्थिरादीनि निजस्वकीयनामतुल्योक्तकर्मणां साधने स्मृतानीत्यर्थः ॥ १६ ॥

ध्रुवं स्थिरं धीरमलोलमुक्तं चरं चलं लोलमधीरसंज्ञम् ॥
मैत्रं बुधैर्यन्मृदुहारि सौम्यं भीष्मं स्मृतं क्रूरतरं तथोग्रम् ॥ १७ ॥

अथोपजात्या स्थिरादीनां संज्ञांतरमाह—ध्रुवमिति । बुधैः स्थिरं ध्रुवं धीरं चोक्तम् । एवं चरं चलं लोलमधीरं धीरं चोक्तम् । मृदुहारि सौम्यं चोक्तम् तथा एतत् उग्रं भीष्मं क्रूरतरं च स्मृतम् ॥ १७ ॥

तीक्ष्णं खरं दारुणभं भवेल्लघु क्षिप्रं च साधारणमेव मिश्रम् ॥
भपंचकं दारुणपाशगे सदाऽनिष्टं श्रविष्ठोत्तरखण्डपूर्वकम् ॥ १८ ॥

तीक्ष्णे तीक्ष्णं खरं दारुणं च भवेत् लघु क्षिप्रं च भवेत् साधारण एव मिश्रभं भवेत् इत्यर्थः । अथ धनिष्ठादिपंचकमाह—श्रविष्ठोत्तरखण्डपूर्वकं धनिष्ठोत्तरखंडादारभ्य रेवत्यंतं भपंचकं पंचकयोग इति सदाऽनिष्टं भवति । क्लिष्टगणं भपंचकं । वारुणपाशगं वरुणगंबा पाशाद्यमम् ॥ १८॥

प्रेतं नयेत्पितृवनं न चौकसो न गोपनं दारुतृणौघसंग्रहः ॥
यानं यमाशां ग्रथनं न रज्जुभिर्भपंचकेस्मिन्विदधीत शायनम् ॥१९॥

अथ पंचके हेयमाह—प्रेतमिति । जनइतिशेषः । अस्मिन् भपंचके प्रेतं शवं पितृवनं श्मशानम् न नयेन्न प्रापयेत् श्मशानमित्याधारे गौणकर्म्म । अस्य धातोर्द्विकर्मकत्वात् । चपुनरस्मिन्नोकसो गृहस्य गोपनमाच्छादनं न स्यात् । एवं दारुतृणौघसंग्रहो न स्यात् । एवं यमम्श्नुते प्राप्नोति यमाशी दक्षिणदिगन्तात्तं यानं प्रयाणं न स्यात् । पुनरत्र जनैरज्जुभिः कृत्वा शयनस्य मंचकस्येदं शायनं ग्रथनं न विदधीत न कुर्वीत । अत्र देवान्मृतस्याग्निसंस्कारविधानं स्मृत्यंतरादवज्ञेयम् । 'प्रेतो मृते भूतविशेषे च' इतिहैमः ॥ १९ ॥

द्विपालकव्यालधनंजयोग्रभं क्रव्यादभानां नवकं जगुर्बुधाः ॥
कासारकूपाननकर्म्मसाधने हितं तथाधोमुखमुद्धृतौ क्षितेः ॥ २० ॥

अथाधोमुखसंज्ञनक्षत्राण्याह—द्विपेति । बुधाः द्विपालकं द्विस्वामिकं विशाखा व्यालस्य सर्पस्य भमाश्लेषा धनंजयोग्निस्तस्य भं कृत्तिका उग्रभानि पूर्वात्रयमघाभरण्यः क्रव्यादो राक्षसस्तस्य भं मूलं एषां द्वंद्वः । एषां भानां नवकमधोमुखसंज्ञं कासारादिकर्मसाधने हितकारि जगुरूचुः । कासारस्तडागः कूप आननं मुखं एषां कर्मणा तेषां साधने विधानेऽत्राननशब्दस्याऽऽदिशब्दार्थत्वात् वापीभूमिगुहादीनां ग्रहणं । तथा क्षितेः पृथिव्या उद्धृतौ खनने हितमिति 'व्यालो दुष्टगजे सर्पे शठे श्वापदसिंहयोः' इति । 'धनंजयोनामभेदे ककुभेदे च मारुते ॥ पार्थेग्नौ' इतिहैमः ॥ २० ॥

सकाश्यपींद्राऽमरवैद्यमारुतब्रध्नेन्दुदाराणि विदुर्मृदून्यपि ॥
तिर्यङ्मुखान्येपुतरीक्रियामनोक्षवीभगोश्वाननकर्मकोविदाः ॥ २१ ॥

अथ तिर्यङ्मुखभान्याह—सकाश्यपीति । कोविदाः बुधाः सकाश्यपी कश्यपस्य स्त्री काश्यपी अधिकारादत्रादितिः इंद्रः अमरवैद्यः मारुत ब्रध्न रविः एषां द्वंद्वः । एषामिंदुदारा नक्षत्राणि पुनर्वसुज्येष्ठाश्विनीस्वातिहस्ताभिधानितैः सह विद्यते इतिसकाश्यप्यादीदुदाराणि मृदूनि चित्रामृगरेवत्यनुराधाभानि तिर्यङ्मुखमज्ञानि विदुर्जानन्ति । अपिरितियुक्तार्थे च पुनर्बुधा एषु नवसु तरीक्रिया नौकृत्यं अनोक्षादिकर्म च विदुः । अन शकटः अक्षः पाशकः लि. शुकसारिकादिपक्षी इभो हस्ती गौः प्रतीतः अश्वआननं मुखं येषां ते तेषां कर्म कार्यमिति । 'पाशकः प्रासकाऽक्षश्च देवन' इतिहैम । काश्यपस्य कलत्राणित्रयोदश यदुक्तं भूगोले । दितिः १ अदितिः२ कद्रुः३ सेनब्राह्मणं४ भानुयोगेश्वरी५ विनता६ सविका७ सुप्रभा८ सद्गनेत्रा९ मिथुना १० दिवी ११ कालिनरी १२ कनका १३ इति ॥ २१ ॥

रमाधवोमाधवजीवधीरभप्राचेतसेणांकवशाः सवासवाः ॥
उदाननावारणधामचामरध्वजातपत्राभृतये हिताः स्मृताः ॥ २२ ॥

अथ वशस्थेनोर्ध्वमुखनक्षत्राण्याह—रमेति । सद्भि' सवासवा धनिष्ठयायुता रमाधवो विष्णु श्रवण उमाधव शभु आर्द्रा जीव गुरु पुष्य । धीरभानि रोहिण्युत्तरात्रये । प्रचेता वरुणस्तस्यैणाकवशा चद्रस्त्री शतभिषक् आसा द्वंद्व एतास्ताराउदानना उर्ध्वमुखसज्ञा स्मृता प्रोक्ता । किंभूता एता हिता हितकारिण्य । कस्मै वारणधाम हस्तिधाम अंबाडेइतिभाषा । चामरं ध्वजा पताका आतपत्रं छत्रं एषाद्वंद्व । एषामाधृतये धारणाय । हितादियोगे चतुर्थी । क्वचित्प्रचेतसेणाक इतिपाठोऽपपाठ प्रचेत शब्दो हसातत्वाद्विसर्गलोप एव । इतिनवकमूर्द्धमुखसंज्ञम् ॥ २२ ॥

द्विदैवतादित्यभसंयुतानि ध्रुवाणि भान्यत्र जगुर्बृहन्ति ॥
जघन्यसंज्ञान्यहिशांतकेंद्रप्रभंजनांभःपतिभानि चार्याः ॥ २३ ॥

अथोपेंद्रवज्रया बृहद्भान्याह—द्विदैवतेति। ओया द्विदैवत विशाखा आदित्यभं पुनर्वसु 'पुनर्वसुमयामुकौ आदित्यौ च' इतिहैम । आभ्या सयुतानि ध्रुवाणि भानि रोहिण्युत्तरात्रयभानि बृहत्संज्ञानि जगु । च पुनरार्या । अहिराश्लेषा शोरुद्र आर्द्रा अतको भरणी इद्रो ज्येष्ठा प्रभंजनो वायुस्वाति अभपतिर्वरुणस्तद्भं शतभिषक् । एतानि भानि पच जघन्यसज्ञानि जगु । 'व प्रागुक्तोऽश शभु शा गौरी कमलालया' इत्येकाक्षरकोशे ॥ २३ ॥

शेषाणि भान्यक्षधरामितानि समानसंज्ञानि वदंति संतः ॥
लघुध्रुवाधोक्षजभानि शश्वत्सौम्याद्यान्यंत्यभसंयुतानि ॥ २४ ॥

अथोपजात्या समानभान्याह—शेषाणीति । सत शेषाण्यक्षधरामितानि पंचदशमितानि भानि समानसज्ञानि वदति । अश्विनीकृत्तिकामृगशिरपुष्या पूर्वात्रय मघाहस्ताश्चित्राअनुराधामूलश्रवणधनिष्ठारेवतीइतिपचदश । पुन शश्वन्निरतर सत अत्यभसयुतानि रेवत्यायुक्तानि लघूनि अश्विन्यभिजिद्धस्तपुष्यभानि ध्रुवाणि रोहिण्युत्तरात्रयभानि अधोक्षजोविष्णुस्तद्भ श्रवण एषा द्वंद्व । एतानि भानि सौम्यसज्ञानि वदंति ॥ २४ ॥

मिश्रौषधीशाग्रजविश्वकर्मणामुड्रून्युशंतीज्यवसूत्तराश्विनी ॥
भाभ्यां युतानां भगरक्षसोस्तथा कुलोदयाख्यानि विचक्षणेश्वरा ॥२५

अथोपजात्या कुलोदयभान्याह—मिश्रेति । विचक्षणेश्वरा पडितवरा मिश्रे कृत्तिकाविशाखे ओषधीशश्चन्द्रोमृगशिर अग्रजा पूर्वजा मघा विश्वकर्मा चित्रा एषा द्वंद्व । एतानि भानि । किंभूताना मिश्रौषधीशाग्रजविश्वकर्मणा भगरक्षसोर्योनिराक्षसयोर्भाभ्या पूर्वाफाल्गुनीमूलाभ्यां युताना तथा ईज्य पुष्य वसवोधनिष्ठा उत्तरात्रय अश्विनी एषा द्वंद्व । एषामुडूनि उशन्ति वाञ्छन्ति । इतित्रयोदश कुलोदयाख्यानि ॥ २५ ॥

कर्कांतकादित्यकमूरपूष्णामाहुर्बुधाश्चोपकुलानिभानि ॥
भवाविपद्यालयनेशमित्रज्योतींषि सैंद्राणि कुलाकुलानि ॥ २६ ॥

अथोपजात्योपकुलकुलाकुलभान्याह—ककेति। बुधा. ककादीनां भानि उपकुलसंज्ञान्याहुः कथयति। को ब्रह्मा रोहिणी को वायुः स्वाति. अंतको भरणी आदित्य.पुनर्वसुः कं जलं पूर्वाषाढा सूरः सर्योहस्तः पूषा रेवति एषां द्वंद्वः एषां च पुनर्बुधा. सेंद्राणि ज्येष्ठामहितानि भवो रुद्रः आर्द्रा अग्निर्दितिच्छेदस्तथाच 'अकारो वासुदेवे स्यात्' इतितद्देवतं श्रवण' अविपदः अजपादः पूर्वाभाद्रपदा व्याल्गेऽश्लेषा वनेशो जलपातिर्वरुणः शतभिषक् मित्रोऽनुराधा एषां द्वंद्वः एषां ज्योतींषि भानि कुलाकुलानि तन्नामानि आहुः। ' को ब्रह्मण्यात्मानि रवौ मयूरेऽग्नौ यमेऽनिले। कं शीर्षेऽम्बुसुखे'इतिकोश ॥ २६ ॥

निरंधकं मे विकनीनिकं भवेदपांगपीडं च कलांधकं ततः ॥
पुष्यादिहेयान्ननु नष्टवस्तुनः सुलोचने नाप्तिमिति क्रमेण तु॥२७॥

अथान्धकादिभान्याह—निरंधकमिति। पुष्याच्चतुष्कं चतुष्कं प्रतिमं क्रमेण निरंधकं निर्गते अंधके यस्मात्तद्वं गताक्षं भवेत्। ततोविकनीनिकं विगता कनीनिका तारा यस्मात्तद्भं काणाख्यं भवेत्। ततोऽपांगपीडं अपागे नेत्रप्रांते पीडा यस्य तद्भं चिपिटाख्यं भवेत्। ततः कलांधकं कले मनोज्ञे अंधके नेत्रे यस्य तद्भं दिव्यनेत्रं भवेत्। चः समुच्चयार्थे। तुरितिविशेषार्थे ननु वितर्के। क्रमेण इमानीह सुलोचने दिव्यनेत्रनक्षत्रे नष्टवस्तुनो गतवस्तुन आप्तिं लाभमिति न ईयात्तं न लभेत्। इतीतिकिं इतिशब्दोत्र विवक्षायां तदयमर्थः। गताक्षे भे नष्टवस्तुनः प्राप्तिः स्यात्। विकनीनिके यत्नतः प्राप्तिः। चिपिटभे प्राप्तेर्वार्त्ता। दिव्यनेत्रे प्राप्तिर्नेति ' इति स्वरूपे सान्निध्ये विवक्षा नियमे मता' इतिहैमोनेकार्थः ॥ २७ ॥

सदा विदुः क्रूरभदारुणानि क्रूरेषु पातंगिदिनं तथार्याः ॥
शुभेषु कार्येषु पराणि पुष्यं गुरोरहश्चाखिलकर्मराशौ ॥ २८ ॥

अथ योग्यतामाह—सदाइति। आर्या क्रूरेषु कार्येषु क्रूरभदारुणानि उग्रतीक्ष्णे संज्ञभानि। तथा पातंगिदिनं पतंगस्य सूर्यस्यापत्यं पातंगिः शनिस्तद्दिनं विदुः लक्षयंति। च पुनरार्या अपराणि उक्तव्यतिरिक्तानि भानि शुभेषु कार्येषु विदुः। च पुनरखिलकर्मराशौ समस्तकार्यसमूहे पुष्यं गुरोरहः गुरुदिनं विदुः ॥ २८ ॥

पुष्यस्तनोत्यंगभृतामनेकैरथान्वितोदूषणसंनिपातैः ॥
न्यस्तेज्यभारंभसुकृत्यजातानर्थानुदन्वानिव रत्नधामा ॥ २९ ॥

अथ पुष्यमहत्त्वं वर्णयति—पुष्यइति। रत्न प्रधानं धाम तेजो यस्य सोऽथवा रत्नवत् गुरुमणिवद्धाम प्रभावो यस्य सोऽथवा रत्नानां श्रेष्ठवस्तूनां धाम जन्म यस्मात्स रत्नधामा पुष्योंगभृतां देहिनामर्थान् पदार्थान् तनोति विस्तारयति। किंलक्षणः पुष्योऽनेकैर्दूषणसंनिपातैर्दोषसमवायैरन्वित व्याप्तः। किंविधानर्थान्। न्यस्तेज्यभारंभसुकृत्यजातान् न्यस्ताः

समारोपित इज्यभे पुष्ये आरंभः उद्यमो येषां तानि एवंविधानि सुकृत्यानि सुकर्माणि ते
जातास्तान्। कइव उदन्वान् समुद्रइव। सोप्येवंविधइति समुद्रपक्षे रत्नानां धाम स्थानं यरि
न्सइति अर्थांतरन्यासोप्यत्र यथा पुण्यः कलिः प्राणिनामर्थान्तनोति। किंभूतानर्थान्। न्य
तिपूर्ववत्। किंभूत.पुण्यः कलिरनेकदूषणयुक्तोपीत्याशये सर्वं स्पष्टं स्वभावात्कलिरनर्थं करो
सोऽपि पुष्यनक्षत्रयोगे शुभं करोति तर्हि कृतादियुगे किं वक्तव्यमितिपुष्यनक्षत्रस्यातिशय
वत्यलंकारः 'तिष्यः पुष्यवत् कलौ मे'इतिहैमोनेकार्थः। 'धाम रश्मौ गृहे देहे स्थ
जन्मप्रभावयोः' इति तत्रैवेत्यर्थः ॥ २९ ॥

प्रभूतदोषोदितमप्यभद्रं निहंत्यरं पुष्यकृतेषु तिष्यः ॥
कृतेंद्रवंद्योडुकरग्रहाणामत्रंगिनां कर्मसु सोनिशं स्यात् ॥ ३०

प्रभूतेति। तिष्यः पुष्यः पुष्यकृतेषु पुष्यनक्षत्रे कृतानि कार्याणि तेषु प्रभूतदो
दितमपि भूरिदूषणोपपन्नमप्यभद्रममङ्गलमरं शीघ्रं हन्ति नाशयति। पुनः सपुष्यः कृतः इं
वन्द्यो गुरुस्तस्योडुनि पुष्ये करग्रहो विवाहो येस्तेषामंगिनां देहिनां कर्म्मसु कार्येषु अ
निरन्तरमत्रे भक्षणाय अर्थसामर्थ्यान्नाशाय स्यात्। अत्तृशब्दोऋकारांतोति तृनि अत्ता त
अत्रे कर्तृवत् ॥ ३० ॥

यदा चेत्सासितौ स्यातां भद्रायामारमंत्रिणौ ॥
सायुग्मचरणर्क्षायां भवेद्योगस्त्रिपुष्करः ॥ ३१ ॥

अथानुष्टुभा त्रिपुष्करयोगमाह—यदेति। यदा चेद्यदि सायुग्मचरणर्क्षायां सहाऽयुग्मचर
र्क्षैर्वर्तते या सा तस्यां विषमांघ्रिभयुक्ताया भद्राया २।७।१२ तिथ्यां सासितौ शनिसहिता
मन्त्रिणौ भौमगुरू स्यातां तदा त्रिपुष्करयोगो वृद्धौ विपयोगिनां त्रिगुणफलः शुभाऽशुभ
गुणफलदायक उक्तः ॥ ३१ ॥

अर्थजीवधनादीनां लाभे नष्टे हृतेत्यये ॥
त्रैगुण्यफलदो योगो वृद्धावुक्तोंगिनामयम् ॥ ३२ ॥

कस्मिन्मनि अर्थो द्रव्यं जीवधनादिकं गोमहिष्यादिकं यत 'अकृष्यं कृष्यम
कृष्यमन्यधनं भवेत् ॥ गोमहिष्यादिकं सर्वं बुधैर्जीवधनं स्मृतम्' इति। एषां लाभे
नष्टादि [illegible] हृतेऽल्पये नाशे प्राप्ते सति ॥ ३२ ॥

शुभाख्याऽमृतनामानो क्रमेण मुशलाह्वयम् ॥
गदमातंगरक्षांसि चराचरप्रवृद्धकाः ॥ ३५ ॥
अष्टाविंशत्यभिन्नाः स्युरमी योगाः प्रकीर्तिताः ॥
स्वनामसंख्यफलदाः प्रासावारर्क्षसंभवाः ॥ ३६ ॥

अथानुष्टुप्चतुष्केणाष्टाविंशत्यानंदादियोगानाह—आनंदेति । आनंदेत्यादिकं व्यापकं सुगमम् । नवरं प्रासेति आश्विन्वारनक्षत्रेभ्यो जाताइति ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

खावादिभादिंदुभादोषधीशेहिभादसृजीनेक्षतो विघ्पीति ॥
गुरौ मैत्रतो वैश्वदेवाच्च काव्येऽसिते शंबरेशोद्धृतोमी क्रमात्स्युः॥३७॥

अथभुजंगप्रयातेनैषामुत्पत्तिमाह—खाविति । सुधीः आदिमादश्विनीतो वर्तमानभपर्यंतं गणयेत् । यावत्संख्याकं वर्तमानभ तावत्संख्याक आनंदादियोगो भवेत् एवमोषधीशे चंद्रे इंदुभान्मृगशीर्षात् । असृजि मंगलेहिभादश्लेषात् । विदि बुधे इनर्क्षतो हस्तात् । गुरौ मैत्रतोऽनुराधतः । काव्ये शुक्रे वैश्वेदेवादुत्तराषाढत । असिते शनौ शंबरं जलं तस्येशोवरुणस्तस्योडुत शतभिषक्तः वै निश्चितं क्रमेणेत्येवमेते स्युः । चः समुच्चयार्थः । 'असृग् वक्रे मृगे रक्ते' इतिव्याडि । 'अर्णस्यंबुवा.शंबरम्' इतिहेमः । अहिभादसृजीत्यत्र छंदोभंगो दृश्यते तत पुस्तकांतरं निरीक्षणीयमिति ॥ ३७ ॥

हरावब्जईज्ये निजर्क्षं निजर्क्षं क्रमाद्दास्रमारे ज्ञमैत्रं भवेत् ॥
भदैत्यधिष्ण्यं च धिष्ण्ये कधिष्ण्यं शनौ चैतदेवं सुधासंज्ञयोगः॥२८

अथामृतसिद्धियोगमाह—हराविति । हरौ सूरवारे निजर्क्षं स्वकीयमं हस्त. । अब्जे चंद्रे निजर्क्षं मृगशिरः । ईज्ये गुरौ निजर्क्षं पुष्यः । आरे भौमे दास्रमश्विनी । ज्ञे बुधे मैत्रमनुराधा । धिष्ण्ये शुक्रेऽत्यधिष्ण्यं रेवती । शनौ को ब्रह्मा तस्य धिष्ण्यं रोहिणी क्रमाच्च यदा एवं भवेत्तदा सुधासंज्ञयोगोऽमृतसिद्धियोगो भवेत् । चकारः समुच्चयार्थः ॥ ३८ ॥

द्विदैवादिभानां चतुष्केषु योगाः क्रमात्सप्त ऊष्मांशुपूर्वग्रहाणाम् ॥
सदोत्पातकालाख्यकाणाख्यसौम्या दिनेषु स्वनामप्रकाशेष्टदाःस्युः॥३९

अथोत्पातादियोगचतुष्कमाह—द्विदैवेति । ऊष्मांशुपूर्वग्रहाणां सूर्यादिसप्तग्रहाणां सप्तसु दिनेषु द्विदैवादिभानां विशाखादिनक्षत्राणां चतुष्केषु सदा क्रमेण उत्पात १ काल २ काण ३ सौम्याख्याः ४ योगाः निजनामतुल्यफलदाः स्युः । कोऽर्थः । रविदिने विशाखा तदा उत्पातयोगः अनुराधा तदा काल ज्येष्ठा तदा काणः मूलं तदा सौम्य एवं नक्षत्रचतुष्के एते चत्वारो योगाः चंद्रादिषु पूर्वाषाढादिक्रमेण ज्ञेयाः ॥ ३९ ॥

समारोपित इत्यभे पुष्ये आरंभः उद्यमो येषां तानि एवंविधानि सुकृत्यानि सुकर्माणि ते॰ जातास्तान्। कइव उदन्वान् समुद्रइव। सोप्येवंविधइति समुद्रपक्षे रत्नानां धाम स्थानं यस्मि न्सइति अर्थातरन्यासोप्यत्र यथा पुष्यः कलिः प्राणिनामर्थान्तनोति । किंभूतानर्थान् । न्यर तिपूर्ववत् । किंभूत.पुष्यः कलिरनेकदूषणयुक्तोपीत्याशये सर्वं स्पष्टं स्वभावात्कलिरनर्थं करो सोऽपि पुष्यनक्षत्रयोगे शुभं करोति तर्हि कृतादियुगे किं वक्तव्यमितिपुष्यनक्षत्रस्यातिशये त्यलंकारः ' तिष्यः पुष्यवत् कलौ मे'इतिहैमोनेकार्थः । ' धाम रश्मौ गृहे देहे स्था जन्मप्रभावयोः ' इति तत्रैवेत्यर्थः ॥ २९ ॥

प्रभूतदोषोदितमप्यभद्रं निहंत्यरं पुष्यकृतेषु तिष्यः ॥
कृतेंद्रवंद्योडुकरग्रहाणामत्रांगिनां कर्मसु सोनिशं स्यात् ॥ ३०

प्रभूतेति । तिष्यः पुष्यः पुष्यकृतेषु पुष्यनक्षत्रे कृतानि कार्याणि तेषु प्रभूतदोषो दितमपि भूरिदूषणोपपन्नमप्यभद्रममङ्गलमरं शीघ्रं हन्ति नाशयति। पुनः सपुष्यः कृतः इंद्र वन्द्यो गुरुस्तस्योडुनि पुष्ये करग्रहो विवाहो यैस्तेषामंगिनां देहिनां कर्मसु कार्येषु अनि निरन्तरमत्रे भक्षणाय अर्थसामर्थ्यान्नाशाय स्यात् । अत्तृशब्दोऽत्रकारांतोति तृचि अत्ता तं अत्रे कर्तृवत् ॥ ३० ॥

यदा चेत्सासितौ स्यातां भद्रायामारमंत्रिणौ ॥
सायुग्मचरणर्क्षायां भवेद्योगस्त्रिपुष्करः ॥ ३१ ॥

अथानुष्टुभा त्रिपुष्करयोगमाह—यदेति । यदा चेद्यदि सायुग्मचरणर्क्षायां सहाऽयुग्मचर र्क्षैर्वर्तते या सा तस्यां विषमांघ्रिभयुक्तायां भद्राया २।७।१२ तिथ्या साऽसितौ शनिसहिताव मन्त्रिणौ भौमजीवौ स्यातां तदा त्रिपुष्करयोगो वृद्धौ विपयोगिनां त्रिनिघ्नफलः शुभाऽशुभ गुणफलदायक उक्तः ॥ ३१ ॥

अर्थजीवधनादीनां लाभे नष्टे हृतेत्यये ॥
त्रैगुण्यफलदो योगो वृद्धावुक्तोंगिनामयम् ॥ ३२ ॥

कस्मिन्सति अर्थो द्रव्यं जीवधनादिकं गोमहिष्यादिकं यतः ' अकुप्यं रुप्यहेम कुप्यमन्यधनं भवेत् ॥ गोमहिष्यादिकं सर्वं बुधैर्जीवधनं स्मृतम्' इति । एषां लाभे पलायिते चोरादिना हृतेऽत्यये नाशं प्राप्ते सति ॥ ३२ ॥

आनंदो यमदंडाख्यो धूम्रभृन्न प्रजापतिः ॥
सौम्यध्वांक्षाह्वयौ तस्माद्ध्वजः श्रीवत्ससंज्ञकः ॥ ३३ ॥
कुलिशो मुद्गरश्छत्रं मित्रं मानुपसंज्ञकः ॥
सरोजं लुंक्कोत्पातो कालकाणाख्यसिद्धयः ॥ ३४ ॥

शुभाख्याऽमृतनामानो क्रमेण मुशलाह्वयम् ॥
गदमातंगरक्षांसि चराचरप्रवृद्धकाः ॥ ३५ ॥
अष्टाविंशत्यभिन्नाः स्युरमी योगाः प्रकीर्तिताः ॥
स्वनामसंख्यफलदाः प्राग्वारर्क्षसंभवाः ॥ ३६ ॥

अथानुष्टुप्चतुष्केनाष्टाविंशत्यानंदादियोगानाह—आनंदेति । आनंदेत्यादिकं श्लोकचतुष्कं सुगमम् । नवरं प्रागिति अश्विन्यादिवारनक्षत्रेभ्यो जाताइति ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

रवावादिभादिंदुभादोषधीशेहिभादसृजीर्नक्षतो विद्यपीति ॥
गुरौ मैत्रतो वैश्वदेवाच्च काव्येऽसिते शंवरेशोद्भुतोमी क्रमात्स्युः॥३७॥

अथभुजंगप्रयातेनैषामुत्पत्तिमाह—रवाविति । सुधीः आदिभादश्विनीतो वर्तमानभपर्यंतं गणयेत् । यावत्संख्याकं वर्तमानभं तावत्संख्याक आनंदादियोगो भवेत् एवमोषधीशे चंद्रे इंदुभान्मृगशीर्षात् । असृजि मंगलेहिभादश्लेषात् । विदि बुधे इनर्क्षतो हस्तात् । गुरौ मैत्रतोऽनुराधतः । काव्ये शुक्रे वैश्वेदेवादुत्तराषाढतः । असिते शनौ शंवरं जलं तस्येशोवरुणस्तस्योद्भुत शतभिषक्तः वै निश्चितं क्रमेणेत्येवमेते स्युः । चः समुच्चयार्थः । 'असृग् वक्रे मृगे रक्ते' इतिव्याडि । 'अर्णस्यंबुवा शंवरम्' इतिहैमः । अहिभादसृजीत्यत्र छंदोभंगो दृश्यते ततः पुस्तकांतरं विलोकनीयमिति ॥ ३७ ॥

हरावब्जईज्ये निजर्क्षे निजर्क्षे क्रमाद्दास्रमारे ज्ञमैत्रं भवेत् ॥
भर्देत्यधिष्ण्यं च धिष्ण्ये कधिष्ण्यं शनौ चैतदेवं सुधासंज्ञयोगः॥२८

अथामृतसिद्धियोगमाह—हराविति । हरौ सूरवारे निजर्क्षं स्वकीयमं हस्त । अब्जे चंद्रे निजर्क्षं मृगशिरः । ईज्ये गुरौ निजर्क्षं पुष्यः । आरे भौमे दास्रमश्विनी । ज्ञे बुधे मैत्रमनुराधा । धिष्ण्ये शुक्रेंत्यधिष्ण्यं रेवती । शनौ को ब्रह्मा तस्य धिष्ण्यं रोहिणी क्रमाच्च यदा एतं भवेत्तदा सुधासंज्ञयोगोऽमृतसिद्धियोगो भवेत् । चकारः समुच्चयार्थः ॥ ३८ ॥

द्विदैवादिभानां चतुष्केषु योगाः क्रमात्सप्त ऊष्मांशुपूर्वग्रहाणाम् ॥
सदोत्पातकालाख्यकाणाख्यसौम्या दिनेषु स्वनामप्रकाशेष्टदाःस्युः॥२९

अथोत्पातादियोगचतुष्कमाह—द्विदैवेति । ऊष्मांशुपूर्वग्रहाणां सूर्यादिसप्तग्रहाणां सप्तसु दिनेषु द्विदैवादिभानां विशाखादिनक्षत्राणां चतुष्केषु सदा क्रमेण उत्पात १ काल २ काण ३ सौम्याख्याः ४ योगाः निजनामतुल्यफलदाः स्युः । कोऽर्थः । रविदिने विशाखा तदा उत्पातयोगः अनुराधा तदा काल ज्येष्ठा तदा काणः मूलं तदा सौम्य एवं नक्षत्रचतुष्के एको वारश्चत्वारो योगाः चंद्रादिषु पूर्वाषाढादिष्वप्यूह्याः ॥ ३९ ॥

पितृभं खगगौ द्विदैवतं हिमरश्मावसृजीशतारकम् ॥
विदि मूलमजाग्रजार्चिते हुतभुग्ज्योतिरजो डुभार्गवे॥ ४० ॥
भवतीनभमंशुजे तदा यमघंटाख्ययुगाह्वयोप्यसौ ॥
जनियानशयांबुजग्रहेष्वमरस्थापनकेऽत्ययाय च ॥ ४१ ॥

अथाष्टसंख्यापर्यन्तं वैतालीयवृत्तं तत्र तावद्यमघंटयोगमाह—पितृभमिति भवतीतियुग्मं। यदा खगगौ सूर्ये पितृभं मघा। हिमगौ चंद्रे द्विदैवतं विशाखा। असृजि भौमे ईशतारकमार्द्रा। विदि बुधे मूलं। अजोविष्णुस्तदग्रजो मघवान् तेनार्चितो गुरुस्तस्मिन् दिने हुतभुक् वह्निस्तस्य ज्योतिः कृत्तिका। भार्गवे शुक्रेऽजो ब्रह्मा तदुडु रोहिणी। अंशुजे शनौ इनभं हस्तो भवति सदा बुधैर्यमघंटादियोग ईरितः। कस्मै जनिर्जन्म यानं प्रयाणं शयः पाणिः सएवांबुजं तद्ग्रहः शयांबुजग्रहः पाणिग्रहणं एषां द्वंद्वः एषु च पुनरमरस्थापनके देवप्रतिष्ठायामत्ययाय नाशाय 'अजश्छागे हरे विष्णौ रघुजे वेधसि स्मरे' इतिहैमः। इत्यर्थः ॥ ४० ॥ ४१ ॥

सपतंगभतोऽचलै७र्मिते नवभि९र्भे च नृपालकै१६र्भवेत् ॥
मनुभिः१४कुयमै२१रिभाश्वि२८भिस्त्रियमै२३र्दस्र२मिते सदाऽऽडलः ४२

अथाडलयोगमाह—पतंगेति। सहपतंगेन सूर्येण वर्तते तत्सपतंगं भं तस्माद्रविनक्षत्रादचलैः सप्तभिर्मिते भे सति नृपालकैराजभिः षोडशभिश्च मनुभिश्चतुर्दशभिश्च कुयमैरेकविंशतिभिश्च इभाश्विभिरष्टाविंशतिभिश्च त्रियमैस्त्रयोविंशतिभिश्च दस्रमिते द्वाभ्यां च मिते भेऽडल इति ॥४२॥

बलकर्षककोपलक्रियाविबुधैराडलके च गर्हिता ॥
भवतीह न दोषभाक् क्रिया शयजंबालजसंग्रहादिका ॥ ४३ ॥

अस्यैवफलमाह—बलेति। विबुधैर्बलं सैन्यं कर्षक हली कं जलमुपलक्षणत्वात्कासारकूपारामादिः उपलः पाषाणः एषां द्वंद्वे प्रत्येकसंयोजनात्। एषां क्रिया समरहलप्रवाहवनविधि दुर्गप्रमुखा गर्हिता तिरस्कृता। च पुनरिह योगे शयजंबालजसंग्रहादिकाबालात्पंकाज्जायते तज्जंबालजं कमलं शयः पाणिरेव जंबालजं करकमलमित्यर्थस्तस्य संग्रहः उद्वाहस्स आदिर्यस्यां सा शयजंबालजसंग्रहादिका क्रिया दोषभाग्न भवति। 'जंबाले च कलो पंके' इतिहैमः॥ ४३॥

विडलोंशुमदंशुसंकुलादुडुतो भौमनगा७त्तशेषके ॥
त्रिमितं यदि षण्मितं भवेद्विधुवज्ज्योतिषि चेष्टनुत्तदा ॥ ४४ ॥

अथ विडलमाह—विडलेति। यदिचेत् अंशुमतो रवेरंशुभिः किरणैः संकुलं लुप्तं तस्मादुडुतः सूर्यनक्षत्रात् विधुर्विद्यतेऽस्मिन्नितिविधुवत् तच्च ज्योतिश्च तस्मिन् वर्तमानचंद्रनक्षत्रे आधारे सप्तमी। भौमोष्टौभौमैमस्तस्य नगात्तशेषकं सप्तभाजितशेषकं नक्षत्रं त्रिमितं वाथ षण्मित

भवेत्तदा विडलो भवेत् । किंविशिष्टो विडल । इष्टनुत् इष्टमीशित नुदति विनाशयतीति इष्टनुत् ॥ ४४ ॥

तिमिरारिकरावृतर्क्षतोऽक्षमितेविद्युदगैः कुकंपनम् ॥
भवतीभमिते च शूलकोऽशनिरेव प्रतिमेंनरेन्दुभिः ॥ ४५ ॥

अथ विद्युत्कपनादियोगानाह—तिमिरेति । तिमिरारेवे करैरावृतनक्षत्रं सूर्यकिरणलुप्तन क्षत्राद्धे वर्त्तमानचन्द्रनक्षत्रेक्षमिते पञ्चमिते सति विद्युल्लाभयोगो भवेत् । एवमगै सप्तमिते कुकंपनं भूकंपनयोगो भवेत् । इभमितेऽष्टमिते शूलक । अवरेंदुभिर्दशभि मतिमे समानेऽशनियोगएव स्यात् ॥ ४५ ॥

अनु केतुरहीन्दुभिः समे तिथिभिर्दण्डक उल्मुकं च भे ॥
खचरेंदुभिरब्धिलोचनैः परिवेषः कुलिशोऽनलांत्रकैः ॥ ४६ ॥

अनुपश्चात् । अहीन्दुभिरष्टादशभि समे केतु तिथिभि समे दडक । खचरेन्दुभिरेकोनविंशतिभि समे उल्मुक । अब्धिलोचनैश्चतुर्विंशतिभि समे परिवेष । अनलाब्दकै त्रयोविंशतिभि समे कुलिशो भवति । इति सर्वत्र योज्य च पुनरर्थे । युग्मम् ॥ ४६ ॥

द्वियमैरुडुभिर्मितैर्भतोऽर्कयुतात् घातनपातकौ लभेत् ॥
न सदैषु फलं सुकर्मणामलमारंभविधानतो जनः ॥ ४७ ॥

द्वियमैरिति । अर्कयुताद्भतो रविनक्षत्रात् द्वियमैर्द्वाविंशतिभिरुडुभि सप्तविंशतिभिश्च क्रमेण घातनपातको योगौ स्याता। सदा जन एषु योगेषु सुकर्मणा शुभकार्याणामारभो विधानतो विहितोद्यमादल निश्चयेन फलं न लभेत् न प्राप्नुयात् ॥ ४७ ॥

चंडांशूनविभोडुतोऽहिभमघाचित्रानुराधाश्रवः
पौष्णेष्वश्विभतः क्रमाद्गणनयेलादेवतेशान्विते ॥
स्याद्यावत्यगराजजारमणदोश्चंडायुधस्येतिभे
पातोनारनमेव कर्म रुचिरं नास्मिन्विधेयं बुधैः ॥ ४८ ॥

अथ चंडायुधपातमाह—चडांश्विति । चडांशुना सूर्येण ऊना हीना विभा कांतिर्यस्य तत् तच्चोडु च तस्मात्सूर्यनक्षत्रात् अहिमादिसप्तसु अश्विभतोऽश्विनीत क्रमेण गणनया कृत्वा । इलेति । इला देवता भूदेवो विप्रस्तस्येशश्चन्द्रस्तेनान्विते युक्ते यावति भे अत्राधारे सप्तमी । अगेति । अगाना महीध्राणा राजा हिमाचलस्तज्जा गौरी तद्रमणईश्वरस्तस्य दोर्भुजा तस्य चडायुधमस्त्र तस्य पातो हरायुधपात स्यादित्यन्वय स्पष्टार्थस्त्वयं । सर्पभात्सूर्यभानि स्था प्यतेऽथ पंक्तिषु यद्वर्तमानचंद्रनक्षत्रमुपरिस्थनिद्दिष्टनक्षत्रेण विद्ध यत् तदा तस्मिन्भे हरायुधपात यादित्यर्थ । बुधैरस्मिन्नत्रेऽनारत सदैव रुचिर शुभ कर्म न विधेय न कार्यमित्यर्थ ॥ ४८ ॥

हेलींद्वोरचरे युतावथ विभावर्यार्यधारासुवो-
रुग्रे भेब्जविदोश्च मिश्रभइह क्षिप्रे मृगांकेज्ययोः ॥
मैत्रे धिष्ण्यतमीशयोर्निशिथिनीशैन्योर्विधौ दारुणे
लोले मंगलभंगवान्निखिलभे स्यात्कालचक्रभ्रमः ॥ ४९ ॥

अथ शार्दूलविक्रीडितेन कालचक्रभ्रममाह—हेलीन्द्वोरिति । अथेह लोके हेलीन्द्वोः सूर्यचंद्रयोरचरे भे स्थिरनक्षत्रे युतौ मिश्रीभावे सति मंगलभंगवान् विवाहादिकार्यविनाशकृत् कालचक्रभ्रमः स्यात्। एवं विभावर्या रात्रेरर्यः स्वामी चंद्रः धराभूर्मंगलस्तयो रुग्रे भे युतौ । पुनरब्जविदोश्चंद्रबुधयोर्मिश्रभे युतौ । पुनर्मृगांकेज्ययोश्चंद्रगुर्वोः क्षिप्रे मे युतौ । पुनर्धिष्ण्यतमीशयोः शुक्रचंद्रयोर्मैत्रे भे युतौ । पुनर्निशिथिनीशश्चंद्रः ऐनिः शनिस्तयोर्दारुणे भे युतौ । पुनर्निखिला भा कांतिर्यस्मिन्स एवंविधे विधौ पूर्णेन्दौ लोले भे सति एषः स्यात् । 'अब्जो धन्वंतरौ चंद्रे शंखे पद्मे च संख्यके' इति 'अर्यः स्वामिवैश्ययोः' इति च हैमः । निशीथिनीइत्यत्र शकारमध्ये दीर्घईकारोऽस्ति अत्र तु ह्रस्वइकारः शब्दप्रभेदाद्दृश्यते ॥ ४९ ॥

तिथिवारभवा भवारजाः किल योगाश्च शुभाशुभाह्वयाः॥
विषयेष्वखिलक्रियाविधावखिलेष्वत्र विलोकनोचिताः ॥ ५० ॥

अथ वैतालीयेन केषुकेष्वेते, विलोकनीयास्तदाह—तिथीति । तिथिवारेभ्यो भवाजाताः भवारेभ्यो नक्षत्रवारेभ्यो जायन्ते तज्जाः शुभाशुभाह्वयाः सौम्यक्रूरनामयोगाः अखिलेषु विषयेषु देशेषु अत्राखिलक्रियाविधौ समस्तकार्यविधाने विलोकनोचिता दर्शनाय योग्याः स्युः 'विषयो यस्य योज्ञातस्तत्र गोचरदेशयो.' इतिहैमः ॥ ५० ॥

हेल्यधिष्ठितभमेशभजाः स्युर्हूणहोरखशवंगकिणेषु ॥
येखिलेषु च हिताय कुयोगास्तेऽहिताय विषयेष्वखिलेषु ॥ ५१ ॥

अथ स्वागतावृत्तेनाह—हेल्येति । हेल्याधिष्ठितभं सूर्याश्रितनक्षत्रं च भेशभं भानां नक्षत्राणामीशश्चंद्रस्तद्भं चंद्रनक्षत्रं च ताभ्या जायंते तज्जा ये कुयोगा. अखिलेषु हूणादिषु देशषु हिताय शुभाय स्यु' । न पुनस्ते कुयोगा. अपरेषु विषयेषु देशेषु अहितायाऽशुभाय स्युः॥५१॥

विष्कंभप्रीत्यायुष्मंतः सौभाग्यशोभनावतिगण्डश्च ॥
सुकर्माधृतिशूलाह्वयगण्डावृद्ध्यभिधामी योगाः क्रमशः ॥ ५२ ॥
ध्रुवाख्यव्याघातौ हर्षणवज्रासिद्धयो व्यतीपातः ॥
वरीयानथ परिघशिवौ सिद्धिसाध्यशुभाह्वयशुक्लाख्याः ॥ ५३ ॥

ब्रह्मैन्द्रोत्यौवैधृतिर्योगाः स्युरित्यसौम्यसौम्याहि ॥
स्वसंज्ञा संनिभफलमश्रांतं कर्मसु तन्वंत्येव ॥ ५४ ॥

अथार्यात्रयेन विष्कंभादिसप्तविंशतियोगानाह—विष्कंभेत्यादित्रिभिः विशेषकं । सुगमं । अश्रांतं निरंतरमसौम्यसौम्या क्रूरशुभा अमी योगा कर्मसु कार्येषु स्वसंज्ञासंनिभफलं निजनामसदृशफलं तन्वंति विस्तारयन्ति ॥ ५२ ॥ ५३ ॥ ॥ ५४ ॥

शश्वदमीषामेतेऽशुभफलभाजोपि भवंति वै योगाः ॥
विश्वाकभतिथ्यंगैकोनविंशतिदशधरात्यष्टिमिता ॥ ५५ ॥

अथैतेषामशुभानाह—शश्वदिति । शश्वन्निरंतरममीषां सप्तविंशतेर्योगानां मध्ये एते अमीभ-त्यक्ता योगा विश्वा विश्वे त्रयोदश अर्का नव भानि सप्तविंशति तिथयः पंचदश अंगानि षट् एकोनविंशति दश धरा एक अत्यष्टि सप्तदश एषां द्वंद्व । एभिर्मिता व्याघात १३ शूल ९ वैधृति २७ वज्र १५ परिघ १९ गंड १० विष्कंभ १ व्यतिपाता १७ ॥ ५५ ॥

वैधृतिव्यतिपातावखिलौ स्यातां चानिष्टदौ योगौ ॥
एतद्विहितवृषेनेहपरलोकेऽखिलभोगभाग्भवति ॥ ५६ ॥

वैधृतीति । अखिलौ समस्तौ वैधृतिव्यतिपातौ योगौ अनिष्टदौ दोषकरौ स्यातां । इहाऽस्मिन् भवे एतयोर्वैधृतव्यतिपातयोर्विहितः कृतो वृषो धर्मो येन स पुमान्परे लोके स्वर्गलोकेऽखिलभोगभाक् समस्तभोगफलयुक्तो भवति । व्यतिपातो व्यतीपातइतिशब्दप्रभेदो घञिपरे मा-देरुपसर्गस्य वा दीर्घत्वात् । वैधृतो वैधृतिशब्दप्रभेदोपलक्षणत्वात् । 'धर्म्यं पुण्यं वृषः' इतिहैम ॥ ५६ ॥

परिघार्धमनिष्टमनिष्टा नाड्यः कुलिशस्यादियुतेः ॥
शुभकर्म्मस्वाद्याः स्युस्तिस्रोतिगंडे षडेव गंडे च ॥ ५७ ॥

परिघेति । परिघस्यार्द्धं दलमनिष्टं स्यात् । कुलिशस्य वज्रस्य किंभूतस्य आदियुतेरादिना विष्कम्भेण युतिः संयोगो यस्य स तस्य विष्कंभस्य आद्यास्तिस्रो नाड्यो घटिका नेष्टा च पुनरतिगंडे षट् गंडे षडेव नेष्टाः स्युः । केषु शुभकर्म्मसु ॥ ५७ ॥

व्याघाते न वरा नव पंचाद्याः शूले स्तो द्वौ ॥
अंशे निंद्यौ च मुहूर्त्तावैन्द्रे ध्रुवयोगे च ते शेषे ॥ ५८ ॥

व्याघातेति । एवं व्याघाते नव घटिका वरा श्रेष्ठा न शूले पंच । आद्याइति सर्वत्र योज्यं । अथैंद्रे ध्रुवयोगे च अंशे त्रिभागे इने गते सति द्वौ मुहूर्तौ निंद्यौ स्तः भवतः ॥ ५८ ॥

मितं सदा मानदलेन कर्क्षमसौम्ययोगस्य सरूपकस्य ॥
योगो यदि स्याद्विपमस्तदैवमयोन्यथा पिंडयुतस्य भं तत् ॥५९॥

अथोपजातिम्या विष्कंभादिदुर्योगिष्वेकार्गलचक्रस्योपपत्तिमाह—मितमिति । असौम्ययोगस्य विष्कभव्याघातव्यतीपातशूलपरिघगंडातिगंडवज्रवैधृत्याख्यस्य सरूपकस्यैकेन सहितस्य अस्य मानदलेन प्रमाणस्यार्द्धेन मित प्रमित यद्भ नक्षत्र तद्भ कर्क्ष कस्य मस्तकस्य ऋक्ष नक्षत्र स्यात् । यदि चेद्विषमो योग स्यात् तदा एव स्यात् । अथान्यथा पूर्वोक्तविषमाभावे सति तदा पिंडयुतस्याऽष्टाविंशतिनक्षत्रयुक्तस्य समकुयोगस्य प्रमाणार्द्धेन मित यद्भ तद्भ मस्तकनक्षत्र स्यादित्यन्वय ॥ ५९ ॥

रेखाभिरेवोर्द्धगतैकरेखा खार्जूरिकं विश्वमिताभिरस्मिन् ॥
विद्धा सती मौलिभवस्तदग्रो भपेटकं स्याद्वलयं विदध्यात् ॥ ६० ॥

रेखेति । विश्वमिताभिस्त्रयोदशमिताभी रेखाभिर्विद्धा सती एव विधा उर्द्धगता एकरेखा इत्येव स्वरूपक खार्जूरीक चक्र स्यात् । सुधीभिरस्मिन् वलये मौलिभतोमस्तकनक्षत्रात् तदग्रो ।चक्रचरणे भपेटक नक्षत्रमाला विदध्यात् स्थापयेत् ॥ ६० ॥

खार्जूरिकचक्र मिद													
	आ	पु	पु	श्ले	म	पू	उ	ह	चि	स्वा	वि	अ	ज्ये
	मू												मू
	रो	क	म	अ	रे	उ	पू	श	ध	श्र	अ	उ	पू

तत्रैकरेखाश्रितयोरिनेंद्वोरेकार्गलाख्योंवकदीसिपातः ॥
कार्त्तान्तिकैरेव पुराणगात्रैरुक्तोमिथोदीप्तकृशानुकीलः ॥ ६१ ॥

अथेंद्रवज्रयाऽस्य नामान्याह—तत्रैकेति। एव निश्चयेन पुराणगात्रैर्वृद्धै कार्तांतिकैर्दैवज्ञै । 'दैवज्ञगणकादेशिज्ञानिकार्तांतिकाअपि'इतिहेम । तत्र चक्रे एकरेखास्थितयोरेखाया गतयोरिनें द्वो सूर्यचद्रयोरवक्रदीसिपातो नेत्रतेज पातएकार्गलाख्यउक्त । कीदृशएकार्गलाख्य । मिथ परस्पर दीप्तकृशानो स्फुरदग्ने कीलाइव कीला ज्वाला यस्मिन्स । 'हेति कीलाशिखावला' इतिहेम ॥ ६१ ॥

यदैकरेखास्थितपुष्पवंतयोर्दृगंशुसंपातभुवोतिभीष्मभाः ॥
काले पतंत्यर्णवचीवरातलं नरा· सदा मंगलभंगहेतव· ॥ ६२ ॥

अथोपजात्याऽस्यैव दुष्टपुरुषस्वरूपना ब्रूते—यदैकेति । कदा काले एकरेखास्थितपुष्पवन्तयोरेकरेखाधिष्ठितरविचद्रयोर्दृशौ तयोरशुसपातस्तेन सपातस्तस्माद्भवतीति तद्भुवो नाना अतिभीष्मभा अनिष्टकारकातय सदा निरतर मगलभगस्य पाणिग्रहणनाशस्य हेतव कारण भूता एव विधा नरा नरस्वरूपा अर्णवचीवरा भूमिस्तस्यास्तल पतति गच्छति । 'सागराद्रधे स्युर्नेतिमेखलाचरा' इति हेम ॥ ६२ ॥

सत्याः पुरादोर्ग्रहमंगलं शो बभूव तन्मंगलमाचचार ॥
कपालिनोमंगलमप्यहो स्राक् चैकार्गलोत्पन्ननृपातदोषात् ॥ ६३ ॥

अथास्यैव दुष्टता दर्शयन्नाह—सत्येति । 'व आयुक्तोथ श शभुः शा गौरी कमला-लया' इतिमोभरिवचनात् । श शभु पुरा पूर्वं सत्या पार्वत्या दोर्ग्रहमगल पाणिग्रहण मगलमाचचार चकार । च इत्यवधारणे । अहोइत्याश्चर्ये । तन्मगल पार्वत्या पाणिग्रहणमगल कर्तृभद । स्राक् शीघ्र कपालिनोपि मगल बभूव स्यात् । एकार्गलेपूत्पन्ना ये नरस्तेषा पातदोषात् अत्रशब्दच्छलेन कपालमस्त्यस्येतिकपालिनोभिक्षोरपि कुयोगान्मगल तद्धन्यस्य श्रीमत कथं न । अत्र कुयोगान्मगलमितिविरोधालकार । परिहारस्तु कपालिन ईश्वरस्य भिक्षोश्च मंगलमेव एतयोर्नैश्वरवस्त्वभावात् नतु श्रीमत्पुरुषस्येति । अथवा तन्मगलमिति कपालिनोमगल-भिति सत्त्वे षष्ठी बभूव । सती मगलमपि भिक्षाटन चकारेत्यर्थ । यतो भिक्षूणा मगल भिक्षेति 'सती शिवा महादेवी' इतिहेम ॥ ६३ ॥

ऐशं यतेद्धर्षणशूलसाध्यगंडे व्यतीपातकवैधृतीनाम् ॥
यद्वावसाने स्थितमृक्षमृक्षे चंडायुधं तत्र हि कालभं स्यात् ॥ ६४ ॥

अथ चडायुधमाह—ऐशमिति । यतता गच्छता हर्षणादियोगाना यद्वसानेऽन्ते स्थित-मृक्षं नक्षत्र तत्र तस्मिन्नक्षत्रे हि निश्चयेन ऐशमीशस्येद चडायुध स्यात् । कीदृश चडायुध काल भा कातिर्यस्य तत्कालभम् ॥ ६४ ॥

मरुस्थलीकच्छकलिंगवंगदेशान्नगेलां च शिवास्त्रपातः ॥
एकार्गलं दुष्यति नापरेषु देशेषु भौतावहितौ भवेताम् ॥ ६५ ॥

अत्रैतयोर्हेयस्थानमाह—मरुस्थलीति । शिवास्त्रपातश्चडायुधपात एकार्गलश्च मरुस्थ-ल्यादीन् नगेला पर्वतभूमि च दुष्यति । अपरेषु देशेषु इमौ तौ चडायुधैकार्गलावहितावशुभकरौ न भवेतामित्यर्थ ॥ ६५ ॥

निहंति काश्मीरवेंद्रयोरसौ समागधाख्यद्रविडारिमाणयोः ॥
एकार्गलोन्येषु न मंगलव्रजान्नित्याहतुर्गाल्वदेवलावपि ॥ ६६ ॥

इतिज्योतिर्विदाभरणे योगोत्पत्त्यध्यायो द्वितीय ॥ २ ॥

निहतीति । इतिगाल्वदेवलावपि ऋषी आहतु कथयत । इति किं । असावेकार्गल-

काश्मीरवरेंद्रयो काश्मीरवराडदेशयोर्मागमद्रविडाना सहितयोर्मंगलवनान्निहति विनाश यंति । अन्येषु देशेषु नेति ॥ ६६ ॥

इति श्रीपौर्णिमायगच्छाधीराजभट्टारकपुरंदरश्रीमहिमाप्रभसूरीश्वरचरणसरोरुहचंचरीकायमान
शिष्यभावरत्नविरचिताया श्रीकविकालिदासकृतज्योतिर्विदाभरणस्य
सुखबोधिकाया द्वितीयोध्याय समाप्त ॥ २ ॥

सदा श्रीमहिम्ना प्रभूणा सुनाम्ना शुभज्ञानरत्नाकर सूरिराज्ञाम् ॥
महीमडले स्याच्छियंकस्य नून श्रितस्यास्तमौख्यान्न सतापराशे ॥ १ ॥

॥ अथ भद्राप्रकरणम् ॥ ३ ॥

बवाह्वबालवकौलवतैतिलगरवणिजविष्टयः सप्त ॥
जगदुरथोतिचराणि तिथिखंडात्मकानि करणानि ॥ १ ॥

अथ तृतीयाध्याये प्रथममार्याभ्या सप्तकरणान्याह—बवेति । अथानतर ज्ञातव्य बवा हेत्येतेषा द्वद्व । इतिसप्तचराणि चलस्वरूपाणि तिथिखडात्मकानि तिथ्यर्द्धस्वरूपकाणि जगदु कथयामासु ॥ १ ॥

अचरायुतरंशकलाद्यामासन्ना चतुर्दशी तस्याः ॥
शकुनिचतुष्पदनागकिंस्तुघ्नानि भवंति करणानि ॥ २ ॥

अथ स्थिरकरणचतुष्कमाह—अचरेति । अमाया आसन्नं समीपममासन्न उत्तरखडे आद्यममासन्न यस्या साद्यामासन्ना चतुर्दशी एतेन कृष्णपक्षउत्तरखडश्च सूचित । तस्याश्चतुर्दश्या सकाशात् अचराणि शकुन्यादीनि करणानि भवति ॥ २ ॥

सितादेः करणं व्येको याततिथ्यर्धसंचयः ॥
सप्तभक्तोवशेषेण मितं स्याद्बवतो गतम् ॥ ३ ॥

अथानुष्टुभा करणानयनमाह—सितादेरिति । सितादे सितपक्षप्रतिपत्त । याततिगत करणसचय इति । कोऽर्थ । द्विगुणीकृतयाततिथौ अर्धसचय स गतकरणसचय व्येक एकेन रहित । पुन किंविशिष्ट । सप्तभक्तस्सप्तभिर्हृतोवशेषस्तेनमित प्रमित करण बवतो गत स्यादित्यर्थ ॥ ३ ॥

चराणि विष्टिं करणान्यृते च या भवंति सौम्याखिलकर्म्मसिद्धये ॥
तथैव धीराणि च पित्र्यकर्मणे विष्टिर्विघातादिविधौ वरा भवेत् ॥ ४ ॥

अथोपजात्यैषां फलमाह—चराणीति । विष्टिमृते विना चराणि करणानि सौम्याखिलकर्मसिद्धये शुभसमस्तकार्यसिद्धये भवंति । तथैव च पुनर्धीराणि स्थिराणि शकुन्यादीनि करणानि पित्र्यकर्म्मणे पूर्वजसंबन्धिकृत्याय भवन्ति पुनः सा विष्टिर्विघातादिविधौ वरा श्रेष्ठा भवेत् ॥ ४ ॥

भद्रा पुरा संयुग ईशविग्रहाद्बभूव वामीवदनामरासुरे ॥
लांगूलिनी सप्तशया त्रिपद्वती वराटिकादृग् घनघोषकस्वना ॥ ५ ॥

अथ सा क' विष्टिस्तदुत्पत्तिमाह—भद्रेति । पुरा पूर्वममरासुरे नाम्नि संयुगे संग्रामे भद्रा ईशविग्रहाच्छंभुशरीराद्बभूव संजाता । किंलक्षणा । वामीवदना वामी रासभी तद्वद्वदनं मुखं यस्याः सा । यतः । 'वामी शृगाल्यां करभीरासभीवडवासु च' इति हैमः । पुनः किंभूता । लांगूलिनी पुच्छयुक्ता । पुनः किंलक्षणा । सप्त शयाः कराः यस्यास्सा सप्तशया । 'पंचशाखः शयः समः' इति हैमः । त्रयः पादाश्चरणा विद्यते यस्याइतित्रिपद्वती । वराटिकादृक् कपर्दिकावत् दृशौ यस्यास्सा वराटिकादृक् । पुनः घनो निबिडः कुत्सितो घोषो घोषकः कुत्सितकांस्यं तद्वत्स्वनः शब्दो यस्याः सा । 'घनः कांस्ये विद्युतीयघोषे' इति हैमः । कुत्सितार्थे कप्रत्ययः ॥ ५ ॥

जाले प्रविष्टा कुणपांशुकांबरामरद्विषामग्रजकानने तदा ॥
परेतगा धूमनिभा बलोद्धता वात्येव साभूदतिदीर्घविग्रहा ॥ ६ ॥

जालइति । तदा सा भद्रा वात्या इव वातानां समूहो वात्या तद्वदतिदीर्घविग्रहाऽत्यायतशरीराऽभूत् । किंभूता । अमरद्विषां दैत्यानां जाले समूहे प्रविष्टा । पुनः किंभूता । कुणपांशुकानि शववस्त्राण्येवांबराणि यस्याः सा कुणपांशुकांबरा 'अजीवे कुणपं शव' इतिहैम. । अथवा कुणपांशुकांबरा शववस्त्रा । अंबरे गगनेऽमरान् द्विषंतीतितेषामंबरामरद्विषामित्यत्र योज्यम् । पुनः किंभूता । अग्रजाः पितरस्तेषां काननं वनं श्मशानं तस्मिन्परेतेन गच्छतीतिपरेतगा [illegible]ा । पुनर्धूमनिभा धूमसदृशी । पुनर्बलोद्धता शौर्योत्कटा । 'श्मशानं करवीरं स्यात् [illegible] इतिहैमः । प्रेतः परेतश्चामृते मृतविशेषे इति ॥ ६ ॥

[illegible]शिरेमरारयः क लिंदजासोदरधामपद्धतिम् ॥
[illegible]दं कर्पाद्दनो वह्न्यायुधानंदवतोमरुद्रया ॥ ७ ॥

[illegible]रयो दैत्यास्तस्याविष्टेः सकाशात् कलिंदजासोदरधामपद्धतिमानशिरे [illegible] तस्याः सोदरो यमस्तस्य धाम्नां गृहाणां पद्धतिः पंक्तिस्तां । [illegible]' इतिहैमः । अथ सा भद्रा कपर्दिन ईशस्य कर्णपदमवाप प्राप । [illegible] नंदवनः परमसुखयुक्तस्य । किंलक्षणा सा । वह्न्यायुधा अग्निशस्त्रा । पुनः किंभूता [illegible] यूनां रयोवेगस्तद्वद्वेगो यस्याः सा मरुद्रया ॥ ७ ॥

२९२ यंत्रमंत्रादिषु [illegible]
२९३ वेदमन्त्रारम्भ [illegible]
२९४ मंत्रादित्रितारंभ
२९५ मंत्रादिस्त्रा [illegible]
नमस्तमंत्रोपन्[illegible]
मन्त्रारंभेमीनारो[illegible]
न्यासंकात्यादि
निषेध.

विधेयमेवाग्निशिखाग्रतालुका फलं न साशेतवरात्ति मंगलम् ॥
नैरैरतः स्वात्महितोपलब्धिभिस्तदाश्रितं स्वाश्रितकर्मसिद्धिजम् ॥

अथास्या मुहूर्त्यनिषेधमाह—विधेयेति । शात् ईशान् इत प्राप्तो वरो यया शेतवरा साविष्टि फलमत्ति भक्षयति । किंभूता सा अग्निशिखा अग्नेर्वह्नेः शिखा ज्वाला तस्याग्रं तद्वत् तालुक यस्यास्सा । किंभूत फल स्वाश्रितकर्मसिद्धिज स्वयाविष्टचाश्रित विहितं कर्म तस्य सिद्धिस्तस्या जात भद्राया कृतकार्यनिष्पत्तिजातं अतोहेतोर्नरैरस्तदाश्रित विष्टिवेलाप्राप्त मंगलमुद्वाहादिक न विधेय न कर्त्तव्य । किंभूतर्नरै । स्वात्महितोपलब्धिभि स्वात्मने जीवाय हिता हितकारिणी उपलब्धिर्बुद्धि प्राप्तिर्ज्ञान वा येषा तरिति । 'उपलब्धिर्भवेज्ज्ञाने तथा प्राप्तिमनीषयो ' इतिमहीप ॥ ८ ॥

पक्षे वलक्षे 'शभवैवमुत्तरे तिथेर्मिताया निगमैर्भवैर्दले ॥
'स्यात्पंचदश्या विषभून्मिता तिथेर्धरोनितायाःशितिभे च साधके ॥ ९ ॥

अथविष्टिभोग्यकालमाह—पक्षेइति । वलक्षे शुक्लपक्षे निगमैर्वेदैश्चतुर्भिश्च पुनर्भवैरुद्रै-कादशभिर्मितायास्तिथेश्चतुर्थ्या एकादश्या उत्तरे दले शात् शिवाद्भवतीति शभवा भद्रा स्यात् चपुनरेव चतुर्दश्या पूर्णिमायाश्च पूर्वविषभूता सर्पेण मिता चासौ आसमस्ता तिथिश्च विषभून्मिता तिथिस्तस्या अष्टम्या आद्यके प्रथमे दले शभवा स्यात् । च पुन शिति कृष्णा भा कान्ति-र्यस्मिन् स तस्मिन् शितिभे कृष्णपक्षे धरोनिताया एकेन रहिताया पूर्वोक्तचतुर्थ्यादितिथे-स्तृतीयाया दशम्या उत्तरे दले पुनश्चतुर्दश्या सप्तम्या प्रथमे दले सा भद्रा स्यादित्यर्थ ॥ ९ ॥

नेष्टाः सदाऽशेषविनाडिका वरं चैके बुधाः पुच्छघटीत्रयं जगुः ॥
तस्या वरामह्वयपरार्द्धगा तिथेर्या तामसंतो निशि चादिगापरे ॥ १० ॥

नेष्टाइति । सदा बुधा क्रियाविधौ तस्याभद्राया अशेषा समस्ताघटीरिष्टाः श्रेष्ठा न जगु र्नोचु बुधा अस्या पुच्छ घटीत्रय चर जगुः अथ केषांचिन्मतमाह अपरेऽसतोऽमेधमो या भद्रा तिथेरपराद्धगा उत्तरदलस्थिताऽस्ति तामह्नि दिने वरा श्रेष्ठा जगु पुनर्या भद्रा तिथे रादिगा पूर्वदलस्थिताऽस्ति ता निशि रात्रौ वरा जगु ॥ १० ॥

भैः पंचभिर्दस्रकुभिर्नखैः स्यादस्या घटीभ्यः क्रमतो मिताभ्यः ॥
घटीत्रयं ल्हूनलता परं च सितेऽसिते चोत्क्रमतोपि भैभ्याः ॥ ११ ॥

अथास्या पुच्छनिवेरतामाह—भैरिति । सिते शुक्लपक्षे चतुर्थ्यां भै सप्तविंशतिभिर्मिताभ्यो घटीभ्य सकाशादस्याभैम्या विष्टेरपर घटीत्रय ल्हूनलता स्यात । क्रमत एवमष्टम्या पचभिर्मिताभ्यो घटीभ्य एकादश्या दस्रकुभिर्द्वादशभिर्मिताभ्य पूर्णिमाया नखैर्विंशतिभिर्मिताभ्य च पुनरसिते कृष्णपक्षे उत्क्रमतो वैपरीत्यचलनेनाऽपि तृतीयाया विंशतिभिर्मिताभ्य सप्तम्या-

द्वादशभिर्मितान्यः दशम्यां पंचभिर्मिताम्यश्चतुर्दश्यां सप्त विंशतिभिर्मित.भ्योऽपरं वटात्रिय लूनलना स्यात् । भीमात् ईशात् भवा भैमी 'भीमभर्गौ' इति हैमः । लूनलताशब्दोऽस्मिन्ग्रंथे बहुषु स्थानेषु पुच्छवाचको दृश्यते महाकविप्रोक्तत्वात्प्रमाणम् ॥ ११ ॥

निजः षडंशो लपनं गलः स्यात्त्रिंशल्लवरुर्यंशउरोंगभागः ॥
नाभिः कटिर्मार्गणभागकोस्याः शेषं च लां गूललतेशजायाः ॥१२॥

अथास्यादेहविभागमाह—निजेति । अस्याईशाज्जायतेऽइति ईशजा तस्या भद्राया निजः स्वकीयः शरीरापेक्षया षडंशः षष्ठोभागः पंच घट्यो लपनं वदनं स्यात् । एवं त्रिंशल्लवस्त्रिंशत्तमो भाग एका घटी गलः कंठः । त्र्यंशस्तृतीयो भागो दश घट्यउरो हृदयं । अंगभागः षष्ठो भागः पंच घट्यो नाभिः । मार्गणभागकः पंचमोभागः षड्घट्यः कटिः । शेषं त्रिमितघट्यो लांगूललता पुच्छलतेति ॥ १२ ॥

मयोदितो वर्ष्मविभाग एष त्रिंशद्घटीप्रख्यमितौ हि सत्याम् ॥
सयोपरैर्युक्तियुतोनसद्भिर्मान्यो निरुक्तोपमतः सदास्याः ॥ १३ ॥

अथ न्यूनाधिकभद्रायां भागविवेकतामाह—मयेति । हीतियुक्तार्थे त्रिंशद्घटीतुल्यमितैः भद्रायां सत्यां मदा मयाऽस्या भद्राया एष वर्ष्मविभाग शरीरविभाग उदितः कथितः । अत.कारणादपरैरनसद्भिर्विबुधैरस्याः सोयं विभागो मान्यो ग्राह्यः । स कः । योयुक्तियुतो निरुक्तः कथितः।कोऽर्थः। यदा भद्रा न्यूनाधिका स्यात्तदा भागोपि तत्सदृशो भवेत् ॥१३॥

विलीयतेऽर्थो लपने लयो गले तस्मादुरस्यर्थनिमीलनं कलिः ॥
नाभौ धियोरं विलयः कटिस्थले लूने च विष्टेर्विजयोऽनिशं भवेत् ॥१४

अथ भद्राङ्गविभागफलमाह—विलीयतइति । अनिशं निरंतरं विष्टेर्लपने मुखेऽर्थः कार्यं विलीयते विनाशमुपैति । तस्मात्तदनंतरं गले कंठे लयो मृत्युर्भवेत् । उरसि हृदि अर्थस्य पदार्थस्य निमीलनं हानिर्भवेत् । नाभौ कलि क्लेशः । अरं शीघ्रं कटिस्थले धियो बुद्धेर्विलयो नाश । लूने पुच्छे विजयो भवेत् । च पुनरर्थे । विलीयतेकर्तरिप्रयोगः । लयश्चेति-क्षयवाचकः । उक्तं च लघुस्तवे । 'लीयंते खलु यत्र कल्पविरमे ब्रह्मादयस्तेप्यमी' इति ॥ १४ ॥

रसातलस्था तिमिकार्मुकांगनाघटस्थिते राजनि भूमिगा भवेत् ॥
द्विरेफगोद्वंद्वनखायुधानुगे विष्टिर्दिविस्था ननु शेषराशिगे ॥ १५ ॥

अथ विष्टेः स्थितिनिर्णयमाह—रसेति । ननु निश्चितं तिमिर्मीनराशिः कार्मुको धनुः अंगना कन्या घटस्तुला एषां द्वंद्व एषु स्थिते राजनि चन्द्रे सति विष्टिरसातलस्था पातालस्थिता भवेत् । द्विरेफोऽलिः वृश्चिकः गौर्वृष द्वंद्वं मिथुनं नखायुध सिंहः एषां द्वंद्वः

एतान् राशीननुगः प्राप्तस्तस्मिन् राजनि एतद्राशिगतचंद्रे विष्टिर्भूमिगा भवेत् शेषराशिगे मेषकर्कमकरकुंभगते राजनि विष्टिर्दिविस्था स्वर्गस्थिता भवेदित्यर्थः ॥ १५ ॥

सा याति मन्वष्टगतिथ्युदन्वदिग्गीश्वरोपर्बुधसंमितादिषु ॥
तिथिष्वनिष्टाभिमुखी यथेयमैंद्रयाननाशाभ्यइतिक्रमःस्यात् ॥१६॥

अथ विष्टिगत्यभिमुखमाह—सायातीति । मनुश्चतुर्दश अहिरष्ट अगः सप्त तिथिः पंचदश उदन्वान् समुद्राश्चत्वारः दिक् दश ईश्वर एकादश उषर्बुधोऽग्निस्त्रयः एषां द्वंद्वः एभिः संमितासु प्रमितासु तिथिषु सा विष्टिरैंद्रयाननाशाभ्यः पूर्वप्रमुखकाष्ठाभ्यइति यथाक्रमं याति गच्छति । यथा चतुर्दश्यां पूर्वाभिमुखी । अष्टम्यामग्निदिङ्मुखी । सप्तम्यां दक्षिणाभिमुखी । पूर्णिमायां नैर्ऋत्यभिमुखी । चतुर्थ्यां पश्चिमाभिमुखी । दशम्यां वायव्याभिमुखी । एकादश्यामुत्तराभिमुखी । तृतीयायामीशानाभिमुखीइति । इयं विष्टिरभिमुखी अनिष्टा स्यात् ॥ १६ ॥

वार्वीतिहोत्रस्वपयातुधानकृत्त्यंबरप्रेतपकेन्द्रदिक्षु ॥
भद्राननं भीतिवहं निरुक्तं कृत्योद्यमानामृषिभिः क्रमेण ॥ १७ ॥

अथविशेषतआह—वारिति । ऋषिभिः क्रमेण कृत्येषु कार्येषूद्यमो येषां ते तेषां पुंसां भीतिवहं भयकारि भद्राननं विष्टिमुखं निरुक्तं प्रोक्तम् । कासु वारादिदिक्षु । वार्जलं वीतिहोत्रोऽग्निः स्वधनं एषां द्वंद्वः एतान् पातीतिपा. द्वंद्वे प्रत्येकस्यसंयोजनात् जलपोवरुणः अग्निपोऽग्निदेवः स्वपोधनपतिः यातुधानो राक्षस कृत्तिश्चर्मैवाम्बरं यस्य सकृत्त्यम्बरो रुद्रः प्रेतपो यमः को वायुः इंद्रः सुरपतिः एषां द्वंद्व एषांदिक्षु । स्पष्टार्थस्तु । चतुर्थ्यां पश्चिमायां भद्राननं एवमष्टम्यामग्नेय्यां । एकादश्यामुत्तरस्यां । पूर्णिमायां नैर्ऋत्यां । तृतीयायामैशान्यां । सप्तम्यां दक्षिणस्यां । दशम्या वायव्या । चतुर्दश्या पूर्वस्या । ग्रंथान्तरे तु यावत्संख्यादिगा तावत्संख्यामिते प्रहरे भद्रामुखम् । यथा चतुर्थ्यां पश्चिमाया चतुर्थे प्रहरे एवं सर्वमपीतिदृश्यते॥१७॥

क्ष्मया च दोर्भ्यामिषुभिः शिवैरिनैर्मितं रवौ यामदलं वरं विदुः ॥
विधौ भुवांकेरहिभिर्दिनैरिनैर्द्वाभ्यां सभद्रं स्वरशास्त्रदर्शिनः ॥१८॥

अथयामार्द्धमाह—क्ष्मयेति । स्वरशास्त्रदर्शिनः स्वरशास्त्रज्ञाः रवौ रविवारे क्ष्मयैकेन दोर्भ्यां द्वाभ्यां इषुभिः पंचभिः शिवैरेकादशभिरिनैर्द्वादशभिर्मितं यामदलं प्रहरार्द्धं वरं विदुः अवधारयंति । एवंविधौ चंद्रे भुवैकेनाकेनांकैर्नवभिरहिभिरष्टाभिर्दिनैः पंचदशभिरिनैर्द्वादशभिर्द्वाभ्यां मितं सभद्रं कल्याणसहितं यामदलं विदुः ॥ १८ ॥

अंकैरगैरग्निभिरंशुभिर्युगैर्दिग्भिर्नृपैः स्याच्च समं शुभं कुजे ॥
षष्टं द्वितीयं दशमं बुधे गुरौ तदक्षदोरंकदशाहिसंख्यया ॥ १९ ॥

अंकेरिति । कुजे भौमदिने अंकैर्नवभिरगैः सप्तभिरग्निभिस्त्रिभिरंशुभिर्द्वादशभिर्युगैश्चतु-र्भिर्दिग्भिर्दशभिर्नृपैः षोडशभिः समं सदृशं यामार्द्धं शुभं स्यात् । बुधे षष्ठं द्वितीयं दशमं या-मार्द्धं शुभं स्यात् । गुरौ अक्षाणि पंचदोषौ भुजौ द्वौ अंका नव दश अहयोऽष्टौ एषां द्वंद्वः एषां संख्ययासमं मितं तद्यामार्द्धं शुभं स्यात् ॥ १९ ॥

शरांगदिग्विश्वदिनेंद्रनागैर्भृगावभिन्नानि शुभान्यशंसन् ॥
शशांकविश्वेंद्रनृपेंद्रियैश्च यामार्द्धकानीह शनौ स्वरज्ञाः ॥ २० ॥

शरेति । इह स्वरज्ञाः भृगौ शुक्रदिने शरादिभिरेषां द्वंद्वः । एभिः पंचषड्दशत्रयोदशपं-चदशचतुर्दशाष्टभिरभिन्नान्यविच्छिन्नानि प्रमितानि यानि यामार्द्धकानि शुभानि अशंसन् कथयन् । शंसुकथने । चपुनरेव स्वरज्ञाः शनौ शशांकादिभिरेषां द्वंद्वः एभिरेकत्रयोदशचतुर्दश-षोडशपंचभिः प्रमितानि यामार्द्धानि शुभानीत्यर्थः ॥ २० ॥

विष्टिः स्याद्धरितालिकार्चनविधावुत्सर्गजातक्रिया-
वैमेयेषु शिवार्ययोः फलवती होमे सदैवार्चने ॥
सोपाकर्म्महुताशनीजलधरार्चापाकयज्ञक्रिया-
स्वारब्धेऽध्वरकर्म्मणीष्टयजने भूपप्रदाने तथा ॥ २१ ॥

अथ शार्दूलविक्रीडितेन पूजाविशेषादौ विष्टिं शुभामाह—विष्टिरिति । विष्टिर्हरितालिकार्च-नविधौ भाद्रपदशुक्लतृतीयाहरितालिकाभिधा तस्या व्रतपूजाविधाने सदैव फलदायिनी स्यात् । एवमुत्सर्गजातक्रियावैमेयेषु उत्सर्गो नीलोद्वाहः जातक्रिया शिशूनां घृतप्राशसंस्कार-क्रिया वैमेयो विनिमयः एषां द्वंद्वः एषु च पुनः शिवार्ययोः शंभुगौर्योरर्चने पुनर्होमे पुनरुपाकर्महुताशनीजलधरार्चापाकयज्ञक्रियासु उपाकर्म प्रथममारभ्यमाणं श्रावणीकर्म्म हुताशनी होलिका जलधराजलाशयाः कूपादयस्तेषामर्चा प्रतिष्ठा पाकः पचने यज्ञः एषां द्वंद्वः एषां क्रियासु पुनः आरब्धे प्रारंभितेऽध्वरकर्मणि यज्ञकृत्ये तथा इष्टयजने तथा भूपप्रदाने राज्ञा दत्तवस्तुनि फलवती स्यात् । 'दक्षजाया कुमारी' इति हैमः ॥ २१ ॥

भद्राविहितकार्याणां नृपभूदेवताज्ञया ॥
नृणां सफलयत्यर्थं सा वा भर्गसपर्यया ॥ २२ ॥

इति श्रीकविकालिदासोदिते ज्योतिर्विदाभरणे भद्राध्यायस्तृतीयः ॥ ३ ॥

अथानुष्टुभा पूजादिहेतुना विष्टिं शुभामाह—भद्रेति । साविष्टिः भद्रा भद्रायां विहितं निर्मितं

कार्यं येस्ते तेषां नृणां पुंसामर्थं पदार्थं सफलयति सफलं करोति । त्रिर्डित्करणे इतित्रि । कथं नृपो राजा भूदेवता विप्र एतयोराज्ञयादेशेन भर्गसपर्यया शंभुपूजया चेत्यर्थ ॥ २२ ॥

इति श्रीपौर्णिमीयगच्छाधीराजभट्टारकपुरंदरश्रीमहिमाप्रभसूरीश्वरचरणसरोरुहचंचरीकायमान शिष्यभावरत्नविरचिताया श्रीकविकालिदासकृतज्योतिर्विदाभरणस्य सुखबोधिकाया भद्राध्यायस्तृतीय ॥ ३ ॥

गच्छेश्रीमहिमाप्रभाख्यसुगुरो श्रीपौर्णिमीयाभिधे ।
शिष्य सूरिवरस्य माण्डणसुतो यो भावरत्नाह्वय ॥
माल्हाकुक्षिसमुद्भव सुकृतवान् श्रीपत्तने पत्तने ।
छंदोव्याकरणाभिधानस्मरणतोलंकारयुक्तामिमाम् ॥ १ ॥

॥ पर्वप्रकरणम् ॥ ४ ॥

सुयोगवत्याश्रितपर्वकाला तिथिर्भवेन्मंगलकार्यहंत्री ॥
पर्वाण्यथो मंगलसिद्धयेऽहं तच्छुद्धये वच्मि विपर्वदोषात् ॥ १ ॥

अथ चतुर्थोऽध्याय । तत्र प्रथममुपजातिभ्यामाह—सुयोगेति । सुयोगवती शुभयोगयुक्तापि तिथिर्मंगलकार्यहंत्री उद्वाहादिकार्यनिष्पत्तिविनाशिनी भवेत् । किंविशिष्टा तिथिराश्रितपर्वकाला कुह्वादिपर्ववेलायुक्ता अत कारणादहं पर्वाणि वच्मि ब्रवीमि किमर्थं विपर्वदोषात् विगतपर्वदोषात् मंगलसिद्धये विवाहादिकार्यनिष्पत्त्यै किंभूतायै तस्यास्तिथे शुद्धिर्यस्या सा तच्छुद्धिस्तस्यै ॥ १ ॥

कुहूः सिनीवाल्यपि रोहिणीविभावादर्शिते दर्शितमंडले क्रमात् ॥
स्तोमेनुमत्यह्नि च पूर्णिमास्यथो राकारजन्यामुदिते विधाविह ॥२॥

अथ पर्वाण्याह—कुहूरिति । क्रमादनुक्रमेण आदर्शितेऽदृष्टमंडले दर्शितमंडले च रोहिणीविभौ चंद्रे सति कुहू सिनीवाली द्वे अपि अमावास्ये स्त भवत । यदुक्तं हेमचंद्रपादे । 'सा नष्टेंदु कुहू दृष्टेंदु सिनीवाली' इति । अथो चपुनरिह विधौ चंद्रेऽह्नि दिवसे उदिते रजन्यामुदिते च सति अनुमती राका द्वे अपि पूर्णिमे स्त । यदुक्तं 'कलाहीने त्वनुमती राका पूर्णे निशाकरे' इति ॥ २ ॥

ग्रहस्ययोस्त्वरिमंत्रयोर्मिथः स्वरिष्फयो गहुनुपागरोचिषोः ॥
किलैकराश्यो· समसप्तमस्थयोर्भवेत्सदैवं ग्रहपर्वसंभवः ॥ ३ ॥

अथ वंशस्थेन ग्रहणमाह—ग्रहेति । किलेति संभावनायां । अत्रारिसंज्ञयोः अत्ता च अरिश्च अत्ररी तयोः संज्ञा ययोस्तौ तयोर्मृत्युरिपुसंज्ञयोः पुनः स्वरिष्फयोर्धनव्ययोर्मिथः परस्परगृहस्थयो राशिस्थितयो राहुतुषाररोचिषोः राहुचंद्रयोः सतो. सदैवं ग्रहपर्वसंभवो ग्रहणपर्वसंभवो भवेत् । पुनः किंविशिष्टयो राहुचंद्रयोरेकराश्योरेकराशिर्ययोस्तौ तयोः सतोस्तदापि अयं स्यात् । पुनः किंभूतयो राहुचंद्रयोः समसप्तमस्थयोरुभयतः सप्तमराशिस्थितयोः सतोस्तदाप्ययं स्यात् ॥ ३ ॥

अमावसान्तं दिवसे रजन्यामन्तो यदि स्यात्सितपंचदश्याः॥
तदोपरागो गणितादरम्यः स्पष्टः शुभे कर्मणि चापि साध्यम् ॥४॥

अथोपजात्या ग्रहणकालमाह—अमेति । यदि चेद्दिवसेऽमावसान्तं अमावास्याया अंतः स्यात् एवं रजन्यां सितपंचदश्याः शुक्लपौर्णिमायाअंतः स्यात्तदा गणितात् गणितमार्गादुपरागो ग्रहणं स्पष्टः । किंलक्षण उपरागः शुभे कर्मण्यरम्यो निंद्यः । अतएव च पुन शुभे कर्म्माणि दैवाज्जाते साध्यं शांतिककर्म्म कर्तव्यं । अथवाऽत्र निमित्तार्थे सप्तमी शुभनिमित्त तदवसरे साध्यं दानं देयमित्यर्थः ॥ ४ ॥

यदंशुदोषेश्वरपर्वसंस्थं भमेव यावन्नहि तावदर्हम् ॥
दिवौकसां यामचतुष्टयं स्याच्छयाग्रहाद्याखिलमंगलेषु ॥ ५ ॥

अथोपेंद्रवज्रया हुतं भं कियत्पर्यंतं हेयं तदाह—यदिति । यावद्दिवौकसां देवाना यामचतुष्टयं मासषट्कं अंशुः सूर्यो दोषाया रात्रेरीश्वरश्चंद्रस्तयोः पर्वसंस्थ ग्रहणवेलागतं यद्भं नक्षत्रं स्यात्तावत्कालपर्यन्तमेव तन्नक्षत्रमर्हं योग्यं नहि स्यात् । केषु शयाग्रहाद्याखिलमंगलेषु शयो हस्तस्तस्य ग्रहः पाणिग्रहणं तदाद्यानि अखिलानि मंगलानि तेष्वित्यर्थः ॥५॥

कृत्स्ने विपादे शकलेंघ्रितुल्ये क्रमाद्रवींद्वोर्ग्रहणे सुकार्यम् ॥
कार्यं नगैः ७ पंचभि५रर्णवैश्च ४ रामैरपास्यैव मितान्यहानि ॥६॥

अथोपजात्या न्यूनाधिकग्रहणे हेयदिनविवेकतामाह—कृत्स्न इति । रवीन्द्वोः कृत्स्ने संपूर्णे ग्रहणे विबुधैर्नगैः सप्तभिर्मितान्यहानि दिनान्यपास्य विहाय सुकार्यं शुभकृत्यं कर्तव्यम् । एवं क्रमात् विपादे विगतः पादश्चतुर्थांशस्तस्मिन् पादत्रये ग्रहणे पंचदिनानि । शकलेऽर्द्धग्रहणे चतुर्दिनानि । अंघ्रितुल्ये एकपादमिते ग्रहणे त्रिदिनानीति स्पष्टम् ॥ ६ ॥

भुक्तं युतं भोग्यमसाधुना भं दिवौकसा विद्धमथाऽऽहवस्थम् ॥
खपांथयोर्भेदितमंडलं वा ज्ञेयं तदुत्पातहतं ग्रहज्ञैः ॥ ७ ॥

तदोचितं मंगलके तदृक्षं यदेंदुराक्रम्य पुनर्भुनक्ति ॥
आमासपट्कं ग्रहयोगगं तत्सदूषणं केचिदुशन्त्यथर्क्षम् ॥ ८ ॥

अथ क्रूराक्रान्तभमाह–भुक्तमिति तदेति युग्मम् । ग्रहक्रैर्मंगलके विवाहादौ तदा उचित भं ज्ञेयं । किंविशिष्टं भं असाधुना क्रूरेण दिवौकसा ग्रहेण भुक्तं गतकाले अथवा युतं वर्तमानकाले अथवा भोग्यं समीपागामिकाले अथवा विद्धं पंचसप्तशलाकायंत्रे । अथवाऽऽहवस्थं संग्रामस्थितम् । अथवा खपाथयोर्ग्रहभेदितमंडले । अथवा तदुत्पातहतं तेषां प्रसिद्धानां दिव्यभौमान्तरिक्षाणामुत्पातास्तदुत्पातस्तेन हतं । यदुक्तं । "क्रूरैर्युक्तं क्रूरगन्तव्यमृक्षं क्राक्रान्तं क्रूरविद्धं च नेष्टम् । यच्चोत्पातैर्दिव्यभौमान्तरिक्षैः पुष्टं तद्वत्क्रूरलत्ताहतं च" तदा कदा यदा इंदुराक्रम्य तन्नक्षत्रं पुनर्भुनक्ति । अथ केचिदाचार्या आमासषट्कं ग्रहयोगगं ग्रहणसंयोगमाप्तं तन्नक्षत्रमार्क्षं सदूषणं दोषसहितमुशन्ति वाञ्छन्ति ॥ ८ ॥

हुताशनाग्न्यागशराग्निभूमयो युगाग्निबाणाक्षयमाग्निपक्षः ।
धरेन्दुवेदार्णवरामशंभवो वार्यग्निरामाब्धिशता१०० क्षिद्विग्रदाः३२ ॥९॥
मयोदितास्तारकतारका इमे क्रमेण नासत्यभतः स्वकर्मगाः ॥
भाश्चर्यनिध्यानकहेतवे तथा वक्ष्ये भरूपध्रुवसायकानहम् ॥ १० ॥

अथ तारकाणां तारकसंख्यामाह–हुतेति मयोदितेति युग्मम् । मयानासत्यभतोऽश्विनीनक्षत्रारम्भक्रमेण हुताशनादिसंख्याका इमे तारकतारका उदिताः कथिताः । तारकाणां नक्षत्राणां तारका तारा तारकतारका किंविशिष्टा तारकतारका स्वकर्मगा निजकार्यानुगता । स्पष्टमाह—अ. ३ भ ३ कृ. ६ रो. ५ मृ. ३ आ. १ पु ४ पु ३ आ. ६ म. ५ पू. २ उ. २ ह ५ चि १ स्वा १ वि ४ अ ४ ज्ये. ३ मू ११ पू ४ उ ३ श्र ३ ध ४ श १०० पू २ उ. २ रे ३२ इति । अथ भरूप १ ध्रुव २ सायकाना ३ । अहं तथा तेन प्रकारेण भरूपादीन् वक्ष्ये कथयिष्ये । भानां नक्षत्राणां रूपाण्याकाराः ध्रुवाः राश्यंशाश्च सायकाः बाणाश्चेति द्वंद्वः भरूपेत्र सयोगनत्वात्तान् । कस्मै भाश्चर्यनिध्यानकहेतवे भानां दीप्तानां चर्यं स्वरूपं भाश्चर्यस्य निध्यानकं तस्य हेतुस्तस्मै ॥ ९ ॥ १० ॥

हयाननाभं च वरांगरूपं क्षुरोपमं ज्योतिरनःप्रकामम् ॥
कुरंगकाभं मणिना सदृक्षं निकेतनाकारमथेषुरूपम् ॥ ११ ॥

अथ प्रथमं काव्यचतुष्टयेन भरूपमाह—हयेति रथेति सर्पेति ज्योतिरिति । इहास्मिन् शास्त्रे इति ताराणां स्वरूपं नक्षत्रमंडलरूपमुक्तं । इमानि किं तदाह ज्योतिर्निगप्रमश्विन्यादि । अश्विनीभं हयस्याननं—— ——ऽऽभा इवाभा यस्य तत् तुरगमुखाकारम् ॥ भ०

वरांगरूपं योन्याकाम्। कृ० क्षुरोपमं मुण्डनोपकरणाकारं । रो०अनः प्रकामं शकटोन्यया-नम् । मृ०कुरंगस्य कं मस्तकं मृगस्य मस्तकं तद्वदाभा यस्य तत् मृगमूर्द्धाकारम् । आ०मणिना रत्नेन सदृशं समानं । पु०निकेतनाकारं गृहाकारं पु०इपुरूपं बाणाकारम् ॥ ११ ॥

रथांगशालाशयनोपमानि शय्यासमं दोःप्रतिमं भमुक्तम् ॥
मुक्तात्मकं विद्रुमतोरणाभे मणिश्रवोवेष्टनतुल्यरूपे ॥ १२ ॥
सकोपकंठीरवविक्रमप्रभं तल्पाकृतीभस्य विलासवत्स्थितम् ॥
शृंगाटकव्यक्ति च तार्क्ष्यकेतुभं त्रिविक्रमाभं च मृदंगसन्निभम्॥१३॥

आ० रथांगं चक्रं तद्वदुपमम् । म. शालोपमम् । पू.शयनोपमं मंचकोपमम् । अत्रैषां द्वंद्वे प्रत्येकं संयोजनात् । उ.शय्यासमम् । ह.दोःप्रतिमं हस्तसदृशम् । चि.मुक्तात्मकं मौक्तिकसदृशम् । स्वा.द्रुमाभं प्रवालाकारं । वि.तोरणाभं अनयोर्द्वन्द्वे द्विवचनं । अ.मणितुल्यरूपं । ज्ये.श्रवसः कर्णस्य वेष्टनं कुंडलं तत्तुल्यम् । अनयोर्द्वन्द्वे द्विवचनं प्रत्येकं योजनीयम् । मू.कोपेन सह वर्तमानः सकोपः एवंविधो यः कंठीरवः सिंहस्तस्य विक्रमप्रभं उत्पतनोद्यमतुल्यम् । पू०तल्पाकृति मंचकाभम् । उ०इभस्य गजस्य विलासवत्स्थितम् । अ०शृंगाटकव्यक्ति जलकंदाकारम् । तार्क्ष्यकेतुर्विष्णुस्तद्वत् श्रवणः त्रिविक्रमाभं विष्णुचरणाकारम् । ध०मृदंगसन्निभम्॥१२॥१३॥

ज्योतिःशतांगांगसमानरूपं ततोन्यदृक्षं यमलद्वयाभम् ॥
शय्यासवर्णं मुरजप्रकाममितीह तारापटलस्वरूपम् ॥ १४ ॥

ज्योतिः शतभिषक् शतांगो रथस्तस्यांगं चक्रं तेन समानरूपं चक्रसदृशं ॥ 'शतांगः स्यंदनो रथः' इतिहैमः ॥ ततोऽन्यदृक्षं पू०यमलद्वयाभं यमलोद्गतनरुद्वयसदृशम् । उ०शय्यासवर्णं तल्पसमानम् । रे०मुरजप्रकामं मृदंगसमानामिति । चकाराःपुनरर्थाः ॥ १४ ॥

ज्ञेयाः सदैवोत्तरपार्श्वसंस्था विश्वार्यमांभोजपदिंदुभानाम् ॥
द्विदैवतस्यापि च योगतारा बुधैरहिर्बुध्न्यभगादिभानाम् ॥ १५ ॥

अथ तारकतारकाणां स्थानकमाह—ज्ञेया इति । बुधैरहिर्बुध्न्यभगादिभानामुत्तराभाद्रपदापूर्वाफाल्गुन्यश्विनीनां च पुनः विश्वे उत्तराषाढा अर्यमा उत्तराफाल्गुनी अंभो जलं पूर्वाषाढा अजपात् पूर्वाभाद्रपदा इन्दुभं मृगशीर्षं एषां द्वंद्वः । एषां पुनर्द्विदैवतस्य विशाखायाः योगताराः ताराणां योग स योगो योगताराः सदैव उत्तरपार्श्वसंस्थाः उत्तरदिक्समीपस्था ज्ञेया इत्यर्थः ॥ १५ ॥

प्राचीनबर्हिःश्वसनाशनाशनध्वजेज्यमित्राग्रजराजयोषिताम् ॥
विलोकनीया ननु मध्यमास्तथा वसूडुनः पश्चिमभागसंस्थिताः॥१६

प्राचीति। ननु निश्चितं बुधैः प्राचीनबर्हिरिंद्रो ज्येष्ठा। श्वसनो वायुः सवाऽशनं यस्य स श्वसनाशनः सर्पः सएवाऽशनं यस्य स श्वसनाशनाशनो गरुडः ध्वजश्चिन्हं यस्य स श्वसनाशनाशनध्वजो विष्णुः श्रवणः। इज्यः पुष्यः। मित्रोऽनुराधा। अग्रजा विप्रास्तेषां राजा चंद्रस्तस्य योषितः स्त्रियो नक्षत्राणि। आसां द्वंद्वः तासां। अत्र प्राचीनबर्हादीनामग्रजराजयोषितो नक्षत्राण्येवं समासो घटते तथापि स्वाम्यग्रे नक्षत्रनामस्थापनासुर्नीयत्वादेव वक्ष्यमाणाधिकारेऽपि ज्ञातव्यम्। तथा वसूडुनो धनिष्ठाया मध्यगास्ताराः पश्चिमभागसंस्थिता विलोकनीयाः 'द्यग्रोम्यां जातिजन्मजाः' इति हैमः॥ १६॥

पित्र्यंतकोपर्बुधपूपभानामाशागता हंसभुवोऽथ तारा॥
नक्तंचरादित्यहितारकाणामैंद्र्याश्रिता धातुरथोडुनः स्यात्॥ १७॥
द्वितीया योगतारा स्यात्प्रतीच्युत्तरतारयोः॥
पश्चिमार्कोडुनो या सावशेषाणां यथाप्रति॥ १८॥

पित्र्यामिति। पितरो मघा अंतको भरणी उपर्बुधोऽग्निः कृत्तिका पूपभं रेवती एषां द्वंद्वः तेषां ताराः हंसात्सूर्याद्भवतीति हंसभूर्यमस्तस्याशा दक्षिणा ततो ज्ञेयाः। अथ नक्तंचरो राक्षसो मूलं आदितिः पुनर्वसू अहितारका आश्लेषा आसां द्वंद्वः तासां ताराणां तारा ऐंद्र्याश्रिताः पूर्वादिग्गता ज्ञेयाः। अथ धातुर्ब्रह्मण उडुनो रोहिण्या या द्वितीया तारा पुनरर्कोडुनो हस्तस्य या पश्चिमा परमा ताराऽस्ति सा प्रतीच्युत्तरतारयोः पश्चिमदिगुत्तरदिग्गततारयोर्योगतारा संयोगतारा स्यात्। प्रतीच्युत्तरयोरत्र संबंधे षष्ठी। अथाऽवशेषाणां नक्षत्राणां तारा यथाप्रति यथा योग्यं स्थानं ज्ञातव्याः। या एकतारा द्वयोर्नक्षत्रयोस्तारकाणां मध्ये गणनां माप्नोति सा योग तारा कथ्यतेऽत्र विस्तरेण ग्रंथान्तराच्चिंत्यमित्यर्थः॥ १७॥ १८॥

कुंभीनसा भूमियमा गजाग्नयस्ताना द्वितर्का रसषड्युगग्रहाः॥
षडंबरोर्व्योगदिशोंकहेलयो भुजंगमेंद्राः शरमार्गणेंदवः॥ १९॥

अथ काव्यत्रयेण भध्रुवकांशानाह—कुंभीति। आदिमादश्विनीतो ध्रुवकांशका ध्रुवचाः क्रमेण स्युः। कतिसंख्याकास्तानाह। अ० कुंभीनसाः सर्पाः अष्टौ। 'कुंभीनसाशीविषर्दीर्घपृष्ठाः' इति हैमः। भ० भूमियमाः एकविंशतिः। कृ० गजाग्नयः अष्टत्रिंशत्। रो० तानाः संगीतशास्त्रप्रसिद्धाः एकोनपंचाशत्। मृ० द्वितर्काः द्विषष्टिः। आ० रसषट् षट्षष्टिः। पु० युगग्रहाः चतुर्नवतिः। पु० षट् च अंबरं च उर्वी च षडंबरोर्व्यः षडधिकशतम्। अ० अगदिशः सप्ताधिकशतम्। म० अंकहेलयः एकोनत्रिंशदधिकशतं। पू० भुजंगमेन्द्राः अष्टचत्वारिंशदधिकशतम्। उ० शरमार्गणेंदवः पंचपंचाशदधिकशतमित्यर्थः॥ १९॥

खात्यष्टयो रामभुजंगमेंदवोऽभ्यंकेन्दवो लोचनभूमिवाहवः॥
जिनाश्विनो व्योमहुताशनाश्विनो ध्रुव्याश्विनो मार्गणमार्गणाश्विनः॥२०

हृ० स्वात्यष्टय सप्तत्यधिकशतं । चि० रामभुजंगमेन्दव त्र्यशीत्यधिकशतं । स्वा० अहर्केंदव. अष्टनवत्यधिकशतं । वि० लोचनभूमिबाहव द्वादशाधिकद्विशतं । अ. जिनाश्विनः चतुर्विंशत्यधिकद्विशत । ज्ये० व्योमहुताशनाश्विन त्रिंशदधिकशतद्वयम् । मू० ग्रब्ध्याश्विन. द्वाचत्वारिंशदधिकशतद्वयम् । पू० मार्गणमार्गणाश्विनः पचपंचाशदधिकशताद्वयम् ॥ २० ॥

धरांगदस्राश्च युगांगलोचनाः शराद्रिदोर्पांबरसिंधुराश्विनः ॥
नभोरदा तत्वगुणा नगामराः खमादिभाद्ध्रुवकांशकाः क्रमात्॥२१

उ०धरांगदस्राः एकषष्ठ्यधिकशतद्वयम् । अभि०युगांगलोचनाः चतुःषष्ठ्यधिकशतद्वयम् । श्र०शराद्रिदोष पंचसप्तत्यधिकशतद्वयम् । ध०अंबरसिंधुराश्विनः अशीत्याधिकशतद्वयम् । श० नभोरदा विंशत्यधिकशतत्रयम् ॥पू०तत्त्वगुणाः पंचविंशत्यधिकशतत्रयम् ॥ उ०नगामरा सप्तत्रिंशदधिकशतत्रयम् । रे०खं शून्यमिति ध्रुवांशका ॥ २१ ॥

सौम्या दिशोर्का विशिखाश्च दक्षिणाः शिलीमुखा व्योमधराः कपालिनः॥
उदग्रसाः पत्ररथायनं ततो हरेर्दिशं वारिधिचीवराधराः ॥ २२ ॥

अथ भसायकलवानाह काव्यत्रयेण—सौम्येति । सदा उडुनोश्विन्यादेर्नक्षत्रस्य अमी स्फुटा. बाणलवा स्वाऽपमयोगतारयोः निजक्रातियोगतारयोरंतरे विचाले स्युरित्यन्वय । अग्रे ते कथ्यंते । सौम्या उत्तरा दिग् । अ० दिशो दश बाणलवा एवं भ० अर्का. द्वादश । कृ० विशिखा बाणा पंच रो० दक्षिणा दक्षिणदिग्गा शिलीमुखा पच । मृ० व्योमधराः दश । आ० कपालिन एकादश । पु० उदग् उत्तरदिग्गा रसा. पट् । पु० पत्ररथानां पक्षिणामयनं मार्गो व्योम शून्य । आ० हरेर्यमस्य दिशं दक्षिण यथा स्यात्तथा वारिधिचीवरा धरा वारीणि धीयतेऽस्मिन्निति वारिधि समुद्र स एव चीवरं वस्त्र यस्या सा वारिधिचीवरा भू ता धरतीति वारिधिचीवराधरा. पर्वता भूधरा सप्त ॥ २२ ॥

सौम्याः खमर्काश्च धनंजयेंदवोऽपागीश्वरा द्वावुदगद्रिवह्नयः ॥
याम्या धरा द्वौ दहना भुजंगमाः शिलीमुखाः पंचलवाः क्रमादतः ॥२४

म० सौम्या उत्तरादिग्गा ख शून्य । पू० अर्काः द्वादश उ० धनजयेंदवोऽग्निचंद्रास्त्रयोदश । ह० अपाग् दक्षिणादिग्गा ईश्वरा एकादश । चि० द्वौ । स्वा० उदग् उत्तरदिग्गा अद्रिवन्हय सप्तत्रिशत् । वि० याम्या दक्षिणगा धरा एक । अ० द्वौ । ज्ये० दहनास्त्रयः । मू० भुजंगमा अष्टौ । पू० शिलीमुखा पच । उ० पचलवा क्रमादत ॥ २३ ॥

सौम्या द्वितर्काः खगुणा रसाग्नयः खमागमाक्षीणि नगाश्विनो नभः
स्युरंतरे स्वापमयोगतारयोरमी स्फुटा बाणलवाः सदोडुनः ॥ २४ ॥

अ० सौम्या उत्तरगा द्विलर्का: द्विपष्टिः। श्र० खगुणास्त्रिंशत् । ध० रसाग्नयः षट्त्रिंश॥ श०खंशून्यं । पू० आगमाक्षीणि चतुर्विंशतिः ॥ उ० नगाश्विनः सप्तविंशतिः । रे० नभः शून्यं इति बाणलवाः ॥ २४ ॥

अ०	भ०	कृ०	रो०	मृ०	आ०	पु०	पु०	श्ले०	म०	पु०	उ०	ह०	चि०	स्वा०
०	०	१	१	२	२	३	३	३	४	४	५	५	६	६
८	२१	८	१९	२	६	४	१६	१७	९	२८	५	२०	३	१८
०	०	०	०	०	०	०	०	०	०	०	०	०	०	०
०	०	०	०	०	०	०	०	०	०	०	०	०	०	०
०														
१०	१२	५	५	१०	११	६	०	७	०	१२	१३	११	२	३७
उत्तर	उत्तर	उत्तर	दक्षिण	द०	दक्षिण	उत्तर	उत्तर	दक्षिण	उ०	उत्तर	उत्तर	द०	दक्षिण	उत्तर

वि०	अ०	ज्ये०	मू०	पु०	उ०	अ०	श्र०	ध०	श०	पू०	उ०	रे०	अ०
७	७	७	८	८	८	८	९	९	१०	१०	११	०	ध्रु०
२	१४	२०	२	१५	२१	१८	५	१०	२०	२५	७	०	
०	०	०	०	०	०	०	०	०	०	०	०		
०	०	०	०	०	०	०	०	०	०	०	०		
१	२	३	८	५	५	६२	३०	३६	०	२४	२७	००	
दक्षिण	दक्षिण	दक्षिण	दक्षिण	दक्षिण	दक्षिण	उत्तर	उत्तर	उत्तर	उत्तर	उत्तर	उत्तर	.	

स्फुटो यदा राशिमुखो नभश्चरः सेषुस्तदा भध्रुवकेन सेषुणा ॥
तज्ज्योतिषः स्याद्विभिनत्ति मंडलं समः सभोत्पातमुशंति कोविदाः ॥२५॥

अथ भिन्नमंडले नक्षत्रोत्पातमाह—स्फुट इति । यदा राशिमुखः राशिप्रमुख स्फुटः स्पष्टः सेषु सह इषुणा शरेण वर्तमानो यः स एवंविधो नभश्चरो ग्रहः सेषुणा शरसहितेन भध्रुवकेण समः सदृशः स्यात्तदा स ग्रहः तज्ज्योतिषस्तदेव ज्योति स्तज्ज्योतिस्तस्य नक्षत्रस्य मंडलं भिनत्ति कोविदाः पंडितास्तद्भोत्पातं नक्षत्रोत्पातमुशंति कथयंतीत्यर्थः ॥ २५ ॥

समागमोंशांतरसंस्थयोर्भवेन्मिथोंशुयोगे च परस्परं तयोः ॥
तद्गोविमर्दे मृधमर्कसंयुता उल्लेखनं भेदयुतिर्विभेदः ॥ २६ ॥

अथ ग्रहनक्षत्रसंगमाधिकारमाह—समेति । अंशांतरसंस्थयोर्भ्वेकांतरस्थितयोस्तयोर्ग्रह नक्षत्रयोर्मिथः परस्परमंशुयोगे किरणयोगे सति समागमः संगमो भवेत् । च पुनः परस्परं तद्गोविमर्दे तयोर्ग्रहनक्षत्रयोर्गावः किरणास्तेषां विमर्दो व्यालोडनं तस्मिन्सति मृधं

युद्ध भवेत् । पुनरर्कसंयुतौ नक्षत्रसूर्ययोर्युतौ सयोगे उल्लेखन भवेत् । तयोर्विभेदतो भेदयुतिर्भवेत् ॥ २६ ॥

खगोडुनोर्वा खगयोर्द्वयोर्यद्विभेदयोगाश्रितमृक्षमर्हम् ॥
नामासषट्कं शुभमंगले स्यादुल्लेखनाभ्यागमगं समांघ्रिम् ॥२७ ॥

अथ तद्गत भ दूषयति—खगेति । खगोडुनोर्ग्रहनक्षत्रयोर्वाथ खगयोर्ग्रहयोर्द्वयोर्विभेदयो राश्रित यदृक्ष तदृक्ष शुभमगले आमासषट्क षण्मासपर्यन्तमर्हं योग्य न स्यात् । पुनस्तदृक्षमुल्ले खनाभ्यागमग उल्लेखनगत युद्धगत च समाङ्घ्रि समाया वर्षस्याङ्घ्रिश्चतुर्थांशस्तत्पर्यंत मासत्रय शुभकार्येहं न स्यात् । अभ्यागम समरेतिके "पाति रोधेम्युपागमे" इतिहेम । समाङ्घ्रिमिति कालाध्वनोर्नैरतर्ये द्वितीया ॥ २७ ॥

परस्परस्थं च तयोरनाहतं मासद्वयं यावदुडुद्वयं तथा ॥
मासोरशेषासुसमागमस्थितं क्रियासु मासं यदसाध्वधिष्ठितम् ॥२८॥

परस्परस्थमिति । तयोर्ग्रहनक्षत्रया परस्परस्थ यदुडु बुधैस्तदुडु मासद्वय यावदाहत न अगीकृत न कासु अशेषासु क्रियासु । एव तथा सम गमस्थित नक्षत्र मासोर्मासयोर्द्वयम् । यदसाध्वधिष्ठित क्रूरग्रहाश्रित नक्षत्र मासमिति शेषं योज्यम् ॥ २८ ॥

स्यातां समावर्कविभावरीशयोर्भसोमयोर्वार्कभयोरपक्रमौ ॥
स्फुटौ तदायं क्रमसाम्यसंज्ञकं पर्वोदितं यद्यथ पुण्यसिद्धिदम् ॥२९॥

अथक्रांतिसाम्यमाह—स्यातामिति । यदिचेत् अर्कविभावरीशयो सूर्यचद्रयोरथवा भसो मयोर्वाऽर्कभयोर्वा स्फुटौ समावपक्रमौ स्याता तदा बुधैरपक्रमसाम्यसज्ञित क्रांतिसाम्यनामक पर्व उदित कथित । किंविशिष्ट । पुण्येन दानधर्मेण सिद्धिद पुण्यसिद्धिदम् ॥ २९ ॥

ऐंद्रे त्रिभागे च गते भवेत्तयोः शेषे ध्रुवेपक्रमसाम्यसंभवः ॥
यद्येकरेखास्थितभेशचंडगू स्यातां तदापक्रमचक्रवालके ॥ ३० ॥

अथैन्द्रवशाया क्रांतिचक्रमाह—ऐंद्र इति । यद्येकरेखेति । एकरेखाया स्थितौ चेत्तौ भेशचडगू च तौ चद्रसूर्यौ स्याता तदाऽपक्रमचक्रवालके क्रांतिचक्रे तयोश्चन्द्रार्कयोरपक्रमसा म्यसभव क्रांतिसाम्यसंभव स्यात् । कस्मिन्सति ऐन्द्रे योगे त्रिभागे गते विंशतिघटीगत इत्यर्थ । च पुनर्ध्रुवे योगे शेषे त्रिभागे गते चत्वारिंशद्घटीगत उपरि इत्यर्थ ॥ ३० ॥

याम्योत्तराप्रागपराश्च तिस्रो रेखा लिखेदिंद्रदिशोपमास्यम् ॥
मध्यात्पयोनीडमुखं भचक्रं चक्रं त्विदं ज्योतिषिकैरिहोक्तम् ॥३१॥



अथेंद्रवज्रया तच्चक्रमाह—याम्यइति । सुधी याम्योत्तरा प्रागपराश्च तिस्रो रेखा लिखेत् । पुनरिंद्रदिशः पूर्वदिग्मध्यात् भचक्रं राशिमंडलं लिखेत् । किंभूतं भचक्रम् । पयसि जले नीडं स्थानं यस्य स पयोनीडो मीनराशिः स मुखंआदिर्यस्य तदिति । ज्योतिर्विदैरिहेदं चक्रमपमाख्यं क्रांतिसाम्यनाम कमुक्तं । 'भं नक्षत्रे मेषादौ' इतिमहीपः । 'नीडं स्थाने खगालये' इति हैमः ॥ ३१ ॥

निस्त्रिंशकुंताहतमस्ति रक्षितुं नरं च धातानलदग्धविग्रहम् ॥
तथा निमग्नं न सरस्वति क्षमः कृतेनसोमापमसाम्यमंगलम् ॥ ३२ ॥

अथोपजात्यास्य दुष्टफलमाह—निस्त्रिंशेति । धाता ब्रह्मा निस्त्रिंशकुंताहतं तीक्ष्णभल्लताडितं तथाऽनलदग्धविग्रहं वन्हिज्वालितदेहं तथा सरस्वति समुद्रे निमग्नं तं एवंविधं नरं रक्षितु रक्षणाय क्षमःसमर्थोऽस्ति न पुनः कृतेनसोमापमसाम्यमंगलं इनसोमयोः सूर्यचंद्रयोरपमसाम्यं क्रांतिसाम्यं इनसोमापमसाम्यं कृतं विहितं इनसोमापमसाम्ये मंगलं येन सः तं नरमित्यर्थः ॥ ३२ ॥

पतेदसौ चापमसाम्यजन्मा श्रेयोजनान्यातशकुंतिरुर्वीम् ॥
विशालचक्रप्रतिमो यथैवं नेतुं नवाभ्राल्यचिरांशुपातः ॥ ३३ ॥

अथास्यैव पक्षिरूपतामाह—पतेदिति । वैनिपूर्वार्थत्वपक्षांतरेऽसौ अपमसाम्यजन्मा क्रांतिसाम्यसंजातःपातशकुंतिःपातलक्षणपक्षी उर्वी भूमिं पतेत् । किंकर्तुं श्रेयोजनान् मंगलाश्रितनरान् नेतुं गृहीतुमेव । निश्चयेन किंविशिष्टोऽसौ विशालं विस्तीर्णं चक्रमायुधविशेषस्तत्सदृशः । दृष्टांतेन दृढयति । यथा नवाभ्राल्यचिरांशुपातः नवानामभ्राणां मेघानामालिः श्रेणिस्तस्या- मचिरांशुरचिरप्रभा तडित् तस्याः पात इव सोप्येवंविधः । 'चलाशंपाऽचिरप्रभा' इतिहैमः ॥ ३३ ॥

तत्संभवेपक्रमसाम्यमेवयोरितेय साध्यं गणितेन तद्विदा ॥
तदंतरे मानदलैक्यतोधिके तद्दूषणं कर्मसु भूषणायते ॥ ३४ ॥

अथ क्रांतिगणितमाह—तत्संभवेति । तद्विदा दैवज्ञेन गणितेन गणितमार्गेणापक्रमसाम्यं साध्यं साधनीयं कथित् एतयोः सूर्यचंद्रयोःतत्संभवे क्रांतिसंभवे इत मानि सति । अथ माने दृष्ट०मसागार्द्धे कौपूरेभ्योऽधिके तदंतरे तद्दूषणं तद्दूषणं कर्मसु कार्येषु भूषणायते भूषणमिवाचरति भूषणवत्समर्थं भवति॥ ३४ ॥

ज्ञेयं झषाद्ध्योश्च घटीचतुष्टयं पडंघ्रिवाणामनयोर्यदंतरे ॥
जंघाऽन्तर्निविभजिर्घोतुसंत्तयोगेढ्ढानमायेंग्पि मंगलादितम् ॥ ३५ ॥

अथ गंडान्तयोगमाह—ज्ञेयमिति। झषाल्योर्मीनमेषयोरंतरे विचाले यत् घटीचतुष्टयं एवं षडंघ्रिबाणासनयोः षड्अंघ्रयश्चरणा यस्य स षडंघ्रिर्भ्रमरो बाणस्य शरस्य असनं बाणासनं धनुस्तयोर्वृश्चिकधनुषोश्च पुनर्नवाले पंके नीडं स्थानं यस्य स कीटः। इभजिदंसुगेनारिपुः एतत्संज्ञयोः कर्कसिंहयोरार्यैराचार्यैस्तद्घटीचतुष्टयं गंडांतंनाम ज्ञेयम्। किंविशिष्टं गंडांतं मंगलाहितं शुभकार्येऽनिष्टमपि निश्चितम्। 'वैर्यहितो जिघांसुः' इतिहेमः॥ ३५॥

दिवौकसोः संयुतिरिंदुहंसयोः क्रांत्योर्यदि स्यात्खलु वा समानता॥
गंडांतके मंगलमिंद्रयामयोर्युगं न यावद्विबुधैस्तदादृतम्॥ ३६॥

दिवौकेति। खलु निश्चितं यदि दिवौकसोर्ग्रहयोः संयुतिः वाथवा इंदुहंसयोश्चंद्रसूर्ययोः क्रांत्योः समानता स्यात्तदा विबुधैर्गणकैः इंद्रयामयोः सुरपतेः प्रहरयोर्युगं मासत्रयमितं यावन्मंगलं नादृतं नांगीकृतमित्यर्थः॥ ३६॥

समायनर्तुमासानां संधयोर्वासराः क्रमात्॥
गजाब्धिद्विधरातुल्याः पुण्या मंगलगर्हिताः॥ ३७॥

अथ संधिगतदिनान्याह—समेति। समा वर्षं अयनं ऋतुः मासःएषां द्वंद्वः एषां संधयोः संधानयोर्गजाब्धिद्विधरतुल्याः क्रमाद्वासराः स्युः॥ कोऽर्थः। वर्षसंधयो फाल्गुनकृष्णद्वादशीमारभ्य चैत्रशुक्लचतुर्थ्यन्तमष्टौ वासराः। एवमयनसंधयश्चत्वारः। ऋतुसन्धिरेकः। माससंधिरेकः। किंविशिष्टाः पुण्याः दानधर्मयोग्याः। पुनः किंविशिष्टाः मंगलगर्हिताः स्पष्टम्॥ ३७॥

सहस्यतपसोर्मासोरमान्ह्यंशुमतो यदा॥
सपातमार्यभा पर्वज्ञेयमर्द्धोदयाव्हयम्॥ ३८॥

अथाऽर्द्धोदयाभिधं पर्वाह—सहस्येति। यदा अंशुमतः सूर्यस्याह्नि दिने सहस्यतपसोः पौषमाघयोर्मासोरमावासी स्यात्। किंविशिष्टा अमा सपातमार्यभा पातो व्यतीपातः मामा सत्यभामावत् मालक्ष्मीस्तस्या अर्यः स्वामी विष्णुस्तस्य भं श्रवणः ताभ्यां सहवर्तमाना सपातमार्यभा तदा बुधैरर्द्धोदयाव्हयं पर्व ज्ञेयमित्यर्थः॥ ३८॥

पद्मकं पूर्णमासी स्यात्सपातेनेज्यवासरा॥
मधुमाधवयोःपर्व यदा सेन्द्राग्निभा तदा॥ ३९॥

अथपद्मक पर्वाह—पद्मेति॥ यदा मधुमाधवयोश्चैत्रवैशाखयोः पूर्णिमासी स्यात्। किंलक्षणा पूर्णमासी सेंद्राग्निभा विशाखानक्षत्रयुक्ता। पुनः किंभूता। सपातेनेज्यवासरा पातो व्यतीपात इनः सूर्यः इज्यो गुरुः एषां वासरैः सहवर्तमाना सपातेनेज्यवासरा तदा पद्मकंनाम पर्व स्यात्॥ ३९॥

नभस्यापरपक्षस्य षष्ठि सारा शयास्थिते॥
व्यतीपातयुता चेने सकर्क्षा कपिलाव्हया॥ ४०॥

अथ कपिलाषष्ठीमाह—नभस्येति । नभस्यस्य भाद्रपदस्याऽपरपक्षस्था कृष्णपक्षस्था षष्ठी तिथिः कपिलाह्वया स्यात् । किंलक्षणा षष्ठी सहआरेण भौमेन वर्तते सारा । पुनः किंभूता । व्यतीपातयुता । च पुनः किंभूता को ब्रह्मा तस्य ऋक्षेण रोहिणीनक्षत्रेण सह वर्तते या सा सकर्षा । कस्मिन् सति । इने सूर्ये शयस्थिते हस्तनक्षत्राश्रिते ॥ ४० ॥

अष्टम्यश्चाष्टका ज्ञेया मंगलेऽनिष्टदा बुधैः ॥
सहस्तपःसहस्यानां नभस्यस्यासितप्रभाः ॥ ४१ ॥

अष्टकाष्टमीमाह—अष्टेति । बुधैः सहः मार्गशीर्षः तपः माघः सहस्यः पौषः एषां द्वंद्वः एषां नभस्यस्य भाद्रपदस्य चाऽसितप्रभाः कृष्णपक्षान्विता अष्टम्योऽष्टकाभिधा मंगले विवाहादौ नेष्टदा ज्ञेयाः ॥ ४१ ॥

अमायुगादिमन्वादिपक्षसंक्रांत्यनंतिकाः ॥
क्षयाहर्तनवान्नानि चेयं श्राद्धाद्विसप्ततिः ॥ ४२ ॥

अथ द्विसप्ततिश्राद्धान्याह—अमेति । इयं श्राद्धानां द्विसप्ततिर्भवति सा कथ्यते । अमा अमावास्याः द्वादशश्राद्धानि । एवं युगादयस्तिथयश्चत्वारि । मन्वादयस्तिथयश्चतुर्दश । पक्षः श्राद्धपक्षः क्षये तिथौ तदा प्रतिपदासह षोडश श्राद्धानि । संक्रांतयो द्वादश । अनंतिकास्तिथयश्चत्वारि । क्षयाहः मातरपितरयोर्मृत्युदिनं द्वे ऋतव षट् नवान्ने द्वे ॥ ४२ ॥

नवम्यूर्जे तृतीयाद्या माधवेमी युगादयः ।
पंचदश्यसिता माघे नभस्ये स्युस्त्रयोदशी ॥ ४३ ॥

अथ युगादितिथीनाह—नवेति । ऊर्जे कार्तिके आद्या शुक्ला नवमी । माधवे वैशाखेऽक्षय्यतृतीया । माघेऽसिता कृष्णा पंचदशी अमावास्या । नभस्ये भाद्रपदे त्रयोदशी कृष्णा युगादयोऽमी चत्वारस्तिथयः स्युः ॥ ४३ ॥

शुक्लेषे नवमी चोर्जे द्वादशी तृतीया मधौ ॥
नभस्ये तृतीया प्रोक्ताऽमावास्या नभसि स्मृता ॥ ४४ ॥

आषाढी कार्तिकी शुक्ला पंचदश्यथ फाल्गुने ॥
चैत्री चतुर्दशेति स्युर्ज्यैष्ठी मन्वंतरादयः ॥ ४६ ॥

आषाढीति—आषाढी पूर्णिमा १० कार्तिकी पूर्णिमा ११ फाल्गुने शुक्ला पचदशी पूर्णिमा १२ चैत्री पूर्णिमा १३ ज्येष्ठी पूर्णिमा १४ मन्वतरादयोऽमी चतुर्दश वेद्य स्यु ॥ ४६ ॥

राकायाः पंचमे पक्षे शुचेः श्राद्धानि षोडश ।
स्यादेष्वध्वरतुल्यानि पितॄणां दत्तमक्षयम् ॥ ४७ ॥

अथ पक्षश्राद्धान्याह—राकेति । शुचेराषाढस्य राकाया पूर्णिमाया सकाशात् पचमे पक्षे कोर्थो भाद्रपदस्य पूर्णिमात आरम्य षोडशश्राद्धानि अध्वरतुल्यानि यज्ञतुल्यानि स्यु । एषु श्राद्धेषु पितृणा पूर्वजाना दत्तमक्षयं स्यात् ॥ ४७ ॥

माघोर्जमाधवेषानां पूर्णिमाः स्युस्त्वनंतिकाः ॥
वसंते शरदि श्राद्धशुभेऽहनि नवान्नके ॥ ४८ ॥

अथानतिकास्तिथीराह—माघेति । माघकार्तिकवैशाखाश्विनमासाना पूर्णिमा अनंतिका स्यु । तु पुनर्वसन्ते शरदि ऋतौ शुभेऽन्हि दिवसे नवान्नके नूतनधान्यनिर्मिते श्राद्धे स्त ॥ ४८ ॥

मध्वादिमासेषु भवंति भानोः संक्रांतयो मेषमुखाः क्रमात्स्यात् ॥
मासो विसंक्रांतिरथाधिमासो मासो द्विसंक्रांतिरसौ क्षयाख्यः॥४९॥

अथेन्द्रवज्रया सक्रातिन्यूनाधिकमासानाह—मध्वेति । चैत्रादिद्वादशमासेषु भानोर्मेषमुखा सक्रातय स्यु । क्रमात् यो मासो विसक्राति संक्रातिरहित । अथवा द्विसक्राति संक्रातिद्वयसहित स्यात्सोऽसौ मासोऽधिमास क्षयाख्यश्च स्यात् । कोर्थोऽसक्रातिको मासोऽधिक । द्विसक्रातिक क्षय इत्यर्थ ॥ ४९ ॥

यदैंदवो मानतु सौरमासाद्भवेद्विसंक्रांतिरसौ लघीयान् ॥
स योऽधिमासो रदनैर्दलाढ्यैर्ज्ञेयो विधोर्मास इहांशुमासैः ॥५०॥

अथोपजात्या कतिमासैरधिको मास आयाति तदाह—यदेति । ननु निश्चित यो मासो विसक्रातिरैंदवो मासश्चान्द्रो मास सौरमासाल्लघीयानतिशयेन लघुर्भवेत् । इह सोऽसौ विधोर्मासोंऽशुमासै सौरमासैरधिमासो ज्ञेयो बुधैरितिशेष । किंलक्षणैरंशुमासै रदनैर्दन्तैर्दलाढ्यैरर्द्धयुक्तै सार्द्धद्वात्रिंशन्मितैरित्यर्थ ॥ ५० ॥

सौराद्यदा चांद्रमसो गरीयान्मासो द्विसंक्रांतिरसौ क्षयाख्यः ॥
स यस्तदा स्यात्क्षितिवेदरूपैरब्दैर्मितैर्वा क्वचिदंकचंद्रैः ॥ ५१ ॥

अथ कतिवर्षैः क्षयमास आयाति तदाह—सौरेति । यदा यश्चांद्रमासः सौरमासादरीयान-तिशयेन, गुरुर्द्विसंक्रांतिर्भवेत्तदा सोऽसौ मासः क्षयाख्यः स्यात् । कैः कृत्वा क्षितिवेदरूपैरेकचत्वारिंशदधिकशतेन मितैरब्दैर्वर्षैर्वा क्वचित्कालेऽकचन्द्रैरेकोनविंशत्यामितैर्वा ॥ ५१ ॥

चैत्रादिमासादधिमासकालवानूर्जादिमासत्रयऊनमासकः ॥
मासोऽन्यथातोक्तिरियं भवेदतो नेत्याह कश्चिन्नियमं न बालिशः ॥५२॥

अथेन्द्रवंशयाऽधिकक्षयमासनियममाह—चैत्रेति । चैत्रादिमासादधिमासकालवानधिकमासोऽष्ट एतएवाऽधिका भवंतीत्यर्थः ॥ ऊर्जादिमासत्रयऊनमासकः क्षयाख्यः स्यात् एतएव क्षयतां यांतीत्यर्थः ॥ कश्चिदिति । नियमेन नाह नब्रूते । इतीति किं । मासो मासस्ये यमुक्तिरन्यथा न भवेत्। द्वौ नकारौ मकृत्यर्थं सूचयतः। अन्यथा भवेदित्यर्थः। अतःकारणात्स बालिशो मूढः । अथवेयमुक्तिरन्यथा न भवेत् । कश्चिदिति पूर्वोक्तं नियमेनाह । अतः स बालिशो न अपि तु भवेदेवेत्यपिशब्दार्थः ॥ ५२ ॥

त्रिखेंदुभिर्विक्रमभूपतेर्मिते शाकेन्विताह क्षयमासको भवेत् ॥
अन्यः स्वकालाब्दगणेन हायनेऽधिमासयुग्मं क्षयमासवत्यतः॥५३

अथोपजात्या क्षयमासेऽधिकमासद्वयमाह—त्रिखेति । यथा विक्रमभूपतेस्त्रिखेन्दुभिरुयधिकशतेन मिते शाके गते सति अत्रैकचत्वारिंशदधिकशतवर्षपरिपूर्णजातत्वात्क्षयमासको जातोऽस्ति । अयं विद्यमानकालिदासापेक्षया दर्शितदृष्टांतः प्रोक्तः । तथाऽत उक्तक्षयमासात्तु पुनरग्रे इतिप्रकारेण स्वकालाब्दगणेन निजकालगणनया । कोर्थः चत्वारिंशदधिकशतेन मिते हायने वर्षेऽन्यः क्षयमासको भवेत् भविष्यतीत्यर्थः । इहाऽस्मिन् क्षयमासवति वर्षेऽधिमासद्वयं स्यात् । यस्मिन्वर्षे क्षयमासः स्यात्तस्मिन्वर्षेऽधिकमासद्वयं निश्चयेन स्यादित्यर्थ. । 'गणः प्रथमसंख्ययोः समूहे सैन्यभदे' इति महीपः ॥ ५३ ॥

श्रीसूर्यसिद्धांतमतोद्भवार्कात्साध्यौ तदा तावधिकक्षयाख्यौ ॥
मासौ ग्रहज्ञैर्गणितं तथान्यत्साध्यं सदा यद्यपि तद्ग्रहाद्यम् ॥ ५४ ॥

अथेंद्रवज्रयानयोः साध्यस्थानं दर्शयति—श्रीसूर्येति । यद्यपि ग्रहाद्यं गणितमन्यत्साध्यं तथापि ग्रहज्ञैस्तदा तौ अधिकक्षयाख्यौ मासौ साध्यौ कस्मात् श्रीसूर्यसिद्धांतमतोद्भवार्कात् । श्रीवराहमिहिरकृतसिद्धांतगणितसूर्यात् ॥ ५४ ॥

स्थूलं सदा ब्राम्हमतं निरुक्तमादित्यसिद्धांतमतं च सूक्ष्मम् ॥
भाद्यादिकं सूक्ष्मतरादसूक्ष्मं सूक्ष्मं मतं स्थूलत एव सिद्धम् ॥ ५५ ॥

अथ ब्राह्मसूर्यसिद्धांतयोर्मतभेदमाह—स्थूलमिति । बुधैः सदा ब्राह्ममतं स्थूलं निरुक्तम्। च पुनरादित्येति । सूर्यसिद्धांतमतं सूक्ष्मं निरुक्तम् । पुनर्भाद्यादिकं भगणादिकं सूक्ष्मतरात् असूक्ष्ममनिश्चयेन सूक्ष्मं न भवतीत्यर्थः । अत कारणात् स्थूलतएव सूक्ष्मं मतं सिद्धम् ॥५५॥

अतोऽनिशं संक्रमणेंशुमालिनस्तिथौ सदा सूक्ष्मविधानसाधने ॥
सौरं मतं शस्तमथान्यनिर्णये स्थूलं च भेन्यग्रहसंक्रमेष्वपि ॥५६॥

अथोपजात्या सौरब्राह्मयोर्ग्राह्यस्थानमाह—अत इति । अनिशं निरंतरमंशुमालिनः सूर्यस्य संक्रमणे तिथौ तथा सूक्ष्मविधानसाधने स्पष्टगणितसाधने सदा सौरं मतं शस्तं शुभम् । अथान्यनिर्णये स्थूलकार्ये च पुनर्भे नक्षत्रसाधने पुनरन्यग्रहसंक्रमेषु सूर्यव्यतिरिक्तग्रहसंक्रमेष्वपि स्थूलं ब्राह्मं मतं शस्तमित्यर्थः ॥ ५६ ॥

मासि क्षये चाधिकमासि नो हिता व्रतोपयामक्षयसप्ततंतुजा ॥
उत्सर्गभूनेत्रभिषेचनादिका क्रिया भवेद्धर्मवतीह सिद्धिदा ॥५७॥

अथ क्षयाधिमासे हेयमाह—मासीति । क्षये मासि अधिकमासि च विषये क्रिया नो हिता शस्ता । कथंभूता क्रिया । व्रतं नियमः उपयामो विवाहः क्षयो गृहं सप्ततंतुर्यज्ञः एषां द्वंद्वे एभ्यो जायते इति । वजा पुनः किंभूता क्रिया । उत्सर्गभूनेत्रभिषेचनादिका उत्सर्गो नीलोद्वाहादिः भूनेता राजा एतयोरभिषेचनादिकाऽभिषेकपूर्वा । पुनरिह क्षयाधिकमासे धर्म्मवती क्रिया सिद्धिदा भवेत् । 'वसतिः शरणं क्षयः' इतिसंस्तरः 'सप्ततंतुश्च वितानं बर्हिरध्वरः' इति च हैमः ॥ ५७ ॥

आसां पराश्चानपरा हि नाडिका संक्रांतिकालान्मिहिरस्य षोडश ॥
पुण्याः सदाभ्यर्णवती घटी स्मृता तस्यातिपुण्या खलु या भवंति सा॥५८

अथेंद्रवंशया रविसंक्रमणपुण्यकालमाह—आसामिति । तस्य मिहिरस्य संक्रांतिकालात् परा अग्रेतनाश्च पुनरनपराः पूर्वाः षोडश नाडिकाः पूर्वापरभेदात् द्वात्रिंशन्मिता घट्यः पुण्याः दानादिधर्म्मकर्तव्ययोग्याः खलु निश्चितं भवति । पुनरासां पूर्वापरघटीनां मध्ये याऽभ्यर्णवती समीपवती साऽतिपुण्या स्मृता ॥ ५८ ॥

दलं गतेरंशुमतोऽथ मंडलं निजेशभागेन युतं कलादिकम् ॥
षष्ठ्याहतं भुक्तिहृतं घटीमुखं वृषप्रियं संक्रमकालकोदरम् ॥ ५९ ॥

अथोपजात्या संक्रमकालकोदरं साधयति—दलमिति । अंशुमतः सूर्यस्य मंडलं संक्रमणमंडलं अथ तद्गतेर्दलमर्द्धं अथ तन्निजेशभागेन स्वकीयैकादशभागेन युतं तदा कलादिकं भवति तत् षष्ठ्या हतं षष्ठिघटिकाभिर्गुणितं पुनस्तद्भुक्तिहृतं स्पष्टगत्या विभाजितं तदा यल्लब्धं तत्घटीमुखं घटीपलादिकं संक्रमकालकोदरं संक्रमकालकमध्यं नाम पर्व वृषप्रियं धर्म्मवल्लभं भवति 'धर्मः पुण्यं वृषः श्रेयः' इति 'गुणिताहते' इति च हेमषष्ठकांडे । महेश्वरोपि । 'आहते गुणितेऽपि स्यात्ताडिते नाणकेऽपि च' इति ॥ ५९ ॥

खरद्युतेः संक्रमपुण्यनाडिकाः स्वराशिभोगद्युहता विभाजिताः ॥
दिवौकसः स्पष्टजवेन तत्फलं नाड्यादिपुण्यं ग्रहसंक्रमोदरम् ॥६०॥

अथ चंद्रादिग्रहसंक्रमोदरमाह—खरोति । खरद्युनेः सूर्यस्य संक्रमपुण्यनाडिकाः संक्रमपुण्यकालघटिकाः द्वात्रिंशान्मिताः खराशिभोगद्युहृताः चंद्रादिग्रहस्य निजराशिभोगदिवसगुणिताः दिवौकसश्चंद्रादिग्रहस्य स्पष्टजवेन स्पष्टगत्या विभाजिताः यल्लब्धं तत्फलं नाड्यादि ग्रहसंक्रमोदरं पर्व पुण्यं पुण्यक्रियार्थं भवति । अथान्तरे मध्यं यथा । 'नाड्यो रामगुणा ३३ रवेरथ विधोः पद्ददोःपलैर्युग द्वयं २।२६ भौमस्याब्धिपलैर्युता नव ९।४ विदो युक्ताः पलैः खाश्विभिः ॥ षण्णाड्यो ६।२० ऽष्टगजा ८ गुरोरथ भृगोर्नेन्दाः पलैरष्टभिः ९।८ पुण्याः स्यु खनृपाः १६० शनेरुभयतो राश्यृक्षयोः संक्रमे' इत्यर्थः ॥ ६० ॥

निशिथगो यदि भास्करसंक्रमो दिनयुगं जगदुर्वृषवत्सलम् ॥
परदिनं विबुधा रजनीदलाद्भवति संक्रमणं च तदा परम् ॥ ६१ ॥

अथ द्रुतविलंबितेन संक्रमे कालविवेकतामाह—निशिथेति । यदि भास्करसंक्रमो निशिथगो मध्यरात्रिवर्ती भवेत्तदा बुधाः दिनयुगं वृषवत्सलं धर्मप्रियं जगदुः कथयामासुः । च पुनर्भानोः संक्रमणं रजनीदलान्मध्यरात्रात्परमग्रेतनं भवति तदा विबुधाः परदिनं वृषवत्सलं जगदुः ॥ ६१ ॥

द्युमणिसंक्रमतोऽचलभे भवेद्धरिपदं षडशीतिमुखं स्मृतम् ॥
द्वितनुभेऽयनके मृगकर्किणोर्विषुवदेव तुलाधरमेषयोः ॥ ६२ ॥

अथ हरिपदादिपर्वाण्याह—द्युमणीति । अचलभे स्थिरराशौ द्युमणिसंक्रमतः सूर्यसंक्रमणात् हरिपदं नाम पर्व भवेत् । द्वितनुभे द्विस्वभावराशौ रविसंक्रमतः षडशीतिनाम पर्व स्मृतं । मृगकर्किणोः सूर्यसंक्रमात् अयनके स्तः । तुलाधरमेषयोः सूर्यसंक्रमात् विषुवदेव निश्चितं स्यात् । ' तुल्यनक्तंदिने काले विषुवद्विषुवं च तत् ' इति हैमः ॥ ६२ ॥

रसयमैर्धनुषो लवके मिते भुजयमैर्दिनमभ्ररसौकसः ॥
धृतिमिते जितुमस्य च योषितः शतमखैः षडशीतिमुखाव्हयम्॥६३

अथ षडशीतिमुखं स्पष्टयति—रसयमैरिति । धनुषो द्विस्वभावधनूराशिसंक्रांतेः रसयमैः षड्विंशत्या मिते लवकेंऽशे दिन षडशीति मुखाव्हयं पर्व स्यात । एवमभ्ररसौकसोऽभ्ररसो घनरसो जलं तस्मिन्नोकः स्थानं यस्य स तस्य मीनराशेर्भुजयमैर्द्वाविंशत्यामिते लवे दिनं षडशीतिमुखाह्वयं पर्व स्यात् । च पुन. जितुमस्य मिथुनस्य धृतिमितेऽष्टादशभिमिते लवे दिन प० । पुनर्योषितः कन्याया.शतमखैरिंद्रैश्चतुर्दशभिर्मिते लवे दिनं प०॥ ६३ ॥

ऋतुसमान्यथ यान्यपराण्यहः कलहगः स्युरहान्यपि षोडश ॥
ऋतुसमं षडशीतिमुखाश्रितं तदपि यत्कथितं च मनीषिभिः॥६४॥

अथैतत्पर्वदिनमाहात्म्यमाह—ऋत्विति । मनीषिभि पंडितै कलहगा कन्याया अपराणि

यानि षोडशाहानि कथितानि यत् षडशीतिमुखाश्विनमर्दिन च कथिन तान्यहानि क्रतुम-मानि तद्दहश्च क्रतुममं यज्ञतुल्यानि स्युरित्यर्थ ॥ ६४ ॥

अवितुलास्यमथैत्ययनांशकान्वितरविः स यदा विषुवद्दिनम् ॥
मकरकीटमुखं च यदा तदायनदिनं तदहो यदहःस्मृतः ॥ ६५ ॥

अथ विषुवदादि स्पष्टयति—अवीति । अहो इति वितर्के यदा विषुवत्स्याच्च पुनर्यदा यनाशयुक्त सूर्यो यदहर्मकरकीटमुखमेति तदा तदयनदिनं स्मृतमित्यर्थ ॥ ६५ ॥

पितृभशौच्यवसुद्यमरोड्डजाःकुयमवन्हियुगांघ्रिमुखोदयाः ॥
इह तदर्कसमाः स्युरहो यदा यदजपादवदुक्तमहस्तदा ॥ ६६ ॥

अथ हरिपद स्पष्टयति—पितृभेति । अहो इति वितर्के यदा पितृभं मघा शौच्य वह्निभं कृत्तिका वसवो धनिष्ठा द्व्यमरौ द्विदेवौ विशाखा एषा द्वंद्वं एभ्यो जायन्ते इति जा कुयमवन्हियुगाङ्घ्रिमुखोदया एकद्वित्रिचतु पादमुखोदया अर्कसमा स्यु । कोऽर्थ । मघानक्षत्रस्य प्रथमचरणमुखे उदय स्थिरराश्युदय । कृत्तिकाना द्वितीयपादे स्थिरराश्युदय । धनिष्ठाया स्तृतीयपादे स्थिरराश्युदय । विशाखायाश्चतुर्थपादे स्थिरराश्युदय । सिंहवृषकुम्भवृश्चिकाः स्थिरराश्युदया अर्कसमा द्वादशसङ्ख्यामिना इह यदहस्तदा तदहरजपादवत् विष्णुपदेन तुल्य हरिपदसज्ञमुक्तमित्यर्थ । अर्थात् स्थिरसक्रान्त्यादेर्द्वादिशं यदहस्तदहर्हरिपदमज्ञ भवति अजपादवत् । अत्र वत्प्रत्यय आश्रितपदार्थमेव ब्रूते । यथोक्त हेमसूरिभिश्च ' पौषसैश सहस्यवत् ' इति ॥ ६६ ॥

सुकृतकालमपागयनादिगं हरिपदादिगतं च तुलाजयोः ॥
तदनु मध्य इते विदुरुत्तरे मुनिवराः षडशीतिमुखेऽयने ॥६७॥

अथायनादिविशेषगत सुकृतकालमाह—सुकृतेति । मुनिवरा अपागयनादिग दक्षिणायनादिगत कर्कसक्रातावादिगनमाद्या षोडशघटिका समय सुकृतकाल पुण्यकाल विदु अवधारयंति । पुनरेव हरिपदादिगत वृषसिंहवृश्चिककुम्भसंक्रातिष्वाद्या षोडशघटिका सुकृतकाल विदु । पुनस्तदनु पश्चात्तुलाजयोस्तुलामेषयोर्मध्ये सुकृतिकाल विदु । कोऽर्थ । तुलामेषसक्रातिकालात्प्रागष्टौ घटिका परतश्चाष्टौ एव षोडश घटिका मध्यसमयमिति । पुनरुत्तरेऽयने मकरसंक्रातौ इते प्राप्ते सति सुकृतकाल विदु । कोऽर्थ । मकरसक्रातिकालादग्रिमा षोडशघटिका पुण्यकाल प्रथमास्तु नेति । पुन षडशीतिमुखे द्विस्वभावराशौ इते प्राप्ते सति । कोऽर्थ । मिथुनकन्याधनुर्मीनसक्रातिषु अग्रिमाः षोडशघटिका पुण्यकालं विदु ॥ ६७ ॥

अयनयोरिपुराममिताः क्रमाद्धृतमा जगुरुत्तरयाम्ययोः ॥
निजभया च युता विषुता घटीरनगतागतसंक्रमकालयोः ॥ ६८ ॥

अयोत्तरदक्षिणायनयोर्विशेषपुण्यकालमाह—अयनेति ॥ मुनिवराः नअगता अनगताः वर्तमाना इत्यर्थः । अगता एष्या अनगतागतानां संक्रमकालयोरुत्तरयाम्ययोरयनयोः संक्रमात् क्रमेण इपुरामामिताः पंचत्रिंशन्मिता घटीर्नृपतमा अतिशयेन धर्मवत्यो जगुः । कंथमूताः घटीः । निमभया निजराशिसंक्रांतिछायया युताः उत्तरायणे च पुनर्वियुता-दक्षिणायने ॥ ६८ ॥

घोरोष्णगोर्ध्वांक्ष्यमृतांशुवासरे संक्रांतिरारे च महोदरी विदि ॥
मंदाकिनी मंदतमामरार्चिते मिश्रोशनस्यर्कसुते च राक्षसी ॥६९॥

अथेंद्रवंशाया द्वादशसंक्रांत्यधिकारमाह—घोरेति । उष्णगौ रविवारे संक्रांतिर्घोरानाम भवेत् । एवममृतांशुवारे चंद्रवारे ध्वांक्षी । च पुनरारे मंगलवासरे महोदरी । पुनर्विदि बुधवारे मंदाकिनी । अमरार्चिते गुरुवारे मंदतमा । उशनसि शुक्रवारे मिश्रा । अर्कसुते शनिवारे राक्षसी ॥ ६९ ॥

घोरोग्रभे ध्वांक्ष्यनिशं लघूड्डजा मंदाऽचरे चंचलभे महोदरी ॥
मंदाकिनी मैत्रभजा च मिश्रभे मिश्रा भवेद्दारुणभे च राक्षसी ॥७०

अथ नक्षत्राश्रितसंक्रांतिसंज्ञामाह—घोरोग्रेति । उग्रभे क्रूरनक्षत्रे घोरा भवेत् । एवं लघूडुजा क्षिप्रनक्षत्रे जाता ध्वांक्षी । अचरे स्थिरभे मंदा । चंचलभे चरनक्षत्रे महोदरी । मैत्रभजा मृदुनक्षत्रे जाता मंदाकिनी । मिश्रभे साधारणनक्षत्रे मिश्रा । दारुणभे तीक्ष्णनक्षत्रे राक्षसी अनिशं सदेति ॥ ७० ॥

मंदाधरादेवगणानवत्यतो मंदाकिनी भूमिभुजो महोदरी ॥
मलिम्लुचानंत्यभुवोऽपि राक्षसी मिश्रा पशूनेव पतत्रिणः कुजान् ७१

अथोपजात्या मंदादिसंज्ञायाः फलमाह—मंदेति । मंदासंक्रांतिर्धरादेवगणान् विप्रसमूहान् वति रक्षति । अतो मंदाकिनी भूमिभुजो भूपानवति । महोदरी मलिम्लुचान् चौरानवति । राक्षसी अत्यंभुवश्चंडालानवति । मिश्रा पशून् गवादींश्च पुनः पतत्रिणो विहंगान् कुजान् वृक्षानवति ॥ ७१ ॥

विशोऽनिशं ध्वांक्ष्यतिभद्रभाजःकरोति घोरांघ्रिभुवोऽथ संज्ञा ॥
भवारतो यस्य रवेरिता या सा संक्रमस्योक्तफलप्रदा स्यात् ॥ ७२॥

विशोइति । अनिशं सदा ध्वांक्षी विशो वैश्यानवति भद्रभाजोऽतिसुखान्वितान् करोति । घोरा अंघ्रिभुवः शूद्रानवति भद्रभाजः करोति । अथ यस्य रवेः संक्रमस्य भवारतो नक्षत्रात् वारात् या संज्ञा इता प्राप्ता । कोऽर्थः । या संज्ञा वारे सैव नक्षत्रेऽपि । यथा रविवारे घोरा उग्रनक्षत्रे घोरा एकीभूता स्यात्तदा शूद्रानवति । एवं सर्वापीति सा उक्तफलप्रदा स्यात् ।

"विट् प्रवेशे नृवैश्ययोः" इतिहैम. । भद्रशब्दःसुखवाची । 'शांतं तालव्यदंत्याद्यं' । भद्रंभद्रमि-
शब्दप्रभेदे प्रोक्तोस्ति ॥ ७२ ॥

यामे निहंत्यर्णवमेखलाभुजं संक्रांतिराद्येऽबुधिचीवरामरान् ॥
अहर्दले चापि विशोऽपराण्हके शूद्रव्रजानस्तमितेंऽशुमालिनि ॥७३

अथ प्रथमादिप्रहरे संक्रांतिफलमाह—यामइति । आद्ये यामे प्रहरे संक्रांतिः अर्णव एव
खला यस्याःसा भूमिस्तां भुनक्तीति अर्णवमेखलाभुग्राजलोकस्तं हंति ॥ च पुनरहर्दले दि-
र्द्धेऽबुधिचीवरामरान् भूदेवान् विप्रान् हन्ति । पुनरपराण्हके दिनतृतीयभागे विशो वैश्यान्
न्ति । अस्तमितेऽस्तंगतेंऽशुमालिनि सूर्ये सति शूद्रव्रजान् हंतीत्यर्थः ॥ ७३ ॥

निहंति रात्रेः शिविजालिकादिकानर्द्धे महारात्रविभातकांतरे ॥
संक्रांतिरंशोर्नरतांगमर्दिनः काले नरान् वल्लवकांश्चनूपसः ॥ ७४ ॥

निहंतीति । रात्रेरर्द्धेंशोः सूर्यस्य संक्रांतिः शिविजालिकादीन् भिल्ललुब्धकादिकान्
हंति ॥ पुनर्महारात्रविभातकांतरेऽर्द्धरात्रप्रभातयोरंतरे विचाले भरतांगमर्दिनः शैलूषना-
पेतान् हंति । उषसः प्रभातस्य काले वल्लवकान् गोपालान् नरान् हंति ननु निश्चितम् ॥७४॥

स्याचैतिले नागचतुष्पदाख्ययोः सुप्तस्य रात्र्यंतकरस्य संक्रमः ॥
विष्टौ निविष्टस्य ववे गरे तथा सबालवाख्ये वणिजे बुधैः स्मृतः ॥ ७५

अथ तैतिलादिकरणे सुप्तादिरविसंक्रांतिमाह—स्याचैतिले इति । तैतिले नागचतुष्पदाख्य-
गरेतत्करणत्रये सुप्तस्य रात्र्यंतकरस्य सूर्यस्य संक्रमः संक्रांतिः स्यात् । एवं विष्टौ भद्रायां
था ववे गरे सबालवाख्ये वणिजेऽस्मिन् करणपंचके निविष्टस्य आसीनस्य रवेः संक्रमो बुधैः
स्मृतः ॥ ७५ ॥

ऊर्ध्वस्थितस्यांशुमतोऽथ कौलवे किंस्तुघ्नके स्याच्छकुनौ क्रमादयम् ॥
धान्यार्घवृष्टिष्वपि संक्रमो बुधैरनिष्टमध्यातिशुभः प्रकीर्तितः ॥ ७६॥

ऊर्ध्वस्थितस्येति । अथ कौलवे किंस्तुघ्नके शकुनौ एतत्करणत्रये ऊर्ध्वस्थितस्यांशुमतो
रवेरयं संक्रमः स्यात् । बुधैरयं संक्रमो धान्यार्घवृष्टिषु सस्यमूल्यवर्षणेषु क्रमादनिष्टमध्या-
तिशुभः प्रकीर्तितः । कोऽर्थः । सुप्तरविसंक्रमोऽर्घवर्षणधान्येष्वनिष्ट महर्घ्येधान्यवृष्ट्यभाव
कारकः । एवं निविष्टः समः । तथोर्ध्वः श्रेष्ठ इति । 'अर्घः पूजाविधौ मूल्ये' इतिहैमः ॥७६॥

जघन्यभेऽहस्करसंक्रमो बुधैः सदेवलैः पंचदशक्षणः स्मृतः ॥
बृहत्सु पंचागमतुल्यदैवतः समानभे त्रिंशदभिन्नतत्क्षणः ॥ ७७ ॥

अथ नक्षत्रवशेन संक्रांतिमुहूर्तनियममाह—जघन्येति । सदेवलैर्देवलनामर्षिसहितैर्बुधैर्जघन्य-
संज्ञनक्षत्रेऽहस्करसंक्रमः पंचदशक्षणः पंचदशमुहूर्तमितः स्मृतः । पुनर्बृहत्संज्ञनक्षत्रेषु पंचागम-

तुल्यदैवतः पंचचत्वारिंशन्मुहूर्तमितदैवतः स्मृतः । पुनः समानभे समसंज्ञनक्षत्रे त्रिंशदभिन्नत- त्क्षणास्त्रिंशताऽभिन्नस्तुल्यस्तत्क्षणः स एव क्षणस्त्रिंशन्मुहूर्तमितः। 'क्षणो मुहूर्त उत्सवः "पर्वव्या- पारवैकल्यं ' चेति लिंगानुशासने । इत्यर्थः ॥ ७७ ॥

जघन्यभे धान्यमनूष्णगूदये महर्घमामासमपीनसंक्रमः ॥
समं समर्क्षे च समर्घमन्यभे विशेषतो वा कुरुतेऽथ तद्युतिः ॥७८॥

अथास्मिन् धान्यमूल्यविवेकमाह—जघन्यभ इति । जघन्यभे जघन्यसंज्ञनक्षत्रेऽनूष्णगूदये द्वितीयोपलक्षितचन्द्रोद्गमोऽपि पुनरिनसंक्रमः सूर्यसंक्रम आमासं मासपर्यन्तं धान्यं महर्घं महा- नर्घो मूल्यं यस्य तत् बहुमूल्यं कुरुते । च पुनः समर्क्षे समसंज्ञनक्षत्रे चंद्रोदय इनसंक्रमश्च सममूल्यं धान्यं कुरुते । एवं पुनरन्यभे बृहत्संज्ञनक्षत्रे समर्घमल्पमूल्यं कुरुते । युतयोश्चंद्र- रव्योर्युतिः संयोगो दर्शतिथिरित्यर्थः विशेषतः पूर्वोक्तं कुरुते । जघन्यभे विशेषतो महर्घमित्यादि कुरुते ' महार्घो लावकांडके महामूल्ये ' इति हैमः ॥ ७८ ॥

यदेकवारे युतिरिंदुहंसयोर्मिथो नरा यांति च हेलिसंक्रमः ॥
क्षयं नृपाश्चेति सतीनपर्व चेत्तदा शराग्रैः करवालधारया ॥ ७९ ॥

अथ दर्शरविसंक्रांत्योरेकवारे फलमाह—यदेकवार इति । यदा एकवारे इंदुहंसयोश्चंद्र सूर्ययोर्युतिर्दर्शतिथिरित्यर्थः हेलिसंक्रमः सूर्यसंक्रांतिश्च स्यात् । कोऽर्थः । यस्मिन् वारे रवे- संक्रमणं तस्मिन्नेव वारेऽमावासी स्यात्तदा मिथः परस्परं नराः क्षयं नाशं यांति । च पुनश्चेद्यदि इति पूर्वोक्ते सति तस्मिन्नेवैकवारे इनपर्व सूर्यग्रहणं स्यात्तदा नृपाःशराग्रैः करवालधारया तरवारिधारया मिथः क्षयं यांति । यतः ' जिणं इंदवारइं रविसंक्रमइतिणि अमावसि होइ । खप्परले जोगिन फिरइ जीवइवरलोकोइ १ इतिकोकटं । इंदुहंसयोर्युतिशब्देन दर्शतिथिः कथ्यते । यदाहुर्हेमसूरयः ' दर्शः सूर्येन्दुसंगमः ' इति । यतो दर्शतिथावेव चंद्ररविसंयोग इत्यर्थः ॥ ७९ ॥

दिनं सपत्र्यायनयानसंक्रमं न पर्वदग्धं हि च मंगलोचितम् ॥
तदेव यत्सोभयपार्श्ववासरं नभश्चराभ्यागमकालवद्भवेत् ॥ ८० ॥

अथ विवाहादौ ग्रहसंक्रमादि दिनं निषेधयति—दिनमिति । हीनिनिश्चितं । अयनमेव आयनं मार्गः पत्रिणां विहंगमानामायनं पत्र्यायनं व्योम तस्मिन् यानानि विमानानि येषां ते ग्रहास्तेषां संक्रमाः संक्रमणानि तैः सह वर्तते तत् सपत्र्यायनयानसंक्रमं यत् दिनं च पुनः पर्वदग्धं दिनं यत् पुनः सोभयपार्श्वयस्तं ग्रहसंक्रमत उभयतः पार्श्वं दिनं तेन युक्तं दिनं यत् पुनर्नभश्चराभ्यागमकालवत् खेटयुद्धादिनं यत्तदेव दिनं मंगलोचितं न भवेदित्यर्थः ॥ ८० ॥

पर्वाणि चान्यानि बहून्ययादराद्धिचक्षणैरागमधर्मशास्त्रतः ॥
ज्ञेयान्यशेषोत्सवकर्मदानान्येवं विवर्ज्यानि सदेव मंगले ॥ ८१ ॥

अथोपजात्योपसंहारमाह—पर्वाणीति । अथैवं विचक्षणैर्बुधैरादरादागमधर्म्मशास्त्रतोऽन्यानि बहूनि पर्वाणि ज्ञेयानि। किंभूतानि। अशेषोत्सवसमस्तकार्यक्रीडादानि। पुन्मंगले मदैव वर्ज्यानि ॥ ८१ ॥

दिने दिने पर्वकुयोगसंचयो भवेच्च शुद्धिर्घटतेऽपि मंगलम् ॥
पदे पदे वारभधस्त्रयोगजा तदिष्टयोगोदयतः शिवाय यत् ॥ ८२ ॥

अथ वंशस्थेनाह—दिने इति । दिनेदिने पर्वकुयोगसंचयो भवेच्च पुनः पदे पदे वारभधस्त्रयोगजा वारनक्षत्रदिनयोगजाता शुद्धिर्निर्दोषतापि घटते यद्धेतोस्तन्मंगलं इष्टयोगोदयतः ईप्सितयोगोदयतः शिवाय कल्याणाय सुखाय भवेदित्यर्थः ॥ ८२ ॥

अनेकदोषैरपि सौम्ययोगो न हन्यतेऽनेकगुणैः कुयोगः ॥
ग्राह्याः सदा ये च गुणा बुधैर्यैक्रियास्वसौम्याः खलु वर्जनीयाः॥८३॥

अथोपजात्या सुयोगकुयोगयोर्बलमाह—अनेकेति। अनेकदोषैः सौम्ययोगो न हन्यते अपि तु पुनरनेकगुणैः कुयोगो न हन्यते सदा बुधैर्यत्क्रियासु ये गुणास्ते ग्राह्या अंगीकर्त्तव्याः । न पुनर्येऽसौम्यास्ते खलु निश्चितं वर्जनीया इत्यर्थः ॥ ८३ ॥

तद्यैः कुयोगैरिति सौम्ययोगो न हन्यतेऽसत्कथितं यदेकः ॥
कादंबरीबिंदुगणः करीपलेशं यथा दुष्यति नेति कश्चित् ॥ ८४ ॥

अथात्र कस्यचिन्मतं दूषयति—तद्यैरिति । कश्चिदेक इत्याह तदसत् कथितं व्यर्थोदितं । इतीति किं तदाह । यैः कुयोगैः सौम्ययोगो न हन्यते यथा कादंबरीबिंदुगणो मदिराबिंदुसमूहः करीपलेशं शुष्कगोमयलवं न दुष्यति सद्दूषणं न करोतीत्यर्थः ॥ ८४ ॥

एको गुणो दोषगणं समेत्य स्वाहाप्रियं स्वामतिहेतिवंतम् ॥
निगूहतीवामलगव्यबिंदुमूर्तिं तदिष्टा बहवो गुणाः स्युः ॥ ८५ ॥

अथ बहुदोषोऽल्पगुणं परिहरन्नाह—एक इति। एको गुणो दोषगणमेत्य प्राप्य स्वां मूर्तिं निजगुणरूपां निगूहति गुहसंवरणे गुहेरुपधाया ऊद्गुणहेतौ स्वरे इति दीर्घः नाशं प्राप्नोतीत्यर्थः । कइवामलगव्यबिंदुरिव यथा निर्मलघृतादिबिंदुः स्वाहाप्रियं वन्हिमतिहेतिवन्तमतिशयज्वालायुक्तं प्राप्य स्वां मूर्तिं गूहति पूर्ववत् वन्हिसाद्भवतीत्यर्थः । तस्मात्कारणाद्बहवो गुणा इष्टाः स्युः । दोषप्रवाहेत्यत्र प्रवाहशब्दः समूहवाची यथास्मिन्नेव ग्रंथे वक्ष्यते नरप्रवाहः समुद्रो जलराशित्वात् । 'स्वाहाप्रायी प्रियास्य च' इति हैमः ॥ ८५ ॥

दोषैकदेशो गुणसंनिपातमतो दहत्यत्र न संशयोऽस्ति ॥
धनंजयांशो वनराज्यगौघमिवागुणांशोऽपि विवर्जनीयः ॥ ८६ ॥

अथबहुगुणेऽप्येकदोषांशस्यापि त्याज्यतामाह—दोषैकेति । दोषैकदेशो गुणसंनिपातं गुणौघं दहति भस्मीकरोति धनंजयांशवत् । यथा वन्हिलवो वनराज्यगौघं वनश्रेणिं वृक्षसमूहं दहति । अत्र संशयो नास्ति। अतः कारणादगुणांशोऽपि वर्जनीयो बुधैरिति शेषः ॥८६॥

गुणागुणव्रातसमानताश्रयाद्यथाऽशिवार्थं किल मंगलाज्जनः ॥
आघारकक्षौद्रसमानताश्रयादतोऽदनादित्यधिका गुणा वरम् ॥ ८७॥

अविभ्रमस्तु । अथ गुणदोषयोः समानतामपि निषेधयति—गुणेति । किलेति संभावनायां । जनोऽशिवार्थं दुःखहेतुमेति प्राप्नोति कस्मात् गुणाश्चागुणाश्च तेषां व्रातः समूहस्तस्य समानता तुल्यता तस्या आश्रयः स्थानं सेवनं वा यस्मिन् तत् तस्मादेवंविधान्मंगलात् । निदर्शनमाह यथा जन उपद्रवं प्राप्नोति कस्मात् आघारं घृतं कं जलं क्षौद्रं मधु एषां समानताश्रयात् अदनात् समभागभक्षणात् । अतःकारणादधिका गुणाः वरं शुभं गुणाः वरमित्यत्र बहुवचनमेकवचनं युक्तम् । यतो वचनभेदो भवेत् । पुनर्विभक्तिभेदो न यथा वेदाः प्रमाणमित्यर्थः ॥ ८७ ॥

आयुः पुरा भीमसुताधवादयोऽगुणव्रजोपासितमंगलामराः ॥
एकोऽशुभान्येव कुयोगभावतो नृपातदोषोऽपि वरःक्रियास्वतः ॥८८

अथैतदेव दृष्टांतेन दृढयति—आयुरिति । पुरा पूर्वं भीमसुता दमयंती तस्या धवो भर्ता नलराजः स एव आदौ येषां ते भीमसुताधवादयो नृपाअशुभान्यमंगलान्येवाऽऽयुः प्रापुः । लुङि या मापणेऽत उसि रूपं । कथंभूता भीमसुताधवादयः । अगुणव्रजे दोषसमूहे उपासिता आश्रिताः मंगलामरा उद्वाहदेवा यैस्ते अतो हेतोः कुयोगभावत एको दोषोऽपि खर्जूरिकाचक्राद्युत्पन्नदोषः क्रियासु वरः श्रेष्ठ इत्यर्थः ॥ ८८ ॥

पर्वाण्यमानीह सदापवर्ज्जनैःश्रीविक्रमार्केण विनाडिकं प्रति ।
तद्दोषबोधाय तथापि सत्कृता विदुः सदा सत्कृतिना ह्यमूनि च ॥८९॥

इतिश्रीज्योतिर्विदाभरणे कविकालिदासोक्तिते पर्वाध्यायश्चतुर्थः ॥ ४ ॥

अथोपसंहारद्वारेण श्रीविक्रमार्कं वर्णयति—पर्वाण्येति । सदा श्रीविक्रमार्केण विनाडिकं प्रति घट्याः षष्ठितमभागं प्रति पर्व अमानि दानं कैरपवर्जनैर्दानैः । कथंभूतेन विक्रमार्केण । सत्कृतिना पंडितेन च पुनस्तथापि सदा सत्कृता पंडिता इहास्मिन् पर्वाधिकारेऽमूनि पर्वाणि विदुः अवधारयंति । कस्मै तद्दोषबोधाय । तेषां पर्वणां दोषास्तेषां बोधाय ज्ञानाय हीति निश्चितम् ॥ ८९ ॥

इति श्रीवृहत्सिमायगच्छीयराजभट्टारकपुरंदरश्रीमद्देवप्रभसूरीश्वरचरणसरोरुहचंचरीकायमाण
शिष्यभावरत्नविरचितायां श्रीकविकालिदासकृतज्योतिर्विदाभरणस्य
सुखबोधिकायां पर्वाध्यायश्चतुर्थः समाप्तः ॥ ४ ॥

श्रीमहिमाप्रभाह्वाना सूरीशाना सरस्वती ।
पुनातु भाविना शश्वदुत्सवानन्दतरङ्गिनी ॥ १ ॥

॥ ग्रहगोचरप्रकरणम् ॥ ५ ॥

वदामि फलमंगिनामहं तदंबरगगोचरोदितम् ।
असाधुशुभकर्म्मणामथो न येन फलविभ्रमो भवेत् ॥ १ ॥

अथ पंचमाध्याये आसन्नके दुरध्वगाछंदस्तत्र प्रथमं ग्रहगोचरफलसंधानमाह—वदामीति । अथो अनंतरमहं तत् अंबरगानां ग्रहाणां गोचरात् राशिविशेषात् उदितं प्रादुर्भूतम् । अथवा ग्रहगोचरे कथितं फलं वदामि कथयामि येन कारणेनांगिनां प्राणिनां फलविभ्रमः फलसंशयो न भवेत् । किंभूतानां प्राणिनाम् । असाधूनि च शुभानि च कर्म्माणि येषां ते तेषामित्यर्थः ॥ १ ॥

यमेज्यकुजहेलिभार्गवज्ञतारकधवाः खतः क्रमात् ॥
नता भगणभाज ईरिता भ्रमंति विधिना स्ववर्त्मगाः ॥ २ ॥

अथ शन्यादीनां भ्रमणविधिमाह—यमेज्येति । खतः आकाशात् क्रमेण नताः नम्राः अधःस्थानस्थिताः भगणा द्वादशराशयस्तान् भजंतीति भगणभाजः स्ववर्त्मगाः निजमार्गगामिनो विधिना कालेन ईरिताः संतः यमः शनिः इज्यो गुरुः कुजो भौमः हेलिः सूर्यः भार्गवः शुक्रः ज्ञो बुधः तारकाधवश्चंद्रः एषां द्वंद्वः एते भ्रमंति । 'विधिर्वाक्ये च दैवे च प्रकारे कालकल्पयोः' इतिहैमः । 'शनौ ब्रह्मण्यश्च यमः स्थिरः' इतिहैमशेषकोशे । इत्यर्थः ॥ २ ॥

तनुभ्रमणमंबराय नः स भुंजाति च यस्य सत्वरम् ॥
महद्भ्रमणमुर्विपीठतो भवेदनणुकालके नभम् ॥ ३ ॥

अथ ग्रहाणां लघुमहद्भ्रमणभेदमाह—तन्विति । यस्य ग्रहस्य उर्वीपीठतो भूमिपीठतस्तनुभ्रमणं लघुभ्रमणं भवेत्सोऽम्बराय नोऽग्रहोऽनणुकालेन महत्कालेन भं राशिं भुंजति च पुनर्यस्य ग्रहस्य महद्भ्रमणं भवेत्स ग्रहः सत्वरं स्तोककालेन भं राशिं भुंजाति भुनक्ति । भुज्यते इति भुजः भुंजइवाचरतीति भुंजाति इति प्रयोगसिद्धिः । अन्यथा भुंजातिप्रयोगो विबुधगम्यः ॥ ३ ॥

विधोर्भवति सांघ्रयहोद्वयं सदैकभजमध्यभोगकम् ॥
विदोऽक्षयमतुल्यवासरा सवित्र्युशनसोस्तथैकमाः ॥ ४ ॥

अथ ग्रहाणां राशिभोगकालप्रमाणमाह—विधोरिति । विधोश्चंद्रस्य सांघ्र्यहोद्वयं सपादेन युग्मं भजमध्यभोगकमिति भाद्राशेः सकाशाज्जायत इति तज्जं मध्यमभोगकं भवेत् । सपाददिनयुगलं सामान्यतो विधुर्भुंक्ते इत्यर्थः । भजेत्यत्र अर्थवशाद्विभक्तिपरिणामः । एवं विदो बुधस्याक्षयमतुल्यवासराः भजमध्यभोगकाः स्युः । तथा सवित्र्युशनसोः रविशुक्रयोरेकमाः

एकमासो भजमध्यभोगको भवेत् । अहोद्वयमित्यत्राशाब्दिकमतत्वादहर्द्वयमहोद्वयमित्यपि स्यादेवमग्रेऽपि कविना रत्वं रुत्वं च भोक्तमस्ति ॥ ४ ॥

युगं क्षितिभुवोऽथ मासयोरुपर्बुधकुभिर्मिता गुरोः ॥
अगोर्धृतिमिताश्च मासकाः खवन्हिभिरशुभ्ररोचिषः ॥ ५ ॥

युगमिति । क्षितिभुवो मंगलस्य मासयोर्द्वयं भजमध्यभोगकम् । अथ गुरोर्गीष्पतेरुपर्बुधा अग्नयश्च कुभूश्च ताभिस्त्रयोदशभिर्मिता मासकाः भजमध्यभोगकम् । पुनरगो राहोर्धृतिमिता मासकाः भजमध्यभोगकम् । पुनरशुभ्ररोचिषः कृष्णकांतेः शनेः खवन्हिभिस्त्रिशतामिता मासकाः भजमध्यभोगकम् । स्युरितियुग्मम् ॥ ५ ॥

निजद्युनिशवृत्तगो ग्रहोऽनिशं प्रवहवायुनेरितः ॥
प्रयात्यपि गतिं पृथग्विधामचंचलचलोच्चहेतुना ॥ ६ ॥

अथैषां गतिहेतुमाह—निजेति । निजद्युनिशवृत्तगो निजाहोरात्रमंडलगतो ग्रहोऽनिशं निरंतरं प्रवहनामवायुना ईरितः प्रेरितः सन् पृथग्विधां भिन्नविधामपि गतिं प्रयाति । किंभूतेन प्रवहवायुना अचंचलचलोच्चहेतुना मन्दोच्चचलोच्चकारणेनेत्यर्थः ॥ ६ ॥

समा अजिनगातिवेलिता चरा चरतरा दिवौकसः ॥
गतिर्भवति मंदसंज्ञिका सदेति च कृशैव सप्तधा ॥ ७ ॥

अथ ग्रहाणां सप्तधागतिमाह—समेति । समा तुल्या गतिः १ अजिनगा वक्रगतिः २ अतिवेलिता अतिवक्रा गतिः ३ चरा गतिः ४ चरतरा गतिः ५ मंदसंज्ञिका मंदा गतिः ६ कृशा गतिः ७ दिवौकसो ग्रहस्येत्यमुना प्रकारेण सप्तधा गतिर्भवतीत्यर्थः ॥ ७ ॥

गत्या समं पत्ररथायनायनः स्वमध्यगत्या स्फुटया चरत्यथ ॥
द्युरात्रवृत्ते विबुधैः समा गतिर्ज्ञेया यदा तस्य हि यो दिवौकसः ॥ ८ ॥

अथोपनात्या गतीना लक्षणमाह—गत्येति । अथ यदा पत्ररथानां पक्षिणामयनं मार्गो व्योम तस्मिन्नयनं मार्गो यस्य स ग्रहो द्युरात्रवृत्तेऽहोरात्रमंडले स्वमध्यगत्या निजमध्यगमनेन समं सदृशं स्फुटया स्पष्टया गत्या चरति गच्छति हि युक्तं तदा बुधैस्तस्य दिवौकसो ग्रहस्य समा गतिर्ज्ञेया ॥ ८ ॥

अत्यल्पगत्यांचरणांथ एति गतिर्यदाधिष्ठितभे विलोमाम् ॥
वक्रा गतिः स्यात्तमपास्य राशिं राशौ गते वक्रतरातिगत्या ॥ ९ ॥

अत्यल्पेति । यदाधिष्ठितभे आक्रांतराशौ अंबरपांथो ग्रहोऽत्यल्पगत्याऽतिसूक्ष्मगत्या विलोमां पश्चाद्गामिनीं गतिमेति प्राप्नोति तदा ग्रहस्य वक्रा गतिः स्यात् । अथातिगत्या तं राशिमपास्याश्रितराशिं त्यक्त्वा राशौ गते पाश्चात्यराशिं प्राप्ते ग्रहे सति वक्रतराऽतिद्रावेन वक्रा गतिः स्यादित्यर्थः ॥ ९ ॥

ग्रहोऽतिवेगेन यदा स्वमार्गमाक्रांतभे गच्छति यश्चरोक्ता ॥
तदा गतिस्तस्य विहाय राशिं तमेष्यभे चातिचरा गतिज्ञैः ॥१०॥

ग्रह इति। यदा यो ग्रहोऽतिवेगेनाक्रांतभे संश्रितराशौ स्वमार्गं निजमार्गं गच्छति तदा गतिज्ञैस्तज्ज्ञैस्तस्य ग्रहस्य गतिश्चरा उक्ता। च पुनर्ग्रहस्तं राशिमाश्रितराशिं विहायैष्यभे आगामिकराशौ गच्छति तदा गतिज्ञैस्तस्यातिचरा गतिरुक्ता ॥ १० ॥

वक्री पुनस्तत्र स चेन्नभोगस्तदातिचारी चरतीह मार्गी ॥
स्वमध्यगत्यूनजवेन मंदो ज्ञेयः कृशो यः स गतिक्षयत्वात् ॥११॥

वक्रीति। चेद्यदि स नभोगो ग्रहस्तत्र राशौ वक्री इह मार्गी संश्चरति गच्छति तदातिचारी कथ्यते। अथ ग्रहः स्वमध्यगत्यूनजवेन निजमध्यमगतिहीनवेगेन मंदो ज्ञेय इति लक्षणया मंदा गतिरुक्ता। अथ यो ग्रहो गतिक्षयत्वात्कृशः स कृशो ज्ञेय इति लक्षणया कृशा गतिरुक्ता ॥ ११ ॥

वक्रातिचारैंबरगाश्चरंतो ददत्यलं लल्लपराशराद्याः ॥
आक्रांतराशेरमनंत हीति फलं न लब्धद्रकवेधसत्याः ॥ १२ ॥

अथ ग्रहाणां वक्रातिचारे फलं निषेधयति—वक्रेति। अलमित्यवधारणे हीतिविशेषार्थे। अंबरगा ग्रहा वक्रातिचारे चरंतो गच्छन्त आक्रांतराशेः फलं न ददति न समर्पयंति। इति लल्लपराशराद्या ऋषयोऽमनंत जगुः। किंभूता लल्लपराशराद्याः द्रं गमनं तस्य कः प्रकाशस्तस्य वेधः द्रकवेधः अर्थात् ग्रहाणां गतिप्रकाशवेधः लब्धः प्राप्तश्चासौ द्रकवेधश्च लब्धद्रकवेधस्तस्मिन् सत्याः सत्यभाषिणः। 'द्रमयंगमनंक्षुद्रम्' इत्यादिद्व्यक्षरकोषे सौभरिकः। सूर्यमित्रवाय्वग्निब्रह्मात्मयमकेकिषु प्रकाशवक्त्रयोश्चापि' इतिराजशेखरः। अमनंतेत्यत्रात्मनेपदं द्रकेतिपदं बुधैश्चिंत्यं। वक्रातिचारे संहितायां यथा 'विलोमगत्या यदि वातिगत्या प्रयाति यो राशिमतीतमेष्यम्। हित्वा तदीयं गगनेचरोऽसौ दद्यात्फलं पूर्वगृहे यदुक्तम् ॥१॥

वक्रातिचारेण गृहांतरेऽपि स्थितो ग्रहः पूर्वफलप्रदः स्यात्। देशांतरं कार्यवशाद्गतो हि स्वदेशधर्मं न जहाति मर्त्यः ॥ २ ॥

यदा ग्रहोऽयं समुपैति राशिं तदा तदीयं स फलं ददाति। पीतादिवर्णेन समागमे हि वर्णं सितस्तन्मयतामुपैति ॥ ३ ॥

यावंति यो वक्रगतेर्दिनानि भवेत्स वक्रो यदि वातिचारः ॥ दशांशतुल्यानि दिनानि तेषां दद्यात्फलं पूर्वगृहे यदुक्तम् ॥ ४ ॥

त्रयोदशार्काः क्षितिजश्च सप्त त्र्यहं बुधः पंच दिनानि शुक्रः। वक्री गुरुः पूर्वफलप्रदः स्यादेकादशौवेति जगौ वराहः ॥ ५ ॥

मासं शनीज्यौ कुजभार्गवौ तु पक्षं दशाहानि च सोमसूनुः। ददाति वक्री फलमाद्यराशेः केषांचिदेवं न मतं बहूनाम् ॥ ६ ॥ इत्यर्थः ॥ १२ ॥

एकमासो भजमध्यभोगको भवेत् । अहोद्वयमित्यत्राशाब्दिकमतत्वादहर्द्वयमहोद्वयमित्यपि स्यादेवमग्रेऽपि कविना रत्वं रुत्वं च मोक्तमस्ति ॥ ४ ॥

युगं क्षितिभुवोऽथ मासयोरुपर्बुधक्रुभिर्मिता गुरोः ॥
अगोर्धृतिमिताश्च मासकाः खवन्हिभिरशुभ्ररोचिषः ॥ ५ ॥

युगमिति । क्षितिभुवो मंगलस्य मासयोर्द्वयं भजमध्यभोगकम् । अथ गुरोर्गीष्पतेरुपर्बुधा अग्नयश्च कुभूश्च ताभिस्त्रयोदशभिर्मिता मासकाः भजमध्यभोगकम् । पुनरगो राहोर्धृतिमिता मासकाः भजमध्यभोगकम् । पुनरशुभ्ररोचिषः कृष्णकांतेः शनेः खवन्हिभिस्त्रिंशतामिता मासकाः भजमध्यभोगकम् । स्युरितियुग्मम् ॥ ५ ॥

निजद्युनिशवृत्तगो ग्रहोऽनिशं प्रवहवायुनेरितः ॥
प्रयात्यपि गतिं पृथग्विधामचंचलचलोच्चहेतुना ॥ ६ ॥

अथैषां गतिहेतुमाह—निजेति । निजद्युनिशवृत्तगो निजाहोरात्रमंडलगतो ग्रहोऽनिशं निरंतरं प्रवहनामवायुना ईरितः प्रेरितः सन् पृथग्विधां भिन्नविधामपि गतिं प्रयाति । किंभूतेन प्रवहवायुना अचंचलचलोच्चहेतुना मन्दोच्चचलोच्चकारणेनेत्यर्थः ॥ ६ ॥

समा व्रजिनगातिवेलिता चरा चरतरा दिवौकसः ॥
गतिर्भवति मंदसंज्ञिका सदेति च कृशैव सप्तधा ॥ ७ ॥

अथ ग्रहाणां सप्तधागतिमाह—समेति । समा तुल्या गतिः १ व्रजिनगा वक्रगतिः २ अतिवेलिता अतिवक्रा गतिः ३ चरा गतिः ४ चरतरा गतिः ५ मंदसंज्ञिका मंदा गतिः ६ कृशा गतिः ७ दिवौकसो ग्रहस्येत्यमुना प्रकारेण सप्तधा गतिर्भवतीत्यर्थः ॥ ७ ॥

गत्या समं पत्ररथायनायनः स्वमध्यगत्या स्फुटया चरत्यथ ॥
द्युरात्रवृत्ते विबुधैः समा गतिर्ज्ञेया यदा तस्य हि यो दिवौकसः॥८॥

अथोपजात्या गतीनां लक्षणमाह—गत्येति । अथ यदा पत्ररथानां पक्षिणामयनं मार्गो व्योम तस्मिन्नयनं मार्गो यस्य स ग्रहो द्युरात्रवृत्ते स्वीयाहोरात्रमंडले स्वमध्यगत्या निजमध्यमगत्या समं सदृशं स्फुटया स्पष्टया गत्या चरति गच्छति हि युक्तं तदा बुधैस्तस्य दिवौकसो ग्रहस्य समा गतिर्ज्ञेया ॥ ८ ॥

अत्यल्पगत्यांबरपांथ एति गतिर्यदाधिष्ठितभे विलोमाम् ॥
वक्रा गतिः स्यात्तमपास्य राशिं राशौ गते वक्रतरातिगत्या ॥ ९ ॥

अत्यल्पेति । यदाधिष्ठितभे आक्रांतराशौ अंबरपांथो ग्रहोऽत्यल्पगत्याऽतिसूक्ष्मगत्या विलोमां पश्चाद्गामिनीं गतिमेति प्राप्नोति तदा ग्रहस्य वक्रा गतिः स्यात् । अथातिगत्या तं राशिमपास्याऽभिनराशिं त्यक्त्वा राशौ गते पाश्चात्यराशिं प्राप्ते ग्रहे सति वक्रतराऽतिशयेन वक्रा गतिः स्यादित्यर्थः ॥ ९ ॥

ग्रहोऽतिवेगेन यदा स्वमार्गमाक्रांतभे गच्छति यश्चरोक्ता ॥
तदा गतिस्तस्य विहाय राशिं तमेष्यभे चातिचरा गतिज्ञैः ॥१०॥

ग्रह इति। यदा यो ग्रहोऽतिवेगेनाक्रांतभे सश्रितराशौ स्वमार्गं निजमार्गं गच्छति तदा गतिज्ञैस्तज्ज्ञैस्तस्य ग्रहस्य गतिश्चरा उक्ता। च पुनर्ग्रहस्त राशिमाश्रितराशिं विहायैष्यभे आगामिकराशौ गच्छति तदा गतिज्ञैस्तस्यातिचरा गतिरुक्ता ॥ १० ॥

वक्री पुनस्तत्र स चेन्नभोगस्तदातिचारी चरतीह मार्गी ॥
स्वमध्यगत्यूनजवेन मंदो ज्ञेयः कृशो यः स गतिक्षयत्वात् ॥ ११ ॥

वक्रीति। चेद्यदि स नभोगो ग्रहस्तत्र राशौ वक्री इह मार्गी सञ्चरति गच्छति तदाऽतिचारी कथ्यते। अथ ग्रह स्वमध्यगत्यूनजवेन निजमध्यमगतिहीनवेगेन मंदो ज्ञेय इति लक्षणया मंदा गतिरुक्ता। अथ यो ग्रहो गतिक्षयत्वात्कृश स कृशो ज्ञेय इति लक्षणया कृशा गतिरुक्ता ॥ ११ ॥

वक्रातिचारैरचरगाश्चरंतो ददत्यलं लल्लपराशराद्याः ॥
आक्रांतराशेरमनंत हीति फलं न लब्धद्रकवेधसत्याः ॥ १२ ॥

अथ ग्रहाणां वक्रातिचारे फल निषेधयति—वक्रेति। अलमित्यवधारणे हीतिविशेषार्थे। अचरगा ग्रहा वक्रातिचारे चरतो गच्छन्त आक्रांतराशेः फल न ददति न समर्पयति। इति लल्लपराशराद्या ऋषयोऽमनंत जगुः। किंभूता लल्लपराशराद्या द्रु गमन तस्य क प्रकाशस्तस्य वेध द्रकवेध अर्थात् ग्रहाणां गतिप्रकाशवेध लब्ध प्राप्तश्चासौ द्रकवेधश्च लब्धद्रकवेधस्तस्मिन् सत्या सत्यभाषिण 'द्रुभयगमनक्षुद्रम्' इत्यादिद्व्यक्षरकोषे सौभरिक। सूर्यमित्रवाद्यग्निब्रह्मात्मयमकं किंपु प्रकाशवक्त्रयोश्चापि' इतिराजशेखर। अमननेत्यत्रात्मनेपदं द्रकेतिपदं बुधैश्चिन्त्यं। वक्रातिचारे संहितायां यथा 'विलोमगत्या यदि वातिगत्या प्रयाति यो राशिमतीतमेष्यम्। हित्वा तदीयं गगनेचरोऽसौ दद्यात्फलं पूर्वगृहे यदुक्तम्॥१॥

वक्रातिचारेण गृहांतरेऽपि स्थितो ग्रहः पूर्वफलप्रदः स्यात्। देशांतर कार्यवशाद्गतो हि स्वदेशधर्मं न जहाति मर्त्यः ॥ २ ॥

यदा ग्रहोऽन्य समुपैति राशिं तदा तदीयं स फलं ददाति। पीतादिवर्णेन समागमे हि वर्णः सितस्तन्मयतामुपैति ॥ ३ ॥

यावंति यो वक्रगतेर्दिनानि भवेत्स वक्रो यदि वातिचारः ॥ दशांशतुल्यानि दिनानि तेषां दद्यात्फलं पूर्वगृहे यदुक्तम् ॥ ४ ॥

त्रयोदशार्कि क्षितिजश्च सप्त ह्यह बुध पंच दिनानि शुक्रः। वक्री गुरुः पूर्वफलप्रदः स्यादेकादशैवेति जगौ वराह ॥ ५ ॥

मासं शनीज्यौ कुजभार्गवौ तु पक्ष दशाहानि च सोमसूनुः। ददाति वक्री फलमाद्यराशेः केषांचिदेव न मत बुधानाम् ॥ ६ ॥ इत्यर्थः ॥ १२ ॥

एवं शरांगाश्च जिना गुणार्का वियच्छराः खाब्धिधरा ग्रहज्ञैः ॥
क्रमेण धाराजमुखग्रहाणां घस्राः सदा वक्रगतेर्निरुक्ताः ॥ १३ ॥

अथ भौमादिग्रहपंचकस्य वक्रगतिदिननियममाह—एवमिति । सदा ग्रहज्ञैरेवं क्रमेण धराजमुखग्रहाणां भौमादिग्रहाणां वक्रगतेः शरादिमिता घस्रा वासरा निरुक्ताः प्रोक्ताः । कोऽर्थः । भौमस्य वक्रगतेः शरांगाः पंचसप्ततिर्वासराः । बुधस्य वक्रगतेर्जिनाश्चतुर्विंशतिर्वासराः । गुरोर्वक्रगतेर्गुणार्कास्त्रयोविंशत्यधिकशतं वासराः । शुक्रस्य वक्रगतेर्वियच्छरा गगनबाणाः पंचाशत्वासराः । शनेर्वक्रगतेः खाब्धिधराश्चत्वारिंशदधिकशतं वासरा इत्यर्थः ॥१३॥

शरांबरागा द्विनवाहितारका सुरेषवो ह्यग्नियमाश्च वासराः ॥
तेषां स्वभुक्त्याननमार्गकाश्रिताः स्मृता बुधैरूर्ध्वमतोऽथ वक्रगाः॥१४

अथैषां मार्गदिननियममाह—शरेति । बुधैस्तेषां भौमादीनां पंचानां स्वभुक्तिर्निजसंक्रमितभोगराशिस्तस्या आननं मुखं संक्रमणप्रारंभो यस्यासौ मार्गकश्च तमाश्रिताः प्राप्ताः स्वभुक्त्याननमार्गकाश्रिता शरादिमिताः वासराः स्मृताः । कोऽर्थः । भौमस्य निजराशिसंक्रमणमुखादारभ्य मार्गे भवा मार्गकाः वासराः शरांबरागाः पंचाधिकसप्तशतानि भवंति । एवं बुधस्य द्विनव द्वानवतिर्वासरा मार्गकाः । गुरोरहितारकाः अष्टसप्तत्यधिकशतद्वयं वासरा मार्गकाः । शुक्रस्य सुरेषवस्त्रयस्त्रिंशदधिकपंचशतानि वासरा मार्गकाः । शनेर्ह्यग्नियमाः अष्टात्रिंशदधिकशतद्वयं वासरा मार्गका इति । अथ चेद्यदि अतएव तस्मान्मानादूर्ध्वं चेद्वक्रगाः स्युरित्यर्थः ॥ १४ ॥

स्वकालभागांतरकाधिकश्चेन्मंदो व्रजेदंशुमतो ग्रहोऽस्तम्॥
ऊनो निजैः काललवैरमंदस्तदान्यथा चाभ्युदयं प्रयाति ॥ १५ ॥

अथैषामस्तोदयमाह— स्वकालेति । मंदो ग्रहो गुरुः शनिश्च मंदौ गुरुशनी इति ज्योतिषः संज्ञात्वात् । अंशुमतः सूर्यात् स्वकालभागांतरकाधिको निजकालांशांतराधिकस्तदा गुरुः शनिश्चास्तं व्रजेत् । यदा अमंदश्चंद्रो बुधः शुक्रो भौमश्च ये तेऽमंदाः निजैः काललवैः स्वकालांशैरूनो हीनस्तदाऽमंदो विधुर्बुधः शुक्रो भौमश्चास्तं व्रजेत् । च पुनरन्यथा पूर्वोक्तविपर्यये कोऽर्थो यदा सूर्यः स्वकालांशान्तरहीनश्चेत्तदा गुरुः शनिश्चोदयं प्रयाति । सूर्यो निजकालांशैरधिकश्चेत्तदा चंद्रो बुधः शुक्रो भौमश्चोदयं प्रयातीत्यर्थः ॥ १५ ॥

दिवाकराः सप्तधरा गुणोर्व्यो हरा ग्रहा बाणधरा ग्रहाणाम् ॥
कालांशका मार्गवतामिलोना अमी क्रमाद्वक्रवतामथाब्जात् ॥१६॥

अथ ग्रहाणां कालांशकानाह—दिवेति । अब्जात् चंद्रात् मार्गवतां मार्गिणां ग्रहाणां क्रमेण दिवाकरादयः कालाः स्युः । कोऽर्थः । मार्गिणश्चंद्रस्य दिवाकरा द्वादशकालांशकाः । मार्गिमंगलस्य सप्तधराः सप्तदश मार्गिबुधस्य गुणोर्व्यस्त्रयोदश मार्गिगुरोर्हरा एकादश मार्गिशुक्रस्य

ग्रहा- नवो मार्गिशनेर्वर्णाधराः पचदश कालाशका इति। अथ वक्रव्रता ग्रहाणा क्रमेण इलोना इला भिस्तया ऊना एकोना अमी निजनिजकालांशका स्यु। कोर्थ। वक्रिणो भौमस्य षोडशका- गशका। एव वक्रिबुधस्य द्वादश। वक्रिगुरोर्दश। वक्रिशुक्रस्याष्टो। वक्रिशनेश्चतुर्दशेति ॥ १६॥

महीभुवोऽप्यंऽश्वरहेलयो नृपा वियद्गुणा व्योमचराः षडग्नयः ॥

देवौकसां पाशभृतोऽस्तवासरा दिगाश्रिता ज्ञानिभिरत्र कीर्तिताः ॥१७॥

अथ वंशस्थेन भौमादीनामस्तदिननियममाह—महीति। ज्ञानिभिरत्र महीभुवो भौमादि देवौकसा ग्रहाणामस्तवासरा अश्वरहेल्यादय पाशभृतो वरुणस्य दिगाश्रिता पश्चिमदिगाश्रिता कीर्तिता। स्पष्ट तु भौमस्य अश्वरहेल्यो विंशत्यधिकशत पश्चिमदिगाश्रिता अस्तवासरा। एवं बुधस्य नृपा षोडश। गुरोर्वियद्गुणास्त्रिंशत्। शुक्रस्य व्योमचरा नव। शने षडग्नय षट्त्रिंशत् ॥ १७ ॥

क्रमेण तेऽष्टेषुरसैरगाग्निभिर्दिगद्रिरामैर्विधुसायकाक्षिभिः ॥

प्राच्यां दिनैरंकसुरैरथोदिताः पश्चाद्व्रजंत्यस्तमयं पुनर्ग्रहाः ॥ १८॥

अथोपजात्या भौमादीनामुदितदिननियममाह—क्रमेणेति। क्रमेण ते भौमादय पच ग्रहा अष्टेषुरसादिभिर्दिनै प्राच्या पूर्वस्यामुदिता सतोऽथ पश्चात् पुनर्ग्रहा अस्त व्रजति। कोऽर्थ। भौम पूर्वस्यामष्टेपुरसैरष्टपचाशदधिकषट्शतैर्दिनैरुदित पश्चादस्त याति। एव बुधोऽगाग्निभि सप्तत्रिंशद्दिनै पश्चा०। गुरुर्दिगद्रिरामैर्द्वासप्तत्यधिकशतत्रयेण दिनै प०। शुक्रो विधुसायकाक्षिभिरेकपचाशदधिकशतद्वयेन दिनै प०। शनि पूर्वस्यामुदित पश्चाद कसुरैरेकोनचत्वारिंशदधिकशतत्रयेण दिनैरस्त याति ॥ १८ ॥

वक्रोदितावष्टजिनाश्च देवा यत्नास्ततस्तिष्ठत एवमग्र्याम् ॥

अस्तं यमाश्वा रदना व्रजेतां तावुद्गमं काव्यविदौ प्रतीच्याम् ॥१९॥

अथेन्द्रवज्रया वक्रोदितशुक्रबुधयोरस्तोदयदिननियममाह—वक्रइति। काव्यविदौ शुक्रबुधौ वक्रोदितौ वक्रवंतौ उदय प्राप्तौ अष्टजिना अष्टचत्वारिंशदधिकशतद्वय देवास्त्रयस्त्रिंशत यत्नाश्च गता सतस्ततस्तस्या दिशि पूर्वस्या तिष्ठतो वसत पश्चादैन्द्र्या पूर्वस्यामेवास्त व्रजेता। अपुन शुक्रबुधौ अस्तानतर यमाश्वा द्वासप्ततिर्वासरा रदना द्वात्रिंशद्वासरा गता मन्त प्रतीच्या पश्चिमायामुद्गममुदयं व्रजेता। कोर्थ। शुक्र पूर्वस्या वक्रोदितादारभ्य अष्टाचत्वारिंशदधिकशतद्वयमितेषु गतेषु पुन पूर्वस्यामेवास्त याति। अस्तदिनादारभ्य द्वासप्ततिदिनेषु गतेषु शुक्र पुनः पश्चिमायामुदयं याति। एव बुधोऽपि स्वमानेनेति। अथ विशेष। भौमादय सर्वे ग्रहा- पूर्वस्यामुदय याति पश्चिमायामस्त याति पुन शुक्रबुधौ पूर्वस्यामुदयमस्त पश्चिमाया चोदयमस्त यात इति ॥ १९ ॥

---

१ क्रमेण भूतर्करसैरिति क्वचित्पाठो दृश्यते। अय महलाघवानुसारी।

अवक्रवक्रास्तमयोदयानां मानं यतः स्थूलतयैतदुक्तम् ॥
प्रत्यक्षमश्रांतमृतेऽवबोधेऽनेनानुवेलं न हि गोचरस्य ॥ २० ॥

अथोपजात्यैतन्मतं दृढयति—अवक्रेति । हीति निश्चितं । अवक्रवक्रास्तमयोदयानां समवक्रास्तमयोदयानां ग्रहाणामेतन्मानं स्थूलतया उक्तं । यतः कारणादवबोधे, ज्ञाने गोचरस्यानेन मानेन कृते विनाश्रांतं निरंतरमनुवेलं समयं प्रति प्रत्यक्षं नास्ति ॥ २० ॥

वक्री दिवौका निजवक्रघस्रैर्यस्तस्य पूर्वोदितमध्यराशेः ॥
भोगादनल्पो ननु राशिभोगो ज्ञेयोऽयमुत्पातहतो ग्रहज्ञैः ॥२१॥

अथेन्द्रवज्रयोत्पातलक्षणग्रहमाह—वक्रीति । यो वक्री वक्रवान् दिवौकाः ग्रहो निजवक्रघस्रैः पूर्वोदितमध्यराशेर्भोगादनल्पो महान् तदा ननु निश्चितं ग्रहज्ञैस्तस्य, ग्रहस्यायं राशिभोग उत्पातहतो ज्ञेयः । दिवि गगने ओको गेह यस्य स दिवौकाः । दिवौकाः पृषोदरादित्वाच्छन्दप्रभेदोऽपि ॥ २१ ॥

निजास्ततोऽह्वानि पुरातनोऽर्वागूर्ध्वं शिशुः स्यादुदयाद्दिवौकाः ॥
स्वास्तद्युवेदांशमितानि सद्भिरुक्तस्तदुक्त्याश्रितगोमनोभिः॥२२॥

अथोपजात्या ग्रहाणां वयोवस्थामाह—निजेति । निजास्तत स्वास्तमयादर्वाक् पूर्वं दिवौका ग्रह पुरातन वृद्धः स्यात् । पुनरुदयादूर्ध्वमुपरि शिशुः स्यात् । कियत्कालं स्वास्तद्युवेदांशमितानि निजास्तमयदिनानां चतुर्थभागप्रमितान्यहानि दिनानि एतावत्कालमिति कालाध्वनोरिति द्वितीया इति सद्भिरुक्तः । किंभूतैस्तदुक्त्याश्रितगोमनोभिस्तेषां ग्रहाणामुक्तिस्तयाश्रितं गौः वाग् मनश्चित्तं येषां ते तैरित्यर्थः ॥ २२ ॥

सदौषधीशोऽस्तमयाद्दिनैकमेकं स्मृतो बालपुराणकायः ।
अगोरहो दर्शनमिंदुहेलयोर्ग्रहेऽथ केतोर्दिनविंशतिः स्यात् ॥ २३ ॥

अथ विशेषमाह—सदौषधीशइति । सदा ओषधीशश्चन्द्रोऽस्तमयाद्दिनैकमेकं बालपुराणकायः स्मृतः उदयाद् दिनं बालः अस्तात्प्राग् दिनं वृद्धः । अथ पुनरगो राहोरिंदुहेल्योश्चन्द्रसूर्ययोर्ग्रहे ग्रहणे एकं दिनं पूर्वापरत्वेनादर्शनमद्धर्वृद्धो बालः । केतोर्दर्शने दिनविंशतिर्बालपुराणकायः ॥ २३ ॥

केचिज्जरत्वं किल दारकत्वं मितानि वा कालखैर्निजैः स्यात् ।
अहान्यथो वासनयेतिघस्रैर्विश्वैर्जगुः कालगतेर्ग्रहस्य ॥ २४ ॥

अथ प्रकारान्तरमाह—केचिदिति । किलेति संभावनायाम् । कालगतेरस्तंगतस्य ग्रहस्य निजैः कालखैर्मितान्यहानि यावत् जरत्वं वृद्धत्वं दारकत्वं बालत्वं स्यात् । अथो वा घस्रैः पञ्चदशभिर्विश्वैस्त्रयोदशभिर्मितान्यहानि जरत्वं बालत्वं स्यादिति वासनया भावनया केचित् बुधा जगुः ॥ २४ ॥

एकर्क्षभोगोऽष्टशती कलाः स्यात्सपादधिष्ण्यद्वयमेकराशेः ॥
भोगो ग्रहाणां भयुगांशपादः सदैकभोगे च नवांशकाः स्युः॥२५॥

अथ ग्रहाणां राशिभोगमाह—एकेति । ग्रहाणामेकर्क्षभोग एकनक्षत्रभोगोऽष्टशती अष्टानां शतानां समाहारोऽष्टशती कलाः त्रयोदशांशा विंशतिः कलाः स्युः । सपादधिष्ण्यद्वयमेकचरणसहितनक्षत्रद्वयमेकराशिभोगःस्यात् । च पुनः सदैकभोगे एकभोगे राशिभोगे भयुगांशपादः सपादनक्षत्रद्वयं नवांशकाः स्युरित्यर्थः ॥ २५ ॥

भुक्तौषधीशप्रमदांघ्रिराशेरिता नवाप्ता ननु राशयः स्युः ॥
अथादिभाच्छेषमिता नवांशा ज्ञेया ग्रहाणामिति राशिभोगाः॥२६॥

अथ विशेषत आह—भुक्तइति । ननु निश्चितं । अथ आदिभादश्विनीतो भुक्ता ओषधीशप्रमदानां नक्षत्राणामङ्घ्रयश्चरणा येन स चासौ राशिश्च तस्माद्राशेरिताः प्राप्ताः नवभिराप्ताः लब्धा ग्रहाणां राशयः स्युः । अथ पुनः शेषमिताः शेषनक्षत्रचरणमिता ग्रहाणां नवांशा ज्ञेया इति राशिभोगाः ॥ २६ ॥

शरीरिणश्चंडघृणीतरांशुर्यत्रस्थितो जन्मनिभे स राशिः ॥
अज्ञातजन्मद्युभकालजंतोः प्रसिद्धनामाक्षरतो जनेर्वा ॥ २७ ॥

अथ मनुजानां राशिमाह—शरीरिणइति । शरीरिणो मानवस्य स राशिर्भवेत् । स कः जन्मनि भे यत्र भे यस्मिन् राशौ चंडघृणिः सूर्यस्तस्माद् इतरांशुः शीतांशुश्चंद्रः स्थितो भवेत् । वा इति पक्षांतरेऽज्ञातजन्मद्युभकालजंतोरविदितजन्मदिननक्षत्रसमयो यस्य स चासौ जंतुर्मनुष्यस्तस्य जनेर्जन्मसमयादारभ्य प्रसिद्धनामाक्षरतः ख्यातनाम्न आदिव्यंजनतो राशिः स्यात् ॥ २७ ॥

क्षीणौषधीशारयमांशुमालिनः पापाः सदान्ये खचराश्च साधवः ॥
नभश्चराणामिह येऽपि राशयःस्मृताःखलानां विबुधैरसाधवः ॥२८॥

अथ खलसौम्यग्रहानाह—क्षीणौषधीशेति । सदा क्षीणौषधीशः क्षीणश्चंद्रः आरो भौमः यमः शनिः अंशुमाली सूर्यश्चैते पापाः क्रूराः अन्ये बली चंद्रः बुधः शुक्र गुरुश्च खेचरा साधवः सौम्याः। इह खलाना ग्रहाणां येऽपि राशयः विबुधैस्ते राशयोऽसाधवोऽसौम्याःस्मृताः॥२८॥

पंचाननाख्यो हि यथेभचक्रे पंचाननाख्योऽस्ति तथा भचक्रे ॥
एनं हरिः पालयितुं क्षमोऽस्य कृतं तदित्येतदगारमार्यैः ॥ २९ ॥

अथ वर्णनद्वारेण सूर्यस्य सिंहगृहं स्थापयति । अथ सिंहराशिं तत्स्वामिनं च वर्णयति—पचाननाख्यइति । हीति विशेषार्थे यथा इभचक्रे गजयूथे पंचाननाख्यः सिंहोऽस्ति तथा भचक्रे राशिसमूहे पंचाननाख्य सिंहराशिरस्ति अतो हरिः सूर्य एनं सिंहराशिं पालयितुं

क्षमोऽस्मि । अत्र शब्दबलात् हरिरेव हरिं पालयितुं क्षमो नान्यः इति हेतोराद्यैर्विबुधैरस्य सू-
र्यस्यैतदगार सिंह कृतम् ॥ २९ ॥

सिंहादिचक्रार्द्धपती रविः स्याद्विलोमकीटादिभखंडपोऽब्जः ॥
पतंगधामासविधं तमीशः स्थातुं कुलीरे त्वकरोदगारम् ॥ ३० ॥

अथ रविचंद्रयोः षण्णां षण्णां राशीनां स्वामित्वमाह—सिंहेति । रविः सिंहादिचक्रार्द्धपतिः स्यात् । कोऽर्थः । सिंहः कन्या तुला वृश्चिकः धनुः मकरः एषां पतिः सूर्यः । अथाब्जश्चंद्रो विलोमकीटादिभखंडपः विलोमगणनया कर्कादिराशिस्वामी स्यात् । कोऽर्थः । कर्कः मिथुनं वृषः मेषः मीन. कुंभ इति । अथ वर्णनद्वारेण चंद्रस्य कर्कगृहं स्थापयति । तुरित्यवधारणे तमीशश्चंद्रः कुलीरे कर्कराशौ अगारं गेहमकरोत् कृतवान् । किं कर्तुं पतंगस्य रवेर्धाम्नो गृहस्य आसविधं सामस्त्येन समीपं स्थातुं । अत्र यः पाठः एकः प्रोक्तः द्वितीयः ह्यकरोरगारं । अत्र हे तमीश इति वाच्यं । तृतीयस्तु चकरो रजं चेति । अत्राहं तमीश उरजं गृहं चकर करोमि स्मेति शेष तथैव ॥ ३० ॥

उच्चोच्चमार्गे चरतां ग्रहाणां बुधाननानामवनेरिनेंद्वोः ॥
प्रतिष्ठितान्यालयतः पुराणैर्द्विजैर्यथोकांसि यथाक्रमेण ॥ ३१ ॥
षडंघ्रिविभयो रसाभवो भृगुर्वृषभशांकराव्हयोः ॥
वशाजितुमयोर्विदीश्वरोऽनुगो भवति कर्किणो भपः ॥ ३२ ॥
भगो नखरहेतिनायकः शरासनवनाल्ययाग्यपः ॥
गुरुस्तिमिर्ग्वरिजो बुधैः स्मृतः कलशनक्रभेश्वरः ॥ ३३ ॥

अथ शेषग्रहाणां राशिगृहाण्याह—उच्चेति । पुराणैर्वृद्धैर्द्विजैर्यथाक्रमेणेनेंद्वोः सूर्य-चंद्रयोरालयतो गृहाभ्यामोकांसि गृहाणि प्रतिष्ठितानि स्थापितानि । केषां बुधाननानां बुधप्रमुखानां ग्रहाणां । अतएव किं भूताना उच्चोच्चमार्गे चरतां गच्छतां । कोऽर्थः । बुधादीनां बुधशुक्रभौमगुरुशनीनां सूर्याल्लिसहादिषड्गृहाणि प्रोक्तानि । अथ विशेषेण चंद्रात्कर्कादि षड्गृहाणि । यथा सूर्यस्य सिंह, बुधस्य कन्यामिथुने शुक्रस्य तुलावृषौ मंगलस्य मेषवृश्चिकौ । इत्यं ज्ञानमिति शेषः ॥ ३३ ॥

क्रमादजभगोमृगावलाकुलीरतिमिनौलिराशयः ॥
इंः स्तुग्ध तुंगनंज्ञितास्तदंशमितराशयो नताः ॥ ३४ ॥

भृगो मकर कर्कश्च बुधस्यावला कन्या मीनश्च गुरो कुलीर कर्को मकरश्च शुक्रस्य तिमिर्मीन कन्या च शनेस्तौलिराशिस्तुला मेषश्च उच्चनीचौ ॥ ३४ ॥

न कल्पितमगोश्च मंदिरं महर्षिभिरनुच्चमुच्चकम् ॥
तथा शिखिन आकृतेस्तयोर्गतेरनियमादभावतः ॥ ३५ ॥

अथ राहुकेत्वोरुच्चनीचाभावमाह—नकल्पितमिति। महर्षिभिरगो राहोस्तस्या शिखिन केतोश्चोच्चकमनुच्चक मंदिर च न कल्पित न कथित कस्मादनियमादनिश्चयेन राहुकेत्वोराकृते शरीरस्य गतेर्गमनस्याभावत इति ॥ ३५ ॥

तथाप्युदितमास्पदं वशा त्वगोर्मिथुनमुच्चमस्तभम् ॥
अनुच्चमपरैरतोऽस्तभं कुलादिकमिदं शिखावतः ॥ ३६ ॥

अथ मतांतरमाह—तथेति। तु पुनस्तथाप्यपरैर्बुधैरगो राहोर्वशा कन्या आस्पद गृहमुदित मोक्त पुनरस्य मिथुनगृहमुच्च अस्तभं धनूराशिभवनमनुच्च। शिखावत केतोरत कन्यातो मिथुनतो धनुतोऽस्तमं सप्तमं कुलादिक गृहादिक मोक्त। कोऽर्थ। निजं मीनमभन आदिशब्दात् धनुरुच्चं मिथुनं नीच मोक्तमिति ॥ ३६ ॥

कमासुरमगुं पुराणगा विदुः स्वरविदोऽहिविग्रहम् ॥
तमोमयमिह स्वकर्म्मणा सदेति च कभेदवानयम् ॥ ३७ ॥

अथ राहुकेत्वोर्भेदमाह—कमेति। स्वरविद पुराणगा आसुर श्मश्रूपलक्षित क मस्तकमगु राहुं विदु। च पुनरहिविग्रह सर्प्पशरीर तमोमय तम स्वरूप केतु विदु। इतीह लोकेऽयं ग्रह स्वकर्म्मणाऽमृतपानापराधेन सदा कभेदवान् कस्य शरीरस्य भेदयुक्त। पृथक् मस्तक पृथगन्यत् 'मूर्ध्नि चित्ते जले काये' इत्यादिकशब्दार्थे ॥ ३७ ॥

सदागमपुराणसंहितास्वयं किल खगो विधुंतुदः ॥
शिखीगणितभुक्तिदर्शनात् प्रसिद्ध इति तथ्यमस्त्यपि ॥ ३८ ॥

अथास्यप्रमाणतामाह—सदेति। किलेति भावनाया। अयं विधुंतुदो राहु शिखी केतु खग आगमा वेदा पुराण संहिता एतासु गणितं राश्यादिभुक्तिर्गति कलादिरेषा दर्शनात्सदा प्रसिद्ध इति तथ्य सत्यमस्त्यपि। उक्तंच। प्राय सदा दानफलानि पुमा भवनि तत्वाद्गुचरं निमित्तम्। सप्तैव तान् केचिदुदाहराति नवग्रहानप्यपरे मुनींद्रा ॥१॥ हिरण्यगर्भो भुवन मिश्रगु सप्तैव वारानसृजद्युगादौ। उत्पातरूपाच्छिखिनोगुमिन्दो पात च मप्तैव मनोग्रहा स्यु ॥२॥ न गोचरे नापि विउग्रनाथो भयो निरुक्त ग्रहशास्त्रतज्ज्ञै। स्वर्भानुकेतो सदसत्फलत्वमस्तीति जल्पति च केचिदेवम् ॥३॥ नाब्दाधिपत्य न दिनाधिपत्य न गोचरस्थानवलागमेषु। होरादशाया च तथाष्टवर्गे नथापि मूढा प्रवदनि राहुम् ॥४॥ न दृष्टमन्यत्र फलान्वित तमस्तथापि वाच्य कचिदीरित यत। अनुक्तमात्र नहि तद्विरोधक विभिन्नवाक्येऽपि समानदोषत ॥ ५ ॥ ए-

कत्र दर्शनान्मूढैर्नान्यत्राप्युक्तमिष्यते ॥ जलामरत्वेन सर्वत्र न ह्यसत्वं विभावसो ॥६॥ राहुःपीडां ग्रहः कुर्याच्चन्द्रभास्करयोरपि । मनुष्याणामुदासीनः स मूढैः कथ्यते कथम् ॥७॥ तावद्दृपांको भुवनत्रयस्य सर्गस्थितिध्वंसविधौ विधाता । तं शंभुमूर्ध्ना भृतमिंदुमद्यात्तथापि मूढा न वदंति राहुम् ॥८॥ आदौ हि सृष्टेः शतपत्रजन्मा ससर्ज मंदग्रहशीघ्रपातात् । अकल्पयच्चैषु नवग्रहांश्च तेषां च मध्ये कृतसप्तवारान् ॥९॥ कालत्रय रुद्रविलिप्तिकादद्वं तमोऽन्वहं व्यस्तगतं भुनक्ति । गजाश्विलिप्तासहितेन वार्कमन्वेति भागत्रितयेन केतुः ॥१०॥ अत्रानुमानेऽपि च भुक्तिमत्त्वहेतोरनैकान्तिकता हि दृष्टा । अतो न तेषां ग्रहता परेषां तदन्यथा संभवतो तदूह्यम् ॥११॥ मंदोच्चपातेष्वपि भुक्तिमत्वे न विश्वजन्मा विदधे ग्रहत्वं । तेषां पृथक्कर्मतपःप्रभावो हेतुर्ग्रहत्वे न तु भुक्तिमत्वम् ॥ १२ ॥ प्रासादकूपादिजलाशयानामुद्यापने दैवतशाखिनां च । गृहार्चने शांतिकपौष्टिकेषु नवग्रहाणां जगति प्रसिद्धिः ॥१३॥ राहुःपुराणेष्वसुरोत्तमाङ्गे भुजंगरूपं स्मरशास्त्रकाराः । तमिम्बरूपं जगदुर्ग्रहज्ञा स्वरूपभेदोऽस्य तु कार्यभेदात् ॥१४॥ अष्टाधिकेतुसहस्रमाहुर्वराहलछमसुप्तग्रहज्ञाः । ते चाग्निकालद्रुहिणांतककेग्रहोग्रवास्तामसकीलकाद्य ॥ १५ ॥ वृत्ति विधास्यन्त्रिलिना गणानां चकार सत्कर्मविभागमाद्याः । येषां तु यस्मिन्पहारभागः प्रकल्पित कर्मणि तत्र ते स्युः ॥१६॥ व्यासोंगिराः शौनकवामदेवपराशराश्चात्रिमरीचिमुख्याः । अस्त्येव राहुः प्रवदंत्यनस्तैर्दृष्टेन्दुरेखादिषु चात्र नित्यः ॥१७॥ भिन्नं शिरः विसुधां पिबतो सुरस्य प्राणाश्च चात्यजदथामरवृंदमत्तम् । दृष्ट्वाद्यनं विभिरदादमरत्वमस्य पूजां पुष्कर सदा भविताष्टमस्त्वम् ॥१८॥ जिनेषु देवेषु पुरा सुरेन्द्रैर्मघः सुरारोऽडलिनोऽस्य वेधां देवै महान्. परितोऽमेत्य याते ग्रहाणां निगुणोऽत्र रेतुम् ॥१९॥ यथा गोचरेणार्कपुत्रो विधिस्तथा राहुकेतू फलं माप्नुयातु । शिरसो भिन्नो वेदको नार्कमदां तुर्वंदू न यद्वत्तथा राहुकेतोः ॥२०॥ विवाहादिसत्कर्मकार्येषु उभे शिक्षित्य वदं मंदवद्राहुकेत्वोः । स क्ष्मानिपातो भवेद्यत्तु केतोर्विचिंत्याकेतचापि नक्षत्रशुद्धि ॥२१॥ इतिमहितादीपके ॥ ३८ ॥

सर्वे महारमजहरीज्यसुधारसाग्रो मित्राणि हंसजमिताववहितौ समोऽन्यः॥
भानोर्विधोः रविविधोः सुहृदावपान्ये मध्याः समावसितसौरानसावर्कि॥३९॥
अन्येऽसृजः सुहृद इंदुसुतोऽभिघातिः सोयोऽसृगेनिधिषणाश्च समाः सखायौ । अन्यौ न वासवगुरोरहितौ कविज्ञौ मध्यो यमोऽशुभ्जचंद्रमसोऽप्यनीष्टाः ॥ ४० ॥
सौम्यासितावसृगोःसुहृदौ रवींदू प्रत्यर्थिनौ त्रिदशवंद्यकुजौ समौ स्तः॥
मध्यो गुरुर्भृगुजचंद्रजौ यमस्य मित्रेऽपरेऽस्य इतीह मयोच्यतेऽन्ः ॥४१॥

अथ [illegible] —सर्वेति । अन्येति । सौम्यादिति । [illegible] । [illegible] अन्यद्

भौमः हरीज्यः इंद्रपूज्यो गुरुः तुषारभाश्चंद्र एते भानोर्मित्राणि स्युः। हंसजः सूर्यात्मजः शनिः सितः शुक्र एतौ अहितौ अरी अन्यो बुधः समः। अथ विधोश्चंद्रस्य रविविदौ सूर्यबुधौ सुहृदौ मित्रे अन्ये समाः। चंद्रस्य वैरी नास्ति। अथासृजो मंगलस्य असितभः कृष्णप्रभः शनिरुशना शुक्रः एतौ समौ बुधोऽरिः अन्ये सुहृदो मित्राणि। अथेंदुभुवो बुधस्य सोमोऽभिघातिर्वैरी असृग् भौम ऐनिः शनिः धिषणो गुरुरेते समाः अन्यौ सखायौ मित्रे। अथ वासवगुरोरिंद्रगुरोर्बृहस्पतेः कविज्ञौ शुक्रबुधौ अहितौ यमः शनिर्मध्यः समः अंशुः सूर्यः कुजो मंगलश्चंद्रमा एतेऽभीष्टा अतिमित्राणि। अथ भृगोः शुक्रस्य सौम्यो बुधः असितः शनिः एतौ सुहृदौ रवींदू प्रत्यर्थिनौ शत्रू त्रिदशवंद्यो गुरुः कुज एतौ समौ स्तः। अथ यमस्य शनेः गुरुर्मध्यः समः भृगुजः शुक्रः चंद्रसुतो बुध एतौ मित्रे अपरेऽरयः शत्रव इति ॥ ३९ ॥ ४० ॥ ४१ ॥

मूर्तेरथो सविधकेंद्रयुगानुगाश्च तात्कालिका इति सभाजनवंत उक्ताः ॥
तज्ज्ञैर्मिथोऽन्यगृहगा अभिघातयोऽतः सर्वत्र राशिवलये द्विजवर्त्ममार्गाः ॥

अथ तात्कालिकग्रहाणां मैत्रीचक्रमाह—मूर्तेरिति। अथ तज्ज्ञैर्द्विजवर्त्म पक्षिमार्गो नभस्तस्मिन् मार्गो येषां ते द्विजवर्त्ममार्गा ग्रहास्तात्कालिकाः जन्मादिसमयभवाः मूर्तेर्लग्नात् सविधकेंद्रयुगानुगाः पूर्वानुपश्चात् समीपकेंद्रयुग्मगताः। कोऽर्थः। धन २ सहज ३ सुहृ ४ भवनगताः व्ययाय १२ ११ कर्म १० भवनगताः मिथः परस्परं सभाजनवंतो मित्राणि उक्ताः। कस्मिन्सर्वत्र राशिवलये अतः परमन्यगृहगा अभिघातयः शत्रवः उक्ताः। आलिंग्य कुशलादिपृच्छा सभाजनं कथ्यते। यतः "आनंदनत्वाप्रच्छनं स्यात्सभाजनमित्यपि" इति हैमः। अभिमानिरभिघातिश्चेति शब्दप्रभेदे साधुसुंदरगणयः ॥ ४२ ॥

शक्त्यत्रिदेवलवराहविरोचनाद्या मित्रादिकं त्रिगुणभावभृतां ग्रहाणाम् ॥
युक्त्यन्वितं जभणुरप्यपरैरदो यदुक्तं निसर्गजनितं तदयुक्तिमत्स्यात् ॥ ४३

अथ सदुक्त्या मतांतरं निषेधयति—शक्त्येति। शक्त्यत्रिदेवलादयः त्रिगुणभावभृतां ग्रहाणां मित्रादिकं मित्रसमशत्रुरूपं तदन्वितं युक्त्यन्वितं जभणुर्जगुः। अपि पुनरपरैर्यत् मित्रादिकं निसर्गजनितं स्वभावजातं न पुनस्तात्कालिकमित्युक्तं तदयुक्तिमत् न युक्तिमत्स्यात् ॥ ४३ ॥

ज्ञेयः स्वकीयनिलयोच्चसुहृद्गृहस्थोऽवक्री शचीरमणवु-
द्धिसहाययुक्तः ॥ धिष्ण्यान्वितो मृधजयी स बली
ग्रहेंद्रो यो गोचरादिभवपूर्णफलप्रदः स्यात् ॥ ४४ ॥

अथ फलदायिग्रहमाह—ज्ञेयइति। यो ग्रहेंद्रो गोचरादिभवपूर्णफलप्रदः स्यात्। स ग्रह एवंविधो ज्ञेयः। स्वकीयेति। स्वकीयनिलयोच्चसुहृद्गृहस्थः निजभवनस्थः उच्चभवनस्थः मित्र-

भवनस्थः अवक्रो मार्गस्थः शचीरमणः पौलोमीपतिरिंद्रस्तस्य बुद्धिसहायः प्रधानो गुरुस्तेन युक्तः धिष्ण्याभिनः शुक्रयुक्तः मृधजयी संग्रामे जयं प्राप्तः बली ग्रहयुद्धे उत्तरचारी ग्रहो बली इति ॥ ४४ ॥

योऽनुच्चगोऽरिकुलगोऽर्कविलुप्तदीप्तिः पातंग्यसृक्तिमिरदीप्तियुतो विवेगः ॥ सुस्थानगोऽपि खचरो विफलो भचक्रे स्यात्साहितोऽहितखलग्रहवर्गवान्सः ॥ ४५ ॥

अथ विफलग्रहमाह—य इति । यः सुस्थानगः शुभस्थानकगतोऽपि खचरो ग्रहो भचक्रे नक्षत्रमंडले एवंविधः स्यात् । योऽनुच्चगो नीचभवनगतः अरिकुलगः शत्रुगृहगतः "समौदवसितं कलम्" इतिहैमः । अर्कविलुप्तदीप्तिरस्तंगतः पातंगिः सूर्यस्यापत्यं शनिः । असृक् भौमः तिमिराणामंधकाराणां दीप्तिर्ज्वलनमर्थशक्त्या विनाशो यस्मात् स तिमिरदीप्तिः सूर्य एभिर्युक्तः विगतो वेगो यस्यस मंदः साहितः शत्रुग्रहसहितः अहितः शत्रुः खलग्रहः पापग्रहः एषां द्वंद्वः एषां वर्गः षड्वर्गोऽस्यास्तीत्यहितखलग्रहवर्गवान् । स ग्रहो विफलो निष्फलः स्यात् ॥ ४५ ॥

ककसहोत्थकसून्वहिताबलालयवृषाव्हयकर्म्मफलागमाः ॥ व्यय इतीनमिताः किल भावता निगदिता विबुधैरुदयात्क्रमात् ॥४६॥

अथ द्रुतविलंबितेन द्वादशभवनान्याह—ककेति । किलेति सत्ये विबुधैरुदयात्क्रमात् क्रमेण इनमिता द्वादशभिर्मिता भावानां भावो भावता निगदिता प्रोक्ता । इतीति किं तदाह । ककेति । कःकायस्तनुभवनं १ कः धनं तद्भवनं २ सहोत्थ.सहजभवनं ३ कं सुखभवनं ४ सूनुः सुतभवनं ५ अहितो रिपुभवनं ६ अबला जायाभवनं ७ लयो मृत्युभवनं ८ वृषो धर्मभवनं ९ कर्मभवन १० फलागमः आयभवन ११ एषां द्वंद्वः एते व्ययभवन १२ 'मूर्ध्नि चित्ते जले काये सुखे ब्रह्मणि मारुते । कामे लभे सुवर्णे च कशब्दो द्रविणेऽध्वनि' १ इत्यनेकार्थध्वनिमंजरी ॥ ४६ ॥

सहजलाभविपक्षनभःस्थितो जनिभतो निखिलार्थसुखप्रदः ॥ भवति विध्यत एव न चेद्रविर्वृषसुतांत्यशगैर्र्वियमैर्ग्रहैः ॥ ४७ ॥

अथ ग्रहाणां फलमाह तत्र प्रथमं रविफलं—सहेति । चेद्यदि वियमैः शनिरहितैः वृषसुतांत्यशगैः वृषो धर्मः नवमं भवनं ९ एवं सुत. पंचमं अंत्यं द्वादशं ११ श सुखं चतुर्थं ४ एषु गतैर्ग्रहैःरविर्न विध्यते एव तदा रविर्जनिभतो जन्मराशित. सहजलाभविपक्षनभ स्थित. तृतीये ३ कादश ११ षष्ठ ६ दशम १० भवनास्थितो निखिलार्थसुखप्रदो भवति ॥ ४७ ॥

असमहत्यरिखांगबलायगो हिमगभस्तिरनिष्टहरो ग्रहैः ॥ द्रविणरिष्फकगोष्टयनाशगैर्यदि न विध्यत इंदुजवर्जितैः ॥ ४८ ॥

अथ चंद्रफलमाह—असमेति । यदि चेत् इंदुमेन बुधेन वर्जितैर्बुधरहितैः द्रविणं धनं द्वितीयभवनं २ एवं रिष्फं द्वादशं १२ कं सुख चतुर्थं ४ गीर्बुद्धिः पंचमं ५ वृषो धर्मः नवमं ९ नाशो मृत्युरष्टमं ८ एषां द्वंद्वः एषु गतैर्ग्रहैर्हिमगमास्तिश्चंद्रो न विध्यते तदा चंद्रोऽनिष्टहरः सुखदायी स्यात् । किंभूतश्चंद्रः असमा विषमा हेतयः अस्त्राणि यस्य सोऽसमहेतिः कामः जायाभवनं ७ अरिः षष्ठं ६ खं दशमं १० अंगं प्रथमं १ बलं पराक्रमस्तृतीयं ३ आय एकादशं ११ एषां द्वंद्वः एषु गतः ॥ ४८ ॥

सहजशत्रुफलागमगो भतः सहजामित्रफलागमदो ग्रहैः ।
भवति विद्धघनो न हि जन्मनो यदि कुजोऽत्यतपःप्रतिभास्थितैः ॥४९॥

अथ भौमफलमाह—सहजेति । यदि अत्यं द्वादशं १२ तपः नवमं ९ प्रतिभा बुद्धिः पंचमं ५ एषु स्थितैर्ग्रहैर्विद्धो घनः शरीरं यस्य स विद्धघनः कुजो भौमो न भवति तदा कुजः सहजाः सहोदराः मित्राणि चैषां फलागमदो लाभदायी भवति । किंभूतः कुजः जन्मनो जन्मसंबंधिनो भतो राशित सहजस्तृतीयभवन ३ शत्रुः षष्ठं ६ फलागम आय एकादशं ११ एषु गतः ॥ ४९ ॥

घनसवित्र्यरिकालखलाभगो विधुसुतः शुभकृद्वितमीश्वरैः ।
मतिपराक्रमधर्मघनात्ययव्ययगतैर्न खगैर्यदि विध्यते ॥ ५० ॥

अथ बुधफलमाह—धनेति । यदि वितमीश्वरैश्चंद्ररहितैर्मतिः पंचमं ५ पराक्रमस्तृतीयं ३ धर्मो नवमं ९ घनः शरीर प्रथमं १ अत्ययो मृत्युरष्टमं ८ एषु भवनेषु गतैर्ग्रहैर्विधुसुतो बुधो न विध्यते तदा बुधः शुभकृत् स्यात् । कथंभूतो बुधः धनं द्वितीयभवनं २ सवित्री माता चतुर्थं ४ अरिः षष्ठं ६ कालो मृत्युरष्टमं ८ खं दशमं १० लाभ एकादशं ११ एषु भवनेषु गतः ॥ ५० ॥

द्रविणलाभवृषस्मरधीस्थितो द्रविणलाभवृषस्मरधीप्रदः ।
यदि न विद्ध इहेंद्रगुरुर्ग्रहैर्व्ययविनाशखविक्रमनीरगैः ॥ ५१ ॥

अथ गुरुफलमाह—द्रविणेति । इह व्ययो द्वादशं १२ विनाशोऽष्टमं ८ खं दशम १० विक्रमस्तृतीयं ३ नीरं चतुर्थं ४ एषु भवनेषु गतैर्ग्रहैर्न विद्धस्तदेंद्रगुरु द्रविणं धनं तथा लाभः वृषो धर्मः स्मरः कंदर्पः धीर्बुद्धिरेषा द्वंद्वः एतान् प्रददातीति द्रविणलाभवृषस्मरधीप्रदो भवति । किंभूत इंद्रगुरुः द्रविणं धनभवनं २ लाभ एकादश ११ वृषो धर्मो नवमं ९ स्मरः कामो जायाभवनं ७ धी बुद्धिः पंचमं ५ एषु भवनेषु स्थितः ॥ ५१ ॥

व्ययलयातनयायतपःस्थितो यदि न विद्धतनुर्गुचरैः स्वदः ॥
अहितवुद्धिलयास्तपुराम्बरक्रतुबलायगतैरसुरार्चितः ॥ ५२ ॥

अथ शुक्रफलमाह—व्ययेति । यदि अहितः षष्ठं ६ बुद्धिः पंचमं ५ लयोऽष्टमं ८ अस्तं सप्तमं ७ पुरं शरीरं प्रथमं १ अंबरं दशमं १० ऋतुर्यज्ञः उपलक्षणया धर्मो नवमं ९ बलं तृतीयं ३ आय एकादशं ११ एषु गतैर्युचरैः खेटैर्विद्धा तनुः शरीरं यस्य सोऽसुरार्चितो शुक्रो न तदा शुक्रः स्वदो धनदायको भवति । किंलक्षणः शुक्रः व्ययो द्वादशं १२ लयोऽष्टमं ८ आतनयं सुतभवनं मर्यादिकृत्य 'आङ् मर्यादायां' कोऽर्थः । प्रथमं१ द्वितीयं२ तृतीयं ३ चतुर्थं ४ पंचमं ५आय एकादशं११ तपो नवमं ९ एषु स्थितः । तपः शब्दोऽकारांतोऽप्यस्ति । अथवा खरि परे शरि विसर्गलोपो वा एवं नभःशब्दादिष्वपि ऊह्यम् ॥ ५२ ॥

शनिरथायबलासहजस्थितो यदि नभादभियातिगणापहः ॥
भवति विद्धपुरो जनुषः खगैर्विरविभिर्धिषणांत्यतपःस्थितैः॥५३

अथ शनिफलमाह—शनिरिति । यदि विरविभिः सूर्यरहितैर्धिषणा बुद्धिः पंचमं ५ अंत्यं द्वादशं १२ तपो नवमं ९ एषु स्थितैः खगैर्विद्ध पुरं शरीरं यस्य स विद्धपुरः शनिः तदा शनिः अभियातिगणापहः शत्रुसमूहघातको भवति । किंविशिष्टः शनिर्जनुषो जन्मतो भवनात् राशेः सकाशात् आय एकादशं ११ बलं तृतीयं ३ असहजः शत्रुः षष्ठं ६ एषु स्थितः ॥ ५३ ॥

अनुगलाभजिघांसुनभःस्थितो निखिलसौख्यकरो हि विधुंतुदः।
व्ययसुताध्वरभावनिशांतगैर्यदि न विध्यत एव नभश्चरैः॥५४॥

अथ राहुफलमाह—अनुगेति । यदि व्ययो द्वादशं १२ सुतं पंचमं ५ अध्वरो यज्ञो नवमं ९ एषां भावानां निशांतगैर्गृहगतैर्नभश्चरैर्ग्रहैर्विधुंतुदो राहुर्न विध्यते तदा राहुर्हि निश्चितं निखिलसौख्यकरो भवति । किंलक्षणो राहुः अनुगः सेवकस्तृतीयं ३ लाभ एकादशं ११ अभिजिघांसुर्वैरी षष्ठं ६ नभो दशमं १० एषु भवनेषु स्थितः । 'धामागार निशांतं च' इति हैमः ॥ ५४ ॥

शिखिनं प्राहुरगोरपरेऽगुवद्वनभग्राह शरैः प्रमिते बुधाः ।
नवलवेऽपि चरंतमनारतं जगति सर्वजनार्तिहितोदयम् ॥५५॥

अथ केतुफलमाह—शिखिनमिति । बुधाः शिखिनं केतुमगुवद्राहुतुल्यमाहुः । अपि पुनरपरे आचार्या अगोराहोर्वनभग्राह शरैः चतुःपंचाशत् ५४ भमिते प्रमिते नवलवे नवांशके चरंतं गच्छंतं शिखिनं केतुं जगति भुवनेऽनारतं निरंतरं सर्वजनार्तिहितोदयं सर्वलोकपीडाकरमाहुः । कोऽर्थः ऽश्विनीमाचतुर्दशं नक्षत्रं चित्रा तस्या द्वितीयपादे यदा राहुरायाति तदा रोहिणीशकटभेदोत्पातो भवति विलोममार्गेण अष्टनक्षत्रं पुनर्वसुयावत् ॥५५

परकुले गमनं निशि साहसं हृतिगमः क्रियते न तदास्थितिः।
जनपदांतरयानमनिष्टदं नखरेण शकुंत्ययनायनैः ॥ ५६ ॥

अथानिष्टग्रहे करणीयं निषेधयति—परेति । शकुंतीनां पक्षिणामयनं मार्गो यस्मिन्तद्व्योम तस्मिन्नयनं येषां ते तैर्ग्रहैरनिष्टदैः कृत्वा नरवरेण निशि रात्रौ परकुले परगृहे गमनं न क्रियते । पुनः साहसं हठात् द्रविणमो हृत्यै हरणाय गमनं न क्रियते । एवं तरीषु नौषु स्थितिरुपविष्टता न पुनर्जनपदांतरयानं देशांतरप्रयाणमिति ॥ ५६ ॥

खगवरे नरदेवनिभालनं वरतरं रुधिरे प्रविदारणम् ।
अखिलशास्त्रविबोधनमिंदुजे बलिनि मंत्रिणि दोर्ग्रहणव्रतम् ५७

अथ यस्मिन्वारे यत्करणीयं तदाह—खगेति । खगवरे रविवारे नरदेवनिभालनं भूपदर्शनं वरतरं श्रेष्ठतरं स्यात् । रुधिरे भौमे प्रविदारणं छिन्नकर्म्म वरतरं । इंदुजे बुधेऽखिलशास्त्रविबोधनं समस्तशास्त्रज्ञानं वरतरं । बलिनि बलयुक्ते मंत्रिणि गुरौ वारे दोर्ग्रहणव्रतं पाणिग्रहणव्रतं वरतरं स्यात् । 'रुधिरं घुसृणे रक्ते रुधिरो धरणीसुते' इति हैमः ॥ ५७ ॥

दितिजमंत्रिणि यानमलं भवेदसितगुर्बलवानथ दीक्षिणे ॥
कृतिभिरप्युदिता निखिलाः क्रिया हरिणलक्ष्मणि वीर्यवतीष्टदाः॥५८

दितिजेति । दितिजमंत्रिणि दैत्यप्रधान शुक्रे यानं भवेत् । अथ दीक्षिणे दीक्षितनराय दीक्षणे दीक्षाया वा असितगुः शनिर्बलवान् स्यात् । अथ कृतिभिः पंडितैर्वीर्यवति बलयुक्ते हरिणलक्ष्मणि चंद्रे निखिलाः क्रिया इष्टदा उदिताः प्रोक्ताः । अलमित्यवधारणे ॥ ५८ ॥

उचितमैन्दवमंगभृतां बलं बलिनि नैव विलोकयितुं पदं ॥
पदमशेषसुकर्मगणे सदा स्युरुडुपे बलिनोऽखिलखेचराः ॥५९॥

अथ चंद्रबलं विशिनष्टि—उचितमिति । अंगभृता देहिनां बलं विलोकयितुं पदं पदं पदेपदे ऐंदवं चंद्रसंबंधि बलं उचितं योग्यं । च पुनस्तदेवाह बलिनि बलयुक्ते उडुपे चंद्रे सति अखलखेचराः सौम्यग्रहाः अशेषसुकर्मगणे समस्तशुभकार्यसमूहे सदा बलिनः स्युः । अखिलखेचरा इत्यपिपाठः ॥ ५९ ॥

विषमखेटनिकायफलार्णवं तरितुमिंदुबलोत्कटवेडया ॥
अनुदिनं धवलांशुबलं नरः क्षम उपास्यमतोऽस्ति विशेषतः॥६०

विषमेति । नरः इंदुबलमेव उत्कटा उत्कृष्टा वेडा तरी तया इंदुबलोत्कटवेडया कृत्वा विषमा खला क्रूरा ये खेटास्तेषां निकाया गृहशब्दपर्यायत्वात् भावास्तेषां फलमेव अर्णवः समुद्रस्तं तरितुं क्षमोऽस्ति । अतः कारणात् अनुदिनं दिने दिने विशेषतो धवलांशुबलं चंद्रबलं उपास्यं सेवनीयं 'निकायः पद्मसंवयोः' इति हैमः ॥ ६० ॥

सदोदितं चंद्रमसः प्रधानं बलं बुधैः कर्म्मसु वाखिलेषु ॥
प्रमोदरेहर्नवकेन चांद्रं तत्रैव ताराबलमप्यतीष्टम् ॥ ६१ ॥

१ दीक्षणे । २ बलिनः किन्खेचरा इत्यपिपाठः अविदास्ति तत्र किलेति निश्चयेनेति वाच्यम् । ३ अयमेव पाठः सुष्ठुतरो भाति । ४ मयमीष्टम् ।

अथोपजात्या क्षीणचंद्रे ताराबलमाह—सदोदितमिति । सदा बुधैरखिलेषु कर्म्मसु चंद्रमसो बलं प्रधानं उचितं कथितं वेति पक्षांतरे । अमोदरेऽमावास्याया उदरे मध्येऽहर्नवके कोऽर्थः । अमावास्यातिथेः प्राक्दिनचतुष्कं पश्चाद्दिनचतुष्कं । अमातिथिना सह नवदिनानि एषु चांद्रं बलं न कथितं । अपि पुनस्तत्राहर्नवके ताराबलमेवातीऽष्टमतिशयेन शुभम्॥६१॥

तारा भवेयुर्जनिभादतोभान्नवेति शश्वद्दशमाच्च सौम्याः ॥
त्रिपंचसप्त प्रविहाय सर्वाः शरीरिणां मध्यफला तथाद्या ॥६२॥

अथ शुभाशुभतारामाह—तारेति । शश्वत् सदा ताराः जनिभाज्जन्मनक्षत्रात् । पुनर्दशमाद्भात् नक्षत्रात् । अत्रानुक्तादपि एकोनापि एकोनविंशतिनमनक्षत्राच्च नवसंख्याका भवेयुः । त्रिर्नव सप्तविंशतिरित्यर्थः । तासु त्रिपंचसप्ततृतीयापंचमीसप्तमीताराः विहाय सर्वास्ताराः शरीरिणां सौम्याः शुभाः तथा आद्या प्रथमा तारा मध्यफला स्यात् ॥ ६२ ॥

राजा हि तारेयबलेन राज्ञो बलादशीतद्युतिरुष्णभासः ॥
सर्वे नभोगा बलिनो बली स्यादृंर्वतयगुः स्वाद्बलतो बलीयान् ॥ ६३ ॥

अथ ग्रहबलेन बलिग्रहमाह—राजेति । हीति विशेषार्थे तारेयबलेन तारासंबंधिबलेन राजा चंद्रो बली स्यात् । राज्ञश्चंद्रस्य बलात् अशीतद्युतिः सूर्यो बली स्यात् । उष्णभासः सूर्यस्य बलात् सर्वेण बलेन नभोगा ग्रहा बलिनो भवंति । अगुः राहुः स्वाद्बलतो निजबलात् बलीयान् बलिष्ठः स्यात् ॥ ६३ ॥

ददाति पीयूषघनो नराणामसौ फलं धीधनधर्मगो भात् ॥
असाधु वा साधु फलेन तुल्यं स्वर्चितांघ्रेरपि वर्द्धमानः॥६४॥

अथोपेंद्रवज्रया चंद्रस्य शुभाशुभफलमाह—ददातीति । भात् जन्मराशितो धीर्बुद्धिः पंचमं ५ धनं द्वितीयं २ धर्मो नवमं ९ एषु राशिषु गतः पीयूषघनोऽमृतमयदेहश्चंद्रो वर्द्धमानः शुक्लपक्षभवो नराणां साधुफलं ददाति । किंभूतं फलं स्वर्चितांघ्रेः स्वःशब्देन स्वर्गिण आचार्य आधेयोपचारात् तैरर्चितौ अंघ्री पादौ यस्य स तस्य गुरोः फलेन तुल्यं । यथा पंचमद्वितीयनवगोऽपि गुरुः शुभ इति वेति पक्षांतरे यदासौ क्षीणश्चंद्रस्तदा पंचमो द्वितीयो नवमश्चंद्रो असाधुफलं ददाति ॥ ६४ ॥

शक्तिस्तुपारांशुफलं परेषां दिवौकसां वस्तुफलं प्रकल्प्यम् ॥
शक्त्या हि वस्तुत्वमथैति मात्रा यथोष्णशक्त्यैव तन्नपात्स्यात॥६५

अथोपजात्या सर्वग्रहेषु शक्तिरूपेण चंद्रफलमाह—शक्तिरिति । तुषारांशुफलं चंद्रफलं शक्तिराधेयः कथ्यते परेषामन्येषां दिवौकसां ग्रहाणां फलमाधारपदार्थं प्रकल्प्यं प्रकल्पनीयं । अथ हि यतो मात्रा किंचित्पदार्थोऽल्पः शक्त्या वस्तुत्वं वस्तुभावमेति प्राप्नोति । अत्र बहु आधारः वस्तुत्वमाधेय , यथाऽयमग्निरत्राधारस्यापि महत्त्वोऽस्त्युष्णिरिष्मरत्वात् ।

नहि घटत्वं विना घटोत्पत्ति । दृष्टांतमाह यथेति । उष्णशक्त्यैव तनूनपात् अग्निः स्यात् । यत्रोष्णत्वं तत्र वन्हिरिति मात्रापरिच्छेदे । 'अक्षरावयवे द्रव्ये मानेऽल्पे कर्णभूषणे । कालवृत्ते' इति हैमः ॥ ६५ ॥

अतो विलग्नेऽखिलकर्मराशावहस्कराश्मीरितदीप्तिवीर्यम् ॥
प्राप्ताखिलाप्रायनपौरुषेऽपि विलोकनीयं सततं सुधीभिः ॥ ६६ ॥

अयातोऽवश्यं वर्द्धमानचंद्रवलादानमाह—अतइति । अत पूर्वोक्तिशक्तिहेतुत्वात् सततं सदा सुधीभिर्विलग्ने राशिचक्रेऽहस्करस्य सूर्यस्याशुभिः किरणैरीरिता प्रेरिता दीप्तिर्यस्य स वर्द्धमानचंद्रस्तस्य वलं वीर्यं विलोकनीयं कस्मिन् अखिलकर्मराशौ समस्तकार्यसमूहे । कथंभूते विलग्ने प्राप्ता अखिला समस्ता अप्रयाना ग्रहास्तेषां पौरुषं वलं येन तस्मिन्नपीति॥६६

अनंतरं दोर्ग्रहतो नराणामालोकयेत्तारकराजवीर्यम् ॥
अपास्य सीमंतनिषेककृत्यमर्वागतस्तच्च नितंबिनीनाम् ॥ ६७ ॥

अथ चंद्रवलग्रहणे विवेकतामाह—अनंतरमिति । सुधीर्नराणां दोर्ग्रहतो विवाहादनंतरं तारकराजस्य चंद्रस्य वीर्यं वलमालोकयेत् । चपुनरतः पाणिग्रहणादर्वाक् नितंबिनीनां स्त्रीणां तच्चंद्रवलमालोकयेत् । किंकृत्वा सीमंतकर्म्म 'अग्रहणी' इति भाषाया । निषेककर्म्म गर्भाधानकर्म्म द्वंद्वं प्रत्येकयोजनात् । अपास्य विहाय सीमंतगर्भाधानकर्मणी भर्तुर्नं स्त्रियास्तु चंद्रवलं विलोकनीयमित्यर्थः । कर्म्मशब्दोऽकारांतोऽप्यस्ति ॥ ६७ ॥

पतिंवरोलंघ्य वराय दद्यात्स्वकर्म्मवत्सप्तपदाचलं च ॥
सौभाग्यमष्टांगमतस्ततस्तद्योज्यं खगाद्युत्थफलं तदर्थे ॥ ६८ ॥

अथ कन्यावरयो पूर्वापरचंद्रवलग्रहणे हेतुमाह—पतिंवरेति । पतिंवरा कन्या सप्तपदाचलं चतुर्मंगलवर्तनानंतरं । अथातोश्मानमारोहय युत्तरतोऽग्नेर्दक्षिणपदेन स्वांगुष्ठं गृण्हामीत्यादिगृह्योक्तं धान्यानिर्मितमश्मपुञ्जरूपं उल्लंघ्य अतिक्रम्य वराय भर्त्रेऽष्टांगं सौभाग्यं दद्यात् । यत 'पादौ कर्णौ शिरो बाहू करौ नासाक्षिणी तथा । ललाटं सुभगस्त्रीणामेवमष्टांगमुच्यते" । कीदृशसौभाग्यं स्वकर्म्मवत् निजकर्मतुल्यं । चपुनः । ततः कारणादतोऽस्मिंस्तदर्थे तस्याः कन्याया अर्थो भर्ता तस्मिन् भर्तरि यत् खगाद्युत्थफलं योज्यमिति॥६८

पाणिग्रहांगादिविधौ नृनार्योः पित्रोरदश्चंद्रमसो विचिंत्यम् ॥
राशौ वलं नेतुरगारकाणां तथानुगानां च युधि ध्वजिन्याः ॥६९॥

अथ चंद्रवलविलोकनीयस्थानमाह—पाणिग्रहेति । पाणिग्रहांगादिविधौ विवाहप्रागम कार्यविधाने नृनार्यो वरवध्वो पित्रो राशौ अदश्चंद्रमसो न च विचिंत्यम् । च पुनरगा-

रकाणा नेनुः स्वामिनो राशौ चंद्रबलं विचिंत्यं । तथा युधि संग्रामे ध्वजिन्याः सेनाया अनुगाना स्वामिना राशौ चद्रबलं विचिन्त्यम् । अनुगः स्वामीसेवकयोरित्यनेकार्थः ॥६९॥

न दोहदस्यामृतपिंडसारं भिक्षोरुपात्ताध्वरदैवतस्य ॥
सहस्रचंद्रव्रतकर्तुराद्यैरसाधु वा साधु न चिंतनीयम् ॥ ७० ॥

अथ चंद्रबलस्यानवलोकनीयस्थानमाह—नदोहदस्येति । अमृतस्य पिंडोऽगं यस्य सोऽमृतपिंडश्चंद्रस्तस्य सारं बलं दोहदस्य दौर्हृदस्य साधु वाऽसाधु न चिंतनीय । एवं भिक्षोर्योगिनश्चंद्रबलं न चिंतनीयं । एवं उपात्ताध्वरदैवतस्य गृहीतयज्ञदेवस्य प्रारब्धयज्ञकर्तुश्चंद्रबलं न विचिन्तनीयम् । पुनः सहस्रचंद्रव्रतकर्तुः चतुरशीति ८४ तमे वर्षे सहस्रचंद्रव्रतमुक्तं तत्कारकस्य चंद्रबलं न चिन्तनीयं आद्यैः पंडितैरिति ॥ ७० ॥

नरेषुभूपंचनवद्वितर्कदिगद्र्यगाब्धीभहरेनतुल्याः ॥
क्रमेण भानामविपूर्वकाणामनूष्मभासः किल कालसंज्ञाः ॥ ७१ ॥

अथोपेंद्रवज्रया कालचंद्रमाह—नरेष्विति । किलेति सत्ये नरेषु पुरुषेषु क्रमेणाविपूर्वकाणां मेषादीनां भानां राशीनां भूपंचादिभिस्तुल्या मिता अनूष्मभासश्चंद्राः कालसंज्ञाः स्युरित्यर्थः । मेषराशेर्नरस्य भूरेको जन्मचंद्रो घातकः । एवं वृषस्य पंचमश्चंद्रः । मिथुनस्य नवमः । कर्कस्य द्वौ द्वितीयः । सिंहस्य तर्काः षष्ठः । कन्याया दिक् दशमः । तुलाया अद्रयस्तृतीयः । वृश्चिकस्य अगाः पर्वताः सप्तम । धनुषोऽब्धि समुद्रश्चतुर्थः । मकरस्य इभ अष्टम । कुंभस्य हरः शिव एकादशः । मीनस्य इनाः सूर्याः द्वादशः एषां द्वंद्व एभिस्तुल्याः ॥ ७१ ॥

रूपाहिगांकांगगुणागमाश्विदिगीश्वरेषूष्मकरैरभिन्नाः ॥
मेषादिकानां विधवो वशासु ज्ञेयाः सदा कालकलार्तिदा वा ॥७२॥

अथोपजात्या स्त्रीणां कालचंद्रमाह—रूपेति । वेति स्त्रीपक्षे वशासु स्त्रीषु मेषादिकानां राशीनां रूपादिभिरभिन्नास्तुल्याः विधवश्चंद्राः सदा कालो यमस्तस्य कला निर्याणसंहरणादिरूप तद्वत् आर्तिदाः पीडाकरा ज्ञेयाः बुधैरितिशेषः । रूपेति । मेषस्य रूपं एक १ वृषस्य अहिरष्टमः ८ मिथुनस्यागाः सप्तमः ७ कर्कस्य अंको नवमः ९ सिंहस्य अंगं षष्ठ ६ कन्याया गुणास्तृतीयः ३ तुलाया आगमाश्चतुर्थ ४ वृश्चिकस्य अश्विनौ द्वितीयः २ धनुषो दिग् दशमः १० मकरस्य ईश्वर एकादशः ११ कुंभस्य इषुः पंचमः ५ मीनस्य ऊष्मकरो द्वादशः एषां द्वंद्वः एभिस्तुल्याः ॥ ७२ ॥

वधूप्रवेशे युधि यानगेहक्रियाविवाहेषु हलप्रवाहे ॥
नृपाभिषेकाभरणाम्बुधृत्यागनिष्टदः स्यात्किल कालचंद्रः ॥७३॥

अथोपेंद्रवज्रया यत्र स्थाने कालचंद्रो हेयस्तदाह—वधिवति । किलेति भावनायां वपूम-शी पुनर्युधि संग्रामे पुनर्यानगेहक्रियाविवाहेषु पुनर्हलप्रवाहे पुनर्नृपाभिषेकः आभरणस्य अस्त्रस्य च धृतिर्धारणं तयोर्नृपाभिषेकाभरणास्त्रधृत्योः एषु कालचंद्रोऽनिष्टदः स्यात् ॥ ७३ ॥

राज्ञोऽजपूर्वेष्वथ कालगेहादेकैकवृद्ध्या गदिताः क्रमेण ॥
विद्धिष्ण्यहेल्यारसुरेज्यमंदाः शरीरिणां राशिषु कालसंज्ञाः ॥७४॥

अथोपजात्या शेषषड्ग्रहाणां कालसंज्ञामाह—राज्ञइति । अथ अजपूर्वेषु मेषादिराशिषु राज्ञश्चंद्रस्य काल गेहात् क्रमेणैकैकवृद्ध्या विद्,बुधः धिष्ण्य शुक्रः हेलि सूर्यः आरो भौमः सुरेज्यो गुरु मंदः, शनिश्चैते शरीरिणा कालसंज्ञाः गदिता । कोऽर्थः । यस्य यस्य नरस्य यावत्संख्याकः कालचंद्रराशिस्तस्मादेकैकवृद्धिः कर्त्तव्या । यथा मेषराशौ जन्मचंद्रो घातस्तस्य द्वितीयो बुधो घातः । एवं तृतीय, शुक्रश्चतुर्थो रविः । पंचमो भौमः । षष्ठो गुरुः । सप्तमः शनिरेते कालसंज्ञाः । एवं यथा धनुराशेः पुरुषस्य चतुर्थं कालचंद्रस्तस्य पंचमो बुध का-लसंज्ञ इत्येवमेकैकवृद्ध्या सर्वेऽपि ज्ञातव्याः ॥ ७४ ॥

नभश्चरः संक्रमतः स्वतोऽर्वाक् स्वभोगराश्यंशमितैरहोभिः ॥
अधिष्ठितर्क्षादपि चैष्यराशेरलं फलं यच्छति मूर्तिमत्सु ॥७५॥

अथोपेंद्रवज्रया ग्रहस्यागामिकराशिफलमाह—नभेति । नभश्चरो ग्रहः स्वतः संक्रमतो वर्त्तमानराशिस्थादर्वाक् पूर्वं स्वभोगराश्यंशमितैर्निजभोगराशेस्त्रिंशन्मितैरहोभिर्दिनैरधिष्ठित-र्क्षात् आक्रांतराशेः सकाशाच्चैष्यराशेरागामिकराशेः फल शुभमशुभं मूर्तिमत्सु नरेषु यच्छति ददाति । विशेषार्थस्त्वयं सूर्यो गंतव्यराशेः प्राक् पंच दिनानि फलदः स्यादेवं भौमोऽष्ट-दिवसान् । बुधः सप्त दिनानि शुक्रः सप्त दिनानि चंद्रो घटीत्रय राहुर्गंतव्यराशेः पूर्वं त्रैमासान् शनिः षण्मासान् गुरुर्मासद्वय फलदः स्यादिति ॥ ७५ ॥

यद्राशिगा स्याद्युतिरभ्रमार्गयोर्जनस्य तद्राशिवतोऽशिवं भवेत् ॥
यस्याणु बिंबं ग्रहणं तयोरिह ग्रहस्य तस्यैव तमोवृतस्य च ॥७६॥

अथोपजात्या युतिग्रहणाधिकारे विवेकमाह—यद्राशीति । अभ्रमार्गयोर्ग्रहयोर्युति-संयोग । यद्राशिगा यश्चासौ राशिश्च त गच्छतीति यद्राशिगा स्यात् । सचासौ राशिश्च तद्राशिस्तद्राशिवतो जनस्याशिवमशुभं भवेत् । च पुनस्तयोर्ग्रहयोरिह संयोगे यस्य ग्रहस्या-ऽणु बिंबं सूक्ष्मं मडल भवति तस्य तमोवृतस्य तमसाच्छादितस्य ग्रहणं भवति ॥ ७६ ॥

बलमथ वैधं वरमोऽशुभेतरो राशिर्धनाद्यात्मजधर्मगः समः ॥
भ्रात्र्यो मदांत्यारयवारिगोऽधमो राशेर्भवेन्नामवतश्च जन्मनः ॥७७॥

अथ ग्रहणसमये वर्तमानचन्द्रराशिशुभाशुभमाह—चलेति । ग्रहणसमये नामवत पुरुषस्य जन्मनो राशे सकाशात् चल तृतीय ३ आय एकादश ११ वैरी पष्ठ ६ अवर दशम १० एषु गतो राशिरशुभितर शुभो ग्राह्य । पुनर्द्धन द्वितीय २ आद्य प्रथम १ आत्मज सुत पचम ५ धर्मो नवम ९ एषु गतो राशि समो ग्राह्य । पुनर्मद सप्तम ७ अत्यो द्वादश १२ अत्ययोऽष्टम ८ वारि चतुर्थं ४ एषु गतो राशिरधमो भवेदिति ॥ ७७ ॥

शुभःशुभाय ग्रहणाच्छरीरिणां समश्च साधारणकामसिद्धये ॥
इहाधमोऽनिष्टफलाय पार्वणो राशिर्भवेदाग्रहणं युतेरिति ॥ ७८ ॥

अथैतादृग्राशीना फलमाह—शुभेति । इह लोके शरीरिणा पर्वणि भव पार्वणो ग्रहणगतराशिर्ग्रहणाच्छुभ शुभाय स्यात् । च पुनरेव सम साधारणकामसिद्धये भवेत् । पुनरधमोऽनिष्टफलाय भवेत् । इत्यनेन प्रकारेण भौमादीना युते सकाशात् आग्रहणमयमर्थो ग्राह्य । युतेरारभ्य आग्रहण ग्रहणपर्यंत तेन युद्धादिग्राह्यमित्यर्थ ॥ ७८ ॥

खगेरितासाधुफलं जनेन तदर्चयायत्तदितं वरेण्यम् ।
सदौषधिस्नानविधानहोमापवर्जनेभ्योऽभ्युदयाय वा स्यात् ॥७९॥

अथोपेंद्रवज्रया ग्रहाणामनिष्टफले शातिस्नानद्वारमाह—खगेति । यदा जनेन कर्तृपदेन यत् खगेनेरित प्रेरितमसाधुफलमनिष्टफलमित प्राप्त तदा तदयया श्रद्धया तदर्चन तद्ग्रहपूजनेन तदशुभ वरेण्य श्रेष्ठ स्यात् । केभ्य सदौषधीभिर्भव्यौषधीभि स्नानविधान होम २ अपवर्जन दान ३ एभ्य इति ग्रहकृपयाभ्युदयाय वा स्यादिति पाठातरम् ॥ ७९

काश्मीरयष्टीमधुपद्मकैलामनःशिलोशीरवसंतदूतिभिः ॥
सदारुभिःस्यादहिते खरांशौ निमज्जनं नु किल कर्मसिद्धये ॥८०॥

अथोपजात्यानिष्टसूर्ये शातिस्नानमाह—काश्मीरेति । किलेति सत्ये । खराशौ सूर्ये हितेऽनिष्टे सति नु पुरुषस्य कर्मसिद्धयै ईप्सितप्राप्तये मज्जन स्नान स्यात् । काभि काश्मी केसर घुसृण यष्टी मधु प्रतीत पद्मकस्तरुविशेष । कमलफल कमलकाकडी । एल एलची प्रतीता मन शिला 'मनशिल' इतिभाषाया उशीर वीरणीमूल वसतदूति पाटला एताभि किंभूताभि सदारुभिर्देवदारुसहिताभि । कोऽर्थ । एता ओषधीजलभृतकुंभे निक्षिप्य स्नान कर्तव्यमित्यर्थ । 'स्नेहवृक्ष भद्रादारु भद्रा दार्व च दारु च' इतिनिघंटु 'पाटलाया तु स्यात् वसंतदूती स्यात् ' इतिनिघंटु ॥ ८० ॥

सपंचगव्यैः स्फटिकेभदानत्रिपत्रमुक्तांबुजमुक्तिशंखैः ॥
तुषारभास्याप्लवनं नृपाणामुक्तं हि तुष्ट्यै विषमे ग्रहज्ञैः ॥ ८१ ॥

अथानिष्टचद्रे शातिस्नानमाह—सपचेति । तुषारभासि चद्रे विषमेऽनिष्टे सति निश्चि ग्रहज्ञै तुष्ट्यै तोषाय नृपाणा राज्ञामाप्लवन स्नानमुक्त कथित । पंचगव्यादिद्रव्यैर्नैर्न एव

गव्यं गोदुग्धं १ दधि २ घृत ३ विट् ४ मूत्रं ५ स्फटिको दृषद्भेदः इभदानं गजमदः त्रिपत्रको बिल्वः मुक्ताफल अंबुजं कमलं शुक्तिशंखौ प्रतीतौ एभिः ॥ ८१ ॥

स्याच्चंदनश्रीफलहिंगुलीकश्यामाबलामांस्यरुणप्रसूनैः ॥
ह्रीबेरचांपेयजयांकुराढ्यैः स्नानं कुदायादकृताशिवघ्नम् ॥ ८२ ॥

अथेंद्रवज्रयानिष्टे भौमे शांतिस्नानमाह—स्याच्चन्दनेति । चदनादिभिः स्नानं कोर्भूमेर्दायादः पुत्रो भौमस्तेन कृतमशिवं हंतीति कुदायादकृताशिवघ्नं भौमकृतोपद्रवहरं स्यात् । चदनं मलयजं श्रीफलो बिल्वः हिंगुलीक ओषधीविशेषः श्यामाः प्रियंगवः बला बलबीजः मांसिः मरुमांसिः अरुणप्रसूनानि रक्तपुष्पाणि एषां द्वंद्व एभिः । किंभूतैः ह्रीबेरं बालकं चांपेयं नागकेशरं जपांकुरा ओंड्रपुष्पकिसलयाः एभिराढ्यैर्युक्तैः 'नागपुष्पं मतं नागं केसरं नागकेसरं । चांपेयं नागकिंजल्कं कनकं हेम कांचनं' १ इतिनिघंटुः 'ओंड्रपुष्पंतु जपा' इतिहैमः ॥ ८२ ॥

सहेममूलाक्षतमौक्तिकेयैर्गोरोचनक्षौद्रफलैः सगव्यैः ॥
हिताय साद्भिर्विषमे नराणां निमज्जनं चांद्रमसायने स्यात् ॥ ८३ ॥

अथोपजात्या बुधे शांतिस्नानमाह—सहेमेति । चाद्रमसायने बुधे विषमेऽनिष्टे सति नराणामेभिः सह मज्जनं हिताय स्यात्तदाह गोरोचनं गोपित्तं क्षौद्रं मधु फलं मदनमीढलं ? फलं एभिः किंभूतैरेभिः सगव्यैः पंचगव्ययुक्तैः । पुनः किंभूतैः । सहेममूलाक्षतमौक्तिकेयैः हेमं नागकेसरं मूलं पुष्करमूलं अक्षता लाजा मंगलतंदुलाः 'लाजाः स्युः पुनरक्षताः' इतिहैमः । मौक्तिकेयं मुक्ताफलं एभिः सह वर्तमानैः पुनः किंभूतैः साद्भिः जलैः सह वर्तमानैः ॥ ८३ ॥

सिद्धार्थयष्टीमधुनीरमालतीप्रसूनयूथीप्रसवैः सपल्लवैः ॥
रिष्टं यदीज्याद्विषमस्थितादितं शिवाय यैस्तेष्वरुहं निमज्जनम् ॥ ८४ ॥

अथानिष्टगुरौ शांतिस्नानमाह—सिद्धार्थेति । यदि चेत् यैर्नरैर्विषमस्थितात् क्रूरस्थितात् इज्याद्गुरोः सकाशात् रिष्टं कष्टं इतं प्राप्तं तेषु नरेषु शिवाय निमज्जनं प्रोक्तं किंभूतं निमज्जनं अरुहं न विद्यते रुट् जन्म कष्टोत्पत्तिर्यस्मात्तत् । अथवारुहं दूर्वारहित 'हरितालिरुहा पोटा' इति हैमः । सिद्धार्थैः श्वेतसर्षपः यष्टीमधु प्रतीतं नीरं बालकं मालतिप्रसूनानि जातिपुष्पाणि यूथीप्रसवाः मागधीपुष्पाणि एभिः किंविशिष्टैः सपल्लवैः पल्लवयुक्तैः ॥ ८४ ॥

ना शंबरैलाफलमूलकुंकुमैः सपुंडरीकैः शिलया समन्वितैः ॥
कवीरितानिष्टविघातहेतवे स्नायादनब्जैरिति कश्चिदाह वा ॥ ८५ ॥

अथानिष्टे शुक्रे शांतिस्नानमाह—नाशमिति । ना पुरुषः कविना शुक्रेण ईरितं प्रेरितमनिष्टमशुभं तस्य विघातहेतवे स्नायात् । कैः सपुंडरीकैः श्वेतकमलसहितैः शिलया मनःशिलया समन्वितैः । शंबरं जलपर्यायत्वाद्बालकं एलाफलं प्रतीतं मूलं पुष्करमूलं कुंकुमं काश्मीरं एषां द्वंद्वे एभिः वा इति पक्षांतरे कश्चिदनब्जैरित्याह कमलानि विहाय स्नायादिति कथयति ॥ ८५ ॥

बलांजनश्यामतिलैः सलाजैः सरोद्रजीमूतशतप्रसूनैः ॥
यमानुजादासमनिष्टमुग्रं विलीयते मज्जनतोऽप्यशेषम् ॥ ८६ ॥

अथेंद्रवज्रयानिष्टे शनौ शांतिस्नानमाह—बलेति । यमस्यानुजो लघुभ्राता शनिस्तस्मात् प्राप्तं प्राप्तमुग्रं दारुणमशेषं समस्तं विलीयते नाशं प्राप्नोति कर्त्तृक्तिः। कस्मात् मज्जनतः स्नानात् कैः बला बलबीजः अंजनं कृष्णसौवीरं श्यामतिलः कृष्णतिलः एषां द्वंद्वे एभिः किंविशिष्टैः सलाजैः व्रीहिसहितैः पुनः किंभूतैः रोद्रः 'रोहीडो इतिभाषा' जीमूतः मुस्ता शतप्रसूनाः 'सूर्या इतिभाषा' एषां द्वंद्वे एभिः सहवर्त्तमानैस्तैः 'शतपुष्पामिशिर्वोपा' इति निघंटुः ॥ ८६ ॥

सलोध्रगर्भेण मदेभदानैरर्णोंबुदश्रीफलपर्णवर्णैः ॥
हरेदभद्रं विषमागुजातं शरीरिणामाप्लवनं सदूर्वैः ॥ ८७ ॥

अथोपजात्यानिष्टे राहौ शांतिस्नानमाह—सलोध्रगर्भेणेति । आप्लवनं स्नानं शरीरिणा विषमागुजातं दुष्टराहुजातमभद्रं कष्टं हरेत् । कैः अर्णःजलपर्यायत्वाद्वालकं अंबुदो मुस्ता श्रीफलपर्णानि बिल्वपत्राणि वर्णं धुसृणं 'वर्णं लोहितचंदनं' इति हैमः । एषां द्वंद्वः एतैः किंभूतैः लोध्रः प्रतीतः लोध्रो गर्भे मध्ये यस्य स लोध्रगर्भः अथवा गर्भः पनस कंटक इत्यपि एणमदः कस्तूरी इभदानं गजमदः एभिः सहवर्त्तमानैः पुनः किंभूतैः सदूर्वैः दूर्वासहितैः ॥ ८७ ॥

शिखाभृदार्तिंतिलपत्रिकाब्दसारंगनाभीभमदांबुरौद्रैः ॥
निषेधतीहाविकमूत्रमिश्रैः स्नानं नुराब्यैः करकामृताभ्याम् ॥८८॥

अथानिष्टे केतौ शांतिस्नानमाह—शिखेति । इह लोके स्नातुर्नरस्य शिखाभृदार्तिं केतुपीडा निषेधति निराकरोति कैः तिलपत्रिका रक्तचंदनं 'रतांजणी इति भाषा' 'रक्त तिलपर्णिका' इति हैमः । अब्दो मुस्ता सारंगनाभिः कस्तूरी इभमदो गजमदः अंबु वालकं रौद्र एषां द्वंद्वः एभिः किंविशिष्टैः आविकमूत्रमिश्रैः मेषमूत्रसंयुक्तैः पुनः किंभूतैः करकः 'घनोपलस्तुकरकः' इति हैमः । अमृता गुडूची आभ्यामाढ्यैर्युक्तैः ॥ ८८ ॥

कर्तव्यमित्यं तिलांबुजोशीरकपूतिकाष्ठैः ससर्पभक्षौद्रशमींद्रदूर्वैः ॥
वसंततती स्यात् विषमे नराणां भाढ्यां युतैर्मज्जनमिष्टदं स्यात् ॥८९॥

सपंचगव्यैः [illegible]निस्नानमाह—तिलांबुजेति । सूर्योपरागे सूर्यग्रहणे विषमेऽनिष्टे शारभास्याप्लवन[illegible]त्स्यात् । कैः तिलः अंबुजं कमलं उशीरकं वीरणीमूलं मज्जनमिष्टदं [illegible] शांतिस्नानमा[illegible]षां द्वंद्व एभिः किंविशिष्टैः सर्पभक्षपभनामौषधियुक्तैः [illegible]
देवदारु भाय नृपाणा[illegible] दूर्वा शतपर्विका आभिः सह वर्त्तते तैः पुनः किंभूतैः [illegible]

पाथः शमीकोकनदैरनिष्टे विधूपरागे तिलदारुवर्णैः ॥
सिद्धार्थदूर्वामधुकालमेयैरनिष्टनाशाय तु मज्जनं स्यात् ॥ ९० ॥

अथानिष्टे चंद्रग्रहणे शांतिस्नानमाह—पाथइति । अनिष्टे विधूपरागे चंद्रग्रहणे मज्जनमनिष्टनाशाय स्यात् । कैः पाथोः जलं पर्यायत्वाद्वालकं शमी केशघ्नी कोकनदं रक्तकमलं तु पुनः तिलाः दारु देवदारु वर्णं काश्मीरं एषां द्वंद्वः एतैः पुनः सिद्धार्थः श्वेतसर्षपः दूर्वा मधुकालमेयं नागकेसरं एषां द्वंद्वः एभिः ॥ ९० ॥

मिथः कदूर्वाबुजसर्षपाख्यैर्द्वयोर्युजावारमुखग्रहाणाम् ॥
सपंचमृत्पल्लवपंचगव्यैरनिष्टदायां स्नपनं वरं स्यात् ॥ ९१ ॥

अथोपेंद्रवज्रयानिष्टदायां ग्रहयुतौ शांतिस्नानमाह—मिथइति । मिथः परस्परं आरमुखग्रहाणां भौमादिपंचकस्य मध्ये द्वयोर्ग्रहयोर्युतौ संयोगेऽनिष्टदायां सत्यां स्नपनं स्नानं वरं शुभकृत्स्यात् । कैः कं जलपर्यायत्वाद्वालकं दूर्वा अंबुजं कमलं सर्षपाः एषां द्वंद्वः एभिः कंभूतैः पंचवर्णमृत्तिका पंचवर्णपल्लवाः पंचगव्यं एषां द्वंद्वः एभिः सहवर्तमानैः ॥ ९१ ॥

दोषाशमीपद्मकशंखपुष्पीवत्सांकुराम्रांकुरहेमपुष्पैः ॥
सदा ससिद्धार्थकचंदनाब्जैर्निमज्जनादेति नरःसुशांतिम् ॥ ९२ ॥

अथोपजात्या सामान्यतः शांतिस्नानमाह—दोषेति । सदा नरो निमज्जनात् सुशांतिमेति प्राप्नोति कैः दोषा हरिद्रा शमी केशघ्नी पद्मकं कमलफलं तरुविशेषश्च शंखपुष्पी प्रतीतं वत्सांकुरा गुडूची आम्रांकुरा आम्रपल्लवाः हेमपुष्पं नागकेशरं एषां द्वंद्वः एभिः किंविशिष्टैः सिद्धार्थः श्वेतसर्षपः कं वालकं चंदनं मलयजं अब्जं पद्मं एभिः सह वर्तमानैः । इति नवग्रहशांतिस्नानाधिकारः ॥ ९२ ॥

अर्कत्रिवर्हद्रुमनेमिशालापामार्गबोध्यद्रिवनस्पतीभ्यः ॥
शम्याद्रिदूर्वाकुथतः क्रमेण होमोचिताः स्युः समिधो ग्रहाणाम् ॥ ९३ ॥

अथेंद्रवज्रया नवग्रहाणां होमेंधनान्याह—अर्केति । क्रमेण ग्रहाणां सूर्यादीनां होमे उचिताः समिध एधांसि स्युः । सूर्यस्यार्कात् अर्कवृक्षात् समिध एवं चंद्रस्य त्रिवर्हद्रुमात् पलाशवृक्षात् । भौमस्य नेमिशालात् खदिरवृक्षात् बुधस्यापामार्गात् 'अघाड इतिभाषा' । गुरोर्बोधेः पिप्पलद्रुमात् शुक्रस्याद्रिवनस्पतेरुदुंबरवृक्षात् एषां द्वंद्वः एभ्यः । शनेः शमीतः राहोराद्रिदूर्वातः केतोः कुथतः कुशात् एभ्यो वृक्षेभ्यः सरलानि सुस्निग्धानि पर्वोक्रमानमितानि इंधनानि ग्राह्याणि इति ॥ ९३ ॥

हुत्वा खगानां समिधस्तथाज्यं चरूंस्तिलानुक्तफलानि मंत्रैः ॥
निजागमोक्तैरपिपूजनं च दानं सुभद्राय ततो विदध्यात् ॥ ९४ ॥

अथोपजात्या ग्रहाणां पूजनदानाधिकारमाह—कृत्वेति । ततः स्नानानंतरं खगानां पूजनं दानं च सुमद्राय सुखाय विदध्यात् कुर्यात् । किंकृत्वा समिधः एवामि तथा आज्यं चरून् उक्तफलानि च हुत्वा हवनं विधाय कैर्निगमोक्तैः स्वशाखावेदोक्तैर्मंत्रैरिति ॥ ९४ ॥

नृणां सिताऽघ्न्या गलबद्धचीवरा लवेतरोधस्यवती सुलक्षणा ॥
दुष्टे विवस्वत्यपवर्जनोचिता सगोस्तनीतंदुलहर्म्यदक्षिणा ॥ ९५ ॥

अथ प्रथमं सूर्यदानमाह—नृणामिति । नृणां दुष्टे विवस्वति सूर्ये सति सिताघ्न्या गौरपवर्जनोचिता दानाय हिता स्यात् । किंविशिष्टाऽघ्न्या गलबद्धचीवरा कंठबद्धवस्त्रा पुनः किंभूता लवेतरमल्पेतरं बहु ऊधस्यं क्षीरमस्यास्तीति बहुदुग्धवती । पुनः किंभूता सुलक्षणा दोषरहिता । पुनः किंभूता गोस्तनी द्राक्षा तंडुलाः प्रतीताः । हर्म्यं गृहं एषां दक्षिणासहिता । 'उस्राघ्न्या रोहिणी' इतिहैमः । 'गोरसः क्षीरमूधस्यम्' इति च ॥ ९५ ॥

शंखं समुक्तं कलधौतजं द्विजे सरोहिणीस्तन्यमनन्यदक्षिणम् ॥
दद्यादनिष्टे किल रोहिणीविभौ सतंदुलाधारसितोपलं सदा ॥ ९६ ॥

अथ चंद्रदानमाह—शंखमिति । किलेति सत्यनिष्टे रोहिणीविभौ चंद्रे सति सदा नरो द्विजे विप्रे शंखं दद्यात् । किंविशिष्टं शंखं समुक्तं मुक्ताफलसहितं पुनः किंभूतं शंखं कलधौतजं रजतमयं पुनः किंभूतं सरोहिणीस्तन्यं गोदुग्धसहितं । पुनः किंभूतं शंखं तंडुलाः प्रसिद्धाः आधारं घृतं सितोपला शर्करा एताभिः सहवर्तमानं । पुनः किंभूतं शंखं अनन्यदक्षिणं न विद्यतेऽन्या दक्षिणा यस्मिंस्तत् रजतदानमेव देयमित्यर्थः । 'स्तन्यं पुंसवनं पयः' इतिहैमः । ननु द्विजेऽत्राधिकरणं कथं तदाह । ननु यस्मै दित्सा रोचते धारयते वा तत्संप्रदानमिति । तदुक्तं विधानंदेन वाशब्देन वाशब्दस्य व्यवस्थावाचित्वात् । ब्राह्मणस्य ददाति । ब्राह्मणे ददात्यपि स्यादेव रुचेरप्रयोगे राज्ञो रोचते मृगया न मंत्रिण इत्यादौ षष्ठीप्रयोगदर्शनात् । विस्तरे न विद्यते राज्ञो रोचते घृतमित्यादयोऽपि तदेतच्च निर्धारितं महाभाष्यकैयटरणैरिति वक्ष्यमाणाधिकारेऽपि ज्ञातव्यम् ॥ ९६ ॥

वृषोऽरुणो भूमिभुवाऽपवर्जनेऽहितस्य शुल्वादयविषाणसंयुगः ॥
संभूरिचंद्रोऽरुणचीवरं तु वा शस्तो हि गोधूमगुडाज्यवन्नृणाम् ॥ ९७ ॥

अथ भौमदानमाह—वृष इति । अहितस्यानिष्टस्य भूमिभुवो मंगलस्यापवर्जने दाने नृणामरुणो वृषो गौः शस्तः शुभः मोक्षः । किंविशिष्टो वृषः शुल्वेन ताम्रेणाढ्यं स्वर्णं

। (अथ बुधस्य दानमाह—सगौरिकेति । नरेण विदो बुधस्य तुष्टये संतोषाय आदिमें किमे गौर्देया दातव्या ।। किंभूता गौः सगौरिका सुवर्णसहिता । पुनः किंभूता अनगौरविग्रहा श्वेतशरीरा। पुनः किंभूता शोणप्रभापीनकुचा रक्तप्रभपुष्टस्तनी । पुनः किंभूता हरिद्रला नीलकण्ठा वाऽथवा रुचिरं देयं चीरं चूडा सीसं च तद्धरा कान्तिर्यस्य तच्चीरमं तत्र चीरं वस्त्रं च चीरमचीरं नीलवस्त्रं] यद्वमोनेकार्थ्ये ' चीरं वाससि चूडायां गोस्तने सीसपत्रके ', इति । किंविशिष्टं चीरमचीरं ससार्षपं सर्षपतैलसहितं । पुनः किंभूतं सकंगु कगुसहितम् ॥ ९८ ॥

सुपीतचीरं सुरवंदितेऽवरे ददाति यो ऽवन्यमराय वाऽवरे ॥
स नैति गांगेयवरं च पुस्तकं नीवारगव्यद्विदलान्नशर्करा ॥ ९९ ॥

अथ गुरुदानमाह—सुपीतचीरमिति । अवरे अनिष्टे सुरवंदिते गुरौ सति यः पुरुषः एतानि ददाति कस्मै अवन्यमराय भूदेवाय द्विजाय तान्याह सुपीतचीरं शुभपीतवस्त्र गांगेयवरं शुभस्वर्णं पुस्तकं नीवारा वनव्रीहयः गव्यं घृतादि द्विदलान्नं चणकादि, शर्करा एताश्च वेति स पुरुषोऽवरमशुभं नेति न प्राप्नोति ॥ ९९ ॥

कर्तुं कविं सौम्यतरं द्विजन्मने वलक्षभं वाहमकुप्यदक्षिणम् ॥
दद्यात्सितार्त्यार्तमना नरोऽथवा मत्स्यंडिकाज्यार्जुनचैलतंडुलान् ॥

अथ कविदानमाह—कर्तुमिति । सितस्य शुक्रस्यार्त्तिः पीडा तयार्तं पीडितं मनो यस्य स सितार्त्यार्तमना नरो द्विजन्मने विप्राय वाहं घोटकं दद्यात् । किंकर्तुं कविं शुक्रं सौम्यतरं शुभतरं विदधातु किंभूतं वाहं वलक्षभं श्वेतप्रभं । पुनः किंभूतं वाहं । अकुप्यं दक्षिणा यस्मिन् स तं । अथवा मत्स्यंडिका फाणितं रक्तखंडं आज्यं घृतं अर्जुनचैलं श्वेतवस्त्रं तंडुला एषां द्वंद्वे एतान् दद्यात् ॥ १०० ॥

सजातरूपाद्विषमानुगो भवेच्छ्यामार्जुनीदानत ऐनिरार्तिहृत् ॥
कृष्णांशुकायस्तिलतैलदानतोऽप्यनिष्टहा वा जनिभाद्धि देहिनाम् १०१

अथ शनिदानमाह—सजातरूपेति । हीति निश्चितं । देहिनां नृणां जनिभात् जन्मराशेः विषमानुगो दुष्टराशिस्थित एवंविध ऐनिः श्यामार्जुनीदानतः कृष्णसुरभीदानत आर्तिहृत् पीडाहरो भवेत् । किंभूतात् श्यामार्जुनीदानतः सजातरूपात् स्वर्णसहितात् वेतिपक्षान्तरे शनिः कृष्णांशुकं कृष्णवस्त्रं अयो लोहं तिलतैलानि एषां द्वंद्वे एषां दानतोऽप्यनिष्टहाऽनिष्टघातको भवेत् ॥ १०१ ॥

ककायदोषस्योपशमाय देहिनां सुसप्तधान्योपलसारशीर्षकैः ॥
प्रपूरितस्यादिभुवि प्रदेशनं शूर्पस्य नीलांबरदक्षिणं भवेत् ॥ १०२ ॥

अथ राहुदानमाह—ककायेति । देहिनां राहुः क मस्तकमेव कायः शरीरं यस्य स ककायो राहुस्तस्य दोषस्योपशमनाय शूर्पस्य प्रस्फोटनस्य प्रदेशनं भवेत् । कस्मिन् । आदि-

भुवि अग्रजन्मनि विप्रे । किंभूतस्य सूर्यस्य सुसप्तधान्यानि उपलसारं लोहशीर्षकं लांगलिफलं एषा द्वंद्वे एभिः प्रपूरितस्य किंभूतं प्रदेशनं नीलांबरस्य दक्षिणां यस्मिंस्तत् नीलांबरदक्षिणं 'प्रदेशनविसर्जने' इतिहैमः । 'लोहे गिरिसारं शिलासारं' इतिहैमः ॥ १०२ ॥

दद्यादजं हाटकभूमिदक्षिणं केतूदये वा विषमानुगे भतः ॥
केतौ जनेर्जन्मवतो द्विजातये तमस्यपीत्याह स बादरायणः ॥ १०३ ॥

अथ केतुदानमाह—दद्यादिति । जन्मवतो नरस्य जनेर्भतो जन्मराशितो विषमानुगे क्रूरगते केतूदये सति स नरोऽजं नागं दद्यात् । कस्मै द्विजातये विप्राय किंभूतमजं हाटकभूमिदक्षिणा यस्मिन् स तं स्वर्णभूदक्षिणं । वाऽथवा केतौ विषमानुगे सति एतद्दानं देयं । अपि पुनः तमसि राहौ विषमे सत्यपि एतद्दानं देयमिति बादरायणः कृष्णद्वैपायनऋषिराह 'कानीनो बादरायण' इतिहैमः ॥ १०३ ॥

आरेनयोर्विद्रुममिंदुधिष्ण्ययोस्तारं विदः कर्बुरमिंद्रमंत्रिणः ॥
मुक्ताफलं धार्यमयश्च तुष्टये यमस्य लाजावलयं किलान्ययोः १०४

अथ दुष्टे नवग्रहे धार्यमाह—आरइति । जनेन आरेनयोर्भौमसूर्ययोस्तुष्टये विद्रुमं धार्यं । एवं इंदुधिष्ण्ययोश्चंद्रशुक्रयोस्तारं रूप्यं विदो बुधस्य कर्बुरं स्वर्णं इंद्रमंत्रिणो गुरोर्मुक्ताफलं यमस्य शनेरयो लोहं अन्ययो राहुकेत्वोस्तुष्टये लाजावलयं लाजावर्तः रलयोरैक्यत्वात् । 'विराटजोराजपट्टोराजवर्त्त' इतिहैमः । रावटीमणिइति भाषा ॥ १०४ ॥

तदर्चनाद्दादिजदेववंदनाच्छ्रेयस्कथाकर्णनतो मखेक्षणात् ॥
होमाज्जपादागमपाठदानतो न पीडयंत्यंगभृतः खगामिनः ॥१०५

अथ संहारमाह—तदेति । अंगभृतः प्राणिन खगामिनो ग्रहा न पीडयंति कस्मात् तदर्चनाद्ग्रहपूजातः पुनरादिजदेववंदनात् द्विजदेववंदनात् । पुनः श्रेयस्कथाकर्णनतः शुभकथाश्रवणात् । पुनर्मखेक्षणात् यज्ञदर्शनात् । पुनर्होमात् पुनर्जपात् प्रणवपूर्वजपनात् पुनः आगमपाठदानतः ॥ १०५ ॥

समाष्टकापत्यभसेदवीर्यं प्रकीर्तितं तज्जनकस्य शश्वत् ॥
इतानुगत्रीभखपांथवीजमादेशिभिस्तत्कमितुस्तथैव ॥ १०६ ॥

स्वमंत्रजाप्यार्चनहोमदानकप्राप्तानुकूल्या हरिवर्त्मचारिणः ॥
अनेककर्मार्थकदा भवंत्यमी परावरेषामपि कर्म्मसाक्षिणः ॥ १०७ ॥
इतिश्रीकालिदासोदिते ज्योतिर्विदाभरणे ग्रहगोचराध्यायः पंचमः ॥ ५ ॥

अथोपजात्या सर्वेषां ग्रहाणामरिष्टानिवर्तकं शांतिप्रकारमाह—स्वमंत्रेति । हरिवर्त्म आकाशं तच्चारिणः खेटाः किंभूताः परावरेषां उच्चनीचजातीनां प्राणिनां कर्म शुभाशुभं तत्साक्षिणः । पुनः किंभूताः स्वमंत्राः तत्तद्ग्रहमंत्रास्तेषां जाप्यं जपः तथार्चनं च होमश्च दानकं च तैः प्राप्तं आनुकूल्यं येषां ते तथाभूताः संतः अनेकेषां कर्मणां अर्थ एव अर्थकः फलं तत्प्रदा भवंति । ग्रहाः सर्वेषां प्राणिनां सर्वेषु कर्मसु जपादिभिः पूजिताः सर्वारिष्टनाशका अनेकेषां सर्वसुखसमर्पकाश्च स्युरिति भावः ॥ १०७ ॥

इति श्रीपौर्णिमीयगच्छाधिराजभट्टारकपुरंदरश्रीमहिमाप्रभसूरीश्वरचरणसरोरुहचञ्चरीकायमान
शिष्यभावरत्नविरचितायां श्रीकविकालिदासकृतज्योतिर्विदाभरणस्य
सुखबोधिकायां ग्रहगोचराध्यायः पंचमः समाप्तः ॥ ५ ॥

वक्रवालग्निमारूढो बरडाव्हो महाबली ॥
क्षेत्रपालः सुखायास्तु राकापक्षभृता सताम् ॥ १ ॥

॥ उत्पातप्रकरणम् ॥ ६ ॥

लोकः खपांथविहिताशुभमेति तावदुत्पातमेष्यति यदाथ तदीरितं स्यात् ॥
च्छांतितोऽशुभफलाय न तद्ब्रुवेऽहमुत्पातरूपफलशांतिविधानतोऽतः ॥

अथ ग्रहगोचरकथनानंतरं तेभ्य उत्पाता जायंतेऽतो वसंततिलकेन उत्पाताध्यायसंज्ञमाह—लोकइति । अथानंतरं यदा लोकः खपायविहिताशुभं ग्रहकृतकष्टमेति प्राप्नोति तावत्तत्कष्टात् पूर्वं लोकस्तदीरितं तेन ग्रहेण प्रेरितमुत्पातं प्रकृतेरन्यत्वमुत्पातस्त्रिधा ग्रहर्क्षैः कृतं दिव्यं उल्कानिर्घातपवनपरिवेषगंधर्वपुरेंद्रचापादि आंतरिक्षं भौमं स्थिरमचरमेष्यति गमिष्यति तदुत्पन्न शांतिविधानात् अशुभफलाय न स्यादतः कारणादहं तदुत्पतनं ब्रुवे । कस्मात् हेतोः उत्पातस्य रूपं स्वरूपं तस्य फलं तस्य शांतिविधानतः शांतिकरणहेतोः । यत दिव्यांतरिक्षादितिममघानि दृष्ट्वा निमित्तानि शुभाशुभानि ॥ वदन्नुदर्कस्य शुभानुपत्त्य महत्त्वमाप्नोति सभासु धीमान् ॥ १ ॥ अतोऽहमुत्पातगणानपीह यथा स्वबोधं कियतोऽपि वक्ष्ये । लोकप्रबोधाय विदग्धतुष्ट्यै जनस्य भूपस्य च विस्मयाय ॥ २ ॥ युद्धं ग्रहाणां परिवेषकेतूदया वैकृतमिंदुभान्वोः । ग्रहोपरागः प्रतिमास्करश्च दिव्या विकाराः कथिता मुनींद्रैः ॥ ३ ॥ इति दिव्याः ॥ संध्याभ्रवैकृतगंधर्वनगराणि तारापातस्तथाशनिरकालगर्जितं च । निर्घातर-

ककरक रजसां निपातो नीहारशक्रधनुषीति नभःसमुत्थाः ॥ ४ इति आंतरिक्षाः ॥ भेदो भुवः प्रपतनं ध्वजतोरणानां गंधर्वसंज्ञितपुरो धरणीप्रकंपः । अर्चासु मंगचलनादि हुताशकोपः शाखा तरोः पतति वायुरतिप्रचंडः ॥ ५ ॥ मधूकजालं निविशत्यकस्माद्विशंति गेहं च कपोतकाद्याः ॥ पिपीलिकाश्येनशिवाभिपक्षिश्वगोमृगाणां च कुजा विकाराः ॥ ६ ॥ इतिभौमाः इत्यादि ॥१॥

यस्यालयस्य सहसा पतनं यदा स्याद्भर्तारमेति शरणस्थवशा तदारम् ॥
धिष्ण्ये प्रघाणपतनं तनुते त्वपत्ये मांद्यं दरिद्रमनुवेलनिशांतशब्दः ॥२॥

अथ प्रथमं भौमोत्पातेषुग्रहगतोत्पातमाह—यस्येति । यदा यस्य नरस्यालयस्य गेहस्य पतनं सहसा झटिति स्यात्तदाऽरं झटिति शरणस्थो गृहस्थस्तस्य वशा महिला भर्तारं मृत्युमेति । तु पुनर्यदा धिष्ण्ये गेहे प्रघाणपतनं बहिर्द्वारप्रकोष्ठपतनं स्यात् 'प्रघाणः प्रघणाऽलिंदा बहिर्द्वारप्रकोष्ठके' इतिहैमः । तदाऽपत्ये संताने मांद्यं रोगं तनुते विस्तारयति । पुनरनुवेलं समये निशांतशब्दो भणकाररूपो दारिद्र्यं तनुते ॥ २ ॥

सीमंतिनी विकृतिमत्प्रसवा स्वभोक्तुर्दास्या? भयाय वडवा
बहुला स्वगोप्तुः ॥ काली च कालभटभीतिविमुक्तये वा
तच्छावदर्शनमथातु च तस्य वै स्यात् ॥ ३ ॥

दिवस इत्यर्थस्तस्य समये श्रावणमासस्य दिनसमये चतुर्षु पत्सु प्रहरेषु क्रमेण प्रसूता प्रसूतिं गताऽर्वती वडवा क्रमेण प्रथमे द्वितीये तृतीये चतुर्थे गृहपतिं गृहिणीं सुतार्थान् निहंति इति। च पुनर्हरौ सिंहराशौ उष्मसमस्य सूर्यस्य समये सिंहराशिगतसूर्ये सति दोग्ध्री सुरभिः प्रसूता वडवावदनिष्टदा च पुनस्तपसो माघस्य समये पुनर्ज्ञवनो बुधवारस्य समये माघमासे बुधवारे च काली महिषी प्रसूता वडवावदनिष्टदा इति। 'अश्वायां पुनरर्व्वती' इति हेमशेषकोशे ॥ ४ ॥

भावी तदापि करभे कलभं करिण्या ज्ञेयं प्रसूयत
इति शुचिभौ नभस्य ॥ चक्रव्ययो नरपतेर्यदि
भूमिदेवे तद्दानमस्ति तदुपप्लवशांतयेऽतः ॥ ५ ॥

अथ भाद्रपदादौ हस्तिनीप्रसूतिस्वरूपमाह—भावी इति ॥ नभस्ये भाद्रपदे करभे हस्तनक्षत्रे शुचिभौ सूर्ये सति यदि चेत् करिण्या हस्तिन्या कलभं प्रसूयते। कलभशब्दस्य पुल्लिंगवल्लिंगत्वादत्र कर्मोक्तौ प्रथमैकवचनं तदापि निश्चितं नृपतेर्नृपस्य चक्रव्ययः सैन्यविनाशो भावी भवितास्ति अतःकारणात्तदुपप्लवशांतये कलभजन्मोपद्रवोपशमनाय भूमिदेवे द्विजे तद्दानं तस्य कलभस्य दानमस्ति इति ज्ञेयम् ॥ ५ ॥

गेहं यदा करटकौशिकगृध्रफेरुश्येनद्वितालुककपोतपतत्रिणः स्यात ॥ नाशं विशंति ससमग्रशिवैणनेत्रा नो चेत्तदुद्वसमगारपतेः प्रयाति ॥ ६ ॥

अथ कृतगृहप्रवेशकाद्युत्पातमाह—गेहमिति ॥ करटो ध्वांक्षः 'ध्वांक्षारिः करटो ध्वांक्ष' इति हैमः। कौशिकोऽलूकः गृध्रो दूरदृग् 'समली' इति भाषा ॥ फेरुर्वृकः श्येनः पत्री 'सींचाणो' इति भाषा। द्वितालुको द्विजिव्हः सर्पः कपोतः पारावतः एते पतत्रिणो गेहं विशंति तदागारपतेर्गृहस्वामिन एणनेत्रा मृगाक्षी स्यात्तदा सा नाशं मृत्युं याति कथंभूता स्त्री सा समग्रशिवा समस्तकल्याणेन सह वर्तमाना। चेत् यदि स्त्री नास्ति तदा तद्गृहमुद्वसं प्रयाति ॥ ६ ॥

संजायते कुलपतिः किल वामलूरः कोष्ठे कुलस्य मधुजालमसह्यपिंडं ॥ स्तंभप्रवालजननं यदि वा तदा वा दारिद्र्यमेति कुररादिविहंगनीडम्॥७

अथ गेहे मधुपिंडादिजननमाह—संजायत इति। कुलस्य गेहस्य कोष्ठे यदि वामलूरो वल्मीकं संजायते वाऽथवा मधुजालं मधुपिंडः 'स्तंभप्रवालजननं' स्थूणायां नानपल्लवाः'। अथवा कुररादिविहंगनीडं उत्क्रोशादिपक्षिकुलायः संजायते क्रियेत निर्माप्यते तदा कुलपतिर्गृहस्वामी असह्या पीडा यस्मिंस्तद्दारिद्र्यकष्टं दारिद्र्यमेति प्राप्नोति ॥ ७ ॥

शृंगाणि चेद्भुवि पतंति च शालमौलेः पृःशालशालवि-

स्फुकरक रजसां निपातो नीहारशक्रधनुषीति नभःसमुत्थाः' ॥ ४ इति आंतरिक्षाः ॥ 'मेदो भुवः प्रस्रवनं ध्वजतोरणाना गंधर्वसंज्ञितपुरो धरणीप्रकंपः । अर्चासु भंगचलनादि हुताशकोपः शाखा तरोः पतति वायुरतिप्रचंडः ॥ ५ ॥ मधूकजालं निविशत्यकस्माद्विशंति गेहं च कपोतकाद्याः ॥ पिपीलिकाश्येनशिवाग्निपक्षिश्वगोमृगाणां च कुजा विकाराः ॥ ६ ॥ इति भौमाः इत्यादि ॥१॥

यस्यालयस्य सहसा पतनं यदा स्यादत्तारमेति शरणस्थवशा तदारम् ॥
धिष्ण्ये प्रघाणपतनं तनुते त्वपत्ये मांद्यं दरिद्रमनुवेलनिशांतशब्दः॥२॥

अथ प्रथमं भौमोत्पातेषु ग्रहगतोत्पातमाह—यस्येति । यदा यस्य नरस्यालयस्य गेहस्य पतनं सहसा झटिति स्यात्तदाऽरं झटिति शरणस्थो गृहस्थस्तस्य वशा महिला भर्तारं मृत्युमेति । तु पुनर्यदा धिष्ण्ये गेहे प्रघाणपतनं बहिर्द्वारप्रकोष्ठपतनं स्यात् 'प्रघाणः प्रघणालिंदा बहिर्द्वारप्रकोष्ठके' इति हैमः । तदाऽपत्ये संताने मांद्यं रोगं तनुते विस्तारयति । पुनरनुवेलं समये निशान्तशब्दो भणकाररूपो दारिद्र्यं तनुते ॥ २ ॥

सीमंतिनी विकृतिमत्प्रसवा स्वभोक्तुर्दास्या? भयाय वडवा
बहुला स्वगोप्तुः ॥ काली च कालभटभीतिविमुक्तये वा
तच्छावदर्शनमथानु च तस्य वै स्यात् ॥ ३ ॥

अप्रस्तुतिवैकृतमाह—सीमंतिनीति । विकृतिमान् विकलांगवान् प्रसवो बालो यस्याः सा विकृतिमत्प्रसवा सीमंतिनी स्त्री स्वभोक्तुर्निजपतेरामयाय रोगाय स्यात् ॥ एवं च वडवाऽश्वी बहुला धेनुः काली महिषी च विकृतिमत्प्रसूतिः सती स्वगोप्तुः निजस्वामिन आमयाय स्यात् । अथ च वा इति पक्षांतरे प्रसूतेरनु पश्चात् तच्छावदर्शने तेषां बालानां विलोकने तस्य पुरुषस्य कालभटो यमस्तस्माद्भीतिस्तस्य विमुक्तये यमभयमोक्षाय वै निश्चितं स्यात् । 'बहुला तु सुरभ्यां नीलिकैलयोः' इति हैम. । यतः 'प्रसवविकारे स्त्रीणां द्वित्रिचतुःप्रभृति समप्रसूतेर्वा । हीनातिरिक्तकाले स्वदेशकुलक्षयो भवति ॥१॥ वडवोष्ट्रमहिषीगोहस्तिनीषु यमलोद्भवे मरणमेषां षण्मासात्प्रसुतिः फलं शांतौ श्लोकौ च गर्गोक्तौ ॥२॥ नार्यः परस्य देशेषु त्यक्तव्यस्ता हितार्थिना । तर्पयेच्च द्विजान् कामैः शांतिं चैवात्र कारयेत् ॥ ३ ॥ चतुष्पदाः स्वयूथेभ्यस्त्यक्तव्याः परभूमिषु । नगरं स्वामिनं यूथमन्यथा नाशयंति वै ॥ ४ ॥' इत्यादि वराहमिहिरोक्तिः ॥ ३ ॥

सार्कांशुकालसमये नभसः प्रसूता नन्दयंती गृहपतिं
गृहिणीं सुतार्थान् ॥ यत्सुक्रमादिति चतुष्पु निहंति
दोग्ध्री हर्युष्मभस्य तपसो नवतश्च काली ॥ ४ ॥

अथ वडवादीनां कालविशेषगतप्रसूतिस्वरूपमाह—सार्कांशुकेति । ननु निश्चितं नभस श्रावणस्य सह अर्कांशुना सूर्यकिरणेन वर्तमानः सार्कांशुः सावर्णः काल सूर्ययुक्तः

दिवस इत्यर्थस्तस्य समये श्रावणमासस्य दिनसमये चतुर्षु पत्सु महरेषु क्रमेण प्रसूता प्रसूतिं गताऽर्वती वडवा क्रमेण प्रथमे द्वितीये तृतीये चतुर्थे गृहपतिं गृहिणीसुतार्थान् निहंति इति । च पुनर्हरौ सिंहराशौ उष्मभस्य सूर्यस्य समये सिंहराशिगतसूर्ये सति दोग्ध्री सुरभिः प्रसूता वडवावदनिष्टदा च पुनस्तपसो माघस्य समये पुनर्ज्ञवतो बुधवारस्य समये माघमासे बुधवारे च काली महिषी प्रसूता वडवावदनिष्टदा इति । 'अश्वाया पुनरर्वती' इति हेमशेषकोशे ॥ ४ ॥

भावी तदापि करभे कलभं करिण्या ज्ञेयं प्रसूयत
इति द्युविभौ नभस्य ॥ चक्रव्ययो नरपतेर्यदि
भूमिदेवे तद्दानमस्ति तदुपप्लवशांतयेऽतः ॥ ५ ॥

अथ भाद्रपदादौ हस्तिनीप्रसूतिस्वरूपमाह—भावी इति ॥ नभस्ये भाद्रपदे करभे हस्तनक्षत्रे द्युविभौ सूर्ये सति यदि चेत् करिण्या हस्तिन्या कलभ प्रसूयते । कलभशब्दस्य पुल्लिंगवल्लिंगत्वादत्र कर्मोक्तौ प्रथमैकवचनं तदापि निश्चित नृपतेर्नृपस्य चक्रव्ययः सैन्यविनाशो भावी भवितास्ति अत कारणात्तदुपप्लवशांतये कलभजन्मोपद्रवोपशमनाय भूमिदेवे द्विजे तद्दानं तस्य कलभस्य दानमस्ति इति ज्ञेयम् ॥ ५ ॥

गेहं यदा करटकौशिकगृध्रफेरुश्येनद्विताल्लुकक-
पोतपतत्रिणः स्यात ॥ नाशं विशंति ससमग्रशि-
वैणनेत्रा नो चेत्तदुद्वसमगारपतेः प्रयाति ॥ ६ ॥

अथ कृतगृहप्रवेशकाद्युत्पातमाह—गेहमिति ॥ करटो द्विकः 'घुन्नारि-करटो द्विक' इति हैमः । कौशिकोल्लूकः गृध्रो दूरदृग् 'समली' इति भाषा ॥ फेरुर्जंबुक श्येन पत्री 'सींचाणो' इति भाषा । द्विनालुको द्विजिव्हः सर्पः कपोत- पारावतः एते पतत्रिणो गेहं विशति तदागारपतेर्गृहस्वामिन एणनेत्रा मृगाक्षी स्यात्तदा सा नाश मृत्युं याति कथभूता स्त्री सा समग्रशिवा समस्तकल्याणेन सह वर्तमाना । चेत् यदि स्त्री नास्ति तदा तद्गृहमुद्वसं प्रयाति ॥ ६ ॥

संजायते कुलपतिः किल वामलूरः कोष्ठे कुलस्य मधुजालमसह्यपिडं ॥
स्तंभप्रवालजननं यदि वा तदा वा दारिद्र्यमेति कुररादिविहंगनीडम्॥७

अथ गेहे मधुपिंडादिजननमाह—संजायत इति । कुलस्य गेहस्य कोठे यदि वामलूरो वल्मीकं संजायते वाऽथवा मधुजालं मधुपिंडः 'स्तंभप्रवालजननं स्थूणाया जातपल्लवाः' । अथवा कुररादिविहगनीड उत्क्रोशादिपक्षिकुलाय- संजायते विलेति विभाव्यते तदा कुलपतिर्गृहस्वामी असह्या पीडा यस्मिंस्तदशक्यकष्टं दारिद्र्यमेति प्राप्नोति ॥ ७ ॥

भृंगाणि चेद्भुवि पतंति च शालमौलेः पुःशालशालवि-

शिलापतनं यदा स्यात् ॥ संजायते सुरसमान-
बले तदर्येऽकस्माद्धि तद्भुगपरोऽत्र न संशयोऽस्ति ॥ ८ ॥

अथ दुर्गशीर्षादिपतनदोषमाह—शृगाणीति । चेद्यदि शालमौले प्राकारशीर्षात् शृगाणि कपिशीर्षाणि भुवि भूमौ पतति च पुनर्यदा पूःशालो नगरीवृक्ष पूःशालविशिख नगरीप्राकारप्रतोलिस्तयो पतनं स्यात्तदाऽकस्माद्धि निश्चित तद्भुक् तस्या नगर्या भोक्ताऽपरो राजा सजायते । कस्मिन् सति सुरसमानबले तदर्ये तस्या नगर्या अर्ये स्वामी तद्दर्यस्त स्मिन्नत्र सशयो नास्ति । अकस्माच्छब्द पूर्वान्वयेऽपि योज्य । 'प्रतोलि विशिखा समा' इति हैम । शाखाभङ्गेऽकस्माद्वृक्षाणा निर्दिशेद्रणोद्योगं । हसने देशभ्रश रुदिते च व्याधिबाहुल्यं ॥ १ ॥ राष्ट्रविभेदस्त्वनृतौ बालवधोऽतीवकुसुमिते बाले । वृक्षात्क्षीरस्रावे सर्वद्रव्यक्षयो भवति ॥२॥ मद्ये वाहननाश सग्राम शोणिते मधुनि रोग । स्नेहे दुर्भिक्षभय महद्भयं निःसृते सलिले ॥ ३ ॥ शुष्कविरोहे वीर्यान्नसंक्षय शोषणे च विरुजाना । पतितानामुत्थाने स्वय भय दैवजनि ते च ॥ ४ ॥ पूजितवृक्षे ह्यनृतौ कुसुमफल नृपवधाय निर्दिष्ट । धूमस्तस्मिन्ज्वालाथवा भवेन्नृपवधायैव ॥ ५ ॥ सर्पत्सु तरुषु जल्पत्सु वापि जनसक्षयो विनिर्दिष्ट । वृक्षाणा वैकृत्ये दशभिर्मासै फलविपाक ॥ ६ ॥ स्रग्गन्धधूपाम्बरपूजितस्तच्छत्रं निधायोपरि पादपस्य । कृत्वा शिवं रुद्रजपोऽत्र कार्यो रुद्रेभ्य इत्यत्र षडङ्ग होम ॥ ७ ॥ इति वृक्षवैकृत । वराह मिहिरोक्तम् ॥ ८ ॥

चेच्छासनासनमरिष्टनिशाटनाख्यकेकाकपोतपतता
सहसा भ्रमन्तुः । एकस्तदाविरिह शासनकामहा-
निस्तिष्ठत्यर्हिर्भवति यस्य च तस्य तद्वत् ॥ ९ ॥

अथ निजासनोपविष्टकाकादिदोषमाह—चेच्छासनेति । अरिष्ट काक । निशाटना ख्योलूक केका मयूर कपोत एषा पतता पक्षिणा द्वन्द्वे एषा मध्ये एको विहगो यस्य नु पुरुषस्य शासनासनमाज्ञाया आसनमुद्दिश्य सहसा भ्रमन् सन् इहासने तिष्ठति चपुनस्तद्वद् हिस्तिष्ठति तदा तस्य पुरुषस्य शासनकामहानि राज्ञां वाञ्छितभयो भवति । नृपादिर्यदासन मारुह्य निजाज्ञामाविष्करोति तच्छासनासन केकाशब्द आकारान्तोऽपि मयूरवाचा । उक्तञ्च । 'केका वाणिणि तद्वानि शुद्धे जमनिन् स्त्रिया । गीत्रतन्त्रीनरीनाम्रपर्णीषु तद्विदेनयो' इति इत्यायुधटिप्पनके 'केका केकानुकारध्वनिनिमिर सदा श्रूयते निर्झराणा' इति शृङ्गारशतकेऽपि । अन्यथात्र श्रुतेन छन्दोभङ्गो भवेत् ॥ ९ ॥

यस्यासनस्य शयनस्य च जातु भगो यानस्य वा भवति
यस्य तदर्थभंगः ॥ अश्रातमात्मह्रितबुद्धिभिर्ग्न्यकस्मात्
कार्यं द्विजे तदपवर्जनमात्मशाय ॥ १० ॥

अथासनादिभगदोषमाह—यस्येति । जातु चेद्यस्य पुरुषस्य आसनस्य पादपीठस्य चकस्य च यानस्य वाहनस्य वा अकस्मात् भंगो विनाशो भवति तदा तदर्थभग-तामासनादीनामर्थे स्वामी तदर्थस्तस्य भगो विनाशो भवति । इति हेतोरश्रार्त निरतर-त्महितबुद्धिभिर्नरैस्तदुपवर्जनं आसनशय्यावाहनाना दानं द्विजे विप्रे कार्यं कर्तव्यं कस्मै त्मशाय आत्मने श सुखमात्मश तस्मै ॥ १० ॥

दृष्टे च पुष्करकुटे ज्वलिते कदाचिद्द्रष्टुर्भवेच्छमनपूः-
पदवीप्रयाणं ॥ स्यान्मातरिश्वपदवीज्वलिते तथा च
द्रष्टुर्न नेति भवितव्यवशादकस्मात् ॥ ११ ॥

अथ जलाशयादौ सजातज्वालाया द्रष्टुर्दोषमाह । दृष्ट इति । कदाचिदकस्मात् वितव्यवशात् पुष्करस्य जलस्य कुटे गेहे कोटश्च तस्मिन् कूपादिजलाशये इत्यर्थः । पुष्कर-टे इत्यपि पाठः । ज्वलिते दग्धे दृष्टे सति द्रष्टुः पुरुषस्य शमनपूःपदवीप्रयाणं यमनगरी-गैस्थान भवेत् ॥ जलवैकृत यथा । अपसर्पणं नदीनां नगरादचिरेण शून्यतां कुरुते । शोष-शोष्याणामन्येषा वा ह्रदादीनां ॥ १ ॥ स्नेहासृङ्मांसवहा सकुलकलुषा प्रतीपगाश्चापि । कस्यागमन नद्य कथयति पण्मासात् ॥ २ ॥ ज्वालाधूमक्वाथा रुदितोत्क्रुष्टानि चैव पाना । गीतप्रजल्पितानि च जनमरकायोपदिष्टानि ॥ ३ ॥ सलिलोत्पत्तिरखाते गंधरसवि-र्यये च तोयानां । सलिलाशयविकृतो वा महद्भय तत्र शांतिरिय ॥ ४ ॥ सलिलविकारे र्योत्पूजा वरुणस्य वारुणैर्मंत्रैः । तरेव च जपहोम शममेव पापमुपयाति ॥ ५ ॥ इति क्ष्यमाणजलवैकृतेऽपि ज्ञेय ॥ तथाच पुनर्मातरिश्वा वायुस्तस्य पदवी मार्गो व्योम तस्मिन् ज्वलिते दग्धे दृष्टे सति द्रष्टुर्नरस्य यमनगरीप्रयाण न स्यादिति न द्वौ नकारौ प्रकृत्यर्थं षयत । ज्वलितौ दग्धभास्करौ इति । पुष्कर द्वीपतीर्थे हि । खगरागे । अथावरे । सूर्यास्ये सेफले काडे शुडाग्रे खे जलेऽम्बुदे' इति हैम ॥ ११ ॥

गेहे गृही भवति यस्य यदोदकुंभीभंगः सवैति सहसा
कुरलिंजराल्याः । भंगो भयं भ्रमरजातमपारकोपं जीव-
स्वहानिरथ मंथनभांडभंगः ॥ १२ ॥

अथ जलकुंभादिभगे दोषमाह—गेह इति । यस्य नुर्नरस्य गेहे यदा सहसा उद-कस्य कुंभी उदकुंभी उदकस्य उदन्नादेश कुंभी पुस्त्रीलिंग जलकलशस्तस्य भगो भवति । पुनरलिंजराणां मणिकानामाली श्रेणि ऊर्ध्वमेकैकोपरि न्यस्तमणिकश्रेणिः 'कुतरवेड' इति भाषा तस्या भगो भवति तदा स गृही भ्रमरान्नृपेवाद्रूपाज्जातमपारकोपं भयमेति प्राप्नोति । अथवा मंथनभाडभगो मंथन्या भगो भवति तदा जीवस्वहानिर्जीवस्य द्रव्यस्य च हानिर्भवति ॥ १२ ॥

भोगी कपोतबलिभुग्बकमैथुनं वा यः पश्यतीदृशर-

दर्द्धविमध्य एति । शार्दूलसंगमवराहकसंगमं स
गोपत्यपत्यनगरीतनिवासमाशु ॥ १३ ॥

अथ कपोतादिमैथुनदर्शने दोषमाह—भोगी इति । यो भोगी पुरुषोऽभीत्यपि पाठः। कपोतः बलिभुक् काकः प्रतीतः एषां मैथुनं पश्यति वा पुनः शार्दूलसंगमो व्याघ्रमैथुनं वराहकसंगमः सूकरमैथुनं एतयोः समाहारस्तत् पश्यति स पुरुष आशु शीघ्रं गवां किरणानां पतिः सूर्यस्तस्यापत्यं यमस्तस्य नगरी संयमनी तस्यां इतः प्राप्तो निवासो येन स यमनगरीनिवासिलोकस्तं अथवा इतः प्राप्तश्चासौ निवासो निलयस्तमेति मृत्युं प्राप्नोतीत्यर्थः। किय त्कालेनेंदुशरदर्द्धविमध्ये चांद्रवर्षार्द्धमध्ये षण्मासमध्ये । वराहको मयूरः । एतयोर्मिथुनमित्यप्यर्थो विभाव्यते ॥ १३ ॥

स्यादेकदङ्कुसलिकासरटोरगाणां पातस्तदूर्ध्वचरतां
यदि यस्य मुंडे । तस्यामयाप्तिरतिदुष्कवती तदा-
तत्स्पर्शोऽपि वा भवति देहभृतो रुजेऽङ्गे ॥ १४ ॥

अथ मूर्ध्नि स्थितकाकादिदोषमाह—स्यादेकेति । यदि यस्य नरस्य मुंडे मस्तके एकदृग् काकः मुसलिका पक्षी सरटः कृकलासः उरगः सर्प एषां द्वंद्वे एषां पातः स्यात्। किंभूतानामेषां ऊर्ध्वं चरतामूर्ध्वं गच्छतां तदा तस्य नरस्य आमयाप्तिः रोगप्राप्तिर्भवति। किंभूता आमयाप्तिः । अतिदुष्कवती दुष्टं कायगति यतीति दुष्कं दुःखं तदस्यास्तीति गाढदुःखयुक्ता अतिदुःखवतीत्यपि पाठः । वा पुनस्तत्स्पर्शोऽपि तेषां काकादीनां स्पर्शनमपि देहभृतो मनुष्यस्याङ्गे रुजे रोगाय भवति। रुट् तस्यै रुजे इति रुट् रुजा इति शब्दप्रभेदः। यतः । 'यन्मूर्द्ध्नि काको निवसत्यकस्मात् स याति नाशं परमापदं वा । योपिच्छिरस्योरग पूर्णकुंभास्थिते द्विके स्यात्स्वमरणाय । भिक्षाटवटं चेत्तनयस्य मृत्यु स्त्रत्नस्य लक्ष्मीर्यदि हंति चंद्रं' इति ॥ आरुह्य कायेन शिरःप्रदेशमुत्पत्य याति प्रतिसूर्यशायी। नरस्य नाशाय स याति नराशु प्रयाति चेद्वाभवरस्तदानीं ॥ १ ॥ मूर्द्धन्यकस्मात्सरटो यदीये पतत्यमौ शीघ्रमुपैति पीडा । यस्यायमेवं वनितादिरथ पतत्यमावप्यविदन्नृपोति ॥ २ ॥ इति संहितायां ॥ १४॥

गर्जेद्यदांधुरमरायतनस्थली वा प्रोतोऽपि तापमति-
वेदनमंधुकर्ता ॥ नाशं तदा सविधमेति च वासभंगं
स्थानेयमप्याद्वितसंहतिकोपहेतुम् ॥ १५ ॥

अथ वृषादिगर्जने दोषमाह—गर्जेदिति । यदांधुः वृषोऽमरायतनस्थली देवगृहभूमिर्वा स्रोतो नदी अपि गर्जेत्तदांधुरनां इत्यपि पाठः । वृषस्थली अतिवेदनं नाशमेति

प्राप्नोति च पुनर्नाशमेति सविधं समीपवार्तिनं वासभगं चेति । स्थाने भवं स्थानेयं निवासस्थानमपि अहितसहतिकोपहेतु रिपुसमूहकोपकारणमेति । स्रोतो निर्झरिणी इति हैम ॥१५॥

घनरसनिधिचीराकंपने देशभंगो भवति चपलमुल्का-
पातादिग्दाहयोश्च ॥ अमितकलहमब्दे कालगे ग-
र्जिते वा वननिधिरसनायों याति शत्रूत्थदोषम् ॥ १६ ॥

अथ मालिनीवृत्तेन भुकपनादिदोषमाह—घनेति । घनरसा जलानि तेषा निधि समुद्र स एव चीवर वस्त्र यस्या सा भुमिस्तस्या कंपने भकपने पुनरुल्कापातदिग्दाहयोरुल्कापाते दिग्दाहे च सति चपल शीघ्रं देशभगो भवति । उल्का पचविधा उल्का १ धिष्ण्या २ ऽशानि ३ विद्युत् ४ तारा इति ॥ उल्कापक्षेण फल तद्वद्धिष्ण्याशनिभिस्त्रिभि पक्षे ॥ विद्युदहोभि षड्भिस्तद्वत्ताराविपाचयति ॥ १ आसा लक्षण सहितातो ज्ञेयं । दिशा दाह पीतोऽग्निवर्णोऽरुणश्च नेष्ट सहितात फल ज्ञेय हेमवर्णे शुभ इति । वा पुनरकालगे प्रावृड्वर्जितेऽब्दे मेघे सति वनाना जलाना निधि समुद्र स एव रसना मेखला यस्या सा भूमिस्तस्या अर्य स्वामी भूपति शत्रूत्थदोष रिपुसजातदोष याति प्राप्नोति । किंविशिष्ट शत्रूत्थदोष । अमितकलहममितो भूरि कलहो राटिर्यस्मिस्तदिति । ‘वन घनरसो यादो निवासोऽमृत’ इति हैम ॥ १६ ॥

भवति मुकुरनाशो हानये त्वोजसो वा प्रहरणपरिभंगः
संगरे भंगलब्ध्यै ॥ अवनिपतिरकस्मादातपत्रस्य भंगे
मरणमिह वरूथिन्यत्ययं चैति केतोः ॥ १७ ॥

अथ दर्पणादिविनाशे दोषमाह—भवतीति । हि निश्चित मुकुरनाशो दर्पणविनाशस्त्वोजसो बलस्य हानये नाशाय भवति वा पुन प्रहरणपरिभगोऽस्त्रभग संगरे सग्रामे भगलब्ध्यै पराजयप्राप्तये भवति । च पुनरकस्मादातपत्रस्य छत्रस्य भगे विनाशे सति इह नगरेऽवनिपतिर्नृपो मरणमेति प्राप्नोति । पुन केतो पताकाया भगे सति वरूथिनी सेना अत्यय क्षय प्राप्नोति । यत ‘शक्रध्वजेन्द्रकीलस्तभद्वारप्रपातभगेषु । तद्वत्कपाटतोरण केतूनां नरपतेर्मरणम्’ ॥ १७ ॥

जलदरसविवृद्धिं यात्यकाले स्रवंती यदि कुविभुरकस्मा-
त्प्रत्यनीकापदं च ॥ भवति जनरुजेंऽभोऽवंध्यकोष्ठः
सदैव कमलविहितखातो दृष्टकावर्तमध्यः ॥ १८ ॥

अथाकाले नदीपूरादौ दोषमाह—जलदेति । यदि स्रवती नदी अकाले जलदस्य मेघस्य रसा जलानि तेषा विवृद्धि जलपूर याति तदाकस्मात् कुविभुर्भूपति प्रत्यनीकापद शत्रुजनितापद याति प्राप्नोति । च पुन सदैव अभमा जलेनावध्य कोष्ठो यस्य स सदा जलभृतकोष्ठ

एवंविध कमलार्थं जलार्थं विहित कृत खात विविशिष्ट कमलविहितखात । दृष्ट कस्य जलस्य आवर्तो भ्रमो मध्ये यस्य स दृष्टकावर्तमध्य । कोऽर्थ । देवखातादौ जलभ्रमण भवति तदा जनरुजे लोकरोगाय स्यात् । 'आवर्त्त पयसा भ्रम' इति । 'क्षीर पुष्करमेघपुष्पकमलान्याप पय पाथ्वसी' इति हैम ॥ १८ ॥

भ्रमरममरमूर्तेर्हंति भंगस्त्वकस्माद्भवति तदुप-
सर्प्पे सर्पणं लोकभूतेः ॥ अचरणशरणानामार्तये
श्रोत्रियाणां वसुवितरणमेधानां च देवाश्रुपातः ॥ १९ ॥

अथ प्रतिमाभगादौ दोषमाह—भ्रमरेति । अमरमूर्ते प्रतिबिंबस्य भगोऽकस्मान्भ्रमर नृदेव राजान हंति । पुनस्तदुपसर्पे तस्या मूर्तेश्चलने सति लोकभूतेर्जनश्रिय सर्पणं गमन हानिर्भवति । चपुनर्देवाश्रुपातो देवमूर्तिनेत्रात् स्रवदश्रुजलमार्तये पीडायै भवति । येषा अ कृष्णस्तस्य चरणमेव शरण रक्षको येषा तेषा विष्णुचरणभक्ताना वैष्णवानामित्यर्थ । पुन श्रोत्रियाणा वेदपाठकाना पुन वसुवितरणे धनदाने मेधा बुद्धिर्येषा ते तेषा दातॄणा 'शरण रक्षणे गेहे वधरक्षत्र्योरपि' इति हैम । यत प्रतिमाविकृतं । अनिमित्तचलनभगस्वेदाश्रुनिपातजल्पनाद्यानि । लिंगार्चायतनाना नाशाय नरेंद्रदेशाना ॥ १९ ॥ मुक्त्वा देवविकारं शुचि पुरोधास्त्र्यहोषित स्नान । स्नानकुसुमानुलेपनवस्त्रैरभ्यर्चयेत् प्रतिमा ॥ २ ॥ इत्यादि संहिताया । इति भौमोत्पाता विशेषतो ग्रंथातरादवसेया ॥ १९ ॥

वियति यदि खरांशोर्दृश्यते बिंबयुग्ममुदितमर-
मिलेशो जायते मंडलेऽन्यः ॥ निजपरिवृढनाशादिंदु-
बिंबद्वयं वा सति निजनगाले तत्र राजा तदान्यः ॥ २० ॥

अथ दिव्योत्पातेषु प्रथम रविचन्द्रयोरम्बिंबद्वयदोषमाह—वियतीति । यदि वियति गगने खरांशो सूर्यस्य बिंबयुग्म बिंबद्वयमुदितं प्राप्तोदय दृश्यते तदार इतिति मण्डले देशे निजपरिवृढनाशात् स्वस्वामिनाशात्तोऽन्योऽमर इलेशो भूमीशो राजा जायते । वा पुन इंदुबिंबद्वय व्योम्नि दृश्यते तदा निजनगरपाले सति तत्र देशेऽन्यो राजा भवति ॥ २० ॥

नभसि समरकाले सेट्योरेति राशिः प्रतिभयमनु
यस्तद्राशिभागस्थदेशाः ॥ गजरथहयदेपाकीर्णनृतृहले-
भ्यः परजनपदपेभ्यो याति संग्राममाशु ॥ २१ ॥

अथ ग्रहयुद्धदोषमाह—नभसीति । नभ नभसि व्योम्नि खेटयोर्ग्रहयो यदि समरकाले युद्धसमयमेति प्राप्नोति तदाऽनु पश्चात् य राशिभागनवांशगेषु स्थिता ये देशा ... नवभागे ग्रहयुद्धे यत्र भागे देशा स्थिताः ... जनपदा ...

तद्राशौ स्थितास्ते देशा आशु शीघ्रं प्रतिभयं भयानकं संग्राममयंति। इणो रूपं प्राप्नुवंति। किंभ्यः। जनपदा देशा जना वा तान् पांतीति जनपदपाः परे च ते जनपदपाश्च शत्रुभूपास्तेभ्यः। किंभूतेभ्य एभ्यो गजरथहयहेषाभिराकीर्णं कौतूहलं एषां तेभ्य इति॥ २१॥

गदितगगनमार्गद्वगनाभेदयोगेऽविरलगदकृतार्तिरेधते लोकशोकः॥ जलदपटलगर्भैरावतीदीप्तियाते व्रजति दरमकाले लोकपालात्प्रजा हि॥ २२॥

अथ नक्षत्रभेदयुतौ दोषमाह—गदितेति। गदितः प्रोक्तश्चासौ गगनमार्गद्वगनयोर्नक्षत्रयोर्भेदयोगश्च तस्मिन् नक्षत्रभेदयुतौ सत्यां लोकशोको जनानां खेद एधते वृद्धिं प्राप्नोति। किंभूतो लोकशोकः। अविरला निबिडगदेन रोगेण कृता आर्तिः पीडा यस्मिन् सः। वा पुनर्हि निश्चितं अकाले जलदपटलगर्भान्मेघघटामध्यादैरावतीदीप्तियाते विद्युत्तेजःपाते सति प्रजा लोको लोकपालान्नृपाद्दरं भयं व्रजति प्राप्नोति। तडिदैरावतीविद्युदिति हैमः। अत्रोत्तरार्द्धे संलग्नत्वाद्गगनोत्पातः प्रोक्तः॥ २२॥

गवि हयकुमितांशे १।१७ यस्य याम्यः पृषत्को द्रुहिणभशकटं सार्द्धांशयुग्माधिकोऽसौ॥ भवति भुवनभीतिं व्योमगोऽपीति भित्वा मृजति विधुयमारा लोकनाशं सृजंति॥ २३॥

अथ दिव्योत्पाते रोहिणीशकटवेधमाह—गवीति। वृषराशौ हयकुमितांशे सप्तदशमितेंऽशे गते सति १।१७ यस्य ग्रहस्य याम्यो दक्षिणगतः पृषत्को बाणः सार्द्धांशयुग्माधिकार्द्धत्रिंशत्कलासहितांशद्वयाधिको भवति तदासौ व्योमगो ग्रहो द्रुहिणभं ब्रह्मणो नक्षत्र रोहिणी तस्य शकटं भित्त्वा भुवनभीतिं सृजति। अपि पुनरिति पूर्वोक्तबाणवक्तव्यतायां १।१७॥ सत्यां विधुश्चन्द्रो यमः शनिरारो भौमश्चैते लोकनाशं मृजंति 'बाणे पृषत्कविशिखौ' इति हैमः। यतः 'रोहिणीशकटमर्कनंदनो यदि भिनत्ति रुधिरोऽथवा शिखी। किंवदामि यदनिष्टसागरे जगदशेषमुपयाति संक्षयम्'॥ २३॥

व्रजति दिवि शिखी यद्युद्गमं दैवयोगादविरलमनुपुच्छाशागता देशभागाः॥ किल कलकलमन्ये यांति नश्यंति देशा जलदविहितपीडानेकसस्योनपीठाः॥ २४॥

अथ केतुवैकृतमाह—व्रजतीति। किलेति सत्ये यदि दैवयोगाद्दिवि व्योम्नि शिखी केतुरुद्गममुदयं व्रजति अनु पश्चात्तदा तत्पुच्छाशागताः तस्य केतोः पुच्छदिग्गता देशा नश्यंति क्षयं गच्छंति अन्ये देशा अविरलं गाढं कलकलं कोलाहलं यांति प्राप्नुवंति। किंभूता देशाः। जलदेन विहिता कृता पीडा तयाऽनेकसस्यैरूनं हीनं पीठं स्थानं येषु ते। यतः। 'उदयेन

यावंति दिनानि केतुस्तत्तुल्यमासान् फलमस्य वाच्यं । वर्षाणि मासैरफलोदयोऽसौ ह्रस्वोऽतिसूक्ष्मोऽचिरकालदृष्टः' ॥ २४ ॥

विधुविधुरुन्नेत्राव्याधयोगोऽतरिक्षे भवति भुवनपीठे ब्राह्मकल्पांतहेतुः ॥ ध्रुवहरिपदरुंधत्यंशुमात्रीक्षणे यो न भवति तदभिज्ञोत्तारमायाति सोऽरम् ॥ २५ ॥

अथ चंद्रलुब्धकनक्षत्रयोर्योगे दोषमाह—विध्विति । अंतरिक्षे व्योम्नि विधुश्चंद्रः विधुरुन्नेत्रा चंद्रमृगाक्षी नक्षत्रमित्यर्थः । तदेव व्याधः यंत्रराजे लुब्धकसंज्ञनक्षत्रं प्रोक्तं तयोश्चंद्रव्याधनक्षत्रयोर्योगो भुवनपीठे ब्राह्मकल्पांतहेतुः संसारप्रलयकारण भवति । पुनर्यदा ध्रुव उत्तानपादजः हरिपदो विष्णुपदानि अरुंधती अक्षमाला अंशुमाता सूर्यमाता आसां द्वंद्वे आसामीक्षणे विलोकने यो नरोऽभिज्ञो ज्ञाता न भवति तदा स पुरुषोऽरं शीघ्रमत्तारं कालमायाति कालो जगद्भक्षक इत्युक्तत्वात् । यतः ' अरुंधतीं ध्रुवं नैव विष्णोस्त्रीणि पदानि च । आयुर्हीना न पश्यंति चतुर्थं मातृमंडलम् ' ॥ २५ ॥

न दृश्यते येन विभा नरच्छविर्यदेति मृत्योर्लपनं च सत्वरं ॥ स चै ध्रुवंतर्गतविष्णुपत्रयघोणारसंज्ञाग्रविलोकनं तथा ॥ २६ ॥

अथ छायापुरुषादिवैरुतमाह—न दृश्यत इति । यदा येन नरेण नरच्छविः पुरुषच्छाया विभाविशेषशोभायुक्ता न दृश्यते तदा वै निश्चितं स पुरुषः सुत्वरं मृत्योर्यमस्य लपनं मुखमेति मरणं प्राप्नोति । तथैव ध्रुवोरन्तर्गतं विष्णुपत्रय घोणाग्रं नासिकाग्रं रसनाग्रं जिव्हाग्रमेषां विलोकनं कर्तव्यं यदा न दृश्यते तदा मरणं । यतः ' चतु पार्श्वस्थगुरुपं यंत्रं वायुपुराकृतं । कल्पयित्वोपरि न्यसेत्पादद्वच्छीर्षमधिपु ॥ १ ॥ सूर्योदयक्षणे सूर्यं पृष्ठे कृत्वा ततः सुधी । स्वपरायुर्विनिश्चेतु निजच्छाया विलोकयेत् ॥ २ ॥ पूर्णच्छायां यदीक्षेत तदा वर्षं न पंचता । कर्णाभावे तु पंचत्वं वर्षेद्वादशभिर्भवेत् ॥ ३ ॥ हस्तांगुलीस्कंधकेशपार्श्वनासाक्षये क्रमात् । दशाष्टसप्तपंचत्र्येकवर्षैर्मरणं दिशेत् ॥ ४ ॥ षण्मासान् म्रियते नाशे शिरसश्चिबुकस्य वा ॥ ग्रीवानाशे तु मासेनकादशाहे च दृश्यते ॥ ५ ॥ सच्छिद्रे हृदये मृत्युर्दिवसे सप्तभिर्भवेत् । यदि च्छायाद्वय पश्येद्यमपार्श्वं तदा व्रजेत् ॥ ६ ॥ इति यंत्रप्रयोगेण छायापुरुषो ज्ञेय ॥ प्रकारान्तरेण विद्यापि छायापुरुष इति योगशास्त्रे ॥ रोहिणीशशभृल्लक्ष्म महापथमरुंधतीं । ध्रुवं च न यदा पश्येद्वर्षेण स्यात्तदा मृति ॥ १ ॥ अथवा । अरुंधतीमित्यादि ॥ अरुंधती भवेज्जिव्हा ध्रुवो नासाग्रमुच्यते । तारा विष्णुपदं प्रोक्तं भ्रुवौ स्यान्मातृमंडलं ॥२॥ इति विद्या योगशास्त्र। ध्रुवंतर्गतमित्यत्र इवर्णादि ह्रस्वे इको यवरलमित्यस्य हेमसूत्रस्य पंचमीव्याख्यानात् । उकाराकारे वकारलपकनागमः स्यान्नी ध्रुवर्गतमिति सिद्धं ॥ उक्तं च । रुनयं श्वेतवर्णं पंक्तिं अत्र न कामन॥ इति अत्र मुत्वरं अपि दृश्यते ॥ १॥ इति हेमव्याकरणे ॥ २६ ॥

यदा ससभ्यः सहसाऽऽहितामेरत्ता तदा शाम्यति गार्हपत्यः ।
पत्न्या भवेच्चांगभूतामपि द्राग्दुःस्वप्नमुत्पातहितं विचिंत्यम् ॥२७॥

अथोपजात्या यज्ञात्प्रागम्यादिवैकृतमाह——यदेति । यदा गार्हपत्यस्तृतीयोऽग्निः ससभ्यः सभ्यसंज्ञचतुर्थसहितः शाम्यति निर्वाणं गच्छति तदा आहिताग्नेरग्निहोत्रिणः पत्न्याः स्त्रियाः सहसाऽत्ता विनाशः स्यात् । च पुनः दुःस्वप्नमपि द्राक् सत्वरमंगभूतां प्राणिनामुत्पातहितं दोषकरं विचिंत्यं ज्ञेयमिति । याज्ञिकाः पंचाग्नयः स्मृताः । एको दक्षिणोऽग्निः अर्द्धचंद्राकारोऽयं दक्षिणदिक्स्थितः१ । द्वितीय आहवनीयश्चतुरस्रोऽयं२ । तृतीयो गार्हपत्यो वर्तुलाकारोऽयं । चतुर्थः सभ्यः निष्कर्मकं द्वौ वर्तुलौ ४ पंचम आवसथ्य ५ इति ॥ स्वप्ने श्वमक्ष्यमाणश्च गृध्रकाकनिशाचरैः ॥ ऊह्यमानं खरोष्ट्राद्यैर्यदा पश्येत्तदा मृतिः ॥ १ ॥ रश्मिभिर्मुक्तमादित्यं रश्मियुक्तं हविर्भुजं ॥ यदा पश्येद्विपद्येत तदैकादशमासतः ॥ २ ॥ वृक्षाग्रे कुत्रचित्पश्येद्गंधर्वनगरं यदि । पश्येत्प्रेतान् पिशाचान् वा दशमासेन तन्मृतिः ॥ ३ ॥ इत्यादियोगशास्त्रेऽभाषार्याः ॥ २७ ॥

जनो यदैत्यद्भुतसंभवं स व्रतोपयामाध्वरकर्म्मपूर्वं ॥
आरभ्य कर्मेति तदैति हास्यं भुक्त्वानु तद्भुक्तिमुपास्यमेतत् ॥२८॥

अथ प्रारब्धकार्येउत्पातसंभवहेयतामाह——जन इति । यदा जनोऽद्भुतसंभवमुत्पातोद्गममेति प्राप्नोति किंकृत्वा व्रतोपयामाध्वरकर्म्मपूर्वं कर्म्म आरभ्य तदा स जनो हास्यमेति प्राप्नोति इति कारणात्तद्भुक्तिं भुक्त्वा तस्योत्पातस्य भोगनिजकालपर्यंतं विहाय अनु पश्चात् एतत् कर्म्म उपास्यं सवनीयमिति ॥ २८ ॥

अन्यैरथोत्पातदिनेऽपि कार्यं न मंगलं स्वागमभेदमंत्रैः ॥
उक्तौषधीस्नानविधेश्च होमादुत्सर्गतः शांतिमुपैति लोकः ॥२९॥

अथोपसंहारेण शांतिमाह——अन्यैरिति । अथ अन्यैरपि पुरुषैरुत्पातदिने मंगलं न कर्तव्यं । लोकः उत्सर्गतः सामान्यतो न शांतिमुपैति कस्मात् उक्तौषधीस्नानविधेर्होमाच्च स्वागमभेदमंत्रैर्निजशाखाभेदमंत्रैश्चेति ॥ २९ ॥

इति श्रीज्योतिर्विदाभरणे उत्पाताध्यायः षष्ठः ॥ ६ ॥

इत्यादय उत्पाता ज्ञेयाः ॥ निजर्तुप्रभवा उत्पातास्तु न दोषाय स्युः । यत ॥ वज्राशनिमहीकंपसंध्यानिर्घातनिःस्वनाः । परिवेषरजोधूमरक्तार्कास्तमनोदयाः ॥ १ ॥ द्रुमेभ्योऽन्नरसस्नेहबहुपुष्पफलोद्गमाः । गोपक्षिमदवृद्धिश्च शिवाय मधुमाधवे ॥ २ ॥ तारोल्कापातकलुषं कपिलार्केंदुमंडलं । अनग्निज्वलनस्फोटधूमरेणुवनिलाहतं ॥ ३ ॥ रक्तपद्मारुणं सांध्यं नभः क्षुब्धार्णवोपमं । सरितां चांबुसंशोषं दृष्ट्वा ग्रीष्मे शुभं वदेत् ॥ ४ ॥ शक्रायुधपरीवेषविद्युच्छुष्कविरोहणं । कंपोद्वर्तनवैकृत्यं रसनं दरणं क्षितेः ॥ ५ ॥ सरोनद्युदपानानां वृद्ध्यूर्ध्वतरणप्लवाः । सरणं चाद्रिगेहानां

वर्षासु न भयावहं ॥ ६ ॥ दिव्यस्त्रीभूतगंधर्वविमानाद्भुतदर्शनं । ग्रहनक्षत्रताराणां दर्शनं च दिवांबरे ॥ ७ ॥ गीतवादित्रनिर्घोषा वनपर्वतसानुषु । सस्यवृद्धिरपां हानिरपापाः शरदि स्मृताः ॥ ८ ॥ शीतानिलतुषारत्वं नर्दनं मृगपक्षिणां । रक्षोयक्षादिसत्वानां दर्शनं वागमानुषी ॥ ९ ॥ दिशो धूमांधकाराश्च सनभोवनपर्वताः । उच्चैः सूर्योदयास्तौ च हेमंते शोभनाः स्मृताः ॥ १० ॥ हिमपातानिलोत्पाता विरूपाद्भुतदर्शनं । कृष्णांजनाभमाकाशं तारोल्कापातपिंजरम् ॥ ११ ॥ चित्रगर्भोद्भवाः स्त्रीषु गोजाश्वमृगपक्षिषु । पत्रांकुरलतानां च विकाराः शिशिरे शुभाः ॥ १२ ॥ इति स्वर्तजाः शुभाः ॥ उन्मत्तानां च या गाथा शिशूनां यच्च भाषितं । स्त्रियो यच्च प्रभाषंते तस्य नास्ति व्यतिक्रमः ॥ १३ ॥ पूर्वं चरति देवेषु पश्चाद्गच्छति मानुषान् । नाचोदिता वाग् वदति सत्या ह्येषा सरस्वती ॥ १४ ॥

इति श्रीपौर्णिमीयगच्छाधिराजभट्टारकपुरंदरश्रीमहिमाप्रभसूरीश्वरचरणसरोरुहचञ्चरीकायमान शिष्यभावरत्नविरचितायां श्रीकविकालिदासकृतज्योतिर्विदाभरणस्य सुखबोधिकायामुत्पाताध्याय षष्ठः समाप्तः ॥ ६ ॥

अथ संस्कारप्रकरणम् । ७

अथाहमाधानविधानतो मतैर्ल्पामि धारामरभूमिभृद्दिशां ॥
स्वकीयकर्मोदितधर्मकीर्तनैर्मनीषिणां संस्कृतिकालनिर्णयान् ॥ १ ॥

अथोत्पातज्ञानानंतरं पुरुषः शुभाशुभं समीक्ष्य योग्यव्यवहारमार्गं व्रजति व्यवहारस्तु गर्भाधानादारभ्य भवत्यतो वंशस्थेन गर्भाधानादिसंस्काराध्यायसंधानमाह—अथेति ॥ अथ मार्ग(?) अहं आधानविधानतो गर्भाधानविधित आरभ्य संस्कृतिकालनिर्णयान् संस्कारसमयनिश्चयान् [illegible] कथयामि । [illegible] मनीषिणां बुद्धिमतां धारामरभूमिभृद्दिशां विप्रक्षत्रियवैश्यानां मतैः कथं भूतैः [illegible] स्वकीयकर्मसु [illegible]रिता उद्धृता कथिता वा ये धर्मास्तेषां कीर्तनं संकथनं येषु ते तैः स्वकीयकर्मो[दितधर्मकीर्तनैः] [illegible]न् ॥ १ ॥ [illegible]य ॥

ईषद्रजोदर्शनकाल[illegible] । [illegible]चो नरो वशामहःपंचकमर्कसंख्यनं ॥
[illegible]हाय युग्मासु विभावरी[illegible] [illegible]तोऽप्यूर्ध्वं सुदायादकलाभिकामवान् ॥ २

[illegible]रमात्या गर्भाधानदाने [illegible] विद्या योग—ईयादिति । सुदायादकलाभिकामवान् [illegible]ध्मानात् । उक्त [illegible] [illegible]त्समात्सिद्धहायुक्तो नरो [illegible] ऋतुमयादर्कसावनमहःपंचकं दिवार्द्धं [illegible] शीर्म द्वारे [illegible] [illegible]रत्वा अनोऽप्यूर्ध्वमेन[illegible] [illegible]दर्शनकालो [illegible] ॥ [illegible]सु विभावरीषु रात्रिषु वशा नारी[illegible]

त्रिविष्टपारीज्यादिने प्रशस्तं दिने गुरोश्चांद्रमसायनस्य ॥
दाक्षायणीकांतदिने क्वचित्स्यादाधानदानं प्रथमं वशायां ॥ ३ ॥

अथ प्रथमाधानदाने वारानाह—त्रिविष्टपेति। वशाया स्त्रियां प्रथममाधानदानं प्रशस्तं शुभं स्यात्कस्मिन् त्रिविष्टपारीज्यादिने त्रिविष्टपस्य, स्वर्गस्य आधारे आधेयोपचाराद्देवानामरयो दैत्यास्तेषामीज्यः पूज्यः शुक्रस्तस्य दिने शुक्रवारे पुनर्गुरोर्दिने चांद्रमसायनस्य बुधस्य दिने क्वचिद्दाक्षायणीनां तारकाणां कांतः चंद्रस्तद्दिनेऽपि ॥ ३ ॥

धाराधरारूढतमीशदारा सकाशनाह्याभरणांत्यतारा ॥
सयातुभा सोग्रशुचींदुवामा नाधानदाने हि वरा पुरंध्र्याः ॥ ४ ॥

अथाधानदाने वर्ज्यनक्षत्राण्याह—धाराधरेति। हि निश्चितं पुरंध्र्याः स्त्रियाः आधानदाने धाराधरारूढतमीशदारा धाराधरो मेघस्तमारूढ इंद्रः 'संक्रंदनाखंडलमेघवाहनाः' इति हेमवचनात् ॥ तस्य तमीशदारा चंद्रकलत्रं ज्येष्ठा न वरा न श्रेष्ठा इत्यर्थः। किंभूता धाराधरारूढतमीशदारा कौ वायुरशनं भक्षणं यस्य स काशनोऽहिस्तस्य भं अश्लेषा अह्याभरणः सर्पभूषणः शंभुरार्द्रा अंत्यतारा रेवती एताभिः सह वर्तमाना। पुनः किंभूता यातुनो रक्षसो भं मूलं तेन सह वर्तते सयातुभा। पुनः किंभूता उग्राणि उग्रसंज्ञमानि शुचिरग्निस्तस्येंदुवामा कृत्तिका एताभिः सह वर्तते या सा सोग्रशुचींदुवामा ज्येष्ठाश्लेषार्द्रारेवतीमूलमघापूर्वात्रयकृत्तिका एता नेष्टाः ॥ ४ ॥

पश्येत्तमिस्त्रेशबलं युवत्या निषेककर्मण्यणुशोणितायाः ॥
राशौ ससोमप्रमदोत्थबीजे शृंगारयोन्याहवभावभाजि ॥ ५ ॥

अथाधाने राशिबलमाह—पश्येदिति। निषेककर्मणि आधानदानविधौ भर्त्ता युवत्यास्तरुणस्त्रिया राशौ तमीशबलं चंद्रबलं पश्येत्समीक्षेत। किंभूताया युवत्या अणु स्तोकं शोणितमृतूत्पन्नरुधिरं यस्याःसा तस्या अणुशोणितायाः रजोदर्शनाद्बहुदिवसे षोडशे दिने वाणुशोणिता स्त्री भवतीत्यर्थः ॥ किंभूते राशौ सोमप्रमदा नक्षत्राणि ताभ्य उत्थं बीजं वीर्यं तेन सह वर्तते ससोमप्रमदोत्थबीजे। पुनः किं भूते राशौ शृंगारयोनिः कंदर्पस्तस्याहवभावं संग्रामभावं भजतीति शृंगारयोन्याहवभावभाक् तस्मिन् पुरुषराशौ इत्यर्थः ॥ ५ ॥

पर्वादिजश्राद्धदिनेषु भीरोर्भवत्यभद्राय निषेककर्म्म ॥
रिक्तासु भैम्यां भवलुत्यघस्त्रे पौष्णे सचंद्रे विबले निजार्ये ॥ ६ ॥
तथाष्टमी दुष्ट्युतिभेघस्त्रजा वेला च संध्योर्दिनदोषयोर्बुधैः ॥
स्वमध्ययामद्वयकालचारिणी विगर्हिताधानविधौ विभावरी ॥ ७ ॥

अथाधानविधौ श्लोकद्वयेन पर्वादीनि निषेधयति—पर्वेति ॥ पर्वादिषु निषेककर्म गर्भाधानरूपं भीरोः स्त्रिया अभद्राय दुःखाय भवति ॥ पर्व अमावास्यादि आदिजानां पितॄणां

श्राद्ध एषा द्वद्वे एतद्दिनेषु च पुना रिक्तासु ४ । ९ । १४ तिथिषु भेम्या विष्टौ पुनर्भवे स्त्रैस्तुल्यबले एकादश्यामित्यर्थ ॥ पुनर्दोस्रे चद्रेऽश्विनीगतचद्रे पुनर्विबले बलहीने निजार्ये- निजे स्वकीये य प्रथम आधानमासस्तस्यार्थ स्वामी शुक्रस्तस्मिन् गर्भप्रथममासस्य शुक्रस्वा मित्वात् ॥ यदुक्त बृहज्जातके ॥ कल्ल १ घना २ कुरा ३ स्थि ४ चर्मा ५ गज ६ चे तनता ७ सित १ कुज २ जीव ३ सूर्य ४ चद्रा ५ कि ६ बुधा ७ परत ॥ उदयपनय ८ चद्र ९ सूर्यनाथा १० क्रमशो गदिता अधिपा इति ॥ ६ ॥ तथेति ॥ आधानविधौ तथा पुनर्बुधैरष्टमी गर्हिता तिरस्कृता एव भवस्वजा नक्षत्रदिनजाता दुष्युतिर्दुष्टयोग पुन दिनदोषयो सध्यौ प्रात साय सध्याकालयोर्वेला पुन स्वमध्ययामद्वयकालचारिणी निजम ध्यानुगामिनी विभावरी रात्रि रात्रेर्मध्य त्याज्यमित्यर्थ ॥ ७ ॥

नृयोषितोर्जन्मदिनं वराननां न कामयेदर्भकगर्भपुष्टये ॥
चरोदये चोदयगैरसाधुभिर्व्रध्नांशगे तूदयभागनेतरि ॥ ८ ॥

अथाधानविधौ जन्मदिनादीनि निषेधयति—ना इति । ना पुरुषोऽर्भकगर्भपुष्टये बाल- कगर्भपोषणाय वरानना सुमुखीं न कामयेत् स्त्रीसेवा न कुर्यात् । कस्मिन् योषितो नार्या जन्म दिने पुनश्चरोदये चरलग्ने पुनर्व्रध्नांशगे सूर्यनवांशगते उदयभागनेतरि उदयो लग्न भागो नवांशोऽनयोर्नेता स्वामी तस्मिन् वा पुन कैं कृत्वाऽसाधुभि खलग्रहै किंभूतैरसाधुभि उद यगैस्तनुलग्नगते ॥ ८ ॥

विलग्नतो वारिवृषोपलब्धिगैः सौम्यैरसौम्यैररिविक्रमायगैः ॥
विधौ ससौम्ये च शुभाय चोद्गमे व्रजेदपत्याय नरो नितंबिनीम् ॥ ९

अथाधानविधौ शुभलग्न दर्शयति—विलग्नेति । नरो नितंबिनीं स्त्रीं व्रजेत्सग कुर्यात् कस्मै शुभायापत्याय शुभपुत्राय कैं सौम्यग्रहै कृत्वा किंभूतै सौम्यैर्विलग्नतस्तनुभवनतो वारि चतुर्थ ४ वृषो नवम ९ उपलब्धि बुद्धि पंचमं ५ 'धीशाचिद्पञ्चमाय' इति हैम ॥ एषां द्वद्वे एषु गते पुनरसौम्यै खलग्रहै किंभूतैरसौम्यैररि षष्ठ ६ विक्रमस्तृतीय ३ आय एकादश ११ एषा द्वद्वे एतद्गै ॥ पुन कस्मिन् ससौम्ये शुभग्रहसहिते विधौ चद्रे उद्गमे प्रादुर्भूते सति ॥ ९ ॥

काव्यारगुर्वंशुमदिंदुभास्करीज्ञलग्नपेंद्रूष्णमरीचयः क्रमात् ॥
आधानमासात्किल मासपालकाः पुष्णंत्यमी गर्भकला स्फुरद्धना- ॥ १० ॥

अथ गर्भस्य दशमासानां पतीनाह—काव्येति । किलेति सत्य आधानमासान्मा काव्याद्या क्रमात् मासपाला मासस्वामिनो गर्भकला पुष्णन्ति वृद्धि नयति । काव्य शुक्र प्रथमाधानमासस्वामी १ एव आरो भौम द्वितीयमासस्वामी २ गुरुस्तृतीयमासस्वामी ३ अ शुर्मान्सूर्यश्चतुर्थमासस्वामी ४ इदु पचममासस्वामी ५ भास्करस्यापत्य भास्करि शनि

षष्ठमासस्वामी ६ ज्ञो बुधः सप्तममासस्वामी ७ लग्नपतिः आधानकाललग्नपतिर्गर्भाष्टममासस्वामी ८ इंदुर्नवममासस्वामी ९ उष्णमरीचिः सूर्यो दशममासस्वामी १० किंभूता गर्भकलाः स्फुरन्त्यः लसद्वर्धमानगर्भपिंडविशेषाः ॥ १० ॥

मासेश्वरे राजनि शक्तिशालिनि त्विष्टैर्ग्रहैर्दृष्टघने च साधुभिः ॥
नराख्यराशावुदये लवानुगे वदंति तत्कर्मविधिं मनीषिणः ॥ ११ ॥

अथाधानविधाने मासेश्वरादिबलमाह्यतामाह—मासेति । मनीषिणः पंडितास्तत्कर्मविधिं गर्भाधानकार्यविधानं वदंति कथयंति कस्मिन् मासेश्वरे शक्तिशालिनि बलयुक्ते सति तु पुनः राजनि चंद्रे शक्तिशालिनि सति पुनः इष्टैर्ग्रहैश्च पुनः साधुभिः सौम्यग्रहैर्दृष्टघने विलोकिततनुभवने सति पुनर्नराख्यराशौ मिथुनकन्यातुलाकुंभधनुःपूर्वार्द्धमकरोत्तरार्द्धं चैते नरराशयः लग्ने लवानुगे नराशगते सति ॥ इति गर्भाधानसंस्कारः प्रथमः ॥ ११ ॥

स्वजातिधर्मादृतमार्गतो वरं स्वकालगं पुंसवनं च कीर्तितं ॥
मासादिगर्भेऽगमितेऽष्टमेऽथवा सीमंतकर्म स्वकुलक्रमाद्वा ॥ १२ ॥

अथपुंसवनसीमंतयोः कर्माह—स्वजातीति । आदिगर्भे बुधैः स्वकालगं पंचममासप्राप्तं पुंसवनं पंचममाससंज्ञकं प्रकीर्तितं पंचमे मासि विधेयमित्यर्थः ॥ किंभूतं पुंसवनं स्वजातिधर्मादृतमार्गतो निजजातिधर्माङ्गीकृतमार्गेण वरं श्रेष्ठं ॥ पुनरादिगर्भे बुधैः स्वकुलक्रमात् सीमंतकर्म आग्रहणीकृत्यं प्रकीर्तितं कस्मिन् गमिते षष्ठेथवाऽष्टमे मासि ॥ १२ ॥

सर्वसहायोनिपतंगमंत्रिणां वाराः पुरंध्रीधृतगर्भसंस्कृतौ ॥
शस्ता विभद्रा हि विनष्टशीतभाश्चतुर्दशीपक्षतिपातवर्जिताः ॥ १३ ॥

अथैतयोर्वारशुद्धिमाह—सर्वेमिति । पुरंध्रीधृतगर्भसंस्कृतौ स्त्रीधृतगर्भसंस्कारे पुंसवने सीमंते चेत्यर्थः । सर्वसहा भूमिस्तस्या योनिर्जन्म यस्य स भौमः पतंगः सूर्यः मंत्री गुरुरेषां द्वंद्वे एषां वाराः शस्ता शुभा प्रोक्ता । किंभूता वाराः विभद्राः विष्टिरहिताः पुनः किंभूता वाराः विनष्टशीतभा नष्टः क्षयं गतः शीतभो हिमांशुश्चंद्रो यस्यां साऽमावास्या विगता नष्टशीतभा येभ्यस्ते आमावास्यारहिता इत्यर्थः । 'सा नष्टेन्दुकला कुहूः' इति हैमः ॥ पुनः किंभूता वाराः चतुर्दशी पक्षतिः प्रतिपत् पातो व्यतीपात एभिर्वर्जिताः ॥ १३ ॥

अधोक्षजादित्यपुरंदरार्चितकव्यादभार्यामरमातृतारकाः ॥
प्रकीर्तिताः पुंसवने स्फुरत्कलाः सीमंतकर्मण्यपि कामदा बुधैः ॥ १४

अथैतयोर्नक्षत्रशुद्धिमाह—अधोक्षजेति । पुंसवने सीमंतकर्मण्यपि बुधैरधोक्षजादितारकाः सिद्धिदाः प्रकीर्तिताः । अधोक्षजो विष्णुः श्रवणः आदित्यः हस्तः पुरंदरार्चितो गुरुः पुष्यः कव्यादो रक्षो मूलः भार्गो भाद्रनक्षत्रं तन्नर्गः स्वामी चंद्रो मृगशीर्षं अमरमाता पुनर्वसुः इति । किंभूता एतास्ताराः स्फुरत्कलाः अमुप्रकिरणाः । इति पुंसवनसंस्कारो द्वितीयः ॥ १४ ॥

शक्तिर्विशां शूद्रजनस्य सप्तमे सीमंतकृत्यं च जगाद मास्यलं ॥
पौष्णेऽपि तत्कर्म कुमारहारितो न मेनिरेऽन्ये श्रुतिधर्मदृष्टयः ॥१५

सीमंते ऋषिमतमाह—शक्तिरिति । अलं निश्चितं शक्तिऋषिर्वैश्यानां तु पुनः शूद्रविशां शूद्रमनुष्याणां सीमंतकृत्यं सप्तमे मासि जगाद कथयामास ॥ 'विट्प्रवेशे नृवैश्ययोः' इति हैमः । च पुनः कुमारहारीतः ऋषिः पौष्णेऽपि रेवत्यामपि तत्कर्म सीमंतकार्यं जगाद अन्ये श्रुतिधर्मदृष्टयो वेदधर्मद्रष्टारस्तत्कर्म न मेनिरे ॥ १५ ॥

खलेतरैर्व्यत्रहितांत्यभावगैर्ग्रहैरमित्रायसहोत्थगैः खलैः
त्रिकोणकेंद्रायगते पुरोधसि स्मृतं च सीमंतविधानमंगतः ॥ १६ ॥

अथ सीमंतविधाने लग्नशुद्धिमाह—खलेति । अंगतो लग्नाद्व्यत्रहितांत्यभावगैर्विगता अत्ता मृत्युरष्टमः ८ अहितः षष्ठः ६ अंत्यो द्वादशः १२ भावा एभ्यस्ते व्यत्रहितांत्यभावगैः अष्टमषष्ठद्वादशभाववर्जितैः खलेतरैः सौम्यग्रहैः च पुनरमित्रायसहोत्थगैः अमित्रः षष्ठः ६ आय एकादशः ११ सहोत्थस्तृतीयः ३ एतद्भावगतैः खलग्रहैः सता पुनस्त्रिकोणे नवमे पंचमे भवने केंद्रे प्रथमचतुर्थसप्तमदशमभवने आये एकादशे भवने गते पुरोधसि गुरौ सति सीमंतविधानं स्मृतं बुधैरिति शेषः । इति सीमंतसंस्कारस्तृतीयः ॥ १६ ॥

जन्यन्ह्यथो दारकजन्मनीति वार्कैरभिन्नेऽह्नि जातकर्म ॥
श्रावाह्नि वा साधुदिनेशदर्ष्ये नामान्तमाद्येऽपि दिने तदुक्तम् ॥१७

अथ जन्मकृत्यमाह—जन्यन्हीति । अथानतर दारकजन्मनीति सुतजन्मप्राप्ते जन्यन्हि जन्मदिने तज्जातकर्म बालकजन्मकार्यं नामांत नामपर्यंतमुक्तं बुधैरिति शेषः ॥ वा यस्मिन् अर्कैः सूर्यैरभिन्ने द्वादशेऽहनि इत्यर्थः ॥ अथवा श्रावाह्नि श्रवणं श्रावस्तदह्नि पुनर्जन्मश्रुतदिनेऽथवा साधुदिने सौम्यग्रहवारदिने वा अथवा आद्ये रविवारेऽथवा आद्ये जन्मदिने ॥ १७ ॥

खरोग्रसाधारणभान्यभेषु चिरायुषे नाम च जातकर्म ॥
शुभोदये कंटकगेऽथ सूनोर्धिष्ण्ये गुरौ वा खलु बोधने स्यात् ॥१८

अथ जातकर्मणि नक्षत्रादीन्याह—खरोग्रेति । खरसंज्ञानि उग्रसंज्ञानि साधारणसंज्ञानि नक्षत्राणि विहाय अन्यभेषु इतरभेषु पुनः शुभोदये शुभलग्ने कंटकगे केंद्रगते धिष्ण्ये गुरौ गुरौ वा सति खलु निश्चितं सुतो बालकस्तस्य जातकर्म च पुनर्बोधने व्यवहारप्रवर्तनार्थं देवदत्त इत्यादि नाम स्यात् ॥ बोधनेऽत्र निमित्तार्थे सप्तमी ॥ कर्म्म चिरायुषे दीर्घजीवित्वाय इति जन्मसंस्कारश्चतुर्थः ॥ १८ ॥

आजन्ममासांतमदुग्धपाने चोक्तेषु भेष्विद्वबले शिशोर्भे ॥
केचिज्जगुर्नामविधानमेतत्प्रधानमूरूद्भवपद्मजातौ ॥ १९ ॥

अथ नामविधाने मतांतरमाह—आजन्मेति । केचिन्मुनयः ऊरूद्भवा वैश्याः पद्याः शूद्राः एषां जातौ सगोत्रे एतत् प्रधानं नामविधानं जगुः कथयामासुः । केषु आजन्ममासांतं जन्ममासमारभ्य उक्तेषु कथितनक्षत्रेषु पुनरदुष्टवारे पुनः शिशोर्बालस्येंदुबले चंद्रबलयुक्ते भे राशौ सति ॥ १९ ॥

षट्कर्मणो बाहुभुवोऽथवार्यैर्नामोदितं वर्णचतुष्टयाढ्यं ॥
सत्र्यक्षरं हारि विशस्त्रिवर्णं द्विवर्णवच्छौद्रमतोऽन्त्यजेऽन्यत ॥ २० ॥

अथ विप्रादीनां नामविवेकतामाह—षट्केति । आर्यैः षट्कर्मणो विप्रस्य बाहुभुवः क्षत्रियस्य वर्णचतुष्टयाढ्यं सत्र्यक्षरयुक्तं चतुरक्षरयुक्तं त्र्यक्षरयुक्तं वा नाम हारि मनोहरं उदितं प्रोक्तं । एवं अथवा पुनः विशो वैश्यस्य त्र्यक्षरं पुनः शौद्रं नाम द्विवर्णवत् द्विवर्णयुक्तं पुनरतोऽस्मादंत्यजेऽन्यनामेति । विशेषस्तु ग्रंथांतरादवसेयम् ॥ २० ॥

स्थिरोदये चापघटज्ञभांशके युते च वा धिष्ण्यविदिंद्रपूजितैः ॥
विलोकिते नाम निगद्यते शिशोरसद्ग्रहालोकनयोगवर्जिते ॥ २१ ॥

अथ नामकथिते लग्नशुद्धिमाह—स्थिरोदयइति । शिशोर्बालकस्य नाम निगद्यते कथ्यते विज्ञैरिति शेषः । कस्मिन् स्थिरलग्ने पुनश्चापो धनुराशिः घटस्तुलाराशिः ज्ञस्य बुधस्य भे राशौ कन्यामिथुने एषां राशीनामंशे । किंभूते स्थिरोदये नवांशके च धिष्ण्यः शुक्रः विद् बुधः इंद्रपूजितो गुरुरेभिर्युतेऽथवाऽसद्ग्रहालोकनयोगवर्जिते दुष्टग्रहविलोकनयोगपरित्यक्ते ॥ २१ ॥

यस्यैंद्रभं जन्मनि यातुधानभं जंतोररं वा हि भुजंगभं भवेत् ॥
गंडांतकं वा यमघंटतारकं यमालयं याति न संशयोऽत्र सः ॥ २२ ॥

अथ ज्येष्ठामूलजातापत्ये दुष्टफलमाह—यस्येति । यस्य जंतोः शिशोः जन्मनि इंद्रभं ज्येष्ठाथवा यातुधानभं मूलं वा भुजंगभमश्लेषा वा गडांतकं वा यमघंटतारकं भवेत् अरं स नरो यमालयं मरणं याति एति अत्र संशयो नास्ति ॥ २२ ॥

नक्तंचरज्योतिरनंत्यपद्भवं विनामकृत्यं प्रविधाय बालकं ॥
परित्यजेदाश्वथ हायनाष्टकं तदाननं वा न विलोकयेत्पिता ॥ २३ ॥

अथमूले जातपुत्रे कृत्यमाह—नक्तमिति । पिता हायनाष्टकं यावत् बालकमाशु शीघ्रं परित्यजेत् । किंकृत्वा विगतं नाम यस्मात्तत् विनाम नामरहितं सूतिकर्म प्रविधाय कथंभूतं नक्तंचरज्योतिर्मूलं तस्यानंत्यपद्भवं चतुर्थचरणं विहायान्यत्रिकचरणजातं वा पक्षांतरे पिता तदाननं तस्य पुत्रस्य मुखं न विलोकयेत् ॥ २३ ॥

पितुः सवित्र्या विभवस्य चापदो मूलादिपादाः क्रमतस्तदग्रे यः ॥
भवंति नाशाय शिशोर्भुजंगभे मतपिमतत्फलमंत्यपादतः ॥ २४ ॥

अथ मूले जातपुत्रे फलमाह—पितुरिति । मूलादिपादात् मूलप्रथमपादात् क्रमतः तदंघ्रयो मूलचरणाः शिशोर्बालकस्य पित्रादिकानां विनाशाय भवंति । कोऽर्थः । मूलप्रथमपादे जातशिशुः पितुर्नाशाय भवति ॥ द्वितीयपादजः शिशुः सवित्र्या मातुर्नाशाय भवति तृतीयांघ्रिजः शिशुर्विभवस्य संपदो नाशाय चतुर्थांघ्रिजःशिशुरापदो नाशाय शुभाय भवतीत्यर्थः ॥ भुजंगभेऽश्लेषायामेतत्फलमंत्यपादतः प्रतीपं विपरीतं । कोऽर्थः । अश्लेषाया अत्यंपादे जातः शिशुः पितुर्नाशकः एवं तृतीयोमातुर्द्वितीयो धनस्य प्रथमपादः शुभाय इति ॥ २४ ॥

बिडौजसो जन्मनि भस्य जंतोर्द्विजिव्हताराफलवत् फलं स्यात्॥
शतौषधीमज्जनहोमदानात्किलैतदुक्ताखिलदोषशांतिः ॥ २५ ॥

अथ ज्येष्ठाफलमाह—बिडौजेति । जन्मनि बिडौजस इंद्रस्य नक्षत्रस्य ज्येष्ठायाः फलं द्विजिव्हः सर्पस्तस्य ताराऽश्लेषा तद्वत्फलं स्यात् ॥ कस्य जंतोर्नरस्य किलेति तदुक्ताखिलदोषशांतिः तेषु मूलादिनक्षत्रेषु उक्ताऽखिला दोषास्तेषां शांतिरुपशमनं स्यात् । कस्मात् शतौषधिमज्जनहोमदानात् स्पष्टमिति ॥ २५ ॥

प्रतिष्ठिताख्यस्य शिशोः शुभान्हि त्रयीतनोरन्ह्यथवा विरिक्ते ॥
भवेन्नवांदोलकपंजरस्य निबंधनं मांद्यनिमीलनाय ॥ २६ ॥

अथ पाळणकबंधनमुहूर्तमाह—प्रतिष्ठितेति ॥ शिशोर्बालकस्य मांद्यनिमीलनाय रोगनाशाय नवांदोलकपंजरस्य निबंधनं भवेत् । कस्मिन् शुभान्हि शुभदिनेऽथवा त्रयीतनोः सूर्यस्यान्हि दिने विरिक्ते रिक्तातिथिवर्जिते किंभूतस्य शिशोः प्रतिष्ठिताख्यस्य प्रतिष्ठिता स्थापिता आख्या नाम यस्य स तस्य ॥ २६ ॥

सदागतित्वाष्ट्रदितीज्यभेषु ध्रुवेषु चांदोलनिबंध उक्तः ॥
सदेवदोषघ्नहरीनभेषु व्युग्रोदयापर्वविपातकालः ॥ २७ ॥

अथांदोलकबंधने नक्षत्रशुद्धिमाह—सदेति । आंदोलनिबंध उक्तः बुधैरिति शेषः केषु सदागतिर्वायुःस्वाती त्वष्टा चित्रा अदितिः पुनर्वसुः इज्यः पुष्य एषु नक्षत्रेषु पुनर्ध्रुवेषु ध्रुवसंज्ञकनक्षत्रेषु सदेवदोषघ्नहरीनभेषु देवदोषघ्नौ देवदैत्यावश्विनी हरिर्विष्णुः श्रवणः इनः सूर्यो हस्त एभिः सह वर्तते तानि तेषु किंभूत आंदोलनिबंधः व्युग्रोदयापर्वविपातकालः विगता उग्राद् ईश्वरात् उदयो जन्म यस्याः सा विष्टिः पर्वाणि विपातो व्यतीपातादिरेते यस्मात्. विष्टिव्यतीपातपर्वरहित इत्यर्थः ॥ 'श्रीवत्सोग्रौ धूर्जटी च भीमभर्गौ' इति हैमः ॥ २७ ॥

विचिंतयेद्दोलकपेटकेऽस्मिंश्चतुर्दिशो हंसकराग्रतश्चान ॥
दिशो हरेर्भान्यथ पंच पंच मध्ये ततः सप्त बुधः क्रमेण ॥ २८ ॥

अथांदोलके नक्षत्रस्थापनमाह—विचिंतयेदिति ॥ बुधः पंडितो हंसकारावृतर्क्षात् सूर्यनक्षत्रा-त्क्रमेण हरेरिंद्रस्य दिशः पूर्वतः पंच पंच भानि अस्मिन् दोलकपेटके चतुर्दिशो विचिंतये-त्ततः पुनर्मध्ये सप्तभानि स्थापयेत् ॥ २८ ॥*

इंद्राशमृक्षं शयने शुभं भवेद्यमाशमामाय कपाशमामदं ॥
यज्ञाशमत्रेति सुखाय भं शिशोरंतर्गतं तस्य च दोलबंधने ॥ २९ ॥

अथ पूर्वादिस्थभफलमाह—इंद्रेति ॥ इति पूर्वोक्तप्रकारेण दोलकबंधने दोलकनक्षत्रस्थापने स्थितमृक्षं वर्तमानं च नक्षत्रमिंद्राशां पूर्वदिग्गतं भवति तदा तस्य शिशोः शुभं भवेत् । एवं यदि यमाशां दक्षिणगं तदामाय रोगाय । यदि कं जलं पातीति कंपो वरुणस्तमश्नुते इति तदाशां पश्चिमगतं तदाऽऽमदं रोगदं। यदा यज्ञाशमुत्तरदिग्गतं तदाऽत्रे मरणाय यदि अंत-र्गतं पेटकमध्यगतं तदा सुखाय भं भवेदिति ॥ २९ ॥

दोलेन पोतश्चरभेतरोदये वना४य११मा७रांग६विय१०त्रिकोणगैः ॥
सौम्यैरसौम्यैरहितायवीर्यगैश्चांदोलितः काममियादलं नृपः ॥ ३० ॥

अथ दोलके लग्नशुद्धिमाह—दोलेनेति ॥ पोतो नृपः बालो राजा च दोलेन पालणके-नांदोलितो किंचन क्रियाकरणात् काममभीष्टमियात् प्राप्नुयात् ॥ ततो वसंतादौ शुभमुहूर्ते दोलाखेलनमपि नृपस्य सुखाय अत एतदपि संलग्नं प्रोक्तमलमित्यर्थः । कैश्चरभेतरोदये स्थिरलग्ने सौम्यैर्ग्रहैः कृत्वा । किंविशिष्टै वनं जलं चतुर्थं ४ आय एकादशं ११ मारः कंदर्पः सप्तमं ७ अंगं षष्ठं ६ वियद् गगनं दशमं १० कोणं नवपंचमं ९।५ एषु गतैः पुनरसौम्यैः खलैः किंविशिष्टैरसौम्यैः अहित षष्ठं ६ आय एकादशं ११ वीर्यं तृतीयं ३ एषु गतैरित्यर्थः ॥ ३० ॥

निशांततो निष्क्रमणं प्रवीणैः सूनोरथो मासि मिते चतुर्भिः ॥
प्रकीर्तितं सद्ग्रहवासरे वा सौरे दिने सौम्यतिथावभीष्टम् ॥ ३१ ॥

अथ बालकस्य निष्क्रमणमाह—निशांतेति ॥ अथानंतरं प्रवीणैर्बुधैः सूनोः सुतस्य निशांततो गृहात् निष्क्रमणं निर्गमनमभीष्टं कमनीयं प्रकीर्तितं ॥ कस्मिन् चतुर्भिर्मिते मासि तेः सद्ग्रहवासरे वा रवेर्दिने वा सौम्यतिथौ ॥ ३१ ॥

गदाग्रजश्वेतरुचीनमित्रत्रिविष्टपेज्यादितिदस्रपूष्णां ॥
धिष्ण्येषु सूनुर्बहिरोकसोऽर्कं पश्येत्स्वपुष्ट्यै ननु वासवे च ॥ ३२ ॥

अथ निष्क्रमणे नक्षत्राण्याह—गदेति ॥ सुनिश्चितं सूनुः पुत्र ओकसो गृहाद्ब-हिरर्कं पश्येत् सूर्यदर्शनं कुर्यादित्यर्थ । कस्यै स्वपुष्ट्यै बालकपुष्टितायै केषु गदाग्रजो विष्णु. श्रवणः श्वेतरुचिश्चंद्रो मृगशीर्षं इनो हस्त. मित्रोऽनुराधा त्रिविष्टपेज्यो नाकपूज्यो

* आवृती नंबर १

गुरुः पुष्यः अदितिः पुनर्वसुः दस्रोऽश्विनी पूषा रेवती एषां द्वंद्वे एषां धिष्ण्येषु च पुनर्वासैः
धनिष्ठायां ॥ ३२ ॥

अन्नादनं मासि रसैरभिन्ने सूनोस्तदासन्नगमासयुग्मे ॥
पुत्र्या भवेच्चात्र विदर्शपूर्णाभद्राजयापक्षतयः प्रदिष्टाः ॥ ३३ ॥

अथ बालस्यान्नप्राशनमाह—अन्नेति ॥ सूनोः रसैरभिन्ने षष्ठे मासि अन्नादनं भवेत् ।
चपुनः पुत्र्यास्तदासन्नगमासयुग्मे तस्य षष्ठमासस्य उभयत आसन्नगौ समीपगतौ मासौ तयो-
र्युग्मे पंचमे सप्तमे इत्यर्थः । पुनरत्र विदर्शेति । विगताः दर्शोऽमावासी पूर्णास्तिथयः जयारिक्त-
थयः पक्षतिः प्रतिपत् याभ्यस्ता एताः प्रदिष्टाः कथिताः अन्याः शुभा इत्यर्थः ॥ ३३ ॥

संतोर्भकान्नाशनकर्मणींदुज्ञदेववंद्योशनसामहानि ॥
विमित्रमैत्राख्यलघुध्रुवाणि श्रवःश्रविष्ठादितिभानि चाहुः ॥३४

अथान्नाशने वारनक्षत्राण्याह—संत इति ॥ संतो बुधाः अर्भकान्नाशनकर्मणि एतानि
शुभान्याहुः । इंदुश्चंद्रः विद् बुधः इंद्रवंद्यो गुरुः उशना-शुक्रः एषां द्वंद्वे एषामहानि चपुनर्वि
गतो मित्रोऽनुराधा एभ्यस्तानि एवंविधानि मैत्राख्यनक्षत्राणि लघुसंज्ञानि ध्रुवसंज्ञानि श्र
श्रवणः श्रविष्ठा धनिष्ठा अदितिः पुनर्वसुः एतानि भानि च ॥ ३४ ॥

मित्रर्क्षमुष्णांशुदिनं च षष्ठीमन्नाशने मंजु जगाद कश्चित् ॥
वीक्ष्योदितं तेन नवान्नशुद्धिं तत्रान्नमेत्यात्ययमेति पोतः ॥ ३५

अथात्र ऋषिमतमाह—मित्रेति । कश्चिन्मंजु शुभं यथा भवति तथाप्राशने मित्रर्क्षम-
राधां उष्णांशुदिनं रविवारं षष्ठीं तिथिं च जगाद कथयामास । पोतो बालकोऽन्नमेत्य भुक्त्वा
त्ययं नाशमेति प्राप्नोति । किंभूतमन्नं तत्र तेन ऋषिणा नवान्नशुद्धिं वीक्ष्य उदितं कथितं । अ
प्राशननवान्नयोरेकमुहूर्तत्वात्तत्र नवान्नशुद्ध्यपेक्षया उक्तं अन्नप्राशनविधौ नेत्यर्थः ॥ ३५

प्रेक्षांत्यपुण्यात्ययकेंद्रगो रविस्तनोति चित्रं पृथुके रसात्मजः ॥
पित्तं च मंदस्तनुते प्रभंजनं कृशः किल ग्लौर्हि तथा दरिद्रताम् ॥

अन्नाशने लग्नफलमाह—प्रेक्षेति ॥ युग्मं इति युग्मं ॥ अन्नाशनेऽन्नादने तनुतो लग्नं
सर्वत्र योज्यं । रविः पृथुके बालके चित्रं कुष्ठं तनोति 'चित्रं स्यात्पांडुरं कुष्ठं' इति हैम । रवि
रविः प्रेक्षा बुद्धिः पंचमं ५ अंत्यं द्वादशं १२ पुण्यं नवमं ९ अत्यय अष्टमं ८ केंद्रं १।४।७
एतद्गतः । एवं रसात्मजो भौमः पित्तं तनोति चपुनर्मंदः शनिः प्रभंजनं वायुं तनोति
कृशः क्षीणो ग्लौश्चंद्रो दरिद्रतां तनोति । हि पादपूरणे किल भावनायाम ॥ ३६ ॥

वृध्यै बुधो गीष्पतिरायुषे भृगुर्भोगाय सारंगकलंकभृच्छिशोः ।
तत्स्थो भवेत्सर्वकलःकलावदोऽतनुश्रियुश्चात्ररिगोन्नकाशने ॥३

बुध्यै इति ॥ बुधस्तत्स्थः पूर्वोक्तप्रेक्षादिभवनस्थितः सन् शिशोर्बालस्य बुध्यै मतये भवति। एवं गीष्पतिर्गुरुरायुषे जीविताय भृगुः शुक्रो भोगाय सारंगभृत् कलंकभृच्चंद्रः सर्वकलःसंपूर्णकलावान् सन् कलौघदो विज्ञानादिकलादायको भवेत्। तस्थ इति सर्वत्र योज्यं। यदि च पुनर्विधुरत्ररिगोऽस्ताष्टमं ८ अरिः षष्ठं ६ एतयोर्गतोऽस्तकृत् मरणकारको भवेदिति ॥ ३७ ॥

अथ व्यतीतैकसमस्य सूनोरुशंति वर्षद्वयकालशुद्धं ॥
चौलं निजान्वायविधिक्रमेण विदूषणे मासि सदन्ह्यभिज्ञाः ॥३८

अथ चौलकर्माह—अथेति ॥ अथानंतरं अभिज्ञा दैवज्ञा निजान्वायविधिक्रमेण निजवंशविधानानुक्रमेण सूनोः सुतस्य चौलं मुंडनमुशंति वांछंति। कस्मिन् विदूषणे दूषणरहिते मासि पुनः सदन्हि शुभवारे किंभूतस्य सूनोर्व्यतीताऽतिक्रांता एका समा वर्षं यस्मिन्स्तस्य किंयंतं चौलं वर्षद्वयकालशुद्धं वर्षयुग्मकाले शुद्धं ॥ ३८ ॥

शिशौ जरावत्यतिचारगेऽनृजौ मृगेऽस्तगे लेयगतौ गुरौ हरेः ॥
गुरौ हरेरस्तगते विरोधिनां चौलादिसंस्कारविधिर्ह्यनादृतः ॥ ३९ ॥

अथ गुरुशुक्रदोषे चौलं निषेधति—शिशाविति ॥ शिशौ बालके चौलादिसंस्कारविधिरनादृतो नांगीकृतो बुधैरिति शेषः। कस्मिन्सति हरेरिंद्रस्य गुरौ जीवे शिशौ बालके जरावति वृद्धेऽतिचारगे चारमतिक्रांतेऽनृजौ वक्रे मृगे मकरराशिगतेऽस्तंगते सिंहराशिगते सति पुनर्हरेरिंद्रस्य विरोधिना द्विषा दैत्याना गुरौ शुक्रेऽस्तंगते सति ॥ ३९ ॥

मास्यन्हि भे जन्मवतश्च जन्मनो न मंगलं मंगलकृत्सदा भवेत् ॥
किलाद्यपत्यस्य तदेव मंगलं पुरुक्रियं शौक्रयमभीष्टदं न यत् ॥ ४० ॥

अथ मासादीन् दूषयति—मासीति ॥ सदा जन्मवत. शिशोर्जन्मनो मासि अन्हि भे राशौ च मंगलं चौलादिसंस्कारविधानं मंगल न भवेत्। किलेति सत्ये। यद् यस्मात् आद्यापत्यस्य प्रथमसंतानस्य तदेव मंगलमभीष्टद कामद न भवेत्। किंभूतं मंगल शौक्रयं शुक्रे ज्येष्ठमासे भवं कृत्यं वा पुनः किंभूतं पुरुक्रिय पुरुर्भूयसी क्रिया यस्मिंस्तत्। 'भूर्यदभ्रं पुरु स्फिरं' इति हैम ॥ ४० ॥

चलांशुमद्गोपतिभानि दास्रं धिष्ण्ये सहस्रांवकशीतभासोः ॥
सपौष्णचित्राणि सदा प्रवीणाःक्षौरे जगुर्ह्याद्दृतसौम्यतारे ॥ ४१ ॥

अथ चौले नक्षत्राण्याह—चलांशुमदिति ॥ सदा प्रवीणा. पंडिताः क्षौरे एतानि नक्षत्राणि जगुरूचुस्तान्याह। चलानि चलसंज्ञानि अंशुमान् सूर्यो हस्तः गोपतिर्वाक्पतिर्गुरु पुष्य. एतानि पुनर्दास्रमश्विनी सहस्रांवक सहस्राक्ष इंद्रो ज्येष्ठा शीतभाश्चंद्रो मृगशीर्षं एतयोर्भे धिष्ण्ये नक्षत्रे किंभूतान्येतानि सपौष्णचित्राणि रेवतीचित्रायुक्तानि किंविशिष्टे क्षौरे आद्दृतसौम्यतारे आश्रितशुभतारके ॥ ४१ ॥

सद्भिर्विरिक्तास्तिथयो विपर्वा विषष्ठयमापक्षदलेंदुघस्राः ॥

भवारयोगाखिलशुद्धिवत्यः क्षुरक्रियायामुदिता विभद्राः ॥ ४२ ।

अथात्र पर्वादीनि प्रतिषेधाति—सद्भिरिति ॥ सद्भिर्बुधैस्तिथय उक्ता उदिताः कस्य क्षुरक्रियायां किंभूतास्तिथयः विरिक्ता रिक्तातिथिवर्जिताः पुनर्विपर्वाः पर्ववर्जिताः पुनः किंभूता विगता षष्ठी अमावासी पक्षदलमष्टमी इंदुघस्रः पूर्णमासी याभ्यस्ता विषष्ठयमापक्षदलेंदुघस्राः। पुनः किंभूताःभवारयोगाखिलशुद्धिवत्यः भानि वारा योगा एषामखिलया समस्तया शुद्ध्या युक्ताः पुनः किंभूताः विभद्राः विष्टिरहिताः ॥ ४२ ॥

स्याद्गोचरेणाष्टकवर्गकेण वा चेद्दृश्यते शुद्धिरिहोक्तकालवत् ॥

गंडांतसंध्यासमयौ तमस्विनीमपास्य भद्राकरणं सुखार्थकृत् ॥४३॥

अथात्र गोचरशुद्धिमाह—स्यादिति ॥ चेद्यदि गोचेरणाष्टकवर्गकेण वा इह उक्तकालक्षौरकर्मोक्तकालतुल्या शुद्धिर्दृश्यते तदा भद्राकरणं मुंडनसुखार्थंकृत् । किंकृत्वा गंडांतसंध्यासमयौ तमस्विनी रात्रीं चापास्य हित्वा ॥ ४३ ॥

त्रिकोणकेंद्रस्वगतैरपापैः पापैरमित्रायपराक्रमस्थैः ॥

शुभोदये चान्यगते च केतौ गदंति चूडाकरणं कृतींद्राः ॥४४॥

अथात्र लग्नशुद्धिमाह—त्रिकोणेति ॥ कृतींद्राः पंडितमुख्याः चूडाकरणं मुंडनं वदंति। कैः शुभोदये शुभलग्ने त्रिकोणं नव ९ पंचमं ५ केंद्रं १।४।७।१० स्वं धनं द्वितीयं २ एषु भवनेषु गतैरपापैः सौम्यैः पुनरमित्रं षष्ठं ६ आय एकादशं ११ पराक्रमस्तृतीयं ३ एषु स्थितैः पापैः क्रूरग्रहैः कृत्वा पुनरन्यगते उक्तेभ्योऽन्यस्थानगते केतौ सति ॥ ४४ ॥

पित्तं पतंगो मृतिमसृगब्जादब्जः कृशः कंटककोणसंस्थः ॥

लयं यमो यच्छति पंगुभावं गलामयं ग्लौर्वपने शिशूनाम् ॥४५

21929

शेषास्तारा· शस्ता इति बहुवचनात्पाठश्च साधु. ॥ चपुन· पचम पंचममेवाहर्दिन शस्त किंकृत्वा विरुद्धतारा त्रिपचसप्तमादितारामपास्य हित्वा ॥ ४६ ॥

व्रते मृतौ चानुदितेऽपि तीर्थे क्षौरं निदेशान्नरदेवतायाः ॥
द्वैजाह्निने चाध्वरदीक्षणे भे धनंजयाधानविधौ वरं स्यात्॥४७॥

अथ मुहूर्तं विनापि व्रतादौ क्षौरमाह—व्रते इति ॥ अनुदितेऽनुक्तेऽपि भे नक्षत्रे दिने च एषु क्षौरं वर स्यात्तानाह ॥ व्रते व्रतविषये मृतौ मरणे तीर्थयात्राया नरदेवताया भूपस्य निदेशादादेशात् द्वैजात् विप्रसवधिनिदेशान् अध्वरदीक्षणे यज्ञदीक्षाया धनजयाधानविधौ अग्न्याधानकर्मणि दिने इति ॥ ४७ ॥

कर्मन्दिनां पक्षविरामघस्रे स्याद्ब्रह्मचर्याहितपावकानां ॥
सत्यां सदा मुंडनमप्यशुद्धौ चतुर्विधैनोवयसापहं च ॥ ४८ ॥

अथ संन्यासिकादीना क्षौरमाह—कर्मेमिति ॥ कर्मदिना संन्यासिना ब्रह्मचर्याहितपावकाना ब्रह्मचारिणामग्निहोत्रिणा पक्षविरामघस्रे पक्षातदिन पूर्णिमाऽमावास्यो च एतयो- र्मुण्डनं स्यात् ॥ कस्या शुद्धिरहिते पुन सत्या विधवाया सदा मुडन स्यात् ॥ किं- भूतं मुडनं चतुर्विधैनोवयसापह चतुर्विधगोघातादिपापावस्थानाशक वय शब्दोऽकारान्तो- ऽपि अथवा समासेऽकारान्तत्वम् ॥ ४८ ॥

क्षौरैंदवाहर्युतिवारभेषु मासे नुरुक्तेष्ववदन्नथार्याः ॥
केशान्तकर्मेज्यभृगूदयस्थे सौम्यायने षोडशहायनस्य ॥४९॥

अथ षोडशवर्षस्य केशान्तकृत्यमाह—क्षौरैंद्रिति ॥ अथानतर आर्या आचार्या षोडशहायनस्य षोडशवर्षकस्य नुर्नरस्य केशान्तकर्मे केशक्षुरकार्यमवदन् जगु । कस्मिन् केषु ईज्यभृगूदयस्थे गुरुशुक्रलग्नस्थिते सौम्यायने उत्तरायणे उक्तेषु कथितेषु क्षौरैं- दवाहर्युतिवारभेषु क्षौरोक्ततिथिवारनक्षत्रेषु ऐंदवाह्नेन चान्द्रदिनेन युक्तवारनक्षत्रेषु समासे ह्रस्वातशब्दस्याऽकारान्तत्वमनित्य तेनैंदवाहर्युतिरित्यादि सर्वत्र ज्ञेयम ॥ ४९ ॥

वर्षे त्रिभिः प्रदरकाडमिते मिते वा संतः शिशोःश्रवणवेधविधानमाहुः।
मासेषु फाल्गुनमधूर्जसहस्यकेषु काव्येंद्रमंत्र्युदयवत्स्वसितान्यपक्षे ॥५०

अथ वसततिलकेन कर्णवेधमाह—वर्षे इति ॥ सतो विबुधा शिशोर्बालस्य श्रवणवे धविधान कर्णाकीर्णकृत्यमाहु । कस्मिन् केषु त्रिभिर्मिते वर्षे प्रशस्ता प्रदरा बाणा प्रदर- काडा काडशब्दः प्रशस्यार्थस्तैर्मिते वा पचमे इत्यर्थ ॥ फाल्गुनो मधुश्चैत्र ऊर्क कार्तिक सहस्य पौष एषु मासेषु किंभूतेषु मासेषु काव्य शुक्र इन्द्रमत्री गुरुर नयोरुदयवत्सु शुक्रजीवोद्गमयुक्तेषु असितान्यपक्षे शुक्लपक्षे इत्यर्थ ॥ ५० ॥

आदित्यभे मृदुलघुश्रुतिवासवेषु भिंद्याच्च सद्गगनमार्गदिनेषु शश्वत् ॥
कर्णौ शिशोर्गरलभूषितकंठजारिक्तेतराखिलशशांकदिनेषु सूच्या ५१

अथ कर्णवेधे नक्षत्रादीनाह—आदित्येति ॥ सुधी शश्वत् सदा सूच्या प्रोक्तधातुशलाकया शिशोः कर्णौ भिंद्यात् उत्कीर्णयेत् । केषु आदित्यमे हस्तनक्षत्रे मृदुसंज्ञानि लघुसंज्ञानि श्रुति श्रवणो वासवं धनिष्ठा एषु पुनः सद्गगनमार्गदिनेषु शुभग्रहवारे पुन गरलभूषितकंठ शंभुस्तस्माज्जायते इति तज्ञा विष्टिरमावासी रिक्तास्तिथय आम्य इतरा अखिला समस्ता शशांकदिनश्च द्वंद्व एषु ॥ ५१ ॥

कश्चिद्रदोदयत ईरितमुत्तराणां तेन त्रये लपदिह श्रुतिवेधकर्म ॥ अर्वागसाध्विति शिशोर्वचनं च कृष्टिः सल्लब्धवर्णगदितोक्तिविलोकनत्वात् ॥ ५२ ॥

अथ मतांतरमाह—कश्चिदिति ॥ कश्चिद्दषिः पंडित इति वचनमलपत् । इतीति किं रदोदयतो दंतोद्गमादर्वाक् असाधु तेन हेतुना इह दंतोद्गमे सति श्रुतिवेधकर्म ईरितं प्रोक्तं कस्मिन् उत्तराणां त्रये नक्षत्रेषु कस्मात् सल्लब्धवर्णगदितोक्तिविलोकनत्वात् ॥ ५२ ॥

संवेधयेच्छ्रवणमैंद्रनते खराशौ योगे शुभेऽमृतमयूखबले च पौरे ॥ शीर्षोदयेमरपुरोधसि सद्युसाद्रिः श्रोत्राश्रितेर्व्यशुभयोगनिशामनैश्च॥५३

अथ कर्णवेधे लग्नादीनाह—संवेधयेदिति ॥ सुधी श्रवणं कर्णं संवेधयेत् भिंद्यात् कस्मिन् सति ऐंद्रयनते पूर्वाण्हे खराशौ सूर्ये च पुनः शुभे योगे पुनरमृतमयूखबले चंद्रबले शीर्षोदये पौरे लग्ने । शीर्षोदयास्तु मिथुनसिंहकन्यातुलावृश्चिककुंभाः कथ्यते । अमरपुरोधसि गुरौ शीर्षोदयलग्नगते इत्यर्थः ॥ पुनः कैः कृत्वा श्रोत्राश्रितैः तृतीये ३ कादश ११ गते सद्युसद्रि सद्ग्रहै कथंभूतैः सद्युसद्रिर्व्यशुभयोगनिशामनैः 'ईक्षणं तु निशामनं' इति हेम ॥ ५३ ॥

घोणामथोदगयने विषमे कुमार्या वर्षे सुवारतिथियोगविलग्नलग्नैः ॥ भिंद्यात्तु लब्धचलमैत्रचरैर्विकर्क्षैर्मैराद्यपक्षवति राजनि चादियामे५४

इतिश्री कविकालिदासोदिते ज्योतिर्विदाभरणे मध्यसंस्काराध्याय ॥७॥

अथ कुमार्या घ्राणवेधमाह—घोणामिति । अथानंतरं सुधी कुमार्या घोणां घ्राणं भिंद्यात् वेधयेत् 'घ्राणं घोणा विकूणिका' इतिहैमः । कस्मिन् विषये वर्षे पुनरुदगयने पुनराद्यपक्षवति शुक्लपक्षयुक्ते राजनि चंद्रे पुनरादियामे प्रथमप्रहरे पुनः कैः कृत्वा सुवारतिथियोगविलग्नलग्नैः शुभवारः शुभातिथि सुयोग शुभविलग्न एभिर्लग्नैर्युक्ते 'लग्नं विलग्नं मेषादि' इति॥ शब्दप्रभेद । पुनर्लघुसंज्ञानि अचलानि स्थिरसंज्ञानि मैत्रसंज्ञानि चरसंज्ञानि एतैर्भैर्नक्षत्रै विभूतैर्नक्षत्रै विकर्क्षै रोहिणीवर्जितै ॥ ५४ ॥

इति श्रीपौर्णिमीयगच्छाधिराजभट्टारकपुरंदरश्रीमाहमाप्रभसूरीश्वरचरणसरोरुहचंचरीकायमान शिष्यभावरत्नविरचितायां श्रीविक्रमकालिदासकृतज्योतिर्विदाभरणस्य सुखबोधिकायाम् मध्यसंस्काराध्यायः समाप्त ॥ ७ ॥

उपवीतप्रकरणम् ८ ।

जनितोऽथ निषेकतोऽष्टमे रशनाबंधनमग्रजन्मनाम् ।
श्रुतिधर्मविदो हि हायने जगदुर्वाक्षमितेऽपि वा गिरे ॥ १ ॥

अथैतत्संस्कारकथनानंतरमुपनयनसंस्कारो घटतेऽतो वैतालीयेनोपवीताध्यायसमानमाह—जनित इति ॥ अथानंतरं हि निश्चितं श्रुतिधर्मविदो विबुधा जनितो जन्मतो निषेकतो गर्भाधानतो वाऽष्टमेऽक्षमिते पंचमेऽपि हायने वर्षे द्विजन्मनां विप्राणां रशनाबंधनं जगदुः कस्मै गिरे विद्यायै पठनायेत्यर्थः ॥ रशनाबंधनं तु विप्राणां मौंजीबंधः क्षत्रियाणां धनुर्ज्याबंधो वैश्यानां मौर्वीबंध इति विशेषः शास्त्राज्ज्ञेयः ॥ १ ॥

शरदामगदच्चतुष्टये कुसुराणामपि पंचमाब्दतः ।
मुनिरासुरिरष्टमे व्रतं समये कश्चिदरं बटोरिते ॥ २ ॥

अथात्र मतांतरमाह—शरदामिति ॥ अरं निश्चितं आसुरिर्मुनिः कुसुराणां भूदेवानां विप्राणां पंचमाब्दतः पंचमवर्षादारभ्य शरदां वर्षाणां चतुष्टये मौंजीबंधनमगदज्जगाद । अपि पुनः कश्चिदष्टमे समये वर्षे इते प्राप्ते सति बटोर्माणवकस्य व्रतं रशनाबंधनं जगाद ॥ २ ॥

वरमर्णवचीवराभुजां व्रतमेकादशमे च हायने ।
सुसमीकविधानतेजसे खलु षष्ठेऽत्र न विभ्रमो भवेत् ॥ ३ ॥

अथ क्षत्रियाणां व्रतमाह—वरमिति ॥ खलु निश्चितं अर्णव एव चीवरं यस्याः सा भूमिस्तां भुजंतीति भुजस्तेषां क्षत्रियाणां एकादशेन मीयते इति एकादशमं अन्यद्वात्र मट्प्रत्ययस्याविषयत्वात् एकादशम इति न स्यात् । तस्मिन् षष्ठे च हायने वर्षे व्रतं धनुर्ज्याबंधनं वरं श्रेष्ठं स्यात् । कस्मै सुसमीकविधानतेजसे संग्रामकार्यवीर्याय अत्र विभ्रमः संशयो न भवेत् ॥ ३ ॥

उपवीतविधानकं विशामलमर्कप्रतिमे विपश्चितः ।
अपि पण्यफलाप्तये भवेदवदन्वा व्रतमष्टकेऽब्दके ॥४॥

अथ वैश्यानां व्रतबंधनमाह—उपवीतेति ॥ अलं निश्चितं विपश्चितः पंडिता विशो वैश्यानामुपवीतविधानकं व्रतबंधनमवदन्नकथयन् । कस्मिन्नर्कप्रमिते द्वादशेऽब्दके वर्षे कस्यै पण्यफलाप्तये विक्रेयफलप्राप्तये 'पणितव्यं तु विक्रेयं पण्यं सत्यापनं' इति हैमः । वा पक्षांतरेऽष्टमे वर्षे व्रतं भवेत् ॥ ४ ॥

कुभुजामपि सप्तमाब्दतोऽर्कसमापद्व्रकमुदीरितं व्रते ।
यवनासुरिदेवलोक्तिभिर्विबुधैराचितसंमितेर्विशाम् ॥ ५ ॥

अथ व्रतबंधे ऋषिमतमाह—कुभुजामिति ॥ यवनासुरिदेवलोकिमिरेषामृषीणामुक्तिमि कृत्वा विबुधैः कुभुजां क्षत्रियाणां विशां वैश्यानामपि सप्तमाब्दतः सप्तमवर्षादर्कसमापट्क सावनसूर्यसमानवर्षषट्कं व्रते ईरितं प्रोक्तं किंभूतैर्विबुधैराचितसंमतैः पूर्णमतैः ॥ ५ ॥

तरणावलकेशदिग्गतेऽमरदित्युद्भववंदितोद्गमे ।
जगुरंतरभागसंयुते व्रतबंधस्य विधिं मुनीश्वराः ॥६॥

अथोत्तरायणादौ व्रतबंधमाह—तरणेति ॥ मुनीश्वराः व्रतबंधस्य विधिं जगुः कस्मिन्नलकेशादिग्गते उत्तरायणे सूर्ये पुनरमरा देवा दित्युद्भवा दैत्या आभ्यां वंदितौ गुरुशुक्रौ अनयोरुद्गमे उदिते सति किंभूते तरणौ अंतरभागसंयुते सायनांशसहिते ॥ ६ ॥

निजतुंगभतोऽगभस्थिते हरिगे वक्रिणि वातिचारिणि ।
नमुचेरहितार्चिते शिशौ व्रतबंधो न पुराणविग्रहे ॥ ७ ॥

अथ गुरुदोषे व्रतबंधं निषेधति—निजेति ॥ व्रतबंधो न भवेत् कस्मिन् निजतुंगभतो निजोच्चराशितोऽगभस्थिते सप्तमराशिस्थिते हरिस्थे सिंहस्थे वक्रिणि वाऽतिचारिणि वा शिशौ बाले वा पुराणविग्रहे वृद्धे वा नमुचेर्दैत्यस्याहित इंद्रस्तेन अर्चिते गुरौ सति ॥ ७ ॥

दितिजेज्यतमीशयोरपीतरकामाय च वृद्धबालता ।
निगमस्मृतिकर्मतो भवेदुपवीतस्य विधानके वटोः ॥ ८ ॥

अथ शुक्रचंद्रयोर्वृद्धबालत्वे व्रतं निषेधति—दितीति ॥ दितिजानां ईज्यः पूज्यः शुक्रः तमीशश्चंद्रः अनयोर्वृद्धबालता वटोर्माणवकस्य उपवीतस्य विधानके निगमस्मृतिकर्मतो वेदस्मृतिकार्यात् इतरकामाय धर्मनाशाय भवेदित्यर्थः ॥ ८ ॥

क्षितिकंपनकालतो व्रतं नभसस्तारकपातकालतः ।
न विदुर्ग्रहतोंशुचंद्रयोरगभिद्यामयुगाश्रितं बुधाः ॥ ९ ॥

भूकंपनादौ दोषे मासत्रयं व्रतबंधनं निषेधति—क्षितीति ॥ बुधाः क्षितिकंपनकालतो भूकंपकालात् नभस आकाशात् तारकपातकालतस्तारापतनकालात् अंशुचंद्रयोश्चंद्रार्कयोर्ग्रहतो ग्रहणाच्च व्रतं न विदुः अगभिदिंद्रस्तस्य यामयुगाश्रितं हिमहराश्रितं मासत्रयं यावदिति ॥ ९ ॥

प्रथमामररुंडमूर्तिभृद्गगने केतुरुदेति चेत्तदा ।
व्रतकृत्यमसिद्धिलंघिवत्स्मृतमाहायनमागमांतकैः ॥ १० ॥

अथ केतूदये वर्षपर्यंतं व्रतबंधनं निषेधति—प्रथमेति । चेद्यदि गगने केतुरुदेति उदयं प्राप्नोति किंभूत. केतुः प्रथमामराः पूर्वदेवा दैत्यास्तेषां रुंडमूर्तिरिव रुंडमूर्तिं बिभर्तीति प्रथमामररुंडमूर्तिभृत् रुंडशब्द. प्राकृतो रोढ़लोड़वो इति भाषा । तदा आगमांतकैर्वेदा एवांतकानि

नेत्राणि एषां तैर्वेदचतुर्भिर्वेददर्शनैर्वेदपाठकैराहायनं आङ् मर्यादायां वर्षपर्यंतं व्रतकृत्यं व्रतकार्यं असिद्धिलब्धिवत् फललब्धिशून्यं स्मृतम् ॥ १० ॥

क्षयमास्यधिमास्यकालजस्तनयित्नूपलपातभागृतौ ।
व्रतमेत्य बटुः पुनर्भवेदवकीर्णी च विलुप्तहायने ॥ ११ ॥

अथ क्षयमासादौ व्रतं निषेधति—क्षयेति ॥ बटुःव्रतमेत्य व्रतबंधनं प्राप्य पुनरवकीर्णी-खंडितव्रतो भवेत् 'क्षतव्रतोऽवकीर्णी स्यात्' इतिहैमः ॥ क्षयमासि अधिमासि अधिकमासे पुनः अकालजः प्रावृट्ऋतुं विना जातश्चासौ स्तनयित्नुर्मेघश्च तस्योपलपातः करकाणां पातस्तं भजतीति भाक् स चासौ ऋतुश्च तस्मिन् पुनर्विलुप्तहायने यस्मिन् वर्षे बृहस्पतेर्वत्सरे संक्रमणद्वयं स्यात्तल्लुप्तवर्षं तस्मिन् ॥ ११ ॥

गुरुसंक्रमयुग्मवत्समा गदिता सा ननु लुप्तसंज्ञिका ।
विबुधैरहिता व्रते तु याऽधिसमा गीष्पतिसंक्रमोज्झिता ॥ १२ ॥

अथ लुप्ताधिकवर्षलक्षणमाह—गुर्विति ॥ ननु निश्चितं विबुधैः सा समा लुप्तसंज्ञिता प्रोक्ता या गुरुसंक्रमयुग्मवत्समा गुरुसंक्रमणद्विकयुक्तं वर्षं स्यात् । पुनः साऽधिसमाऽधिकवर्षं याद्या गीष्पतिसंक्रमोज्झिता गुरुसंक्रमणरहितं वर्षं स्यात् ॥ १२ ॥

स्वमदप्रतिभायधर्मगं धिषणं चातिबलं जगुर्बुधाः ।
घनकर्मबलाभियातिगं स्वबलीतार्चमिहर्क्षतो बटोः ॥ १३ ॥

अथ राशिगतगुरोः फलमाह—स्वमदेति ॥ इह व्रतबंधे बुधाः बटोर्धिषणं गुरुं अतिबलं सानुकूलं शुभदं जगुः ऊचुः ॥ चातिफलमित्यपि पाठः ॥ किंभूतं गुरुं ऋक्षतो जन्मराशितः स्वं धनं द्वितीयः २ मदः सप्तमः ७ प्रतिभा विद्या पंचमः ५ आय एकादशः ११ धर्मो नवमः ९ एषां द्वंद्वे एषु राशिषु गतं जन्मराशित एतत्संख्याप्राप्तो गुरुः शुभ इति पुनर्बुधाः घनः प्रथमः १ धाम दशमः १० बलं तृतीयः ३ अभियातिः शत्रुः षष्ठः ६ एषां द्वंद्वे एषु राशिषु गतं गुरुं स्वबलेना निजपूजोपहारेण इता प्राप्ताऽर्चा पूजा येन त स्वबलीतार्चं सानुकूलं जगुः अनुकूलमिति शब्दप्रभेदः ॥ १३॥

तनुतेऽर्चितकोऽप्यरं बटोर्जनिराशेर्हिबुकात्ययांत्यगः ।
धिषणो रशनानिबंधने वृजिनं दंडधरार्तिसंभवम् ॥ १४ ॥

तनुत इति ॥ धिषणो गुरुररमत्यर्थमर्चितकोऽपि पूजितोऽपि बटो रशनाबंधने मौंजिबंधे वृजिनं क्रमर्षसामर्थ्याद्दुःखं पापं वा तनुते विस्तारयति । किंभूतो धिषणो जनिराशेर्जन्मराशितो हिबुकं चतुर्थः ४ अत्ययमष्टमः ८ अंत्यं द्वादशः १२ एषां द्वंद्वे एतद्राशिगतः किंभूतं वृजिनं दंडधरार्तिसंभवं यमपीडाजातं 'दंडधरोऽर्कसूनुः' इति हैमः ॥ इति राशिगतगुरुफलम् ॥ १४॥

यदा व्यतीताष्टसमस्य राशेर्वटोरनिष्टो भवतींद्रमंत्री ।
तमर्चयित्वा हि तदा विधेया व्रतक्रिया बुद्धिमतां वरिष्ठैः ॥१५॥

अथोपेंद्रवज्रया वयोवृत्ते गुरुपूजामाह—यदेति ॥ यदा व्यतीताष्टमवर्षस्य बटोःराशेः जन्मराशेरिंद्रमंत्री अनिष्टो भवति तदा बुद्धिमतां वरिष्ठैर्धीरैःपंडितैर्व्रतक्रिया हि निश्चितं विधेया कर्तव्या किंकृत्वा तं गुरुमर्चयित्वा ॥ १५ ॥

सदा सपर्या द्विगुणातिदुष्टे शस्ता गुरावादिभुवामपींदौ ।
तथा नृपाणां त्रिगुणा विशां सा चतुर्गुणात्मीयबलिक्रियार्हा ॥१६॥

अथोपजात्या दुष्टगुरुचंद्रयोर्विप्रादीनां पूजाधिक्यमाह—सदेति । सदा गुरौ इंदौ चंद्रेऽप्यतिदुष्टे सति आदिभुवां द्विजानां द्विगुणा सपर्या पूजा शस्ता प्रोक्ता तदा नृपाणां त्रिगुणा पूजा विशां वैश्यानां सा पूजा चतुर्गुणा । किंभूता सपर्या आत्मीयबलिक्रियार्हा निज-पूजाविधानयोग्या ॥ १६ ॥

यदातिदुष्टोऽमरधीसहायो द्विपारिगो मासि मधौ तिमिस्थे ।
तदा दिवानेतरि वा निबंधः पट्कर्मणां स्यात्खलु मेखलायाः ॥१७॥

अथ दुष्टगुरौ चैत्रादौ व्रतबंधमाह—यदेति ॥ यदाऽमरधीसहायो गुरुरतिदुष्टो दुष्टतरो द्विपारिगः सिंहराशिगतो भवेत्तदा खलु निश्चितं पट्कर्मणां विप्राणां मेखलाया मौंज्या निबंधः स्यात् । कस्मिन्मधौ चैत्रे मासि दिवानेतरि सूर्ये तिमिस्थे मीनराशिस्थिते वेति॥१७॥

न गोचरे दृश्यत एव शुद्धिस्तदाष्टवर्गेण विलोकनीया ।
यदा व्रतस्योभयतो न मित्रे चैत्रे भवेन्नीरनिकेतनस्थे ॥ १८ ॥

अथ व्रतबंधे गोचरादिशुद्धिमाह—न गोचरेति ॥ यदा गोचरे ग्रहगोचरे व्रतस्योपनयनस्य शुद्धिर्न दृश्यते तदाष्टवर्गेण शुद्धिर्विलोकनीया । यदा उभयतो गोचराष्टकवर्गाभ्यां शुद्धिर्न तदा चैत्रे मासे मित्रे सूर्ये सति शुद्धिर्भवेत् । किंभूते सूर्ये नीरनिकेतनस्थे नीरे जले निकेतनं गृहं यस्य स मीनस्तद्राशिस्थिते ॥ १८ ॥

न शक्तिनीने जगदुस्तपस्ये पराशराद्या रशनानिबंधं ।
न शुक्रसंज्ञे जितुमाश्रिते च न पौषमास्यूष्मकरे मृगस्थे ॥१९॥

अथात्र ऋषिमतमाह—न शक्तीति । पराशराद्या ऋषयः रशनानिबंधं जगदुः कथयामासु कस्मिन् शक्तिनि मीने इने सूर्ये सति पुनस्तपस्ये फाल्गुने मासे शुक्रसंज्ञे ज्येष्ठमासे पौषमासे पुनर्जितुमाश्रिते मिथुनराशिगते मृगस्थे मकरस्थे चोष्मकरे सूर्ये सति ॥ १९ ॥

हंसेऽजगे हारितदेवलादयो व्रतक्रियारंभमलं न मेनिरे ।
व्यासादयो धर्मविदोऽनिशं व्रतं वदंति तस्मिन्किल माधवाश्रिते ॥२०॥

पुनर्मतांतरमाह—हंस इति ॥ अत्र भृशं हारितदेवलाद्य ऋषयो व्रतक्रियारंभं न मेनिरे नागीचक्रुः कस्मिन् अजगे मेषराशिगते हंसे सूर्ये। किल निश्चितमनिशं निरंतरं धर्मविदो व्यासादयो व्रतं वदंति कस्मिन् तस्मिन्मेषराशिगते सूर्ये किंभूते तस्मिन्माधवाश्रिते वैशाखमासप्राप्ते ॥ २० ॥

व्रतं गिरे मासि तपस्यपि स्याच्चिरायुपे फाल्गुनसंज्ञके च।
वैशाखमध्वोरखिलार्थसिद्ध्यै शुक्रे शुचौ गोऽर्थदरिद्रतायै ॥ २१ ॥

अथ माघादौ व्रतबंधफलमाह—व्रतमिति ॥ अपि निश्चितं तपसि माघे मासि व्रतं गिरे विद्याप्राप्तये स्यात् ॥ चपुनः फाल्गुनसंज्ञके मासि व्रत चिरायुपे दीर्घजीविताय स्यात् ॥ पुनर्वैशाखे चैत्रे च व्रतमखिलार्थसिद्ध्यै समस्तपदार्थसिद्धये स्यात् ॥ पुनः शुक्रे ज्येष्ठमासे शुचौ आषाढमासे व्रत गोऽर्थदरिद्रतायै गौ सरस्वती अर्थो द्रव्यं अनयोर्दरिद्रताऽभावस्तस्यै स्यात्। कस्य बटोरिति शेष ॥ २१ ॥

माघास्यमासामुपवीतकृत्ये स्यादादृतं पट्कमपि प्रियं न।
तदादिजानामुदितं तदेवाऽत्रिणोत्तराशायनगं परेषाम् ॥ २२ ॥

अथ मतांतरमाह—माघेति ॥ आदिजानां विप्राणामुपवीतकृत्ये माघास्यमासा माघप्रमुखमासानां यत् पट्कमादृतमंगीकृतमपि प्रियं न स्यात्साधरणत्वात्। अत्रिणा ऋषिणा तदेव माघादिपट्कमुत्तराशायनगमुत्तरदिगयनगतमुदितं प्रोक्त केषां परेषामितरेषां क्षत्रियादीनाम् ॥ २२ ॥

मासं बटोरजिनदंडकमेखलानां केचिद्बुधा वितरणे वरमामनंति।
दर्शावधिं सकलधर्मविदो वदंति मासं च पोडशकलेंदुवतीविरामम् ॥ २३ ॥

अथ वसततिलकया चर्मदंडमौंजीधारणे मतांतरमाह—मासमिति। केचिद् बुधाः बटोर्माणवकस्याजिनदंडकमेखलाना चर्मदंडमौंजीनां वितरणे दाने दर्शावधिममावास्यांतं मासं वर श्रेष्ठमामनति कथयंति ॥ चपुन॰ सकलवेदविदोऽखिलवेदपारगाः पोडशकलेंदुवती समस्तकलायुक्तचंद्रयुक्ता पूर्णिमा तस्या विरामपर्यंत मासं वर वदंति—अजिनेति। यत उक्तं 'मेखलामजिन दंडमुपवीतं च नित्यश ॥ कौपीन कटिसूत्रं च ब्रह्मचारी तु धारयेत् ॥ १ ॥ अग्नींधनमध.शय्या भैक्षचर्या गुरोर्हित' इति ॥ २३ ॥

सदा वरं काश्यपिकामराणां मधावृतौ मेखलबंधकर्म्म।
मधौ निदाघे किल बाहुजानां विशां भवेत्प्रावृपि वा निदाघे ॥ २४ ॥

अथोपेंद्रवज्रया वसंतादौ विप्रादीना व्रतबंधमाह—सदेति ॥ काश्यपी एव काश्यपिका भूमिस्तस्या अमरा देवा विप्रास्तेषां मेखलबंधकर्म मौंजीकार्यं मधौ वसंते ऋतौ सदा वर श्रेष्ठं

भवेत् " काश्यपीपर्वताधारा " इति हैमः ॥ एवं बाहुजानां क्षत्रियाणां मेखलाकार्यं मघौ वसंते निदाघे ग्रीष्मे वा पुनर्विशां वैश्यानां प्रावृषि वर्षाकाले निदाघे ग्रीष्मे वा ॥ २४ ॥

व्रतं सिते सद्भिरुदीरितं वा राजा भवेत्पंचकलावशेषः ।
पक्षे सिते यावदपीति तावत्सितेऽसिते त्रैवृणिना प्रदिष्टम् ॥ २५ ॥

अथोपजात्या शुक्लकृष्णपक्षयोर्व्रतबंधं दर्शयति—व्रतेति ॥ सद्भिर्बुधैः सिते पक्षे व्रतमुदीरितं प्रोक्तं च पुनर्यावत् पंचकलावशेषोऽवशेषपंचकलामात्रो राजा चंद्रो भवेत्तावत्काले त्रैवृणिना ऋषिणा सितेऽसिते वा पक्षे व्रतं प्रदिष्टं प्रोक्तम् ॥ २५ ॥

रिक्तात्रये निस्तृतियाजयाढ्ये ससप्तमीपक्षतिपूर्णिमामे ।
गलग्रहः स्यात्तमपास्य शंखो व्रते सदाहोभयचांद्रपक्षौ ॥ २६ ॥

अथ व्रतबंधे गलग्रहं निषेधति—रिक्तेति ॥ सदा निरंतरं गलग्रहः स्यात् । कस्मिन् रिक्तात्रये चतुर्थीनवमीचतुर्दशीतिथौ किंभूते रिक्तात्रये निस्तृतीयाजयाढ्ये तृतीयां विनाष्टमीत्रयोदशीयुक्ते पुनः किंभूते रिक्तात्रये ससप्तमीपक्षतिपूर्णिमामे सप्तमी प्रतिपत् पूर्णिमाऽमावास्याभिः सह वर्तते यत्तत्तस्मिन् सदा शंखो मुनिस्तं गलग्रहमपास्य हित्वा व्रते उभयचांद्रपक्षौ शुक्लकृष्णचांद्रपक्षौ आह वदति ॥ २६ ॥

घस्रा दिगीशेष्विनपट्त्रय १०।११।५।१२।६।३। भिन्नाःशस्ता
व्रते चेह सदादिपक्षे । कार्ष्णा मिता द्यक्ष ५ दिगं १०ग ६
रामै ३ रनेकपक्षेष्वविरुद्धमेतत् ॥ २७ ॥

अथ व्रतबंधे दशम्यादितिथीन् दर्शयति—घस्राइति ॥ सदा निरंतरमिह व्रते आदिपक्षे शुक्लपक्षे घस्राः दिवसाः शस्ताः प्रोक्ताः । किंभूता घस्राः दिग् १० दश ईशा एकादश ११ इषवः पंच ५ इना द्वादश १२ षट् ६ त्रयः ३ एषां द्वंद्वे एभिरभिन्नास्तुल्याः दशम्येकादशीपंचमीद्वादशीषष्ठीतृतीयास्तिथय इति । पुनः कार्ष्णाः कृष्णपक्षभवाः घस्राः शस्ताः । किंभूता घस्राः द्य २ क्ष ५ दि १० गंग ६ रामै ३ मिताः द्वितीया पंचमी षष्ठी तृतीया इति । अनेकपक्षेषु बहुऋषिमतेषु एतदुक्तमविरुद्धं सर्वेषां संमतमिति ॥ २७ ॥

भवोद्भवायामयनर्तुसंध्योर्गलग्रहे पर्वणि मंदवारे ।
क्रांत्योः समत्वेऽशुभदक्षभत्रोर्मतं बटोरत्ययदं कुयोगे ॥ २८ ॥

अथ व्रतबंधे विष्ट्यादीन् निषेधति—भवोद्भवायेति ॥ व्रतं बटोरत्ययदं मृत्युदं स्यात् कस्मात् भवादीश्वराद्धवो यस्याः सा भद्रा तस्यां पुनरयनर्तुसंध्योः अयनसंधौ ऋतुसंधौ पुनर्गलग्रहे पुनः पर्वणि पुनर्मंदवारे पुनरशुभदक्षभत्रोः अंशुमाश्च ऋक्षभर्ता च तयोः सूर्यचंद्रयोः क्रांत्योः समत्वे पुनः कुयोगे ॥ २८ ॥

गुरुशनौगारकराजपुत्रा ज्ञेयाः क्रमेणागमपाः प्रवीणैः ॥
निजागमेशाहनि मेखलाया बंधस्तदाचारकरो निरुक्तः ॥ २९ ॥

अथ वेदस्वामिन आह—गुर्विति ॥ प्रवीणैः पंडितैः क्रमेण गुर्वादय आगमपा ज्ञेयाः ॥ ऋग्वेदस्य गुरुः स्वामी यजुषः शुक्रः साम्नो भौमः अथर्वणो बुध इति वेदपाः ॥ मेखलाया बंधस्तदाचारकरस्तेषां विप्रादीनामाचारकृदुक्तः कस्मिन् निजागमेशाहनि निजनिजवेदपतिदिवसे ॥ २९ ॥

द्विजौ हरीज्यास्फुजितौ च राजावारांशुमंतो विडथोपधीशः ॥
स्ववर्णखेटान्ह्युपवीतकर्म स्वधर्मदं वै तदसंभवत्वात् ॥ ३० ॥

अथ गुर्वादीनां वर्णसंज्ञामाह—द्विजाइति ॥ हरीज्यः इंद्रपूज्यो गुरुश्च आस्फुजिच्छुक्रश्च तौ द्विजौ विप्रौ स्तः । चपुनराराशुमंतौ आरश्च अंशुमांश्च तौ भौमसूर्यौ राजौ क्षत्रियौ स्तः । राट् राजौ इति द्विवचनं ॥ अथ पुनरोषधीशश्चंद्रो विट् वैश्यः स्यात् । वै निश्चितं स्ववर्णखेटान्हि निजवर्णग्रहदिने उपवीतकर्म स्वधर्मदं निजधर्मदं स्यात् ।यथा विप्राणां विप्रसंज्ञगुरुशुक्रदिने व्रतकार्यं निजधर्मदं स्यात् । पुनस्तदसंभवत्वात्तयोर्विप्रादिवर्णगुर्वादिवर्णयोर्योगस्याभावात् किंकर्तव्यं तदाह अग्रेतनकाव्ये ॥ ३० ॥

सर्वागमेष्वर्कगुरूशनोब्जा व्रतार्थदाः स्युस्त्वथ सामगानां ।
राज्ञां धराभूर्विदथर्वगानां तत्सिद्धिदश्चोरुभुवामिह स्यात् ॥ ३१ ॥

सर्वेति । सर्वागमेषु अर्कः गुरुः उशनाः शुक्रः अब्जश्चंद्र एते व्रतार्थदाः व्रतेऽर्थदायकाः स्युः॥ अथ तु पुन. सामगानां सामवेदानुगामिनां राज्ञां क्षत्रियाणां धराभूर्भौमस्तत्सिद्धिदस्तस्य व्रतस्य सिद्धिदायकः स्यात् । चपुनरेवमिह उरुभुवां वैश्याना विद् बुधस्तत्सिद्धिदःस्यात् । किंभूतानां वैश्यानामथर्वगानामथर्ववेदानुगानामिति ॥ ३१ ॥

विषविपाभरणाहिभगोष्मकृन्निर्ऋतिमारुतमारमणोडुषु ॥
ससुरवर्द्धकिभेषु भवेद्बटोर्व्रतमृचो विषये श्रुतिकर्मणः ॥३२॥

अथ द्रुतविलंबितेन ऋग्वेदव्रतनक्षत्राण्याह—विषेति । श्रुतिकर्मणो वेदकार्यस्य बटोर्माणवकस्य ऋचो विषये ऋग्वेदविधानाय व्रतं भवेत् । केषु विषं जल पूर्वाषाढा विपाभरण कंठे काल आर्द्रा अहिराश्लेषा भग. पूर्वाफाल्गुनी ऊष्मकृत्सूर्यो हस्तः निर्ऋतिर्मूलं मारुतः स्वाती मा लक्ष्मीस्तस्या रमणो विष्णुः श्रवण एषां द्वंद्वे एतदुडुषु किंभूतेष्वेषु सुरवर्द्धकिर्देवसूत्रधारस्तस्य भं चित्रा तेन सह वर्तते यानि तानि ससुरवर्द्धकिभानि तेषु 'विषं जले क्ष्वेडे' इति हैम ॥ ३२ ॥

अलमलोललघुत्रिदशेंद्रभूर्भगहिमांशुहिमांशुमृगीदृशः ॥
ननु बटोर्यजुषो व्रतबंधने मुनिवरैरुदिताः श्रुतिपारगैः ॥३३॥

अथ यजुर्वेदव्रतनक्षत्राण्याह—अलमिति ॥ ननु निश्चितमलमित्यवधारणे श्रुतिपारगैः वेदपारप्राप्तैर्मुनिवरैर्बटोर्यजुषो व्रतबंधनेऽलोलादितारा उदिताः प्रोक्ताः ॥ अलोलानि स्थिरसंज्ञानि लघुसंज्ञानि भानि त्रिदशेंद्रसूः सुरपतिमाताऽदितिः पुनर्वसुः भगः पूर्वाफाल्गुनी हिमांशुश्चंद्रो मृगशीर्ष एषां द्वंद्वे एषां हिमांशुमृगीदृशश्चंद्रभार्यास्तारा इत्यर्थः ॥ ३३ ॥

प्रथमभासुरवैरिविभूतिभृद्धिपणभोत्तरभेनवसूडुषु ॥
ननु समेत्य हि सामवटुर्व्रतं श्रुतिरसं श्रुतिसंभवमश्नुते ॥३४॥

अथ सामवेदव्रतनक्षत्राण्याह—प्रथमेति ॥ हि युक्तं सामबटुः सामवेदाध्ययनार्थी बटुः प्रथमादिभेषु व्रतमेत्य प्राप्य सततं निरंतरं श्रुतिरसं कर्णपुटस्वादमश्नुते प्राप्नोति ॥ प्रथमभं अश्विनी असुरवैरी विष्णुः श्रवणः विभूतिं भस्म बिभर्ति इति विभूतिभृत् शिव आर्द्रा धिषणो गुरुस्तद्भं पुष्यः उत्तरभानि उत्तरात्रयं इनः सूर्यो हस्तः वसवो धनिष्ठा एषां द्वंद्वे उडुषु । किंभूतं श्रुतिरसं श्रुतिसंभवं वेदघोषसंजातम् ॥ ३४ ॥

बलनिषूदनजिद्रथकाश्यपीश्वसनमित्रसवित्रिनवैद्यभैः ॥
सवसुभामरवर्द्धकिभैः स्मृतं व्रतमथर्ववटौ पटुबुद्धिभिः ॥३५॥

अथाथर्ववेदव्रते नक्षत्राण्याह—बलेति । पटुबुद्धिभिरथर्ववटौ अथर्ववेदमाणवके व्रतं स्मृतं कथितं कैः बलनिषूदन इंद्रस्तं जितवान् इति तज्जिद्गरुडः 'वज्रिजिद्वज्रतुंड, इत्यभिधानचिंतामणिवचनात् ॥ स एव रथो यस्य तेन रमते वा इति बलनिषूदनजिद्रथो विष्णुस्तस्य भं श्रवणः काश्यपी अदितिः पुनर्वसु श्वसनोऽनिलः स्वाती मित्रोऽनुराधा सविता सूर्यो हस्त इनवैद्यो इनः सूर्यस्तस्यापि देवत्वात्तद्वैद्यो अश्विनी एषां द्वंद्वे एभिः किंभूतैः सवसुभिरिति । वसुभं धनिष्ठा अमरवर्द्धकिभं चित्रा आभ्यां सह वर्तते यानि तानि तैः ॥ ३५ ॥

मुक्त्वादिभं क्वचिदिहादृतमांत्यमैत्रेऽथोवादृते व्रतविधौ यजुषां च साम्नां ॥ नांगीकृतं त्रिदशदोपविद्दक्षमांत्योपांत्यर्क्षमादृतमृचामसदस्त्यपीति ॥ ३६ ॥

अथ वसंततिलकेन मतांतरमाह—मुक्त्वेति । अपि निश्चितमिति असत् अस्ति इतीति किं तदाह यजुषां साम्नां च वेदानां व्रतविधौ इह नक्षत्रेषु क्वचिदांत्यमैत्रे रेवत्यनुराधे मुक्त्वा आदिभमश्विनी आदृतं क्वचिदादिभं मुक्त्वा आंत्यमैत्रे आदृते । अथो वा ऋचां वेदानां व्रतविधौ त्रिदशदोषविदक्षे देवदोषज्ञनक्षत्रमश्विनी नांगीकृतं क्वचित् आंत्योपांत्यर्क्षं उत्तराभाद्रपदांगीकृतमिति । आंत्यमैत्रेऽथो वा इत्यत्र एकारांतद्विवचनांते संधिकार्यं केषांचिन्मतभिन्नत्वाङ्कव्यैव। यथा भरद्वाजौ केचिन्मणी वेत्यादौ अमंत्रिमनिषेधं वर्णयंति तद्युक्तं यदाद्रे नोपमार्थेन सिद्धत्वात् । मणि इवेऽद्रिमनोहरस्तिरवावित्यादावसंधिदर्शनाच्च ॥ अन्ये तु यथा दर्शनं संधिमसंधिं वेच्छंति मणि इव दंपतीव गेहमीव मणीवेति हेमसूरिभिः स्वयं नांगीकृतं मतभिन्नं तु दर्शितं च संधिकार्यं अतो वक्ष्यमाणाविचारेऽपि ज्ञेयम् ॥ ३६ ॥

पौष्णेंदिरारमणकैरविणीशगंधवाहाख्यवस्वमरवर्द्धकिभेषु केचित् ॥
ाहुर्मतं सकलवेदविभेदगानां अब्जेज्यभादिभयुतेषु धरामराणाम् ॥३७

पुनर्मतांतरमाह—पौष्णेति । केचिद्बुधाः सकलवेदविभेदगानां सर्ववेदभेदानुगामीनां ामराणां विप्राणां पौष्णादिभेषु व्रतमाहुः। पौष्णं रेवती इंदिरा लक्ष्मीस्तस्या रमणो विष्णु ावणः कैरविणीशश्चंद्रो मृगशीर्षं गंधवहाख्यो वायुः स्वाती वसवो धनिष्ठाऽमरवर्द्धकिर्भं त्रा एषां द्वंद्वे। एषु किंभूतेषु अब्जो रविर्हस्तः ईज्यभं पुष्यः आदिममश्विनी एषां द्वंद्वे भिर्युतेषु ॥ ३७ ॥

सनिजवेदविभुन्यथ न व्रतं मघवमंडलखंडनमंडले।
पणफरालयतत्परभावगे घनगृहान्निजवेदविभौ भवेत् ॥३८॥

अथ द्रुतविलंबितेनास्तंगते वेदविभौ तनुभावादिगते च व्रतं निषेधति—स निजेति ॥ मघवो क्षत्रस्वामी चंद्रस्तस्य मंडलस्य खंडनः सूर्यस्तस्य मंडले मघवमंडलखंडनमंडले सूर्यमंडले कंभूते सनिजवेदविभुनि निजनिजवेदस्वामिना सह वर्तते यत्र तस्मिन् स्ववेदविभौ अस्तंगते इति व्रतं न स्यादित्यर्थः। वेदविभावयेति पाठोऽपि त्रिलिंगत्वाद्युक्तः ॥ अथ पुनर्घनगृहा-त्तनुभवनतः पणफरालयतत्परभावगे निजवेदविभौ सति व्रतं न भवेत् ॥ द्वितीय २ पंचम ५ अष्टमै ८ कादश ११ भावानां पणफरालयसंज्ञा इति तत्परभावास्तेभ्यः पणफरालयेभ्यः ररा अग्रेतना भावास्तृतीय ३ षष्ठ ६ नवम ९ द्वादशा १२ आपोक्लिमसंज्ञा इति बृहज्जातके प्रोक्तं ॥ पणफरालयाश्च तत्परभावाश्च ते तेषु गते इति ॥ ३८ ॥

सपुरपुष्करकर्ममदैकभःश्रुतिपतिः कुरुते व्रतकामिनं ॥
व्रतविलब्धकलं च निजस्तनोः सुमतिलब्धभुजं मतिलब्धिगः ॥३९॥

अथ तनुभावादिगतवेदपतेः फलं वर्णयति—सपुरेति ॥ निजः श्रुतिपतिर्वेदस्वामी व्रत-कामिनं व्रतेच्छुं बटुं व्रतविलब्धकलं व्रतात् विशेषेण लब्धाः प्राप्ताः कला ज्ञानरूपा येन स तं एवंविधं कुरुते। विलब्धफलमिति पाठः विभूषफलमित्यपि पाठः। किं विशिष्टः श्रुतिपतिः तनोः प्रथमभवनात् सपुरपुष्करकर्ममदैकभः पुरं शरीरं प्रथमं १ पुष्करं जलपर्यायत्वाच्चतुर्थं ४ कर्म दशमं १० मदः सप्तमं ७ एषां मध्ये एकभेन एकतरतात्कालिकलग्नराशिना सह वर्तते यः स च पुनर्मतिलब्धिगः पंचमभवनतो निजः श्रुतिपतिः सुमतिलब्धभुजं नरं कुरुते शुभ-मत्या लब्धं यद्व्रतादि तद् भुनक्तीति सुमतिलब्धभुक् तं ॥ ३९ ॥

अनिमिषानिमिषाद्विपदार्चितौ द्विपदगारगतौ विरतिप्रदौ।
श्रुतिपवर्णविभू च निजौ तु वा विरतिगावपि तौ विरतिप्रदौ॥४०॥

अथ व्रते गुरुशुक्रयोर्वेदवर्णस्वामिनोश्च फलमाह—अनिमिषेति ॥ द्विपदगारगतौ यथा-मावाश्रितौ अनिमिषा देवा· अनिमिषद्विपंतो दैत्याः अनयोर्द्वंद्वे एभिरर्चितौ पूजितौ गुरु—

विरतिप्रदौ मृत्युदायकौ भवेतां । वा तु पुनः निजौ श्रुतिवर्णाविभू वेदस्वामिवर्णस्वामिनौ विरतिगौ अष्टमभावस्थितौ तदा विरतिप्रदौ मृत्युदायकौ स्तः॥ तु पुनस्तावपि गुरुशुक्रावपि विरतिगौ मृत्युदौ स्तः ॥ ४० ॥

कुलिशभृत्सचिवे घनगे सिते मतितपोऽनुगते भधवेऽथवा ।
कविलवेऽखिलतर्कचरो भवेच्छ्रुतिपथि द्रुहिणाद्यनुगे व्रती ॥४१॥

अथ व्रते गुरुशुक्रचंद्राणां शुभफलमाह—कुलिशेति ॥ व्रते मौंज्यादिधारकः श्रुतिपथि वेदमार्गेऽखिलतर्कचरः समस्तवेदविचारगामी भवेत् । किंभूते श्रुतिपथि द्रुहिणाद्यनुगे ब्रह्मादिदेवानुगामिनि कस्मिन् कुलिशभृदिंद्रस्तस्य सचिवे गुरौ घनगे तनुभावगे सति पुनः सिते शुक्रे मतितपोनुगते पंचमनवमभावगे भधवे चंद्रे अथवा कविलवे शुक्रनवांशे सति ॥ ४१ ॥

भगलवेऽथ कृशोऽब्जलवे जडः कुजलवे कुमना ज्ञलवे बुधः ।
धिषणधिष्ण्यलवेऽध्वरकृद्वटुर्भवति मातृमुखो हरिजांशके ॥ ४२ ॥

अथ व्रते सूर्याद्यंशानां फलमाह—भगेति ॥ वटुर्भगलवे सूर्यनवांशे कृशो दुर्बलो भवति । एवमब्जलवे चंद्रांशे जडो मूर्ख कुजलवे भौमांशे कुमना विमनस्कः ज्ञलवे बुधनवांशे बुधः पंडित. धिषणधिष्ण्यलवे गुरुशुक्रनवांशेऽध्वरकृत् यज्ञकर्ता हरिः सूर्यस्तस्माज्जायते इति तज्जः.शनिस्तस्य नवांशे मातृमुखो मूर्ख इति ॥ ४२ ॥

प्रथमदेवपुरोधसि वा गुरौ द्विजविभावसदन्वितमंडले ॥
अहितकालकुले कुलकालकृद्भवति दंड्यसदंशगतेऽपि च ॥ ४३ ॥

अथ व्रते क्रूरग्रहयुक्तशुक्रगुरुचंद्राणां फलमाह—प्रथमेति । दंडी व्रती कुलकालकृत् अन्वयनाशको भवति कस्मिन् प्रथमदेवा दैत्यास्तेषां पुरोधसि शुक्रे वा द्विजविभौ चंद्रे वाऽसदन्वितमंडले दुष्टग्रहयुक्तमंडले सति पुनरहितकालकुले षष्ठाष्टमगते चैतत्त्रये असदंशगते पापग्रहनवांशगते सति ॥ ४३ ॥

खरघृणावनुजीव्यचलाभृतः शशिनि कंटकगे कृपिको वटुः ॥
कुभुवि शस्त्र्यतिविद्य इहेंदवेऽमरपुरोधसि भूरिगुणार्थभुक् ॥४४॥

अथ काव्यद्वयेन व्रते केंद्रगतसूर्यादीनां फलमाह—खरेति ॥ इह लग्ने वटुः खरघृणौ सूर्ये कंटकगे १।४।७।१० सति अचलाभृतो नृपस्यानुजीवी सेवको भवति । एवं शशिनि चंद्रे कंटकगे कृपिको हलकर्मकारक. पुनःकुभुवि भौमे कंटकगे शस्त्री शस्त्रायुधः पुनरैंदवे बुधे कंटकगेऽतिविद्यो बहुविद्यायुक्त. पुनरमरपुरोधसि गुरौ कंटकगे भूरिगुणार्थभुक् बहुकीर्ति द्रव्यभोक्ता भवतीति ॥ ४४ ॥

दितिजबुद्धिसहायनभश्चरे चरति तत्र वटुर्व्रतलब्धितः ॥
वृषमखादिकमेति न किं शुभं तरणिजे च जनंगमसंगकृत् ॥ ४५॥

दितिजेति ॥ व्रतलम्बितो व्रतमाप्तकालात् बटुर्नृपमलादिकं धर्मयज्ञादिकं शुभं किं एति प्राप्नोति । कस्मिन् तत्र कंटके दितिजबुद्धिसहायनभश्चरे शुक्रग्रहे चरन् तस्मिन् चरति गच्छति सति च पुनर्बटुर्जनंगमसंगकृत् चांडालसंगकारी भवेत् कस्मिन् तरणिजे शनौ कंटकगे सति ॥ ' दिवाकीर्तिजनंगमाः ' इति हैमः ॥ ४९ ॥

सदितरांबरपांथचतुष्टयं खलु विखोपचयर्क्षकृताश्रयं ॥
सदुपकारफलं व्रतबंधने किल करोत्यथ वर्णिनि सूदयम् ॥४६॥

अथ व्रते उपचयगतदुष्टग्रहाणां फलमाह—सादितरेति ॥ सदितरांबरपांथचतुष्टयं सद्भ्यः शुभग्रहेभ्य इतरे अन्येऽम्बरपांथा दुष्टग्रहा रविभौमशनिक्षीणचंद्राः एषां चतुष्टयं कर्तृपदं वर्णिनि ब्रह्मचारिणि व्रतबंधने सदुपकारफलं सज्जनानामुपकारफलं करोति किंविशिष्टं चतुष्टयं विखोपचयर्क्षकृताश्रयं विगतं खं दशमं येभ्यस्तानि एवं विधानि उपचयर्क्षाणि तृतीय ३षष्ठ ६कादश ११ भवनानि तेषु कृत आश्रयो येन तत् ॥ पुनः किंविशिष्टं सूदयं शुभोदयं ॥ ४६ ॥

ब्रह्मसूत्रधृतिरुत्तमोदयादुष्मगोः क्षणचतुष्टये बटोः ॥
मध्यमा च तदहर्दलावधि स्यादतः क्षणचतुष्टयेऽधमा ॥ ४७ ॥

अथ रथोद्धताछंदसा यज्ञसूत्रधारणे दिनविभागफलं काव्यद्वयेनाह—ब्रह्मेति । उष्मगोः सूर्यस्योदयात्प्रभातात् क्षणचतुष्टये मुहूर्तचतुष्के बटोर्ब्रह्मसूत्रधृतिर्यज्ञसूत्रधारणमुत्तमा श्रेष्ठा च पुनरेवं तदहर्दलावधि तस्मात् क्षणचतुष्टयात्परमहर्दलावधि मध्याह्नपर्यंतं ब्रह्मसूत्रधृतिः मध्यमा पुनरतो मध्यान्हतः परं क्षणचतुष्टयेऽधमा ॥ ४७ ॥

सेतशेषदिवसाधमाधमा गर्हिता व्रतविधौ तु वर्णिनः ॥
उत्तमावनिसुरस्य वा हिता मध्यमाऽवनिभुजोऽधमा विशः॥ ४८ ॥

सेतेति ॥ सा ब्रह्मसूत्रधृतिः इतः प्राप्तः शेषदिवसो यया सा इतशेषदिवसा एवंविधाऽधमा उक्ता सा तु पुनर्वर्णिनो ब्रह्मचारिणो व्रतविधौ गर्हिता वाऽथवा अवनिसुरस्य विप्रस्य उत्तमा हिता हितकारिणी पुनरवनिभुजः क्षत्रियस्य मध्यमा श्रेष्ठा पुनर्विशो वैश्यस्याऽधमा श्रेष्ठा ' उपवीतं यज्ञसूत्रम् ' इति हैमः ॥ ४८ ॥

कश्चिदाह दिवसावसानगं याममुज्झ्य दिनपत्रयं कृती ।
ईरितोपनयनाभिलापकं मुक्तसंध्यमखिलं द्विजातिषु ॥ ४९ ॥

अथात्र मतांतरमाह—कश्चिदिति । कश्चित् कृती पंडितः दिनपत्रयं दिवसस्य चरणत्रयमाह कथयति ॥ किंकृत्वा दिवसावसानगं दिनांतगतं याम चरमप्रहरं विहाय किं विशिष्टं दिनपत्रयं ईरितोपनयनाभिलापकं ईरित कथित उपनयनाभिलाषो यस्मिंस्तत् । पुनः किंभूतं दिनपत्रयं मुक्तसंध्यं त्रिसंध्यारहितं केषु अखिलद्विजातिषु 'यमामुझ्झ्य' इति सुत्रपाठे सूत्रज्ञेनकदोषो

दृश्यते । ग्राममुझ्झ्येत्येतद्युक्तं तत उज्झत्यागे त्रिवर्णात्मकोऽखंडितो दकारोपांत्यो यो धातुस्तत; समासं विना ल्यपाप्रवृत्तिस्तेन प्रोझ्येत्यादि युक्तं अत आङा सह समासे कृते उज्झ्येति जायते परंतु सुशाब्दिको उशंति तत्प्रमाणं । ॥ ४९ ॥

स्वोक्तकालगवयोवतामलं स्वोक्तकालसमये द्विजन्मनां ॥
अन्यथा हि रशनानिबंधनं बंधनाय भवति स्वकर्मणाम् ॥ ५० ॥

॥ अथोपसंहारेण व्रते पूर्वोक्तकालं द्रढयति—स्वोक्तेति । अलमित्यवधारणे द्विजन्मनां विप्राणां स्वोक्तकालसमये पूर्वोक्तनिजकालप्राप्तौ रशनानिबंधनं भवति किंभूतानां द्विजन्मनां स्वोक्तकालगवयोवतां निजकालप्राप्तवयोयुक्तानां हि युक्तार्थेऽन्यथा पूर्वोक्तकालाद्यभावे रशनानिबंधनं स्वकर्मणां बंधनाय पापकर्मणे भवतीत्यर्थः ॥ ५० ॥

नैव कर्म विदधीत सोमपः षोडशाब्दसमयादनंतरं ॥
भूभुजां द्वियमतुल्यहायनान्न व्रतस्य जिनवर्षतो विशाम् ॥ ५१ ॥

अथ व्यतीते काले विप्रादीनां व्रत प्रतिषेधति—नैवेति । सोमपो यज्ञकर्तृविशेषः षोडशाब्दसमयात् षोडशवर्षकालादनंतरं व्रतस्य कर्म व्रतकार्यं नैव विदधीत न कुर्यात् । अत्र विध्यर्थः ॥ तु पुनर्भूभुजां क्षत्रियाणां द्वियमतुल्यहायनाद् द्वाविंशतिवर्षादूर्ध्वं व्रतस्य कर्म न स्यात्पुनर्विशां वैश्यानां जिनवर्षतश्चतुर्विंशतिवर्षत ऊर्ध्वं व्रतकर्म न स्यात् ॥ ५१ ॥

कालशुद्धिरुदिता मया मदा सैव यास्ति रशनानिबंधने ॥
मेखलाव्रतविमोक्षणे हिता चागमव्रतविधौ द्विजातिनाम् ॥ ५२ ॥

अथोक्तकालशुद्ध्योपसंहारमाह—कालेति । आगमव्रतविधौ वेदव्रतकर्मणि द्विजन्मनां च मया कालिदासेन कालशुद्धिरुदिता प्रोक्ता एव निश्चितं सा रशनानिबंधने मौंजीबंधेऽस्ति च पुनः सा मेखला व्रतविमोक्षणे मौंजीबंधविमोचने हितकारिणी ॥ ५२ ॥

ब्रह्मचारिणमधीरभोदये यो दधाति निजकर्मधर्मगं ॥
साधुनां प्रवसनं ह्यधिष्ठिते प्रोक्तकालवदगारतो निजात् ॥ ५३ ॥

अथोपनयनानंतरं वटोर्निर्गमनशुद्धिमाह—ब्रह्मेति । अथो अनंतरं हि युक्तं निजादगारतः स्वगृहात् प्रवसनं यो गमनं कर्तृपदं ब्रह्मचारिणं निजकर्मधर्मगं स्वकर्त्तव्यधर्मगं दधाति पुष्णाति किंविशिष्टं प्रवसनं प्रोक्तकालवत् उपनीतकालशुद्धियुक्तं कस्मिन् अधीरभोदये धीरतांशुदये किंविशिष्टे अधीरभोदये साधुना शुभग्रहेणाधिष्ठिते आश्रिते सति उपर्युक्तानुसारेण वर्ष प्रतिपादयति ॥ प्रवसनादिति पुनः पुनर्गमनं इति भावो. प्रयोगः ॥ ५३ ॥

आनकाननमुवाद्यजस्वनैर्मानुलेन पुनरागमः पुरः ॥
छांदसास्यनिगमोक्तिगंजितो गोमतिस्वशकसिद्धये चयोः ॥ ५४

अथ बटोर्वनात् पुनर्गृहानयने मातुलकृतगौरवं दर्शयति—आनकेति ॥ मातुलेन कृत्वा बटोर्माणवकस्य पुनरागमः पुनर्गृहे आगमनं भवेत् । कस्यै गोमतिस्वशकसिद्धये गौर्वाणी मतिर्बुद्धिः स्वं धनं श सुखं क ज्ञानं एषां निष्पत्तये । किंभूत आगमः पुरोऽग्रे छांदसास्यनिगमोक्तिरंजितः छांदसानां श्रोत्रियाणामास्येषु ये निगमा वेदास्तेषामुक्तिभिरुद्घोषणै रंजितो रागीकृतः शोभां प्राप्त इत्यर्थः ॥ पुनः किंभूत आगमः आनकाननसुवाद्यजस्वनैरुपलक्षितः उपलक्षणार्थे तृतीया आनकाननं भेरीप्रमुखं यत्सुवाद्यं शुभवादित्रं तस्माज्जातैः स्वनैः शब्दैरिति । यतोऽधुनापि मातुलः किंचिद्दानं विधानं विधाय बटुं गृहे आकारयति ॥ ९४ ॥

अथात्र सुबोधार्थं नामतः सर्वे संस्कारा लिख्यते—गर्भाधानं१ पुंसवनं२ सीमंतोन्नयनं३ तथा ॥ जातकर्म४ तथा नाम५ चंद्रदर्शनं६ मेव च॥१॥ अन्नस्य प्राशनं७ चूडा८ नवमं९ चोपवीतकं॥ गोदानं१०व्रातिकं११ चैव आदित्यव्रतमेव१२ च॥२॥उपनिष१३द्विवाहश्च१४ देवयज्ञ१स्तथैव च ॥ भूतयज्ञः२पितृयज्ञो३ ब्रह्मयज्ञ४स्तथैव च ॥३॥ नृयज्ञो५ दार्शिकं१ श्राद्धं पक्षादि २ श्रावणी३ तथा ॥ आश्वयुज्या४ तु यत्कर्म आग्रहायणकं५ तथा ॥४॥ सन्त्यष्टको६ तथा चैत्री७ स्मार्तकर्मणि योजिताः ॥ अग्न्याधेय १ मग्निहोत्रं २ दर्शेष्टिः ३ पौर्णमासिकी४ ॥ ५॥ चातुर्मास्यानि सर्वाणि५पशुबंध६स्तथैव च ॥ सौत्रामण्याग्रयणानि७ प्रोक्ताश्चैते हविर्मखाः ॥६॥ अग्निष्टोमो१त्यग्निष्टोम२ उक्थ्य३श्चै व तु षोडशी४॥७॥ अतिरात्रो५ वाजपेय६ आप्तोर्याम७ स्तथैव च॥सोमसंस्था तु विज्ञेया सर्वशाखासु ताः स्मृताः॥८॥शमो१दमो२ यम३श्चैव नियमश्च ४ चतुर्थकः ॥ प्राणायाम ५ प्रत्याहारो ६ ध्यानं ७ धारण ८ मेव च ॥ योगशास्त्रात्तु विज्ञेया अष्टौ चैवात्मनो गुणाः ॥ ९ ॥ अष्टाचत्वारिंशत् ख्याताः संस्काराः गौतमेन तु ॥ एभिस्तु संस्कृतो यो वै स नरः पुरुषोत्तमः ॥ १० ॥ अथैतान् प्रकारांतरेणाह ॥ गर्भाधान१मथापि पुंसवनकं २ सीमंत ३ जातक्रिया ४ नामा ५ न्नादन ६ चौलको ७ पनयनं ८ श्रौतव्रतान्यप्यथ ॥ चत्वारि स्नपनं ९ विवाहकरणं १० पंचाभियज्ञा अपि संस्थाः सप्त च सप्त सप्त इति ते संस्कारजा अप्यमी ॥ ११ ॥ अस्य व्याख्या ॥ नामादिसंस्कारा दश १० श्रौतकर्माणि चत्वारि शुक्रियं १ शाक्करं २ व्रातिका ३ उपनिषद् ४ पंचयज्ञा ५ पाकयज्ञसंस्थाः सप्त ७ हविर्यज्ञसंस्था सप्त ७ सोमसंख्या सप्त सर्वमिलनेऽत्र काव्ये ४० चत्वारिंशत्संस्कारा ॥ अत्रानुक्ता अप्यष्टौ ग्राह्या. दमः१ क्षांति२ अनसूया ३ शौचं ४ अनायासः ५ मंगलं ६ अकार्पण्य ७ अस्पृहा ८ ॥ ४८॥ इति पाठांतरं॥ इत्यष्टाचत्वारिंशत्संस्काराः ॥ नन्वत्र केचित्स्वसमयपरसमयानभिज्ञा लुंपकप्राया जैनानां संस्कारा न संतीति वदंत्यतस्तेषां नेत्रोद्घाटनाय सज्जनानां ज्ञानाय च जैनमतसंस्कारा अपि नामतो लिख्यते ॥ यदाहुराचारदिनकरे वर्द्धमानसूर्याः ॥ इह हि केचिद्दर्शनमोहांधधिया आर्हत १ सौगत २ वैशेषिक ३ नैयायिक ४ सांख्य ५ चार्वाक ६ तत्वालोकनामानुसारिण एव अदृष्टतत्परमार्थं सहृदयोपात्तप्रमातृप्रमेयप्रमाणप्रभावा आचारमेव तिरस्कुर्वंति न तेषां वचः साङ्गप्रमाणपदमुन्नेयं यतो भगवानृषभादिः अर्हन्नपि विदितसमस्तोपमार्थ

आगर्भाद्राज्याभिषेकपर्यंतं संस्कारांगीकारात्स्वदेहेप्याविश्चकार ॥ यत उक्तमागमे समणस्सणं उंमहावीरस्स अस्मापि उरेपिठमे हिवसे ठिईपडिकरंति तई दिवसे चंदसूरदंसणं कुर्णति इत्यादौ ॥ अत आदौ गृहधर्मकथने षोडशसंस्कारश्लोकाः॥ गर्भाधानं १ पुंसवनं २ जन्म ३ चंद्रार्कदर्शनं ४ ॥ क्षीराशनं ५ चैव षष्ठी ६ तथा निष्क्रमणं स्मृतं ७॥ तथाच नामकरण ८ मन्नमाशनमेव च ९॥ कर्णवेधो १० मुंडनं च ११ तथोपनयनं परं ॥ १२ ॥ पाठालंभो १३ विवाहश्च १४ व्रतारोपो १५ तकर्म च १६॥ अमी षोडशसंस्कारा गृहीणां परिकीर्तिताः ॥ ३ ॥ ब्रह्मचर्यं १ क्षुल्लकत्वं २ प्रव्रज्या ३ स्थापना ४ तथा ॥ तथाच योगोद्वहनं ५ वाचनाग्रहणं तथा ६ ॥ ततश्च वाचनानुज्ञा ७ सोपाध्यायपदस्थितिः ८॥ आचार्यपदयुक्तिश्च ९ प्रतिमोद्वहनं तथा १०॥ व्रतिनि व्रतदानं च ११ प्रवर्तिनीपदक्रमः १२ ॥ महत्तरापदाचारो १३ दिनरात्रिस्थितिर्द्वयोः ॥१४॥ ऋतुस्थितिश्च सव्याख्या १५ मरणस्य विधिः पुनः १६ ॥ द्वाराणि षोडशैतानि यत्याचारे प्रदर्शयेत् ॥ ७ ॥ प्रतिष्ठा बिंबचैत्यादेः १ शांतिकं २ पौष्टिकं ३ बलिः ४॥ प्रायश्चित्तविधिश्चैव ५ आवश्यकविधिस्तथा ६ ॥८॥ तपोविधि ७ स्त्रिविधोऽपि पदारोपणमेवच॥८॥ गृहिसाध्वोः समानानि द्वाराण्यष्ट प्रकीर्तयेत्॥९॥ उपनयनविधिस्तु इक्ष्वाकुवंशयादववंशप्राच्योदीच्यवंशादीनां जैनब्राह्मणानां उपनयनं यज्ञोपवीतधारणं च तथा क्षत्रियवंशोत्पन्नानां जिनचक्रिबलदेववासुदेवानां श्रेयांसदशार्णभद्रप्रभृतीनां नृपाणामपि हरिवंशविद्याधरवंशसंभवानां न जिनोपवीतधारणविधिः ॥ यतस्तेषामेतकुलादिपूर्वत्वमाभावात्पुनः कदाचिदुत्पत्तौ उग्रकुलादिषु संक्रामणत्वात् ॥ वैश्यानां कार्तिकश्रेष्ठिकामदेवादीनामप्युपनयनजिनोपवीतधारणं शूद्राणामपि आनंदादीनां उत्तरीयधारणं शेषाणां वर्णिगादीनामुत्तरासंगानुज्ञा ॥ जिनोपवीतं हि भगवतो जिनस्य गार्हस्थ्यमुद्रा यतीनां हि निग्रंथानां सर्वबाह्याभ्यंतरकर्मविमुक्तानां नव ब्रह्मगुप्तिगुप्तानां ज्ञानदर्शनचारित्ररत्नत्रयी दृढतैवामुद्रावनाभाविता हि सर्वेषामुदयो नव हि सूत्ररूपा नव ब्रह्मगुप्तियुतां रत्नत्रयीं वहंति तन्मयत्वाच्च समुद्रो जलपात्रं करे करोति न सूर्यो दीपं बिभर्ति । यत उक्तं 'अग्नौ देवोस्ति विप्राणां हृदि देवोस्ति योगिनां॥ प्रतिमास्वल्पबुद्धीनां सर्वत्र विदितात्मनां ॥ १ ॥ अतः शिखासूत्रविवर्जिता यतयो ब्रह्मगुप्तिरत्नत्रयकरणाकारणानुमतिषु सदैवाहता ॥ इति जैनमते आचारदिनकरतश्चत्वारिंशत्संस्कारा लिखिताः ॥ एषां मंत्रादिविधिस्तु तस्मादेव सविस्तरेण ज्ञेयः ॥ उक्तं च भगवत्यामपि ॥ एकादशशतस्यैकादशोद्देशे बलाधिकारे संस्कारविधानं ततेणं तस्स महब्बलस्य दारगतस्स अम्मापितरो अणुपुव्वेणं ठितिपडियं वाचं दसूरदं सावणियं वानागरियं वाणामकरण वा परं गामणं पयचं कामणं वा जेमावणं वा पिंडवद्वणं वा पजंपामणं वा कणवेहणं वा संवच्छरपडिलेहणंवा चोलोयणंवा उवणयणं वा आणाणियबहूनि गब्भादणजम्मणमादीयाइं कोतूयाइं करेति इति सूत्रपाठ. ॥ अथास्य वृत्तिः परं गामंति भूमौ सप्पणं पयचं कामणंति पादाभ्यां संचारणं जेमामणंति भोजनकारणं पिंडवद्दणंति कवलवृद्धिकारणं पजंपामति प्रजल्पनकारणं कणवेहणंति प्रतीतं संवच्छरपडिलेपहणंति वर्षग्रंथकारिणं चोलो-

पणगंति चूडाधरण उवणयणति कलाग्रहन गब्भाधाणजम्मणमाईयाइको उगाइकरेतात्ति गर्भादानादिषु यानि कौतुकानि रक्षाविधानादीनि तानि गर्भादानादीन्येवोच्यते ॥ इत्यभयदेवसूरय ॥ इत्यादि व्यवहारकर्म भगवद्भिरप्याचीर्णमागमे विनिर्दिष्टं च यतं व्यवहारो विबहुबलव जन देदेइकेवलीविषउमत्थमित्यादिगाथा ॥ १ ॥ लोकेप्येव 'चतुर्णामपि वेदाना धारको यदि पारग ॥ तथापि लौकिकाचार मनसापि न लङ्घयेत्' ॥ १ ॥ इति जैनमतावतरण संपूर्णम् ॥

इति श्रीकविकालिदासोदिते ज्योतिर्विदाभरणे व्रताध्यायोऽष्टम ॥ ८ ॥

इति श्रीपौर्णिमीयगच्छाधिराजभट्टारकपुरंदरश्रीमदिमाप्रभसूरीश्वरचरणसरोरुहचञ्चरीकायमान शिष्यभावरत्नविरचिताया श्रीकविकालिदासकृतज्योतिर्विदाभरणस्य सुखबोधिकायां व्रताध्यायोऽष्टम ॥ ८ ॥

विद्यारंभविवेकप्रकरणम्

विहितेऽथागमारंभे विद्यारंभो मयोच्यते ॥
आगमांगागमाशेषशास्त्रविद्यार्थसिद्धये ॥ १ ॥

अथ वटुकरणानंतरमध्ययन करोत्यतोऽनुष्टुभा विद्यारमाध्यायस्प्रधानमाह—**विहितइति** ॥ अथानंतरमागमारंभे वेदपठनारंभे विहिते सति मया कालिदासेन विद्यारंभ उच्यते केमर्थ आगमेति आगमागानि षडङ्गानि आगमाश्च अशेषशास्त्राणि चैता विद्याश्चतुर्दश तासामर्थसिद्ध्यैऽभिधेयप्राप्तये ॥ १ ॥

शाखापरिवृढपुज्योशनसामुदये ह्युपलब्ध्यै सततं स्यात् ॥
वागर्थिन इह भापायशसे विद्यारंभोऽमरवरदिवसे ॥ २ ॥

अथ उपचित्रा पादत्रयमात्रासमैकैकपादरचितेन पादाकुलकेन, साधारणविद्यारभशुद्धिमाह—**शाखेति** ॥ हि निश्चितं सतत निरतरं वागर्थिन शिष्यस्य विद्यारभ इह लोके उपलब्ध्यै ज्ञानाय स्यात् ॥ किंभूतायै उपलब्ध्यै भाषायशसे भाषाया सरस्वत्या यशो यस्या सा तस्यै वक्तृत्व कवित्वगुणायेत्यर्थ ॥ कस्मिन् अमरवरदिवसेऽमराणा देवाना मध्ये वर श्रेष्ठ इन्द्रस्तस्य दिवसे उत्तरायणे इत्यर्थ ॥ पुन कस्मिन् शाखापरिवृढो वेदशाखास्वामी पूज्यो गुरुश्च उशना शुक्रश्चैषा द्वन्द्वे उदये उद्गमे सति ॥ 'वाणी भाषा सरस्वती' इति हैम ॥ २ ॥

कश्चिदुपक्रममाह महर्षिर्देवशयनवत्कालमपास्य ॥
विद्यायाः क्षितिसुरविभुवर्षे काव्यगुरूदयकालसमेते ॥ ३ ॥

अथात्र मतांतरमाह—**कश्चिदिति** ॥ कश्चिन्महर्षिर्विद्याया उपक्रममारभमाह कस्मिन् क्षितिसुरा विप्रास्तेषा विभुश्चन्द्रस्तस्य वर्षे किंविशिष्टे क्षितिसुरविभुवर्षे काव्यगुरूदयकालसमेते

शुक्रगुरूदयसमयकालप्राप्ते किंकृत्वा देवशयनवरकालमपास्य विष्णुसुप्तकालं विहाय आषाढ-शुक्लैकादशीमारभ्य कार्तिकशुक्लैकादशीं यावदिति ॥ ३ ॥

पक्षद्वितयगताखिलघस्रैर्विष्टिकुयोगगलग्रहमुक्तैः ॥
संततमिह किल विद्यारंभः सर्वागमकृतसिद्धिप्रदः स्यात् ॥४॥

अथ साधारणविद्यारंभदिनान्याह—पक्षेति ॥ किलेति प्रसिद्धौ इह विद्यारंभः सततं निरंतरं सर्वागमकृतसिद्धिप्रदः स्यात् । सर्वागमेषु सर्वशास्त्रेषु कृतं सिद्धिपदं व्युत्पत्तिस्थानं येन स इति कैः पक्षेति पक्षद्वितयं शुक्लकृष्णपक्षद्वयं तस्मिन् गमो गमनं येषां ते एवंविधा येऽखिलाः समस्ता घस्रा दिवसास्तैः किंभूतैः पक्षद्वितयगताखिलघस्रैः विष्टिकुयोगगलग्रहमुक्तैः स्पष्टम् ॥ ४ ॥

नक्तंचरपुष्करविधुशर्वैस्त्वष्ट्रजपत्पन्नगभगभाद्यैः ॥
लोलल्घूडुसमेतैरखिलो विद्यारंभः सुमतिभिरुदितः ॥ ५ ॥

अथ साधारणविद्यारंभनक्षत्राण्याह—नक्तमिति ॥ नक्तचरादिनक्षत्रैः कृत्वा सुमतिभिः पंडितैरखिलो विद्यारंभ उदितः प्रोक्तः । नक्तचरो रक्षो मूलं पुष्करं जलपर्यायत्वात्पूर्वाषाढा रविर्हस्तः विधुर्मृगशीर्षं शर्वः शंभुस्तस्य ऋक्षमार्द्रा एषा द्वंद्वे एभिः किंभूतैः त्वष्टा चित्रा अजपत् पूर्वाभाद्रपदा पन्नगोऽश्लेषा भगस्तस्य भं पूर्वाफाल्गुनी एभिराद्यैर्युक्तैः पुनः किंभूतैः लोलल्घूडुसमेतैः चरलघुनक्षत्रयुक्तैः ॥ ५ ॥

पर्जन्यार्चितपद्विदुशनसामाहुरहानि वराण्यभिरूपाः ॥
विद्याया विधुमिहिरदिने वारंभे क्वचिदनसौम्यफलेऽस्मिन् ॥६॥

अथ साधारणविद्यारंभे वारानाह—पर्जन्येति ॥ अभिरूपाः पंडिता विद्याया आरंभे पर्जन्येनेंद्रेणार्चितौ पदौ यस्य स गुरुः वित् बुधः उशना शुक्रः एषामहानि दिनानि वराण्याहुः कथयंति ॥ क्वचिदस्मिन् विद्यारंभे विधुमिहिरदिने चन्द्रसूर्यदिने अत्र नपुंसके प्रथमाद्विवचनं कर्तृपदं अनसौम्यफले अनसौम्यं शुभं फलं ययोस्ते भवेतां ॥ फलेऽस्मिन्नित्यत्र संधिकार्यं मणीवादिवज्ज्ञेयमित्यादिवत् ॥ वा इति पक्षान्तरे ॥६ ॥

संधावमरतमिस्रादिनयोः संधौ मनुजतमिस्रादिनयोः ॥
विद्यारंभोऽमरगुरुशरदोः संधावृत्वोरपि न हि वरदः ॥ ७ ॥

अथ विद्यारंभेऽयनादिसंधिं निषेधति—संधाविति । अतिनिश्चितं विद्यारंभो वरदः शुभदायको नहि स्यात् कस्मिन् अमरतमिस्रादिनयोः देवरात्रिदिवसयोरुत्तरायणदक्षिणायनयोः संधावित्यर्थः ॥ पुनर्मनुजतमिस्रादिनयोर्मनुष्याणां रात्रिदिनयोः संधौ पुनः सुरगुरुशरदोः बृहस्पतेः संवत्सरयोः संधौ पुनः ऋत्वोः संधौ ॥ ७ ॥

संसमशरदिताविद्यारंभो विद्यार्थिनि तनुतेऽखिलदंभान् ॥
मासत्रयमवसानादिगतं समशरदः कुरुते गोसिद्धिम् ॥ ८ ॥

अथ विद्यारंभे समवर्षं निषेधति—संसमेति ॥ संसमाः सम्यक् अविषमाः शरदो वर्षाणि इतानि प्राप्तानि येन सचासौ विद्यारंभश्चेति समासः । समवर्षगतविद्यारंभो विद्यार्थिनि शिष्येऽखिलदंभान् समस्तकैतवानि तनुते विस्तारयति विद्यारंभे समवर्षनिषेध इत्यर्थः॥ पुनः समशरदः समवर्षस्य अवसानादिगतं आदिस्थितं अंतस्थितं च मासत्रयं गोसिद्धिं वाणीनिष्पत्तिं कुरुते समवर्षस्याद्यंत्यमासत्रयं शुभमिति ॥ ८ ॥

संक्रंदनसचिवे विदि धिष्ण्ये संहननाय ११ नभो१० वृष९धीस्थे ५॥
चंचलराश्युदये स तु शस्तोऽथासृजि वांशुभुवि त्र्यहितस्थे ॥९॥

अथ विद्यारंभे लग्नशुद्धिमाह—संक्रंदनेति ॥ विद्यारंभः शस्तः शुभः स्यात् ॥ कस्मिंन् हननं वपुः प्रथमं १ आय एकादशं ११ नभो दशम १० वृषो नवमं ९ धीः पंचमं ५ एषां द्वे एतद्भवनस्थे संक्रंदन इंद्रस्तस्य सचिवे गुरौ वा विदि बुधे वा धिष्ण्ये शुक्रे वा सति तु नश्चचलराश्युदये चरराशिलग्ने पुनः अहितस्थे । त्रिस्तृतीयं ३ अहितः षष्ठं ६ एतद्गतेऽसृजि भौमे अंशुभुवि शनौ वा ॥ ९ ॥

वाडवनृपविट्पद्यजनानां विद्यास्वयमखिलासु मयोक्तः ॥
विद्यापृथुलविशेषविभेदारंभविनिर्णयमत्र वदामि ॥ १० ॥

अथ साधारणविद्यारंभोपसंहारमाह—वाडवेति ॥ मया कालिदासेनायं विद्यारंभ उक्तः कासु वाडवा विप्राः नृपाः क्षत्रियाः विशो वैश्याः पद्यजनाः शूद्रा एषां । द्वंद्वे एषां विद्यासु किंभूतासु विद्यासु अखिलासु समस्तासु॥ अथात्राध्यायेऽहं विद्यापृथुलादिनिर्णयं वदामि ब्रवीमि वेद्याया. पृथुलो विस्तीर्णो विशेषः सामान्येतरो विभेदो नानाप्रकारः एषामारंभ उपक्रमस्तन्निर्णयस्तमिति ॥ इति पादाकुलकछंदोजातिः छंदोनुशासनतो ज्ञेय ॥ १० ॥

द्युनेतुर्दिनेऽत्रीतजन्मांगजान्हि प्रबुद्धा विदोषे च गाणित्यमूचुः ॥
॥ सदारंभमुग्रर्क्षरक्षोनलर्क्षैःसनासत्यशेज्येंदुभार्कांत्यलोलैः ॥ ११ ॥

अथ भुजंगप्रयातेन गणितशास्त्रारंभमाह—द्युनेतुरिति ॥ सदा प्रबुद्धाः पंडिताः गाणित्यं गणितशास्त्रस्यायं गाणित्यस्तमारंभमूचुः कथयामासुः । द्युनेतुर्दिने सूर्यदिने च पुनरत्रीतजन्मांगजान्हि अत्रेरृषेः सकाशात् इतं प्राप्तं जन्म येन स चंद्रस्तस्यांगजो बुधस्तस्यान्हि दिवसे किंभूते विदोषे दोषरहिते रात्रिवर्जिते वा ॥ च पुन कैःउग्रर्क्षाणि क्रूरसंज्ञभानि रक्षो मूलं अनलर्क्षं कृत्तिका एषां द्वंद्वे एभिः किंभूतैः नासत्यौ अश्विनी ईशः रुद्र आर्द्रा ईज्यः पुष्यः इंदुभं मृगशीर्षं अर्को हस्तः अंत्यं रेवती लोलानि चरसंज्ञोडूनि एभिः सह वर्तमानैः ॥ ११ ॥

गलग्राहभगांगजापर्वघस्रानशेषेष्वपास्यैतदारंभ इष्टः ॥
तथारंभका वक्ष्यमाणाः समस्ता विशस्ता भवेदेषु घस्रेषु शश्वत् ॥१२॥

अथात्र गलग्रहादीन्निषेधति—गालग्राहेति ॥ शश्वन्निरंतरं एतदारंभो गणित्योपक्रमे इष्टः शुभो भवेत् । केषु अशेषेषु घस्रेषु किंकृत्वा गलग्रहः प्रतीतः भर्ग ईश्वरस्तस्यांगजा विष्टिः पर्वाणि एषां घस्रान् दिवसान् आपास्य त्यक्त्वा तथा पुनरेषु घस्रेषु वक्ष्यमाणा आरंभका विशस्ता प्रशस्ताः स्युः ॥ १२ ॥

नयेच्छब्दशास्त्रागमारंभकालं कृती शेमुषीशोशनोविद्दिनेषु ॥
चलक्षिप्रमैत्रोडुशैवाश्रितेषु स्थितो धर्मशास्त्रादिकारंभिकालम् ॥१३

अथ व्याकरणप्रारंभशुद्धिमाह—नयेदिति ॥ कृती पंडितः शब्दशास्त्रागमारंभकाले नयेत् कुर्वीतेत्यर्थः ॥ शब्दशास्त्रं व्याकरणं तदेव आगमः शास्त्रं व्याकरणशास्त्रमित्यर्थः ॥ अथवा आगमो वेदो विद्या शास्त्रं वा एतयोरारंभ उपक्रमस्तमिति केषु शेमुषीशो गीष्पतिः उशना शुक्रः विद् बुधः एषां दिनेषु किंभूतेषु चलसंज्ञानि क्षिप्रसंज्ञानि मैत्रसंज्ञानि भानि शैवमार्द्रा एभिर्नक्षत्रैराश्रितेषु युक्तेषु तु पुनरत एषु उक्तमुहूर्तेषु कृती धर्मशास्त्रादिकारंभिकालं नयेदिति प्रतीतं धर्मशास्त्रं स्यात् ॥ 'स्मृतिर्धर्म संहिता' इतिहैमः ॥ १३ ॥

त्रियुग्मीश्रवोयुग्मभैः सद्ग्रहाणां समारंभितं सांख्यशास्त्रादिशास्त्रं ॥
मृदुक्षिप्रशंभूडुशंभूडुयुक्तैर्दिनेष्वेव तद्बोधसिद्धिं तनोति ॥ १४ ॥

अथ सांख्यशास्त्रादिप्रारंभशुद्धिमाह—त्रियुग्मीति ॥ सांख्यशास्त्रादिशास्त्रं कर्तृपदं वेदांतादिशास्त्रं तद्बोधसिद्धिं तनोति विस्तारयति तस्य शिष्यस्य बोधसिद्धिर्ज्ञाननिष्पत्तिस्तां किंभूतं सांख्यशास्त्रादिशास्त्रं सद्ग्रहाणां दिनेषु समारंभितं प्रारब्धं कैः त्रयाणां युग्मयोः समाहारस्त्रियुग्मी पूर्वात्रयमुत्तरात्रयमित्यर्थः । श्रवोयुग्मं श्रवणधनिष्ठा एषां द्वंद्वे एभिर्भैः किंभूतैः मृदुसंज्ञानि क्षिप्रसंज्ञानि शंभूडु आर्द्रा द्वितीयं शंभुडुपदं शंभु ब्रह्मा तस्योडु रोहिणी एभिर्युक्तैः ॥ १४ ॥

सशर्वभिगार्श्वीद्विजेज्यांबुपर्क्षं शयादिंदुसारंगदृक्सप्तकं च ॥
कवीनारवारानभिज्ञा वदेयुर्धनुर्वेदविद्यासमारंभकाले ॥ १५ ॥

अथ धनुर्वेदविद्यामुहूर्तमाह—सशर्वेति ॥ अभिज्ञा पंडिता धनुर्वेदविद्यासमारंभकाले शयादिभानि कव्यादिवारान् वदेयु कथयेयुस्तानाह ॥ शयात् हस्तनक्षत्रात् इंदुसारंगदृशां ताराणां सप्तकं नक्षत्रसप्तकं हस्त १ चित्रा २ स्वाती ३ विशाखा ४ अनुराधा ५ ज्येष्ठा ६ मूलमिति किंभूतं सप्तकं सशर्वेति श रुद्र आर्द्रा अः विष्णुः श्रवणः वा जलं पूर्वाषाढा भग. पूर्वाफाल्गुनी अश्विनी अश्विनी इंदुर्मृगशीर्ष अजो ब्रह्मा रोहिणी इज्य. पुष्यः अंबुपो वरुणस्तस्य भं शतभिषक् एभिः सहवर्तते यत्तत् । चपुनः कविः शुक्रः इन. सूर्य. आरो भौमः एषां वारान् ॥ १५ ॥

मृदुक्षिप्रतीक्ष्णाख्यलोलोडुवर्गे तमिस्राभियातींद्रसृग्वासरेषु ॥
सदा दोषविच्छास्त्रविद्या निरिंद्रे तथारंभयेद्गारुडं कर्म सर्वम् ॥ १६ ॥

अथ वैद्यकशास्त्रमुहूर्तमाह—मृद्विति ॥ सदा शिष्यः दोषविच्छास्त्रविद्याः वैद्यकशास्त्रविद्या आरंभयेत् । तथा सर्वं गारुडकर्मापि नागदमनादिकं आरंभयेत् पठेत् । कस्मिन् मृदुसंज्ञानि क्षिप्रसंज्ञानि तीक्ष्णाख्यानि लोलसंज्ञानि उडूनि एषां वर्गे किंभूते निरिंद्रे निर्गतं ऐंद्रं ज्येष्ठा यस्मात्तस्मिन् । च पुनः केषु तमिस्रा तामसी तस्या अभियातिर्वैरी सूर्यः इंदुः असृग् भौमः एषां वासरेषु । तमिस्रातमिस्रं सदंत्याविति शब्दप्रभेदे साधुसुंदरगणयः ॥ १६ ॥

हरेभे च तिष्ये भगर्क्षे हरेभे हरेभे च मैत्रे च वैश्वे हरेभे
हरेभे श्रविष्ठाद्वयेंऽत्ये सदन्हि किलारंभयेन्नाट्यसंगीतशास्त्रम् ॥१७॥

अथ नाट्यसंगीतशास्त्रमुहूर्तमाह—हरेरिति ॥ सदा शिष्यः नाट्यसंगीतशास्त्रमारंभयेत् पठनोद्यमं कुर्यात् । कस्मिन् हरेः सूर्यस्य भे हस्तनक्षत्रे च पुनः तिष्ये पुष्ये पुनर्भगर्क्षे पूर्वाफाल्गुन्यां पुनर्हरेश्चंद्रस्य भे मृगशीर्षे पुनर्हरेरिंद्रस्य भे ज्येष्ठायां पुनर्मैत्रेऽनुराधाया पुनर्वैश्वे उत्तराषाढायां पुनर्हरेर्विष्णोर्भे श्रवणे पुनर्हरेर्वायोर्भे स्वातौ श्रविष्ठाद्वये धनिष्ठायां शतभिषजि पुनरंत्ये रेवत्यां सदन्हि शुभग्रहवासरे च ॥ १७ ॥

योगवद्भिस्तरण्यास्फुजिद्वारयोर्वारवारस्य यादोर्यदिक्नम्रगे ॥
जैनविद्योग्रलोलाद्यमिश्रांत्यभैर्हंस आरंभिता नंदतायै भवेत् ॥१८॥

अथ स्रग्विण्या जैनविद्यापठनमुहूर्तमाह—योगवद्भिरिति ॥ जैनविद्या नंदतायै वृद्धिभावाय भवेत् । किंभूता जैनविद्या आरंभिता सती कस्मिन् हंसे सूर्ये यादोर्यदिग्नम्रगे यादसां जलजंतूनां मर्यः स्वामी वरुणस्तस्य दिक् पश्चिमा तस्या नमनशीलप्राप्तेऽपराण्हे इत्यर्थः ॥ पुनः कैः उग्रसंज्ञानि आद्यमश्विनी मिश्रसंज्ञे द्वे अंत्यं रेवती एभिर्नक्षत्रैः कृत्वा किंभूतैरेतद्भैः तरणिः सूर्यः आस्फुजित् शुक्रः एतयोर्वारयोर्वाऽथवा आरवारस्य योगवद्भिः संयोगयुक्तैः ॥ १८ ॥

यावनीयुक्तिभाषादिकारंभके दारुणं क्रूरभद्वीशपाथोर्यभैः ॥
विश्वकृद्वीतिहोत्रांत्यभैर्वाचिते वीज्यवारे सदारंभिते शं भवेत् ॥१९॥

अथ यवनविद्यामुहूर्तमाह—यावनीति ॥ सदा यावनी यवनसंबंधिनी या युक्तिभाषादिका क्रूरा या पारसी इत्यादिका विद्या तस्या आरंभके उद्यमे आरंभिते प्रारब्धे सति शं सुखं भवेत् । कस्मिन् वीज्यवारे विगतो नष्ट ईज्यो गुरुर्यस्मात् गुरुं विनान्यवारे किंभूते आचिते युक्तेऽन्विते इत्यपि पाठः ॥ कैः दारुणसंज्ञानि क्रूरभानि द्वीशं विशाखा पायसां जलानामर्यः स्वामी वरुणस्तस्य भं शतभिषक् एभिः वाऽथवा विश्वकृच्चित्रा वीतिहोत्रोऽग्निः कृत्तिका अंत्यमं रेवती एभिर्युक्ते ॥ १९ ॥

कश्चिदाहोशनोहोत्रभार्घ्योदयाद्व्येक१ वेदे४ ष्वि५ ना१२,
शे १०.श ११ घस्रैरथ॥ विंशर्ती २० द्रा १४ कृती २२
लेश १६ तत्वैरभिन्नानि भाहानि तद्विद्भिरुक्तानि च ॥ २० ॥

अथ यावन्यां मतांतरमाह—कश्चिदिति ॥ कश्चित् इति आह । इतीति किं तदाह अत्र यावनीविद्यारंभे उशनोऽहः शुक्रवारो भवेत् । अथ पुनस्ताद्विद्भिर्यवनविद्यावेदिभिः भाहानि भस्य चंद्रस्याहानि चांद्रदिनानि उक्तानि । तारीख इति म्लेंछभाषाया ॥ किंभूतानि भाहानि तुल्यानि कैः भार्घोदयाद्भानां नक्षत्राणामर्यः स्वामी चंद्रस्तस्योदयात् द्वौ २ एकः १ वेदा. ४ इषवः ५ इनाः १२ आशाः १० ईशाः ११ एतत्संख्यावस्रै च पुनर्विंशतिः २० इंद्रा १४ आकृतय. २२ इलेशाः भूपा १६ तत्वानि २५ एतत्संख्यावस्रैः । कोऽर्थः दृष्टचंद्र द्वितीयातिथितो ह्येकादिसंख्यामिततारीखदिनानि शुभानीति ॥ भाहानीति । 'भः भागुक्रोऽथ भ सोमो मा कांतिर्मंदिरेंदिरा' इत्येकाक्षरकोषे सौभरिः ॥ २० ॥

धीरधीरेतरक्षिपचांद्रेशवह्निध्ण्यवागीशविद्धेलिराजद्युगम् ॥
शिल्पशास्त्रादिविद्यासमारंभणं स्यादनध्यायवस्रान्यवस्रेष्वलम् ॥ २१ ॥

अथ शिल्पशास्त्रमुहूर्तमाह—धीरेति ॥ अलमित्यवधारणे शिल्पशास्त्रादि वास्तुकादिशास्त्रं तस्य विद्यासमारंभणं स्यात् । केषु अनध्यायवस्रान्यवस्रेषु अनध्यायदिनानि हित्वान्यदिनेषु किंभूतं तत् धीराणि स्थिरसंज्ञानि धीरेतराणि चरसंज्ञानि चांद्रं मृगशीर्षं ऐशं आर्द्रा एतानि अस्यास्तीति वहुव्रीहये एभिर्युक्तमित्यर्थः । पुनः किंभूतं धिष्ण्यः शुक्रः वागीशो गुरु. विद् बुधः हेलिः सूर्य. राजा चंद्र एषां द्युगं दिवसयासम् ॥ २१ ॥

मातृकारंभकालोऽस्ति पूर्वं मया कीर्तितश्चागमारंभकालो भवे ॥
तत्र ये शेषयोगाः स्मृतास्ते सदैवेक्षितुं सर्वविद्यासमारंभणे ॥ २२ ॥

अथोपसंहारेण मुहूर्तानाह—मातृकेति ॥ मया पूर्वं मातृकारंभकालः कीर्तितोऽस्ति च पुनर्भवे आगमारंभकालो वेदारंभसमयः कीर्तितोऽस्ति तत्र आगमादौ ये शेषयोगाः स्मृताः ते योगाः सदैव सर्वविद्यासमारंभणे ईक्षितुं विलोकनाय योग्या भवेयुः ॥ २२ ॥

षड्दलांभोजचक्रे लिखेन्मध्यगं भद्रवर्णं तदाद्येऽर्द्धमात्रात्मकम् ॥
वर्णमोंकारपूर्वानभिज्ञो दलेऽतोपसव्यान्नमःसिद्धवर्णान्क्रमात्॥२३॥

अथ काव्यत्रयेण मातृकाचक्रमाह—षडिति ॥ अभिज्ञः पंडितः षड्दलांभोजचक्रं षट्पर्णकमलचक्रं भद्रवर्णं लिखेत्तच्चक्रे मध्ये इत्यक्षरं मध्यगं मध्यभागे लिखेदित्यर्थः ॥ पुनस्तदाद्ये तस्य चक्रस्याद्ये दले प्रथमे पर्णेऽर्द्धमात्रात्मकं पूर्णमध्ये रेखाद्वयं०॥ वर्णं लिखेत् । अत प्रथमस्थात् अपसव्यं वामं सव्यं विदुः प्राज्ञाः "अपसव्यं तु दक्षिणं" इति कोषात् ॥ क्रमात् दक्षिणक्रमेण ओंकारपूर्वान् ओंनमः सिद्धायेति लिखेत् ॥ २३ ॥

भत्रयं भास्वदध्याश्रितर्क्षान्न्यसेद्‌भद्रवर्णेऽथ दारा हिमांशोरमः ॥
शेषतारागणाभिन्नषड्भागगाः खंडमात्रादिवर्णेषु देयाः क्रमात् ॥२४॥

अथात्र चक्रे भानि स्थापयति—भत्रयमिति ॥ पंडितो भास्वदध्याश्रितर्क्षात् सूर्यनक्षत्रात् भद्रवर्णे भाले स्थितकोष्टके भत्रयं नक्षत्रत्रयं न्यसेत् स्थापयेत् ॥ अथानंतरं पंडितेन हिमांशोश्चंद्रस्य दाराः नक्षत्राणि क्रमात्क्रमेण खंडमात्रादिवर्णेषु पूर्णरेखाद्वयादिवर्णेषु देयाः स्थाप्याः । किंभूता दाराः शेषेति शेषतारागणेन भत्रयवर्जितशेषचतुर्विंशतिनक्षत्रगणेनाभिन्नस्तुल्यः षड्भागः चतुर्भिर्नक्षत्रैरेको भागः एवं षड्भागास्तेषु गता इत्यर्थः ॥२४॥*

चक्रमंतर्भमत्रेऽत्र भाषार्थिनश्चार्द्धमात्राक्षरर्क्षे भवेद्भीतये ॥
शेषभानीति सिद्ध्यै विलोक्यं सदा सर्वविद्यासमारंभसिद्धावदः ॥२५॥

अथैतच्चक्रकोष्टगतफलमाह—चक्रेति ॥ अत्र चक्रेंतर्भे मध्यगतवर्तमानचंद्रनक्षत्रं कर्तृपदं भाषार्थिनोऽत्रे मरणाय भवेत्। चपुनरर्द्धमात्राक्षरर्क्षे कर्तृपदं अर्द्धमात्रे पूर्णरेखाद्वयस्थाने ऋक्षं वर्तमानर्क्षं नकारस्थाने वर्तमाननक्षत्रं च अनयोर्द्वैद्वे द्वे नक्षत्रे भीतये भयाय भवेतां। शेषभानि आभ्या व्यतिरिक्तानि शेषस्थानस्थितनक्षत्राणि सिद्ध्यै सिद्धकार्याय भवेयुः ॥ इत्यदश्चक्रं सदा विलोक्यं सुधीभिरिति शेषः कस्यां सर्वविद्यासमारंभसिद्धौ स्पष्टम् ॥ २५ ॥

मेशातारेशपित्र्यर्यमद्वीश्वरज्योतिराख्येननामेंदुमासेष्वथ ॥
यंत्रमंत्रोपचारक्रियारंभणं ह्यागमज्ञा विदुःकेचिदार्या इषे ॥ २६ ॥

अथ यंत्रमंत्रादिमुहूर्तमाह—मेशेति ॥ हि युक्तार्थे आगमज्ञा. शारदातिलकादिशास्त्रज्ञाः यंत्राणि सूर्यमनापादीनि मंत्राः शारदातिलकाद्युक्ता. उपचारो भूतादिसाधनं एषां क्रियारंभणं विदुः कथयति ॥ केषु मेशेति ॥ मा लक्ष्मीस्तस्या ईशो विष्णुः तारेशश्चंद्र. पितरः प्रतीताः अर्यमा द्वीश्वरौ शक्राग्नी एषां ज्योतींषि श्रवणमृगशीर्षमघोत्तराफाल्गुनीविशाखानक्षत्राणि एषा या आख्या संज्ञास्ताभिरितानि प्राप्तानि नामानि येषां ते च येषा श्रावण. १ एवं मार्गशीर्ष २ माघ. ३ फाल्गुनः ४ वैशाख ५ इति इंदुमासाश्च तेषु केचिदार्या आचार्या इषे आश्विने मासे विदुः ॥ २६ ॥

श्रौतमंत्राननध्यायतिथ्युज्झितैरंशुमत्सावनाहोभिरारंभयेत् ॥
व्यासपक्षद्वयेष्वागमोक्तानमापक्षतिप्रोज्झिताशेषपक्षेष्वपि ॥२७॥

अथ वेदमंत्रमुहूर्तमाह—श्रौतेति । मंत्रवित् आगमोक्तान् श्रौतमंत्रान् वेदसंबंधिमंत्रान् आरंभयेत् । कैः केषु अंशुमत्सावनाहोभिः सौरसावनदिनैः किंभूतैः अनध्यायतिथ्युज्झितैः स्पष्टं । अपि पुनः अमावास्या पक्षतिः प्रतिपत् आभ्यां प्रोज्झितास्त्यक्ता येऽशेषाः समस्ताः पक्षास्तेषु किंभूतेषु व्यासपक्षद्वयेषु आश्विनशुक्लकृष्णपक्षेषु ॥ २७ ॥

* आकृति नंबर २

यस्य येनास्ति मंत्राद्यमारभ्यते तद्धितं तस्य वारांभितं तारके ॥
तस्य देवस्य घस्रेऽथ वारेऽसतो दारुणे यक्षमंत्रादिकं साधयेत् ॥२८॥

अथ मंत्रादिव्रतारंभणशुद्धिमाह—यस्येति ॥ येन पुरुषेण यस्य देवस्य मंत्राद्यमारभ्यते तस्य पुरुषस्य तन्मंत्राद्यं आरंभितं हितं हितकारि अस्ति। कस्मिन् तस्य देवस्य तारके वाऽथवा तस्य देवस्य घस्रे दिने । अथ मंत्रवित् यक्षमंत्रादिकं साधयेत् कस्मिन् असतोऽशुभग्रहस्य वारे दारुणे तीक्ष्णनक्षत्रे ॥ २८ ॥

स्कंदमारद्युपूर्णाख्य ५।१०।१५ भद्रासु २।७।१२ वा
मंत्रयंत्रव्रतारंभमाद्या विदुः ॥ सानिलेंद्रानलर्क्षध्रुव-
र्क्षेष्वमुं धूर्जटीज्येंद्रदस्राच्युतर्क्षेषु च ॥ २९ ॥

अथ मंत्रादिस्वामिनं वर्णयति—स्कंदेति ॥ आद्याः पुरातनाचार्या अमुं मंत्रयंत्रव्रतारंभं विदुः जानंति कासु स्कंदः कार्तिकेयस्तस्य द्युः षष्ठीदिनं मारः कंदर्पस्तस्य द्युस्त्रयोदशी पूर्णाख्यभद्रासंज्ञाः प्रतीताः आसां द्वंद्वे आसु च पुनः केषु धूर्जटिः शंभुः आर्द्रा ईश पुष्यः इंद्रो ज्येष्ठा दस्रौ अश्विनी अच्युतः श्रवण एषु ऋक्षेषु किंभूतेषु सानिलेति अनिल स्वाती इंद्रानलौ शक्राग्नी तयो ऋक्षं विशाखा ध्रुवर्क्षाणि स्थिरसंज्ञानि एषा द्वंद्वे एभि सह वर्तते यानि तानि तेषु ॥ २९ ॥

भैमिकाकालमुक्तं दिनं मंत्रिणः सोमसूनोरशीतद्युतेः कव्यहः ॥
आह चाशेपमंत्रोपचारे सदा सद्गणोऽहः कचिच्चांद्रमप्यादृतम् ॥ ३०॥

अथ समस्तमंत्रोपचारमुहूर्तमाह—भैमिकेति ॥ सदा सद्गण. पंडितवर्गः अशेषमंत्रोपचारे मंत्रिणो गुरोः सोमसूनोर्बुधस्य अशीतद्युतेः सूर्यस्य च एषां दिनमाह कथयति। च पुन कव्यहः कवेः शुक्रस्य अहः दिनमाह। अपिपुन. कचित् चांद्रमहश्चंद्रदिनमादृतमंगीकृतं किंविशिष्टं दिनं भैमिकाकालमुक्तं विष्टिसमयवर्जितम् ॥ ३० ॥

पुष्करागारराशौ च रोपासने पूष्णि धिष्ण्येऽशुशुक्लसच्छवौ मंत्रिणि॥
मंत्रयंत्रव्रतोपासनोद्यापने नोचुरत्यादयोऽभीष्टये सूरयः ॥ ३१ ॥

अथ मंत्रादीनामाराधनादौ मीनार्कादीन्निषेधति—पुष्करेति ॥ अत्र्यादय सूरयः पंडिता मंत्रयंत्रव्रतानां उपासनं आराधनं च उद्यापनं पूर्णां बलिदत्त्यं च अनयो द्वंद्वे एतत्कर्मपदं अभीष्टये प्रति नोचुः नजगदुः। कस्मिन् पुष्करे जले अगारं गेहं यस्य स मीनस्तस्य राशौ रोपासने रोपो बाणस्तस्यासनं धनुस्तस्मिंश्च पूष्णि सूर्ये मीनार्के धनुष्यर्के सति इत्यर्थः ॥ पुनर्मंत्रिणि गुरौ धिष्ण्ये शुक्रे चांशुशुक्लसच्छवौ सूर्येण गाहतकांतौ अस्तंगते सति इत्यर्थः ॥ ३१ ॥

वर्णिनीनां व्रतोपासनं नो हितं कुंभतीर्थोदये वर्णिनीस्थे हरौ ॥
देवतासुप्तिकालेऽथ मासेऽधिके पूर्वदेवेज्यदेवेज्ययोरस्तके ॥ ३२ ॥

अथ कन्यासंक्रांत्यादौ स्त्रीणां व्रतं निषेधयति—वर्णिनीनामिति ॥ वर्णिनीनां स्त्रीणां व्रतोपासनं व्रताराधनं नो हितं हितकारि न स्यात् । कस्मिन् कुंभतीर्थोदये कुंभे घटे तीर्थं योनिरूप त्तिर्यस्य स कुंभतीर्थोऽगस्तिस्तस्योदये । यदुक्तं हेमचंद्रपादैः । 'योनौ पात्रे दर्शनेषु तीर्थशब्दस्त्रयोदशार्थेषु' तत्रोक्तः पुनर्हरौ सूर्ये वर्णिनीस्थे कन्याराशिगते पुनर्देवतासुप्तिकाले चातुर्मासके अथ पुनरधिके मासे पुनः पूर्वदेवेज्यः शुक्रः देवेज्यो गुरुस्तयोरस्तकेऽस्तमने सति ॥ ३२ ॥

स्यादभद्राय भद्रा न शंभोर्जपे मीनराशीनयोगस्तथाप्यर्चने ॥
होमकाले शिवायास्तमी तद्भवः साधने सर्वकालोऽथ मेशेनयोः ॥ ३३ ॥

- अथ महादेवादीनां पूजादौ विष्टिमुखाणामनिंद्यतामाह—स्यादिति ॥ भद्रा विष्टिरभद्राय दुःखाय न स्यात् । तथा मीनराशीनयोगो मीनार्कोऽभद्राय न स्यात् । कस्मिन् शंभोर्महादेवस्य जपेऽर्चनेऽपि पुनः शिवाया भवान्या होमकाले तद्भवस्तस्या भवान्या भवतीति तद्गणेशस्तस्य तमी रात्रिरभद्राय न स्यात् । अथ पुनर्मेशेनयोः मेशो रमापतिश्च इनश्च तयोर्विष्णुसूर्ययोः साधने सर्वकालोऽभद्राय न स्यात् ॥ ३३ ॥

निंद्यकालोऽप्यनिंद्यो मया कीर्तितोऽनिंद्यकालोऽथ निंद्योऽखिले साधने
अन्यदेवव्रतानां स यः सूरिभिस्तत्र सत्यादिभिः प्राक्तनैरादृतः ॥ ३४ ॥

अथ शुभाशुभकालग्रहणे निजमतं द्रढयति—निंद्येति ॥ मया कालिदासेन योऽनिंद्यः कालोऽपि निंद्यः कालः कीर्तितः । यो निंद्यकालोऽनिंद्य उक्तः कस्मिन् अन्यदेवव्रतानां साधने प्राक्तनैः सत्यादिभिः सत्यनामाचार्यादिभिः सूरिभिः पंडितैस्तत्र स मंत्रदेवस्य शरीरे अखिलः काल आदृतोऽङ्गीकृतः ॥ ३४ ॥

कास्यकंठाशयोरांसि गर्भःकटिःपद्द्वयं मंत्रदेवस्य सेनर्क्षतः ॥
त्र्य ३ ग्नि ३ रामा ३ ब्धि ४ वेदा ४ ग्नि ३ रामा ३ गमै ४ रोषधी-
शाबलास्तुल्यमानाः क्रमात् ॥ ३५ ॥

अथ मंत्रदेवस्य शरीरमाह—कास्येति । ओषधीशश्चंद्रस्तस्याबला नार्यो नक्षत्राणि सेनर्क्षतः सूर्यनक्षत्रात् क्रमात् त्र्यग्न्यादिभिस्तुल्यमाना मंत्रदेवस्य कास्यादिकानि स्युः ॥ त्रयः ३ अग्नयस्त्रयः रामास्त्रय ३ अब्धयश्चत्वारः ४ वेदाश्चत्वारः ४ अग्नयस्त्रयः ३ रामा ३ स्त्रयः ३ आगमाश्चत्वारः ४ एषां द्वंद्वे एभिः । कोऽर्थं सूर्यनक्षत्रात् नक्षत्रत्रयेण मंत्रदेवस्य कं मस्तकं स्यात् । एवं पुनर्नक्षत्रत्रयेणास्यं मुख पुनर्नक्षत्रत्रयेण कंठ. एषां द्वंद्वे कास्यकंठाः पुनर्नक्षत्रचतुष्केण शयौ हस्तौ पुनर्नक्षत्रचतुष्केण उरो हृदयं एषां द्वंद्वे हस्तयुग्मेन उरसा च शयोरांसि

इति बहुवचनं सिद्धं पुनर्नक्षत्रत्रयेण गर्भ उदरं पुनर्नक्षत्रत्रयेण कटिः पुनर्नक्षत्रचतुष्केण पदद्वयं चरणद्वयं स्यात् ॥ प्राण्यंगानां द्वंद्वे नित्यमेकत्वं अत्र तदनित्यत्वाद्वयबहुवचनं सिद्धं यतः "राजहंसारत्वमी चंचुचरणैरतिलोहितैः" इत्यभिधानचिंतामणिः। एवं सर्वत्र ज्ञेयम् ॥३५॥*

मूर्ध्नि मंत्रो विसिद्धिर्मुखे सिद्धिदः कालकृत्कंधरायां च दोषो रिपुः ॥
वक्षसीष्टोऽपि गर्भे भवेदर्थहा साधनादर्थदायी तु कट्यंघ्रिषु ॥ ३६ ॥

अथ मंत्रशरीरावयवफलमाह—मूर्ध्नीति ॥ यदि मंत्रपुरुषस्य मूर्ध्नि मस्तके वर्तमानचंद्रनक्षत्रं स्यात्तदा साधनान्मंत्रो विसिद्धिर्गतसिद्धिर्भवेत्साधकस्येति शेषः ॥ एवं मुखे सिद्धिदः स पुनः कंधरायां ग्रीवायां कालकृत् मृत्युदायकः। दोषो हस्तयो रिपुर्वैरी वक्षसि हृदये इष्टो वल्लभः गर्भे उदरेऽर्थहा द्रव्यघातकः कट्यंघ्रिषु कटौ चरणयोश्चार्थदायी द्रव्यदायकः ॥ ३६ ॥

स्वस्वयंत्रादिकारंभशुद्धौ तदुद्यापनं तत्र वा पुण्यकाले हितं ॥
मंत्रजाप्यांशहोमं च कुर्यात्सदा चेदपांपित्तचक्रे भशुद्धिर्भवेत् ॥ ३७ ॥

अथ मंत्रोद्यापनकालशुद्धिमाह—स्वस्वेति ॥ तदुद्यापनं तस्य मंत्रस्योद्यापनं तत्र स्वस्वमंत्रादिकारंभशुद्धौ वाथवा पुण्यकाले हितं हितकारी स्यात्। च पुनश्चेद्यदि अपांपित्तचक्रे भशुद्धिर्नक्षत्रशुद्धिर्भवेत् ॥ 'अपांपित्तधूमध्वजौकृष्णवर्त्मा' इतिहैमः ॥ तदा सदा मंत्रजाप्यांशहोमं कुर्यात्साधक इति शेषः । मंत्रजाप्यस्यांशो दशांशः स चासौ होमस्य तं यथा शतसंख्यमंत्रे दश आहुतय इति ॥ ३७ ॥

अथाग्निचक्रं विलिखेन्नवास्रं क्रमेण धाराधरभिद्दिगस्रात् ॥
रवींदुजेंद्विनिसितारजीवागुकेतवस्तत्र नियोजनीयाः ॥ ३८ ॥

अग्निचक्रम्

के २७	बु ६	शु ९
रा २४	सू ३	श १२
बृ २१	मं १८	चं १५

अथोपेंद्रवज्रयाग्निचक्रमाह—अथेति ॥ सुधीराग्निचक्रं लिखेत् ॥ किंभूतं नवास्रं नवकोष्टसमितं पुनः सुधिया तत्राग्निचक्रे क्रमेण धाराधरा पर्वतास्तान् भिनत्तीति तद्भिद् इंद्रस्तस्य दिक् पूर्वा तस्यास्तस्मात् कोष्टात् रवींद्वादयो योजनीयाः । रविः सूर्य इंदुजो बुधः इंदुश्चंद्रः इनिः शनिः सितः शुक्रः आरो भौमः जीवो गुरुः अगुः राहुः केतुश्चैषां द्वंद्वे इति ॥ ३८

भपंजरं हंससमाश्रितर्क्षाद्यथाक्रमं चक्रगतग्रहेषु ॥
होमे विदध्यान्नवधा विभक्तं खलायगं सिद्धिनुदस्ति यत्तत् ॥३९॥

अथास्मिंश्चक्रे भानि स्थापयति—भपंजरमिति ॥ सुधीः हंससमाश्रितर्क्षात्सूर्यनक्षत्रात् यथाक्रममनुक्रमेण होमे होमकुंडे चक्रगतग्रहेषु भपंजरं सप्तविंशतिनक्षत्रसमूहं नवधा विभक्तं नवभिर्भागैः कृत्वा विदध्यात् न्यसेदित्यर्थः ॥ तत्र यद्भं खलास्यगं क्रूरग्रहमुखगतं तद्भं सिद्धिनुत् सिद्धिनाशकमस्ति ॥ ३९ ॥

---

* आहुति नंबर ३

कवेःकचित्कल्पित ओषधीशे भपंजरांशश्च विधोः सितेऽस्तु ॥
तथैव शेषत्रिकलेंदुभागास्थितं तदृक्षत्रयमर्थहृत्स्यात् ॥ ४० ॥

अथ मतांतरमाह—कवेरिति ॥ कचित् कवे शुक्राद् भपंजरांशो नक्षत्रसमूहभाग ओषधीशे चंद्रे कल्पित च पुन कचित् विधोश्चंद्रात् भपंजराश सिते शुक्रेऽस्तु । तथैव पुन शेषत्रिकलेंदुभागस्थित शेषकलात्रयं चंद्रांशस्थित तदृक्षत्रय तन्नक्षत्रयमर्थहृत् द्रव्यनाशक स्यात्॥४०

जन्यादिसंस्कारविधानहोमे होमेंदिरायाश्च हरेःक्रतौ स्यात् ॥
नित्ये ग्रहेष्टौ च हुताशचक्रं नैमित्तिके दोषवहं न शश्वत् ॥ ४१ ॥

अथ जन्मादिविधानहोमेऽग्निचक्र निर्दूषणमाह—जन्येति ॥ शश्वत् निरंतर हुताशचक्रमग्निचक्र दोषवह दूषणधारक न स्यात् ॥ जन्यादिसंस्कारविधानहोमे जातकर्मादिविधिहोमे च पुनरिंदिराया लक्ष्म्या होमे पुनर्हरे कृष्णस्य होमे पुनर्नित्ययज्ञे पुनर्ग्रहेष्टौ ग्रहस्य इष्टिर्यज्ञस्तस्या पुनर्नैमित्तिके वैश्वदेवे । होमेंदिराया इत्यत्र सप्तम्येकवचनेऽयादेशे कृते यकारलोपे पुन सैषादिसहिता । यदुक्त लौकिकायेह तद्वदेव बहुलं भवेत् । सेमाम्यादंदे सैषा नित्यादीनामदुष्टता इति मार्गमाश्रित्य महाकविना संधि कृत ॥ ४१ ॥

यस्या मयारंभणशुद्धिरुक्ता तच्छुद्धिकालेऽथ तदीरितार्थं ॥
न संशयोऽत्र व्यवहारकर्म विधेयमादेशिभिरप्यशेषम् ॥ ४२ ॥

इति श्रीकविकालिदासोदिते ज्योतिर्विदाभरणे विद्यारंभविधिकाध्यायो नवमः ॥९॥

अथोपसंहारमाह—यस्येति ॥ निश्चित यस्या मया कालिदासेन आरंभणशुद्धिर्विद्यारंभशुद्धिरुक्ता कस्मिंस्तस्या विद्याया शुद्धिकालस्तस्मिन् । अथ पुनरादेशिभिर्गणकैरशेष व्यवहारकर्म विधेय कर्तव्यं किंभूत तदीरितार्थं तया शुद्ध्या ईरित प्रेरितोऽर्थो यस्मिंस्तत् । अत्र निर्णये संशय संदेहो नास्ति ॥ ४२ ॥

इति श्रीपौर्णिमीयगच्छाधिराजभट्टारकपुरंदरश्रीमहिमाप्रभसूरीश्वरचरणसरोरुहचंचरीकायमाणशिष्यभावरत्नविरचितायां श्रीकविकालिदासकृतज्योतिर्विदाभरणस्य सुखबोधिकायामनेकविद्यारंभवर्णनं नामाध्यायो नवमः ॥ ९ ॥

राजसत्ताध्यायः । ९

अथार्थपाशायनकेऽचलाभृतामुक्तोऽभिषेको नृपवंशजन्मनां ॥
पुष्पंधये तौलिगते त्वलं हरौ केचित्सहस्याहुरिषेऽभिषेचनम् ॥ १॥

अथ पठितानंतर नृपवंशजानां राज्याभिषेको भवत्यतः राजसत्ताध्यायसंधानमाह—अथेति ॥ अलमित्यवधारणेऽथानंतर अचलाभृता महीपतीनां नृपवंशजन्मनां राजवंशजाता-

१ उक्तं च वीरमित्रोदये—विवाहयात्राव्रतवास्तुयज्ञचौलोपवीतग्रहणे युगादौ ॥
तथाच दुर्गार्चनसंविधाने न वह्निचक्रं परिचिन्तनीयम् ॥ १ ॥

नामाभिषेकः पट्टाभिषेक उक्तः। कस्मिन्नर्धपाशायनकेऽर्थपो धनपतिः कुबेरस्तस्य आशा उत्तरा तस्या अयनके सति। तु पुनर्हरौ सूर्ये पुष्पं धयति आस्वादयतीति पुष्पंधयो भ्रमरः भ्रमरशब्द-पर्यायस्य ज्योतिषे वृश्चिकपर्यायार्थत्वात् वृश्चिकस्तस्मिन् वृश्चिकसंक्रांतावित्यर्थः॥ पुनस्तौले-गते तुलाराशिस्थे रवौ केचिदाचार्याः सहसि मार्गशीर्षे इषे आश्विने चाभिषेचनमाहुः॥ १॥

स्फुरद्घने निर्जरवंदिते च धिष्ण्येऽभिषिंचेदिह सार्ववीर्यं॥
सिंहासनस्थं किल सार्वभौममितातपत्रधृतिमीशमुर्व्याः॥ २॥

अथ गुरुशुक्रशुद्धौ चक्रवर्त्यभिषेचनमाह—स्फुरद्घनेति॥ किलेत्यवधारणे जन इह उर्व्या ईशं भूपं सार्वभौमं मांधातृप्रमुखषट्चक्रवर्तिसमानं जैनमते तु भरतादिसमानं चक्र-वर्तिनमभिषिंचेत्॥ कस्मिन् निर्जरवंदिते गुरौ धिष्ण्ये शुक्रे च किंभूते स्फुरद्घने दिव्य शरीरेऽनस्तंगते इत्यर्थः। किंभूतं भूपं सार्ववीर्यं आरस्य वीर्येण बलेन सह वर्तते य. स तं पुनः किंभूतं सिंहासनस्थं पुनः किंभूतं इतातपत्रधृतिं इता प्राप्ता आतपत्रस्य छत्रस्य धृतिर्धारणं येन स तं॥ २॥

सौरं सदा मंडलनेतुरह्नमनाहृतापाढनभोनभस्यं॥
किलाभिषेके व्यधिकेंदुमासं महीभुजः पेशलमाहुरार्याः॥ ३॥

अथ देशस्वामिनोऽभिषेकशुद्धिमाह—सौरमिति॥ किलेति सत्ये सदा आर्याः मंडलने-तुर्देशस्वामिनो महीभुजो भूपतेरभिषेके सौरमह्नं सौरवर्षं मनोहरमाहुः कथयंति॥ किंभूतमह्न अनाहृतास्त्यक्ता आषाढः नभ. श्रावणः नभस्यो भाद्रपदश्च एते मासा यस्मिंस्तत् अनाधृता-षाढनभोनभस्यं पुनः किंभूतं व्यधिकेंदुमासं अधिकचंद्रमासवर्जितं। मध्यममंडलाधीशः मध्यमो-ऽन्तनसम्राजापेक्षया सामान्य॥ मंडलस्य द्वादशराजमंडलमध्यात् मंडलमात्रस्य स्वामी इति हैम॥ 'नृपोऽन्यो मंडलेश्वरः' इत्यमरः॥ अन्यो भूम्येकदेशे यो नृप इति तट्टीका॥ 'मध्यमो मंडलेश्वरः' इति हलायुधः॥ भूम्येकदेशे द्वौ इति तट्टीका॥ ३॥

दुर्गाधिपं मंडलपालवत्स्यात्सदाभिषिंचेदथ शासनेशं॥
प्रजापतेः प्राग्गदिताभिषेककालः कवीज्योदयभागपीष्टः॥ ४॥

अथ दुर्गस्वामिनोऽभिषेकशुद्धिमाह—दुर्गेति॥ सदा जनो दुर्गाधिपं वप्रस्वामिनं शासनेश निर्देशाधिपं मंडलपालवत् देशनेतृवत् अभिषिंचेत्॥ अथ प्रजापतेर्नृपस्य प्राग्गदिताभिषेक-कालोऽपि इष्टः स्यात्। किंभूतः कवीज्योदयभाग् शुक्रगुरूदययुक्तः। प्रजापतेरिति॥ सामान्य राजशब्दवाची भूप्रजा नृप इति हेमवचनात्॥ ४॥

रिक्तातिथिं विष्टिमपास्य भूभृतोऽभिषेचनेऽक्षीणविभावरीश्वरं॥
पश्चादुभौ चान्तु कुयोगवर्जितौ हितौ भवेतामपि भूषणार्चितौ॥ ५॥

अथ भूपाभिषेके पक्षशुद्धिमाह—रिक्तेति ॥ भूभृतो महीपस्याभिषेचने उभौ पक्षौ हितौ हितकारिणौ भवेतां किंकृत्वा रिक्तातिथिं विष्टिं क्षीणचंद्रं चापास्य हित्वा किंभूतौ पक्षौ कुयोगवर्जितौ अनु पश्चात् किंभूतौ भूषणान्वितौ सुयोगान्वितौ ॥ ५ ॥

गुर्वौषधीशास्फुजिदंशुमद्विदामतिस्फुरद्बिंबकलाविभावतां ॥
तमीशशुद्धयाश्रितभस्य गोविभोरहानि शस्तान्यभिषेककर्मणि॥६॥

अथाभिषेके दिनशुद्धिमाह—गुर्विति ॥ गोविभोर्महीपतेरभिषेककर्मणि गुरु बृहस्पतिरोषधीशश्चंद्र आस्फुजिच्छुक्र अंशुमान् सूर्य विद् बुध एषां द्वंद्वे अहानि दिनानि शस्तानि प्रोक्तानि । किंभूतानां अतिस्फुरद्बिंबकलाविभावतां अधिकदेदीप्यमानमंडलकलाप्रभायुक्तानां अस्तरहितानामित्यर्थ ॥ किंभूतस्य गोविभो तमीशस्य चंद्रस्य शुद्धया दोषवर्जनेन आश्रितं भं नक्षत्रं राशिर्वा येन स तस्य तमीशशुद्धयाश्रितभस्य ॥ ६ ॥

राजा भवेद्बाहुजवंशभूर्यदाभिषेचने भूमिभुवोऽप्यहः स्मृतं ॥
तस्यासुरो याम्यमहोऽत्र वा विदो दिनं न सर्वत्र जगाद देवलः॥७॥

अथाभिषेके दिनशुद्धौ ऋषिमतमाह—राजेति ॥ यदा बाहुजवंशभूः क्षत्रियो राजा भवेत्तदा तस्याभिषेचने भूमिभुवो भौमस्याप्यहर्दिनं स्मृतं । अत्र देवलऋषिः सर्वत्र वारेषु पट्टाभिषेकं न जगाद उवाच कतिपयवारे जगादेत्यर्थ । अहोऽत्र इत्यत्र रुत्वविधिमपास्य कस्याचिन्मतमाश्रित्य कविना उत्वविधिरंगीकृत ॥ ७ ॥

राज्ञामलोलैणकलंकभेंद्रभक्षिप्रेदिरानायकतारकासु च ॥
मैत्रान्त्यचित्रास्वभिषेचनक्रियामुशंत्यविद्धासु शुभेतरैर्बुधाः ॥ ८ ॥

अथात्राभिषेके नक्षत्राणि दर्शयति—राज्ञेति ॥ बुधा राज्ञामभिषेचनक्रियामुशंति वांछंति कासु अलोलानि धीरसंज्ञानि एणकलंकश्चंद्रस्तस्य भं मृगशीर्षं इंद्रभं ज्येष्ठा क्षिप्रसंज्ञानि इंदिरानायक कमलापतिर्विष्णु श्रवण आसां द्वंद्वे आसु तारकासु भेषु च पुनर्मैत्रमनुराधा अंत्य रेवती चित्रा आसु किंभूतासु शुभेतरै पापग्रहैरविद्धासु ॥ ८ ॥

अनिर्बलैर्निर्मलमंडलांशुभिर्जनीशलग्नेशविपाकपांशुभिः ॥
भतश्च लग्नादपिसद्ग्रहोपगैर्नृपाभिषेको नृपशक्तिभाग्भवेत्॥९॥

अथाभिषेके गोचरशुद्धिमाह—अनिर्बलैरिति ॥ नृपाभिषेको राज्याभिषेको नृपशक्तिभाग राज्ञ शक्तयस्तिस्त्र प्रभुत्वोत्साहमंत्रजा इति ताभिरन्वितो भवेदित्यर्थ ॥ पै भतो गोचरात् शीलमात्र जनीशो जन्मराशिस्वामी लग्नेशो लग्नस्थराशिस्वामी विपाकपो दशास्वामी अंशु सूर्य एषां द्वंद्वे एभि किंभूतैरनिर्बलैर्बलिष्ठैः पुन किंभूतै निर्मला विशदा मंडलानि बिंबकिरणा एषां ते तैरस्तरहितैरित्यर्थ ॥ पुन किंभूतै सद्ग्रहोपगै शुभग्रहान्वितै ॥ ९ ॥

शस्तस्तिमिस्त्रीजितुमादिहोरास्थिरांशगुर्वंशवतीह लग्ने ॥
चरेतरेग्वंशुमंदशुजारैस्त्र्यायारिगैर्भूमिभुजोऽभिषेकः ॥ १० ॥

अथाभिषेके लग्नशुद्धिमाह—शस्त इति ॥ भूमिभुजो महीपतेरभिषेकः शस्तः प्रोक्तः कस्मिन् इह चरेतरे स्थिरे लग्ने किंभूते लग्ने तिमिर्मीनः स्त्री कन्या जितुमं मिथुनः आदिर्मेषः एतेषां होरा लग्नार्द्धं तिमिस्त्रीजितुमादिहोरा स्थिरांशो नवांशश्च गुर्वंशो गुरुनवांशश्च एषां द्वंद्वे एते अस्यास्तीति वतुप्प्रत्यये एतद्वत् तस्मिन् । पुनः कैः अगुः राहुः अंशुमान् सूर्यः अंशुजः शनिः आरो भौमः एषां द्वंद्वे एभिः अग्वंशुमदशुजारैः किंभूतैः त्र्यस्तृतीयं ३ आय एकादशं ११ अरिः षष्ठं एषु गतैः त्र्यायारिगैः ॥ १० ॥

सौम्यैरमित्रांत्यलयान्यभावगैरसाधुदृष्ट्युज्झितमूर्तिभिर्ग्रहैः ॥
स यो विभुत्वं विभुरेति वै भवेद्रसेशमत्तेभकदंबकेसरी ॥ ११ ॥

अथोचितभावगतग्रहैरभिषेकफलमाह—सौम्यैरिति ॥ यो विभुः सौम्यैर्ग्रहैर्विभुत्वं यदाभिषेकमेति प्राप्नोति किंभूतैर्ग्रहैरमित्र षष्ठ ६ अत्यो द्वादशं १२ लयो अष्टम ८ एभ्योऽन्यभावगैरितरभावप्राप्तैः पुनः किंभूतैः सौम्यैर्ग्रहैरसाधुदृष्ट्युज्झितमूर्तिभिः क्रूरग्रहदृष्टिवर्जितमंडलैः वै इति हेतौ स विभुः रसेशमत्तेभकदंबकेसरी भवेत् रसा भूमिस्तस्या ईशा राजानस्त एव मत्तेभाः प्रमत्तगजास्तेषां कदंबः समूहस्तस्मिन् क्रमगीत केसरी सिंह इति ॥ ११ ॥

शीर्षोदयैश्चोपचयाश्रितैः कुजे निजोच्चगे चोपचयेऽचरोदये ॥
पट्टाभिषेकादचलाभृतो दरो रिपोः पदं नैव दधाति मंडले ॥ १२ ॥

अथ भौमशीर्षोदयैरभिषेकफलमाह—शीर्षोदयैरिति ॥ अचलाभृतो महीपतेः पट्टाभिषेकात् रिपोः शत्रोर्दरो भयं मंडले देशे पदं नैव दधाति तत्र रिपुभयं न स्यादित्यर्थः ॥ कैः उपचयाश्रितैः त्रि ३ षट् ६ दशमै १० कादश ११ भावगतैः शीर्षोदयैर्मिथुनसिंहकन्यातुलवृश्चिककुंभैः पुनः कस्मिन् उपचये त्रिषड्दशमैकादशभवनेऽचरोदये स्थिरलग्ने च निजोच्चस्वोच्चभावगते कुजे भौमे सति ॥ १२ ॥

अथातपत्रं विलिखेद्विदिग्ध्वजं भद्रासनं तत्तलटम्रपूर्वगं ॥
सव्यापसव्यांसगचामरद्वयं तद्राज्यमुद्रावलयं च कीर्तितम् ॥ १३

अथ राजमुद्राचक्रमाह—अथेति ॥ सुधीः आतपत्रं छत्रं विलिखेत् । पुनरेवं विदिक् विदिग्ध्वजो यस्मिंस्तत् विदिग्ध्वजम् एवंविधं तत्तलटम्रपूर्वगं भद्रासनं पुनः सव्यापसव्यांसगचामरद्वयं वामदक्षिणस्कंधस्थितचामरयुग्मं लिखेत् । बुधैस्तदा राज्यमुद्रावलयं ग्रन्थविद्भिः प्रकीर्तितम् ॥ १३ ॥

विरोचनाधिष्ठितभाद्गमंडलं सिंहासनाधस्तलमध्यतो न्यसेत् ॥
सव्यापसव्योभयपार्श्वकोदितं तावत्तलस्थं भयुगं बलार्थहृत् ॥१४॥

अथात्र चक्रे नक्षत्राणि स्थापयति—विरोचनेति ॥ विरोचनाधिष्ठितभात् सूर्यनक्षत्रात् सिंहासनाधस्तलमध्यतोऽत्र मंडलं न्यसेत्स्थापयेद्दैवज्ञ इति शेषः । किंभूतं भमंडलं सव्यापसव्योभयपार्श्वकोदितं वामदक्षिणोभयपार्श्वस्थितम् इति नक्षत्रस्थापना ॥ अथैषां फलमाह॥ तावत्तलस्थं सिंहासनाधस्तलमध्यभागस्थितं भयुगं विभोः स्वामिनो बलार्थहृत् सैन्यपदार्थनाशकं स्यात्॥१४*

अधोऽसयुग्मे भचतुष्टयं वरं पश्चाद्विदिक्केतुयुगे प्रमापणं ॥
ताराचतुष्के भचतुष्कमिंद्रदिग्ध्वजाश्रितं मंडलकीर्तिवर्द्धनम्॥१५॥

अधोऽसेति ॥ अधोऽसयुग्मे भद्रासनाधस्तलस्कंधयुग्मे भचतुष्टयं नक्षत्रचतुष्कं वरं श्रेष्ठं स्यात् । पश्चाद्विदिक्केतुयुगे ताराचतुष्के विदिशोर्गतं भयुग्मं प्रमापणं विशरणं (प्रमयः प्रमापणमिति हैम मापण?) व्यापादनं स्यात् । इंद्रदिग्ध्वजाश्रितं पूर्वदिग्ध्वजयोर्गतं भचतुष्कम् उभयतो नक्षत्रस्य युग्मं मंडलकीर्तिवर्द्धनं नीवृद्यशोवृद्धिकारकं स्यात् ॥ १५ ॥

ततो भवेदासनपीठमध्यगं ताराद्वयं भीतिकरं प्रकीर्णयोः ॥
ज्योतिश्चतुष्कं जनयेद्धितं विभोश्छत्रश्रवोंसर्क्षचतुष्टयं लयम्॥१६॥

तत इति ॥ ततस्तदनन्तरम् आसनपीठमध्यगं भद्रासनमध्यभागगतं ताराद्वयं भीतिकरं भयानकं स्यात् । प्रकीर्णयोश्चामरयोर्ज्योतिश्चतुष्कं हितं जनयेत् ॥ छत्रश्रवोंसर्क्षचतुष्टयं छत्रकर्णस्कंधनक्षत्रचतुष्कं लयं मृत्युं जनयेत् । विभोः स्वामिन इति सर्वत्र योज्यं । यत्र नक्षत्रचतुष्कं प्रोक्तं तत्र उभयपार्श्वे भद्वयं स्थाप्यम् ॥ १६ ॥

तारात्रये छत्रविमौलिसंस्थे पट्टाभिषेकान्नरदेवता स्यात् ॥
सम्राडतश्चेदिह चक्रवर्ती स्वराडपापे ननु छत्रयुक्स्थे ॥ १७ ॥

तारेति ॥ छत्रविमौलिसंस्थे छत्रशिरसोपरिस्थिते तारात्रये इह पट्टाभिषेकात् स्वराड् निजराज्ये नरदेवता नरपतिः सम्राड् द्वादशराजचक्रस्य स्वामी स्यात् । यत ' येनेष्टं राजसूयेन मंडलस्येश्वरश्च यः । शास्ति यश्चाज्ञया राज्ञः स सम्राड्' इत्यमरः ॥ इति राजमुद्राधरः ॥ ननु निश्चितं यदि चेत् इह भद्रासने छत्रयुक्स्थेऽपापत्रययोगे स्थिते शुभग्रहे सति अतोऽभिषेकात् स्वराट् चक्रवर्ती स्यात्॥ ननु छत्र इत्यत्र उभयत्र संभाव्यतेऽन्यथा छंदोभंगाश्रितत्वात् स्वराडादिर्भावत्वादेव केन्द्रे छत्रमंडले इत्यादिपरेष्वपि ज्ञेयम् ॥ १७ ॥

भाग्यं भगे भूपणभाज्यविद्धे विधौ कभं भूभुवि मूलमोड ॥
विदि त्वहिर्बुध्न्यभमिंद्रसंघे शौन्यं कवौ छत्रयुगार्किलिङ्ग ॥ १८॥

* आर्द्रा नक्ष ४

अथ छत्रयोगे ग्रहनक्षत्रशुद्धिं दर्शयति—भाग्यमिति ॥ मगे सूर्ये भाग्यं पूर्वाफल्गुनी अविद्धं वेधवर्जितं एवं विधौ चंद्रे कभं को वायुस्तस्य भं स्वाती पुनर्भूभुवि भौमे मूलं पुनर्विदि बुधे ओडु अत्र पदच्छेदः कर्तव्यः अ उडु अः विष्णुस्तस्य उडु संधौ कृते त्रयोदशस्वरो जातः श्रवणः तु पुनरिंद्रवंद्ये गुरौ अहिर्बुध्न्यभं उत्तराभाद्रपदा पुनः कवौ शुक्रे शौच्यमग्निभं कृत्तिका पुनरार्किसूडु कोऽर्थः अर्कस्वर्कसूडु अत्रार्थभेदेऽपि सरूपाणामेकशेष इत्याश्रित्य प्रथमार्कसूशब्दस्य लोपः अर्कसूः शनिस्तस्मिन्नर्कसूः सूर्यस्य देवपर्यायत्वाददितिस्तस्या उडु पुनर्वसू किंभूते मगादिग्रहे भूषणभाजि सुयोगयुक्ते इति छत्रयुक् छत्रयोगः स्यात् ॥ १८ ॥

इहाभिषेकादितिचादृते भे सच्छत्रयुग्भाजि महारथो राट् ॥
अनेकशालेशनतीरितौजा यथाविधोऽन्यत्र तथाविधः स्यात् ॥१९॥

इहेति ॥ इति पूर्वोक्तप्रकारेण इह आसने च पुनःसच्छत्रयुगभाजि शुभछत्रयोगाश्रिते आद्दतेऽगीकृते भे नक्षत्रे सति अभिषेकात् राट् राजा महारथः सहस्रयोद्धा स्यात् । किंभूतो राट् अनेकेषां शालेशानां प्राकारस्वामिनां नतिभिर्नमनैरीरितं प्राप्तमोजो बलं यस्य स इति । अन्यत्र यथाविधो नक्षत्रादियोगस्तथाविधस्तादृक् राजा स्यादित्यर्थः ॥ १९ ॥

तपोधनोपासितराज्यलब्धौ तत्कालमार्यास्त्वभिषेकमूचुः ॥
स्ववंशराज्ञोऽन्यविभोरिते वा राज्यावसाने नरदेवतायाः ॥२०॥

अथाकस्माद्राज्यप्राप्तनरस्य तत्कालाभिषेकं दर्शयति—तपोधनेति ॥ तपोधनस्य महर्षेरुपासितात् सेवनात् राज्यप्राप्तौ सत्या आर्या नरदेवताया नृपस्य तत्कालमभिषेकमूचुः कथयामासुः । तु पुनरार्याः स्ववंशराज्ञो निजवंशनृपस्य वाऽथवाऽन्यविभोरन्यस्वामिनो राज्यावसाने पित्रादिमरणावसाने इते प्राप्ते सति नृपाभिषेकं तत्कालमूचुरिति ॥ २० ॥

अहेलिभिः पंचभिरुच्चगैर्ग्रहैर्नरो भवेन्नीचकुलेऽपि पार्थिवः ॥
तस्याभिषेको जनितोऽधिकैरतस्तज्जातकर्मैव न चात्र विभ्रमः ॥२१॥

अथ नीचकुलोत्पन्ननृपाभिषेकविधिमाह—अहेलिभिरिति ॥ अहेलिभिः सूर्यरहितैः पंचभिरुच्चगैर्ग्रहैः कृत्वा नीचकुले जनितो जन्मप्राप्तोऽपि नरः पार्थिवो भूपतिर्भवेत् । अतः पंचग्रहतोऽधिकैर्ग्रहैस्तस्याभिषेकोऽभिधीयते । तज्जातकर्म एव तस्य सोऽभिषेकः एव जातकर्म प्रोक्तं नीचकुलत्वेन पूर्वं संस्काराभावात् । अत्र विभ्रमः संशयो नास्ति ॥ २१ ॥

भशुद्धिमाहाय क्रमाद्ग्रहोक्तौ महीभुजः केवलछत्रमंडले ॥
सिंहासने विदुर्ध्वजे वत्सोऽभिषेकेऽपि च चामरेऽपरे ॥२२॥

अथ छत्रयोगे ग्रहनक्षत्रशुद्धिं दर्शयति—भाग्यमिति ॥ भगे सूर्ये भाग्य पूर्वाफल्गुनं अविद्ध वेधवर्जित एव विधौ चन्द्रे कभ को वायुस्तस्य भं स्वाती पुनर्भूसुवि भौमे मृ पुनर्विदि बुधे ओडु अत्र पदच्छेद कर्तव्य अ उडु अ विष्णुस्तस्य उडु सघौ कृते त्रयो शमस्वरो जात श्रवण तु पुनर्दिवबधे गुरौ अहिर्बुध्न्यभ उत्तराभाद्रपदा पुन कशो शौच्यमग्निभं कृत्तिका पुनरार्किसूडु कोऽर्थ अर्कस्वर्कसूडु अत्रार्थभेदेऽपि सरूपाणामेव इत्याश्रित्य प्रथमार्कसूशब्दस्य लोप अर्कसू शनिस्तस्मिन्नर्कसू सूर्यस्य देवपर्याय दितिस्तस्या उडु पुनर्वसू किंभूते भगादिग्रहे भूषणभाजि सुयोगयुक्ते इति उत्रयुक् छ स्यात् ॥ १८ ॥

इहाभिषेकादितिचादृते भे सच्छत्रयुग्भाजि महारथो राट् ॥
अनेकशालेशनतीरितौजा यथाविधोऽन्यत्र तथाविधः स्यात

इहति ॥ इति पूर्वोक्तप्रकारेण इह आसने च पुन तच्छत्रयुगभाजि शुभ आदृतेऽङ्गीकृते भे नक्षत्रे सति अभिषकात् राट् राजा महारथ सहस्रयोद्धा स्य राट् अनेकेषा शालेशाना प्राकारस्वामिना नतिभिर्नमनैरित प्राप्तमोजो बल यस्य न्यत्र यथाविधो नक्षत्रादियोगस्तथाविधस्तादृक् राजा स्यादित्यर्थ ॥ १९ ॥

तपोधनोपासितराज्यलब्धौ तत्कालमार्यास्त्वभिषेकमूच
स्ववशराज्ञोऽन्यविभोरिते वा राज्यावसाने नरदेवतायाः

अथाक्रम द्राज्यमाप्तनरस्य तत्कालाभिषेक दर्शयति—तपोधनेति ॥ धैरुपासितात् सेवनात् रा यप्राप्तौ सत्या आर्या नरदेवताया नृपस्य कथयामासु । तु पुनरार्या स्ववशराज्ञा निजवशानृपस्य वाऽथवाऽ राज्यावसाने पित्रादिमरणावसाने इते प्राप्त सति नृपाभिषेक तत्कालमू

अहेलिभिः पचभिरुच्चगैर्ग्रहैर्नरो भवेन्नीचकुलेऽपि
तस्याभिषेको जनितोऽधिकैरतस्तज्जातकर्मैव न

अथ नीचकुलोत्पन्नृपाभिषेकविधिमाह—अहेलिभिरिति ॥ अहे रुच्चगैर्ग्रहै कृत्वा नीचकुल जनिता न प्रमाणोऽपि नर पार्थिवा भूपति धिकैर्ग्रहैस्तस्याभिषेकोऽभिधीयत । तज्जातकर्म एव तस्य सोऽभि नीचकुलत्वेन पूर्व संस्काराभावात् । अत्र विप्रम सज्ञया नास्ति ॥

भशुद्धिमाहाय कुमारहारितो महीभुज केरलठन
सिंहासने सत्यमुखा विदुर्ध्वजे वत्सोऽभिषेकेऽपि च

केषु तत्र तेषु तान्येवाह। प्रजामंडलके जनपदे पत्तने नगरे च पुरे ग्रामे वा निकेतने गृहे चाधिगतेऽधिकारप्राप्ते चेति ॥ ३० ॥

अस्ते च जीवोशनसोरिने झषे शुचौ नभस्ये कुजमंदवासरे ॥
राज्यांगकर्माण्यथ कोविदा विदुर्न वक्ष्यमाणान्यसदिंदुवासरे ॥३१

अथ गुरुशुक्रास्तादिदोषे राज्यांगकर्माणि प्रतिषेधति—अस्ते चेति ॥ अथ कोविदाः पंडिताः राज्यांगकर्माणि वक्ष्यमाणानि न विदुः न कथयंति ॥ कस्मिन् जीवोशनसोर्गुरुशुक्रयोरस्तेऽस्तंगते सति पुनर्झषे मीने इने सूर्ये सति पुनः शुचौ आषाढे नभस्ये भाद्रपदे कुजमंदवासरे भौमशन्योर्दिने पुनरसदिंदुवासरे पापचंद्रदिने ॥ ३१ ॥

लघूडुचित्रादितिमातरिश्वभैरशेषकर्माणि गदंति कुंभिनः ॥
चराचरर्क्षेशपुरोहितोडुभिर्ध्वजाक्रिया वारणधिष्ण्यकर्म च ॥ ३२ ॥

अथ गजकर्मसु मुहूर्तमाह—लध्विति ॥ कोविदाः कुंभिनो गजस्याशेषकर्माणि समस्तकृत्यानि ध्वजाक्रिया पताकाद्यारोपणं च वारणधिष्ण्यकर्म च 'अंबारी' इति भाषायां गदंति। कैः लघूडूनि लघुसंज्ञभानि चित्रा अदितिः पुनर्वसू मातरिश्वा वायुस्तस्य भं स्वाती एषां द्वंद्वे एभिः पुनः चरसंज्ञानि अचरसंज्ञानि ईश आर्द्रा पुरोहितो गुरुः पुष्यः एषां द्वंद्वे एभिर्नक्षत्रैः ॥ ३२ ॥

सामोद्भवस्येनयुतोडुतो लिखेद्भान्यंतरे त्रीण्यनुमूर्धपिंडयोः ॥
तत्संधिनीदंडगतं च भत्रयं भानां द्वयं तुण्डगतं त्हृदि त्रयम् ॥ ३३ ॥

अथ काव्यद्वयेन गजचक्रमाह—सामेति ॥ सुधीः इनयुतोडुतः सूर्यभात् सामोद्भवस्य गजस्य मूर्द्धपिंडयोः कुंभयोरंतरे विचाले विदो त्रीणि भानि लिखेत् निवेशयेत् 'कुंभौ तु पिंडौ शिरसः कुंभयोरंतरं विदुः' इति हैमः ॥ एवं च तत्संधिनीदंडगतं शुंडादंडप्राप्तं भत्रयं पुनर्द्वयं तुंडगतं नक्षत्रयुग्मं मुखप्राप्तं पुनर्भानां त्रयं त्हृदि हृदये लिखेत् ॥ ३३ ॥*

ताराचतुष्कं तु ततोऽग्रपादयोः सदा परांघ्र्योर्भचतुष्टयं लिखेत् ॥
चतुष्टयं लूनलतागतं गजे चतुष्टयं पृष्ठगमिंदुयोपिताम् ॥ ३४ ॥

तारेति ॥ सदा सुधीस्ततस्तस्मादग्रपादयोस्ताराचतुष्कं लिखेत् । च पुनरपरांघ्र्योः पश्चाच्चरणयोर्भचतुष्टयं पुनर्लूनलतागतं पुच्छलताप्राप्तं इंदुयोपितां नक्षत्राणां चतुष्टयं करे कुर्यात् न्यसेत् इत्यर्थः ॥ करोतेस्तनादिगणमपास्य भ्वादिगणे उकारविकल्पार्थं पाठ उक्तस्तेन शापवपि करति करतः करंतीत्यादिरूपाणि हेममते भवंति पाणिनियास्त्वेनं पृथग्धातुं मन्यंते ॥ पुनः पृष्ठगं वंशव्याप्तं नक्षत्राणां चतुष्टयं लिखेत् ॥ ३४ ॥

* आकृति नंबर ५

शुंडादंडे कुंभयोरावलोक्यं वक्रेऽस्ता स्यान्छं त्हदि व्याधिरंघ्योः ॥
पश्चादंघ्योर्भीतिरस्तेति त्हने पृष्ठे व्याधिः कुंभिनोऽशेपकृत्ये ॥ ३५॥

अथ शालिनीछंदसैतच्चक्रगतनक्षत्रफलमाह—शुंडेति ॥ गजस्य शुंडादंडे कुंभयोश्च वर्तमानं चंद्रनक्षत्रं स्यात्तदा राः राज्यद्रव्यं अथवा लक्ष्मीः स्यात् ॥ एवं वक्त्रे मुखेऽस्ता मरण स्यात् । त्हदि त्हदये शं सुखं पुनरंघ्न्योरग्रचरणयोर्व्याधिर्गदः पश्चादंघ्रयोर्भीतिर्भय त्हने पुच्छेऽस्ता मरणं पृष्ठे व्याधिः इत्यमुना प्रकारेण कुंभिनो गजस्याशेपकृत्ये समस्तकार्ये गजचक्र विलोक्यं । शुंडा शुडा इति शब्दप्रभेदो दृश्यते ॥ ३५ ॥

तिर्यग्वक्रैर्भैरिनैनीज्यविद्भिः कुंभिज्योतिःशुद्धिगैर्वेह शस्तः ॥
धीरे लग्ने शुद्धकेंद्रत्रिकोणे सन्नात्यः व्यालोपवात्यादिबंधः ॥ ३६ ॥

अथ गजबंधमुहूर्तमाह—तिर्यगिति ॥ इह सन्नात्यः समरोचितः व्यालो मदोन्मत्तो गज उपवाह्यो राजवाह्योऽरण्यहस्ती एपा द्वंद्वे एपा बंधः शस्तः मोक्षः कैः तिर्यग्वक्त्रैर्भैस्तिर्यङ्मुखनक्षत्रैर्वा इनः सूर्य ऐनिः शनिः ईज्यो गुरुः विद् बुधः एपा द्वंद्वे एते. किंभूतै कुंभिज्योति शुद्धिगैर्गजनक्षत्रशुद्धिमाप्तै । पुनः कस्मिन् शुद्धकेंद्रत्रिकोणे धीरे लग्ने सति १।४।७।१०।९।५ व्यालो 'दुष्टगजो गंभीरवेद्यवमताकुश. राजवात्यः सन्नात्यः समरोचित' इति हैमः ॥ ३६ ॥

दाक्षायण्यर्यैन्द्रसूवातभांत्यक्षिप्राणोर्योडुश्रविष्ठासु धीराः ॥
लग्नाल्लेलात्त्यायकेंद्रेपु सौम्यैराजानेयाद्यश्वकर्माण्यथाहुः ॥ ३७ ॥

अथाश्वकर्मशुद्धिमाह—दाक्षायणीति ॥ धीरा. पंडिता आजानेया कुंभीनाश्वा इत्यादयोऽश्वाः एपा कर्माणि आहुः कैः लग्नात् लेलाल्चरराशेस्त्रय ३ आयः ११ केंद्राणि १।४।७।१० एषु भावेषु स्थितैः सौम्यैः शुभग्रहैः पुनः कासु दाक्षायणीना नक्षत्राणामर्यः स्वामी चंद्रो मृगशीर्ष इंद्रसूरिंद्रमाताऽदितिः पुनर्वसू वातभ स्वाती अत्य रेवती क्षिप्रसज्ञा इति अर्णोयों नडस्वामी वरुणस्तस्योडु शततारका श्रविष्ठा धनिष्ठा आसा ताराणा द्वंद्वे आसु ॥ ३७ ॥

वाहे मौलिस्तंभतो भत्रयं स्यात्सेनादर्थायास्यगा लब्धकामाः ॥
तारास्तिस्रःपंच त्हत्स्था वरिष्ठा दुष्टाश्चाग्रांघ्न्योश्चतस्रःप्रदिष्टाः ॥ ३८ ॥

अथाश्वचक्रे भानि स्थापयति—वाहे इति ॥ सेनात् सह इनेन सूर्येण वर्तते यत्तस्मात् सूर्यनक्षत्रात् वाहेऽश्वे मौलिस्तंभतो मस्तकस्तंभतो भत्रय नक्षत्रत्रयमर्थाय द्रव्याय स्यात् । अर्थात् वर्तमानचंद्रभ यदाऽत्र भवेत्तदेति । एवं आस्यगा मुखगतास्तिस्रस्तारा लब्धकामा प्राप्तकामाः प्रदिष्टाः प्रोक्ताः । पुनस्त्हत्स्थाः त्हदयस्थिताः पंचताराः वरिष्ठाः श्रेष्ठा पुनरग्रांघ्न्योरग्रपादयोश्चतस्रस्तारा दुष्टाः प्रदिष्टाः ॥ ३८ ॥*

---

* आकृति नंबर ६

तारा: पश्चात्पादयोर्मांद्यदाः स्युर्वेदाभिन्नाः पृष्ठदेशे चतस्रः ॥
व्यर्था लूने भानि चत्वारि हान्यै कर्मण्याश्वे चेत्यदश्चिंतनीयम् ॥ ३९॥

तारा इति ॥ पश्चात्पादयोर्वेदाभिन्नाश्चतस्रस्तारा मांद्यदाः रोगदाः स्युः । एवं पृष्ठदेशे वशो चतस्रस्तारा. व्यर्था निष्फला. स्यु. । लूने पुच्छे चत्वारि भानि हान्यै विनाशाय स्यु. । इति प्रकारेण अश्वस्य इदं आश्वं तस्मिन् आश्वेऽश्वसंबंधिनि कर्मणि अदश्चक्रं चिंतनीयं विबुधैः॥ ३९॥

लोलमैत्रलघुजिष्णुकभेषु स्यंदनाखिलविधानमथाहुः ॥
सेनसद्युषु वशां१बु४तप९स्थैः साधुराशिवति साधुभिरंगे ॥ ४०॥

अथ स्वागताछंदसा रथकर्माह—लोलेति ॥ अथानंतरं धीराः स्यदनाखिलविधान रथाना समस्तकार्यमाहुः । केषु लोलसंज्ञानि मैत्रसंज्ञानि लघुसंज्ञानि जिष्णुरिंद्रो ज्येष्ठा को ब्रह्मा रोहिणीभं एषा द्वंद्वे एषु ।किंभूतेषु सेनसद्युषु सूर्यशुभग्रहदिनैः सह वर्तमानेषु पुनः कस्मिन् साधुराशिवति शुभग्रहराशियुक्तेऽगे लग्ने सति पुनर्वशा स्त्रीभवनं पुनः अंबु चतुर्थं तपो नवमं एतद्भवनस्थै· साधुभि. शुभग्रहैः ॥ ४० ॥

ऊष्मवृष्णिकरकीर्णपुरर्क्षाद्देयमृक्षवलयं वलयस्य ॥
सव्यभागनिचितभ्रममग्रादाविमध्यमनसो नवभागम् ॥४१॥

अथ रथचक्रे भानि स्थापयति—ऊष्मेति ॥ ऊष्मवृष्णिः सूर्यस्तस्य करै. कीर्णं व्याप्तं पुरं यस्य तच्च ऋक्षं च तस्मात्सूर्यभात् सुधिया ऋक्षवलयं भचक्रं देयं न्यासीकर्त्तव्यं । कस्मात् अनसः शकटस्य वलयस्य चक्रस्याग्रादग्रभागात् आविमध्यं मध्यभागपर्यंत ।किंभूतं ऋक्षवलय नवभागं नवभिर्भागैः स्थितं पुनः किंभूत सव्यभागनिचितभ्रमं वामभागभरितभ्रमणं वृष्णिरिति प्रष्मिः वृष्मिः शब्दप्रभेदोक्तोऽयं शब्द. दंत्यौष्मवर्णस्त्वजादिपाठे संभाव्यते ॥ ४१ ॥ *।

अग्रभे भवति संकलिरत्ता कूबरोडुनि जयोऽथ रथांगे ॥
संधिभेऽर्थहतिरंतरसंधौ भीतिरिष्टमनसो ननु गर्भे ॥ ४२ ॥

अथैतच्चक्रगतभफलमाह—अग्रेति ॥ अनस शकटस्य अग्रभेऽग्रत वर्तमानचद्रभे संकलिर्युद्धं भवति । एवं कूबरोडुनि कूबरे युगवरे 'कागरा' इति भाषाया । उडुनि वर्तमानचंद्रनक्षत्रे-ऽत्ता मरणं भवति । रथांगे रथपादे चक्रयुग्मे जय· स्यात् । संधिभे संधिगतनक्षत्रेऽर्थहतिर्द्रव्य-हरणं अंतरसंधौ मध्यसंधानगतैर्भैर्भीतिर्भयं गर्भे मध्यभागभे इष्टं शुभं ननु निश्चितं ॥ ४२ ॥

आंत्ययाम्बुभचलाचलमैत्रद्व्यर्यदास्रलघुभेर्निचितेषु ॥
सद्भिरुक्तमृषभाखिलकार्यं व्यारविद्यमसमग्रदिनेषु ॥ ४३ ॥

अथ वृषभसमस्तकर्माह—आंत्येति ॥ सद्भि· पंडितै· वृषभाखिलकार्यं सौरभेयाना समस्त कृत्यमुक्तं प्रोक्तं केषु व्यारविद्यमसमग्रदिनेषु भौमबुधशनिवर्जितेषु सर्वदिनेषु किंभूतेषु निचितेषु

* आकृति नंबर ७

व्याप्तेषु कैः आर्य्यं रेवती यातुभ मूल चलसंज्ञानि अचलसंज्ञानि मैत्रं अनुराधा द्व्यर्यं द्विस्वा- मिकं विशाखा दास्रमश्विनी लघुसंज्ञानि एभिर्भैः ॥ ४३ ॥

याप्ययाननिखिलव्यवहाराः सद्युसत्तिथिषु सत्सु वराः स्युः ॥
उत्तरेंद्रलघुमैत्रचलर्क्षैः कर्कके १।४।७।१० त्युपचये३।६।११ऽथ खलेषु॥

अथ शिबिकासमस्तकर्माह—याप्येति ॥ हि युक्तार्थे याप्ययान शिबिका तस्या निखिल व्यवहाराः वराः श्रेष्ठा स्यु ॥ केषु सद्युसत्तिथिषु शुभदिनशुभवासरेषु सत्सु पुनः कर्क १।४।७।१०। उपचये ३।६।११।१०।११। खलेषु खलग्रहेषु पुनः कैः उत्तरात्रय इंद्रो ज्येष्ठा लघुसंज्ञानि मैत्रसंज्ञानि चलसंज्ञभानि एभि ॥ ४४ ॥

पेटके हरिदिशोंऽशुयुतर्क्षात्पंच पंच हरितः शिबिकायाः ॥
मध्यगा गुणमिताश्च चतस्रो दंडगा विधुवशा ननु देयाः ॥४५॥

अथ शिबिकाचक्रे नक्षत्राणि स्थापयति—पेटकेति ॥ अंशुयुतर्क्षात् सूर्यभात् शिबिकाया पेटके हरिदिशि पूर्वतो हरितश्चतुर्दिक्षु पंच पंच विधुवशा नक्षत्राणि देया । हरित इति सार्व- विभक्तिकस्तस् इत्येके इतिबहुवचन ॥ न पुनर्मौलिगा मस्तकगता गुणमितास्त्रिसंख्यास्तारा देया. पुनर्दंडगा वेणुगाते द्वे द्वे इत्यर्थ । ताश्चतस्रस्तारा देया । ननु निश्चितं दैवज्ञैरिति शेष ॥ ४५ ॥ *

जिष्णुदिश्यपि कमंतकदिग्गं भं गदाय दरदं वनपाशं ॥
वित्तपाशमतिवेदनमृक्षं मध्यवेणुगममीष्टमिह स्यात् ॥ ४६ ॥

अथ शिबिकाचक्रगतनक्षत्रफलमाह—जिष्णुरिति ॥ इह चक्रे जिष्णुदिशि पूर्वस्या यदा भ वर्तमानचन्द्रनक्षत्र स्यात्तदापि निश्चितं कं सुख स्यात् । एवं अंतकदिग्ग दक्षिणदिक्- स्थितं भ नक्षत्र गदाय रोगाय स्यात् । पुन वनपो जलस्वामी वरुणस्तमस्तुते प्राप्नोति इति वनपाश वारुणदिग्गत भ दरद भयद स्यात् । वित्तपाशं धनददिग्गत उत्तरस्या भ्रमति वेदन बहु पीडाकृत् । मध्यश्च वेणुश्च तौ गच्छतीति तन्मध्यवेणुगमिति मध्यग मौलिगत वेणुग उभयपार्श्व वशप्रोतमासमभीष्ट शुभ स्यात् ॥ ४६ ॥

पुष्पवंतकविजीवदिनेषु क्षिप्रधीरमृदुशौरिभशाक्रैः ॥
सेवनाद्यखिलदिव्यशशांके सर्वकर्म गदितं त्वनुगानाम् ॥ ४७ ॥

अथ राजसेवामुहूर्तमाह—पुष्पेति ॥ हि युक्तार्थं अनुगाना सेवकाना सेवन दि भूपसेवादि सर्वकर्म गदित प्रोक्त । कस्मिन् अखिलदिव्यशशांके गचन्द्रे पुन केषु पुष्पवतौ रविशशिनौ कविः शुक्र जीवो गुरुरेषा दिनेषु पुन कैः क्षिप्रसंज्ञानि धीरसंज्ञानि मृदुसंज्ञानि शौरिर्विष्णु श्रवण शाक्र ज्येष्ठा एषा द्वंद्व एभि कृत्वा ॥ ४७ ॥

*४५ आहाने नंबर ४

मारवर्तिनि गुरावसितेऽरावारहंसवति तेजसि वाये ॥
के सितेऽब्जवति वाथ विलग्ने सेवनं मुनिवरा वरमाहुः ॥ ४८ ॥

अथ सेवाया लग्नशुद्धिमाह—मारेति ॥ मुनिवरा सेवन राजसेवा वरमाहु । कस्मिन् मारवर्तिनि कन्दर्पभाजि सप्तमभावे गुरौ सति । अथ पुनररौ शत्रौ षष्ठभावेऽसिते शनौ सति पुनरारहंसवति भौमसूर्ययुक्ते तेजसि पराक्रमभावे तृतीये वाऽथवा आये एकादशभावे सति पुन के सुखे चतुर्थभावे सिते शुक्रे सति वाथवाऽब्जवति चन्द्रयुक्ते विलग्ने लग्ने सति ॥ ४८ ॥

कासराख्यकरभाविमुखानामुक्तपार्श्वलपनोडुषु सर्वम् ॥
वारुपेंद्रवसुवारिनभेषु कर्म सद्भिरिनसद्युषु वैनौ ॥ ४९ ॥

अथ माहिषोष्ट्रादीना कर्माह—कासरेति ॥ सद्भि पडितै कासराख्यो महिष करभ उष्ट्र अविर्मेष मुख आदिर्येषा तेषा महिषादीना सर्व कर्म कथित । केषु उक्तपार्श्वलपनोडुषु प्रोक्ततिर्यङ्मुखनक्षत्रेषु । पुन केषु वारपेति । वार्जलं पूर्वाषाढा उपेंद्रो विष्णुः श्रवणो वसु धनिष्ठा वारि जल तस्य इन स्वामी वरुणस्तस्य भं शतभिषक् एषा द्वंद्वे एषु भेषु पुन इन सूर्य सद्दिव शुभग्रहवासरा एषा द्वद्वे एषु वाऽथवा ऽनौ शनौ ॥४९

स्याद्यमोष्णघृणिमंत्र्यरुणानामन्हि मैत्रलघुभर्गकभैंद्रैः ॥
कर्म पालनमुखं हि सपूर्वैः पुंडरीकमुखहेतिनखानाम् ॥ ५० ॥

अथ सिंहादीना पालनमुहूर्तमाह—स्याद्यमेति ॥ हि युक्तार्थे पुडरीकमुखा चित्रकायप्रमुखा हेतिवत् प्रहरणवत् नखा एषा ते तेषा व्याघ्रप्रमुखनखरायुधाना पालनमुख कर्म स्यात् । कस्मिन् यमोष्णघृणिमत्र्यरुणाना शनिसूर्यगुरुभामानामन्हि दिने पुन कै मैत्रसज्ञानि लघुसज्ञानि भर्ग शिव आर्द्रा को ब्रह्मा रोहिणी ऐंद्रं ज्येष्ठा एषा द्वंद्वे एभि कैर्भैः सपूर्वै पूर्वात्रययुक्तै ॥ ५० ॥

स्याद्वलीमुखरुरुप्रमुखानामैशधीरलघुलोलमृगर्क्षैः ॥
खेलतोऽहनि सतो नरनेतुः कर्मभिः शमटवीशरणानाम् ॥ ५१ ॥

अथ वानरप्रमुखाना खेलनादिकर्ममुहूर्तमाह—स्याद्वेति ॥ अटवीशरणाना वलीमुखा वानरा रुरवो मृगभेदा प्रमुखा एषा वलीमुखरुरुप्रमुखाना खेलत खेलनात् कर्मभि नरनेतुर्नृपस्य श सुख स्यात् । कस्मिन् सत शुभग्रहस्याहनि दिने पुन कै ऐशमार्द्रा धीर सज्ञानि लघुसज्ञानि मृगर्क्षं मृगशीर्ष एषा द्वद्वे एभि ॥ ५१ ॥

चीरताम्रमुकुटादिशकुंतास्तिर्यगाननतमीशवशास्तु ॥
शश्वदुद्वदनभेषु भजेद्राडास्फुजिद्विदिनजीवभपान्हि ॥ ५२ ॥

कातरयोपितोः' इति कोषः ॥ पुनः कस्मिन् सद्भिः शुभग्रहैर्युतानि अचलमानि स्थिरराशयो यस्मिन् कर्कटकस्तस्य काले लग्ने तस्मिन् सद्युताचलभकर्कटककाले ॥ ५५ ॥

क्षिप्रवासवमृदुध्रुवकर्णान्सज्जनो व्यसृगशेषदिनेषु ॥
सेवितुं वसुमतीशमरिक्तेष्विच्छतींदुसितवत्युदयेऽपि ॥ ५६ ॥

अथ राजसेवामुहूर्तमाह—क्षिप्रेति ॥ सज्जनः वसुमतीशं महीपं सेवितुं क्षिप्रादीन् इच्छति ऊरीकरोतीत्यर्थः। इयं सेवा राजद्वारगमनं परदासभावो नास्ति ॥ क्षिप्रेति ॥ क्षिप्रसंज्ञानि वासवं धनिष्ठा मृदुसंज्ञानि ध्रुवसंज्ञानि कर्णः श्रवणः एषां द्वंद्वे इमान् केषु व्यसृगशेषदिनेषु पुनः कस्मिन् इंदुसितवति चंद्रशुक्रयुक्ते उदये लग्ने सति किंभूतेषु समस्तदिनेषु अरिक्तेषु रिक्तातिथिवर्जितेषु ॥ ५६ ॥

विश्वकृत्सुरसवित्र्यजमित्रस्तोमनष्टरदभद्वयधीरैः ॥
संत इज्यमुखवारचतुष्के नव्यवर्मफलकाधृतिमाहुः ॥ ५७ ॥

अथ नूतनसन्नाहखेटकधारणमुहूर्तमाह—विश्वेति ॥ संतः पंडिताः नव्यवर्मफलकाधृतिं नूतनसन्नाहखेटकयोः आधारणमाहुः ॥ फलं 'कंटाल' इति भाषा। कस्मिन् इज्यो गुरुः सन्मुखे यस्य तत् वारचतुष्कं गुरुशुक्रशनिसूर्याणां चतुष्के इत्यर्थः। पुनः कैः विश्वेति ॥ विश्वकृच्चित्रा सुरसावित्री अदितिः पुनर्वसुः अजो विष्णुः श्रवणः मित्रोऽनुराधा स्तोमेन यज्ञेन नष्टाः रदाः दंताः यस्य स पूषा तस्माद्द्वयं रेवत्यश्विन्यौ धीरसंज्ञानि एषां द्वंद्वे एभिर्भैः ॥ ५७ ॥

साधुभिर्निशिथिनीशवदंगान्मारधामगगनोपगतैर्वा ।
वर्मितोऽरि ६भव११ गैरनपापैः स्यात्क्षमोऽहितगणानथ जेतुम्॥५८

अथ सन्नाहधारणे लग्नशुद्धिमाह—साधिवति ॥ ना पुरुषोऽहितगणान् रिपुसमूहान् जेतुमवरीकर्तुं क्षमः स्यात्। किंभूतः साधुभिः शुभग्रहैः पुनरनपापैः पापग्रहैः कृत्वा वर्मितो धृतसन्नाहः किंभूतैः साधुभिः निशिथिनीशवदंगात् चंद्रराशियुक्तलग्नात् मारधामगगनोपगतैः सप्तमचतुर्थदशमभावोपगतैः किंभूतैरनपापैररि ६ भव ११ गैः षष्ठैकादशगतैः ॥ ५८ ॥

आंत्यवात्यबृहदैज्यशयैंद्रत्वाष्ट्रभाग्यवसुभान्यगदश्च ॥
रिष्टितोमरधृतौ धरणेऽस्याः कव्यसद्युभरितानि वराणि ॥ ५९ ॥

अथ खड्गतोमरधारणमुहूर्तमाह—आंत्येति ॥ अथ बुधाः रिष्टितोमरधृतौ खड्गसर्वलावारणेऽस्याः कटारिकाया धारणे च अंत्यादीनि भानि वराणि अगदन् "क्षुर्यस्त्रिको शशायिका" इति हेमशेषकोषः ॥ अंत्य रेवती वात्यं स्वाती बृहत्संज्ञानि ऐज्यं पुष्यः शयः करो हस्तः ऐंद्र ज्येष्ठा त्वाष्ट्रं चित्रा भाग्य पूर्वाफल्गुनी वसुभं धनिष्ठा एषां द्वंद्वे इमानि किंभूतानि काव्यसद्युभयुतानि कविः शुक्रः असंतोऽशुभग्रहास्तेषां यस्मा दिनाः मानि राशयश्चैषां द्वंद्वे एभिर्युतानि ॥५९

ऐनशैंद्रकभनिष्कभधीराचार्यवासवभहारिविशाखाः ॥
कंकपत्रधनुरादिकधृत्यै भिंडिपालधृतयेऽपि च धीराः ॥ ६० ॥

अथ बाणधनुर्भिंदिपालादिधारणे शुद्धिमाह—ऐनेति ॥ धीरा ऐनशेत्यादि अकथयन् जगदु ॥ कस्मै कंकपत्रा बाणा धनुश्चाप इत्यादिकाना धृत्यै धारणाय च पुनर्भिंदिपालधारणाय भिंदिपाल भिंडपाल इति शब्दे भेदः 'बरछी' इति भाषा ॥ ऐनशेति ॥ अ विष्णु इन सूर्यश्च श शंभुश्च इंद्रश्च क ब्रह्मा च द्वंद्वे एषा भानि श्रवणहस्तार्द्राज्येष्ठारोहिण्य निष्क जलं तस्य भ पूर्वाषाढा धीरसंज्ञानि आचार्यो गुरु पुष्य वासव धनिष्ठाभ हारिणि मृदुसंज्ञानि विशाखा आसा द्वंद्वे श्रवणादी एतास्तारा प्रतिनिष्कामिति क जल नि सयोगेऽपि तदेवार्थं ॥ ६० ॥

लोहितांगहरिहंसदिनाढ्यैर्भद्रपूर्णजयवद्विधुवारैः ॥
क्षेरणीयधनुषेषु गदास्यो ध्रियतेऽस्त्रविसरः सति लग्ने ॥ ६१ ॥

अथ बाणादिधारणे तिथिवारशुद्धिमाह —लोहितेति ॥ अस्त्रविसर शस्त्रसमूहो ध्रियते भद्रैरिति शेष । कैः । भद्रेति । भद्रास्तिथय पूर्णा जयाश्च वतुप्रत्यये भद्रवतीभद्रा पूर्णवती पूर्णा इत्यर्थ । एताभिर्युक्ता. विधुवाराश्च इंदुदिनास्तै किंभूतैः लोहितांगो भोम हरिर्यम शनि हसो रवि एषा दिनैराढ्यैर्युक्तै पुन कस्मिन् सति शुभग्रहे शुभे वा लग्ने सति किंभूतोऽस्त्रविसर ॥ क्षेरेति ॥ क्षेरणीय गोफणिकादि धनु समासे धनुषामिति इषुर्बाण गदा अतीता एता आस्य मुख यस्य स इत्यादियुक्त इत्यर्थ । ध्रियते इत्यत्र ऋकारस्य रिज्यादिशत्वाद्दीर्घत्वाभावो घटते परमत्र कस्यचिन्मताश्रित ज्ञातेऽन्यथा धार्यते इति ड़ुधाञ प्रयोगो वरमिति ॥ ६१ ॥

उग्रदारुणमहाबलभांत्यत्वाष्ट्रतिष्यकरकार्ष्णभमिश्रैः ॥
आश्रितान्यसदहानि जगुस्तेऽनेकभेदनलिकास्त्रविधाने ॥ ६२ ॥

अथ नलिकादिशस्त्रविधाने भवारशुद्धिमाह—उग्रेति ॥ ते प्रसिद्धा वीरा. अनेकभेदनलिकास्त्रविधाने लघुबृहदनेकभेद वदूप नालि जबूरा इत्यादि वन्हिशस्त्रविधाने असदहानि पापग्रहदिवसानि जगु कथयामासु । किंभूतानि असदहानि आश्रितानि युक्तानि कै । उग्रेति । उग्रसंज्ञानि दारुणसंज्ञानि महाबलो वायुस्तद्भ स्वाती आंत्य रेवती त्वाष्ट्र चित्रा तिष्य पुष्य करो हस्त कृष्णस्यद कार्ष्णभ श्रवण मिश्रसंज्ञे द्वे एषा द्वंद्व एतै ॥ ६२ ॥

स्याज्जयाय सजयं च सरिक्तं वन्हिमुक्तपरमास्त्रविधानं ॥
चंचरीकहरितावुरुकुंभैरायगेरुपचयेष्वनदुष्टैः ॥ ६३ ॥

अथ वन्हिमुक्तास्त्रे तिथि लग्नशुद्धिमाह—स्याज्जयायेति ॥ वन्हिमुक्तपरमास्त्रविधान कर्तृपद अग्निना प्रेरितलोहगोलकबृहन्नालकास्त्र रोरबाणादिक वा जयाय वैरिपराभवाय

स्यात् । किंभूतं सजयं जयातिथियुक्तं पुनः किंभूतं सरिक्तं रिक्तायुक्तं कैः कृत्वा अनदुष्टैः पापग्रहैः किंभूतैः आयगैः एकादशभावगैः उपचयेषु विषये ३।६।१०।११।चंचरीको वृश्चिकराशिः हरिः सिंहः ताउरिर्वृषः कुंभ एभिः ॥ ६३ ॥

नव्यदुंदुभिजवादनमन्यद्वाद्यवादनमविद्युगमिष्टं ॥
भूभुजोऽस्ति सजयाभिधपूर्णे मैत्रलोललघुभैरितणम् ॥ ६४ ॥

अथ नवीनभेर्याविवादने तिथिवारनक्षत्रशुद्धिमाह—नव्येति ॥ नव्यदुंदुभिजवादनं अन्यद्वाद्यवादनं च कर्तृपदं भूभुजो भूपस्येष्टं श्रेष्ठमस्ति कैः मैत्रलोललघुभैः स्पष्टं । किंभूतं नव्यदुंदुभिजवादनं अविद्युगं बुधवर्जितान्यग्रहदिनगतं पुनः किंभूतं सजयाभिधपूर्णे जयातिथिपूर्णातिथियुक्तं पुनः किंभूतं इतकोणं इतः प्राप्त अर्थशक्त्या आस्फालितः कोणो वीणादिवादनं यस्मिंस्तत् कोणस्तु वादित्र वज्राडवानाडाडीयादिकइतिभाषायां 'भेरी दुंदुभिरानकः' इति हैमः । भेरीशब्दस्यायं विवेकः । भेरी दंडयोग इत्यत्र दंडोपयोगिनो भेरी 'दमामा' इति भाषा इति तार्किकाः । अपरा यतः "सार्द्धहस्तत्रयमानं भेरीणां समुदाहृतं॥ पिंडे षडंगुला प्रोक्ता वादयेन्मुखफुंकयोः" ॥ १ ॥ इति रंगोदये परंतु दुंदुभिस्तु भेर्याकारा संकटमुखी 'नकेरीति' भाषा । अपरं अग्रेतनकाव्ये काहल इत्यत्र ढक्काकारा काहला मदनभेरी 'वरघू' इत्यादिभाषा इति ॥ प्राप्तकोणं इत्यत्र दंडादिघातकरणं अन्यत्र मुखफुंकसंयोगकरणं ॥ ६४ ॥

रिक्तयाहनि युतेऽहितसंघं भीपयत्यहिभयातुभशाक्रैः ॥
नव्यकाहलधृतेरपि पापे तद्रवः समिति वा विमघोग्रैः ॥ ६५ ॥

अथ भेरीधारणे कालशुद्धिमाह—रिक्तेति ॥ काहलधृतेरपि भेरीधारणादपि तद्रवस्तस्य काहलस्य रवः शब्दः समिति संग्रामेऽहितसंघं शत्रुसमूहं भीषयति भीषयते कस्मिन् पापे पापग्रहेऽहनि दिने किंभूते रिक्तया युते वाऽथवाऽहिभमश्लेषा यातुभं मूलं शाक्रं ज्येष्ठा एभिर्युक्ते किंभूतैरेभिः विमघोग्रैर्मघावर्जितानि उग्रसंज्ञानि येषु तानि तैः ॥ ६५ ॥

सिद्धियुज्यमृतसिद्धियुगास्येऽशेषवाद्यगणकर्म विभद्रे ॥
वाद्यधर्तुरनसद्वति राशौ प्राक्कुजे लगति शब्दवतीते ॥ ६६ ॥

अथ वादित्राणां सर्वेषां कर्मशुद्धिमाह—सिद्धीति ॥ अलमित्यवधारणे वाद्यधर्तुर्नरस्य अशेषवाद्यगणकर्म स्यात् ॥ कस्मिन् सिद्धियुजि निष्पत्तिभाजि अमृतसिद्धियुगास्ये अमृतसिद्धियोगप्रमुखे किंभूते विभद्रे विष्टिरहिते पुनः कस्मिन् अनसद्वति शुभग्रहयुतेऽतिशब्दवति कोऽर्थः मेषवृषभमिथुनसिंहधनुषां गणोऽतिशब्दवान् कथ्यते तस्मिन्निते प्राप्ते प्राक् कुजे लग्ने सति इत्यर्थः ॥ प्राक् पूर्वस्यां कुर्भूमिस्तस्यां जायते इति उदयाचलार्कोदयस्थानं प्राक्कुजं लग्नसंज्ञमित्यर्थः ॥ कथं कन्याराशिरतिशब्दवान् न स्यात् सत्यं कन्याराशिः शब्दवान् स्यात् परं अतिशब्दवान् न स्यात् स्त्रीणां मधुरस्वरत्वात् ॥ ६६ ॥

उक्तयस्समुखनिर्णयकालं नोक्तराज्यभवकर्म करोति ॥
अन्यथैत्यथ समुज्झ्य स योऽर्थ वच्मि दिग्विजयकालमिदानीम् ॥६७॥

अथोपसहारेण पूर्वोक्तकालशुद्धिं द्रढयति—उक्तेति ॥ यो राजा उक्तवखनिर्णयकाल पूर्व कथितदिनादिनिश्चयसमय उज्झ्य विहाय उक्तराज्यभवकर्म कथितराज्योत्पन्नविधान करोति सोऽन्यथा वैपरीत्य न एति इति न अपितु प्राप्नोतीत्यर्थ ॥ अथानतर अहं इदानीं साप्रत दिग्विजयकालं वच्मि कथयामि समुज्झ्येत्यय कस्यचिन्मताश्रितत्वात्प्रयोग समासविना दृश्य तेऽन्यथा प्रोक्तेत्यादि स्यात् ॥ ६७ ॥

जेतुमिच्छति परावनिपालं तावदप्युपकुलैः सजयैर्यः ॥
भैरनीककघटाघटनं राट् क्षत्रियद्युनिचितैर्विदधीत ॥ ६८ ॥

अथ नक्षत्रवारशुद्धौ सैन्यरचनामाह—जेतुमिति ॥ यो राट् परावनिपाल रिपुभूप जेतुं हतुमिच्छतीति स राट् तावत्प्रथममनीक घटावटन सैन्यसमूहरचना सैन्यरचनाकरण वा विद धीत । कै उपकुलै उपकुलसंज्ञैर्भैर्नक्षत्रै किंभूतै सजयै जयातिथिसहितै पुन किंभूतैः क्षत्रि यद्युनिचितैः रविभौमौ क्षत्रियसंज्ञौ अनयोर्दिनयुक्तै ॥ ६८ ॥

वासवात्यलघुमित्रजनित्रीमित्रशीतलभमानुगभेषु ॥
तं प्रतीष्टमविधेष्वनुयानं तस्य वाडवखगद्युयुतेषु ॥ ६९ ॥

अथ भवारशुद्धौ नृपप्रयाणमाह—वासवेति ॥ अनु पश्चात् तस्य राज्ञो यान प्रयाण तत सैन्य प्रति इष्ट शुभ स्यात् । केषु वासव धनिष्ठा अत्य रेवती लघुसंज्ञानि मित्रजनित्री सूर्यमाता अदितिः पुनर्वसु मित्रोऽनुराधा शीतलभो हिमांशुश्चन्द्रो मृगशीर्षं मा लक्ष्मीस्तस्या अनुग स्वामी मानुगो विष्णुस्तन्नं श्रवण एषा द्वन्द्वे एषु किंभूतेषु वाडवखगयोर्गुरुशुक्रयोर्विप्रसंज्ञ अनयोर्दिनयुतेषु पुन किंभूतेषु अविधेषु कुयोगैरविद्धेषु विधं विद्धमिति शब्दप्रभेद । जनित्री जनयत्री इति शब्दप्रभेद ॥ ६९ ॥

पर्वपक्षतियुगाखिलरिक्ताद्वादशीत्रिचरणाख्यकुयोगान् ॥
प्रोज्झ्य दिग्विजययानमुशंति योगिनीमुखगणाभिमुखांश्च॥७०

अथ दिग्विजयगमने पर्वादीन् निषेधति—पर्वेति ॥ बुधा दिग्विजयप्रयाण उशति वाञ्छंति किंकृत्वा पर्वेति पर्वाणि पक्षतियुग प्रतिपद्द्वितीये अखिला रिक्ता द्वादशी त्रिचरणाख्यकुयोग त्रिपुष्करनामकुयोग एषा द्वन्द्वे एतान् प्रोज्झ्य हित्वा न पुनर्योगिनीमुखगणाभिमुखान् योगिनी मुखयोगगणसन्मुखान् हित्वा ॥ ७० ॥

निम्नकालवलयं फलकाभं संलिखेद्धुतभुजस्तु दिशोंऽशोः ॥
यत्स्युवह्निदिशि तस्य कभिज्यादासरानिह समस्तदिक्षु ॥७१॥

अथ निघ्नकालचक्रमाह—निघ्नेति ॥ सुधीः फलकाभं दारुपट्टकसदृशं निघ्नकालवलयं हननकालचक्रं लिखेत् । इह चक्रे सुधीः हुतभुजोऽग्नेर्दिशोऽग्निकोष्टतः समस्तविदिक्षु अंशोः सूर्यात् तु पुनरिज्यात् गुरुतो वारान् दिनान् लिखेत्। विदिशि यद् द्युवत् यत् उदप्राप्तग्रहदिनयुक्तकोष्टकं तत् कोष्टकं तस्य निघ्नकालस्य कं मुखं स्थानं स्यादित्यर्थः ॥ ७१ ॥ *

निघ्नकालमनुगैरनुगं यः किं विधाय कुरुते मृधमग्रे ॥
सव्यसाच्यनुगशात्रवसंघैस्तस्य संयति रणांगणसंस्थैः ॥ ७२ ॥

अथ सन्मुखं निघ्नकालमुखं परिहरन् युद्धनयं दर्शयन्नाह—निघ्नेति ॥ यो राट् अनुगैः पदातिभिः सह निघ्नकालमनुगं पृष्ठगं विधाय कृत्वा मृधं युद्धं कुरुते तस्य भूपतेरग्रे संयति संग्रामे सव्यसाच्यनुगशात्रवसंघैः किं स्यात्तस्य किमप्यनिष्टं न कुर्युरित्यर्थः ॥ सव्यसाचिनमर्जुनमनुगच्छंति अनुकुर्वतीति सव्यसाच्यनुगाः अर्जुनाख्यपांडवसदृशा ये शात्रवाः रिपवस्तेषां संघाः समूहास्तैः संयतौ रणांगणे संस्थैः युद्धभूमिंव्याप्तैः 'सव्यसाची धनंजयः' इति हैमः ॥ ७२ ॥

द्युनिशेन दिशोंऽशुमानथैंद्र्या निखिला भुंजति दक्षिणभ्रमेण ।
स च तिष्ठति यत्र तत्र कीलास्त्वनुगाग्रस्थदिशोः स्फुलिंगधूमौ ॥७३॥

अथ मालभारिणीछंदसास्मिन्नेव निघ्नकालचक्रे ज्वालादिसंज्ञात्रयं स्थापयति—द्युनिशेनेति ॥ अंशुमान् सूर्यो द्युनिशेनाहोरात्रेण ऐंद्र्याः पूर्वदिक्तो निखिलाः समस्ताः दिशो भुंजति भुनक्ति केन दक्षिणभ्रमेण सूर्यो यत्र तिष्ठति तत्र स्थाने कीलाग्निज्वाला अस्ति । अनुगाग्रस्थदिशोः स्फुलिंगधूमौ स्तः ॥ कोऽर्थः सूर्याधिष्ठितस्थानात् पृष्ठगतदिशि स्फुलिंगा अग्निकणा भवंति अग्रगतदिशि धूमो भवतीत्यर्थः ॥ मालभारिणीछंदस इदं लक्षणं ' ओजे ससजजगाः समे पादे सभरयाः ॥ऽ॥ऽऽ॥ऽऽऽप्रथमपादः॥ऽऽ॥ऽ।ऽ।ऽ।ऽ।ऽऽ द्वितीयपादः' यथा 'इह वासकसज्जिकाविलासं वहते शारदशर्वरीवरेण्यः ॥ अवतंसितकैरवोज्वलश्रीर्विकसत्तारकमालभारिणीयं' ॥ १ ॥ इति छंदोऽनुशासने हेमसूरयः ॥ भुंजतिप्रयोगो महाकविगम्यः ॥ ७३ ॥

हरिदग्निशिखावतीति यातुर्दहतीष्टं शितिपद्धतीतदाहा ॥
सृजति भ्रममग्रगात्तधूमा न च हंसाभिमुखं हि यानमुक्तम् ॥७४॥

अथ ज्वालादियुक्तदिशां फलमाह—हरिदिति ॥ अग्निशिखावती हरित् वन्हिज्वालायुक्ता दिग् यातुर्नरस्य प्रयाणकारकस्य इष्टं वांछितं दहति । पुनः शितिपद्धतीतदाहा शितिपद्धतिः कृष्णवर्त्मा वन्हिस्तेन इतः प्राप्तो दाहो यया साऽग्निकणयुक्ता पृष्ठगदिग् यातुरिष्टं दहति। पुनरग्रगात्तधूमा आत्तः प्राप्तो धूमो यया साऽग्रगा दिग् भ्रमं संशयं सृजति करोति इति हेतोर्हि युक्तार्थे हंसाभिमुखं सूर्यसन्मुखं यानं प्रयाणं नोक्तं ॥ इति निघ्नकालचक्रम् ॥ ७४ ॥

---

* आकृति नंबर ९

शिखिनस्तमसश्च भुक्तभेषु क्रमतस्तौ मृतजीविताख्यपक्षौ ॥
दहनेंदु १३ मितेष्विति स्वरज्ञा दहनेंदु १३प्रतिमौ विदुर्मृधे तौ ॥७५॥

अथ स्वरोदयोक्तमृतजीविताख्यपक्षौ स्त भवत इति स्वरज्ञा स्वरोदयवेदिन ॥ तौ मृतजीवितपक्षौ मृधे सग्रामे दहनेंदुप्रातिमौ विदु । मृतपक्षोऽग्निसदृशो जीवितपक्षश्चंद्रसदृश इत्यर्थ यत 'यत्र ऋक्षे स्थितो राहुर्वदन तद्विनिर्दिशेत् । मुखात्पचदश ऋक्ष तस्य पुच्छे व्यवस्थि ॥ १ ॥ राहुभुक्तानि ऋक्षाणि जीवपक्षे त्रयोदश ॥ त्रयादशैव भोग्यानि मृतपक्षे प्रकीर्तित ॥२॥ जीवपक्षे क्षपानाथे मृतपक्षे रवौ स्थिते । तस्मिन् काले शुभा यात्रा विपरीते तु हानिदा ॥ ३ ॥ चंद्रादित्यौ यदा युक्तौ जीवपक्षे व्यवस्थितौ । तत्र क्षेम जय लाभ यात्रा काले विनिर्दिशेत् ॥ ४ ॥ मृतपक्षे यदा काले सस्थितौ चद्रभास्करौ । तदा हानिर्भय मरं मृत्युर्यात्राफल मत ॥ ५ ॥ जीवपक्षे स्थिते चद्रे कार्य स्यादमृतोपम । मृतपक्षे मृत शे यत्र चद्रबलाबल ॥ ६ ॥ न तिथिर्न च नक्षत्र न वारो न च चद्रमा । लग्नमेके प्रशसति त्रि पदेकादशे रवौ ॥ ७ ॥ इति जीवपक्षमृतपक्षराहुविचारचक्र ॥ ७५ ॥

अहितैरपसव्यभागग तैः पदिकं युध्यति जीवपक्षलब्धौ ॥
प्रविधाय निहंतुमेकमग्रे युधि शक्यंत इनं न योऽपि तस्य ॥ ७६ ॥

अथ जीवितपक्षे दक्षिणार्कफल दर्शयति—अहितैरिति ॥ यो राट् ते अहितैः शात्रवै सम पदिक पादचारि यथा स्यात्तथा इति क्रियाविशेषण युध्यति किंकृत्वा जीवपक्षलब्धौ जीवितकालप्राप्तावपि एकं केवल इन सूर्य अपसव्यभागग दक्षिणभागस्थित प्रविधाय त शात्रवसत्रय राज्ञो निहतु हननाय न शक्यते समर्था न भवति कस्मिन् अग्रे उत्कटे युधि सग्रामे। अथ धातुर्दिवादिगणीयस्तेन कर्तु क्तिः । यत 'प्राणप्रवेशे वहनाडिपार्श्व कृत्वा पु दक्षिणमर्कबिंब ॥ गच्छेच्छुभायारिवधाय' इत्यादि ॥ ७६ ॥

कुरु तेऽपि कलिं स्पृहास्ति राजन्मिहिराराहनि नागरेण कर्तुं ॥
यदि जीवितपक्षगासु धीरैः सजयासूपकुलेंदुवासिनीषु ॥ ७७ ॥

अथ जीवितपक्षे भवारशुद्धौ युद्धमाह—कुरुत इति ॥ हेराजन् यदि ते तव नागरेण नग सबधिशत्रुजनेन सह कलिं कर्तु स्पृहा वाञ्छाऽस्ति तदा त्व धीरै सुभटै कृत्वा कलिं कुरु क स्मिन् मिहिराराहनि मिहिर सूर्य आरो भोमस्तयोरहनि दिने पुन कासु उपकुलेंदुवासिनी उपकुलसज्ञा इंदोश्चद्रस्य वासिन्य कलत्राणीत्यर्थ । किंभूतासु उपकुलताराषु सजयातिथि कासु पुन किंभूतासु जीवितपक्षगासु जीवितपक्षसश्रितासु 'वासिनी तरुणी स्त्री' इति हलायुध 'सुवासिनी चर्चरी स्यात' इति हेम ॥ ७७ ॥

कुलभेऽभिभवः सतीति युद्धान्नृपतेः स्यादनु नागरस्य सिद्धिः ॥
उभयोरपि संधिरन्यधिष्ण्ये गुरुधिष्ण्याहनि पूर्णयाश्रितेऽतः ॥ ७८ ॥

अथ जीवितपक्षे कुलभादिमवारफलमाह—कुलेति ॥ इति सति जीवितपक्षे कुलभे कुलसंज्ञनक्षत्रे युद्धात् नृपतेः राज्ञोऽभिभवः पराभवः स्यात् । अनु पश्चात् नागरस्य शात्रवस्य सिद्धिः स्यात् ॥ अतोऽस्मादन्यधिष्ण्येऽन्यनक्षत्रे उभयोः संधिः संधानं स्यात् ॥ कस्मिन् गुरुधिष्ण्याहनि गुरुशुक्रदिने किंभूते पूर्णया पूर्णासंज्ञतिथ्याश्रिते ॥ ७८ ॥

यदि शालमसह्यराजधानीं नृपतेर्नेतुमरं तदीश्वरं चेत् ॥
धिषणास्ति सदन्यखायनैर्वा नय मध्ये निचितेऽथ तस्य जित्वा ॥७९

अथ युद्धे जयाय कोटचक्रसंधानमाह—यदीति ॥ अथ यदि चेत् अरं शीघ्रं तदीश्वरं शालस्वामिनं जित्वा शालं प्राकारमसह्यराजधानीं उत्कटरकंधावारं वा नेतुं गृहीतुं नृपतेर्भूपस्य धिषणाऽस्ति तदा त्वमेतद्वक्ष्यमाणं नय कुरु ॥ अथवा नृपते इत्यत्र संबोधनांतपाठे हे नृपते हे राजन् यदि तदीश्वरं शालस्वामिनं जित्वाऽसह्यराजधानीं नेतुं तव धिषणा बुद्धिः इच्छाऽस्ति तदा त्वं शालं नय गृहाण इत्यप्यन्वयः । कस्मिन् सदन्यखायनैः पापग्रहैस्तस्य मध्ये शालचक्रमध्ये निचिते व्याप्ते सति 'स्कंधावारो राजधानी' राजाश्रितमूलनगरमित्यर्थः ॥ इति हैमः ॥ ७९ ॥

चतुरस्रमुदीरितं त्रिकोष्ठं वलयं यत्स्वरशास्त्रभेदविद्भिः ॥
तदथोच्यत एव चक्रसंज्ञं शदिशो न्यस्तकृशानुभादि चक्रम ॥८०॥

अथ कोटचक्रस्थापनां दर्शयति—चतुरस्रमिति ॥ हे राजन् स्वरशास्त्रभेदविद्भिश्चतुरस्रं चतुष्कोणं त्रिकोष्ठ त्रयः कोष्ठाः यस्य तत् यद् वलयं चक्रमुदीरितं कथितं अथ मया तच्चक्रमुच्यते कथ्यते ॥ किंभूतं तत् चक्रसंज्ञं चक्राभिधं दुर्गचक्राभिधं दुर्गचक्रमित्यर्थः ॥ पुनः किंभूतं शदिशः शस्य ईश्वरस्य दिग् तस्या ईशानदिक्तो न्यस्तकृशानुभादि न्यस्तानि स्थापितानि कृत्तिकादि भानि यस्मिंस्तत् ॥ ८० ॥ *

इह शौच्यभमैज्यमार्द्यपित्र्येऽनिलभं द्वीशभमित्रभे च भैम्याः ॥
अभिजिद्द्वयमाद्यमांतकर्क्षं ककुभोऽयं परिधौ गणोऽस्ति बाह्ये॥८१॥

अथ कोटचक्रस्य प्रथममुपरितनकोष्टके कृत्तिकादिभानां स्थापनां दर्शयति—इहेति ॥ हे राजन् इह चक्रे शौच्यभं कृत्तिका ऐज्यं पुष्यः आर्द्यं च पित्र्यं च अनयोर्द्वंद्वे आद्यपित्र्ये आश्लेषामघे द्वे अनिलभं स्वाती द्वीशभमित्रभे विशाखाऽनुराधे द्वे अभिजिद्द्वयं अभिजित् श्रवण धनिष्ठा आद्यमश्विनी आंतकर्क्षं भरणी च समुच्चये एषां द्वादशभानां गणोऽयं भीमस्य ईश्वरस्य इयं भैमी दिक् तस्या भैम्याः ईशानकोणतो बाह्ये परिधौ परिवेषे उपरितनकोष्टकेऽस्ति तिष्ठति ॥ आद्यपित्र्येऽनिलभमित्यत्र द्विवचनं मणीवादिवर्ज्जमितिवत् संधिः ॥८१॥

कभकश्यपभीरुभे च भाग्यं सततं विश्वकृद्दक्षमैंद्रविश्वे ॥
शततारकमंत्यभं च दुर्गे गदितोऽसावुडुसंचयः स्वरज्ञैः ॥ ८२ ॥

* आकृति नंबर १०

अथ चक्रस्य द्वितीयेंऽतरालके रोहिण्याद्यष्टमानि दर्शयति—कभेति ॥ हे राजन् सतत सदा कस्य ब्रह्मणो भे कभ रोहिणी कश्यपस्य भीरु कश्यपर्षे स्त्री अदितिस्तद्भ पुनर्वसु अनयोर्द्वंद्वे इमे भे भाग्य पूर्वाफाल्गुनी विश्वकृद्दक्ष चित्रा ऐंद्रविश्वे ज्येष्ठोत्तराषाढे शततारक शतभिषक् अत्यभ रेवती च समुच्चये इत्यसावुडुसंचयो भवर्गो दुर्गविचाले स्वरज्ञैर्गदित प्रोक्तः ॥ ८२ ॥

रुरुकार्यमयातुधिष्ण्ययुग्मं त्रिकमंत्यानुगभद्वयं च मध्ये ॥
इह मध्यगभाष्टकेंऽग वार्त ससमस्तावरगैः सदैव विद्धि ॥ ८३ ॥

अथ चक्रस्य तृतीये मध्यभागकोष्टकेऽष्टमृगशीर्षादिस्थापना दर्शयति—रुर्विति ॥ तु पुनः स्वरज्ञै रुरु मृगशीर्ष श रुद्र आर्द्रा अर्यमयातुधिष्ण्ययुग्ममिति । कोऽर्थ अर्यम युग्म उत्तराफाल्गुनी हस्त इति द्वय यातुयुग्मं मूल पूर्वाषाढा इति द्वय अजपत् पूर्वभाद्रपदा भ त्यानुगभ अत्यस्य रेवतीनक्षत्रस्यानुपश्चात् गच्छतीति तत् उत्तराभद्रापदामित्यर्थ ॥ एषां द्वंद्वे समग्रपद ॥ इत्यय भाना गणो मध्ये शालमध्यकोष्टके गदित प्रोक्त । अग इति कोमलामन्त्रणे हे राजन् ससमस्तावरगै समग्रग्रहै सह वर्तमाने इह मध्यभाष्टके मध्यप्राप्तनक्षत्राणामष्टके त्व सदैव वार्त कल्याण विद्धि जानीहि 'स्वास्थ्ये वार्तमनामयम्'इतिहैम ॥ ८३ ॥

विदिगंशुसमानभैः प्रवेशो गदितस्तंभ इहानुबाह्यकोणं ॥
भचतुष्टयमंतरस्थतारा निखिला निर्गमगा बुधैर्विचिंत्याः ॥ ८४ ॥

अथ भै प्रवेशनिर्गमस्तम्भस्थानानि दर्शयति—विदिगमिति ॥ इह शालचक्रे विदिगंशुसमानभै विदिक्षु चतसृषु अंशुभि सूर्यैर्मान प्रमाण येषा तानि तैर्भैर्द्वादशनक्षत्रै कृत्वा बुधै प्रवेशो गदित ॥ कृत्तिकारोहिणीमृगशीर्षाणि १ मघापूर्वाफाल्गुन्युत्तरफल्गुन्य २ अनुराधाज्येष्ठामूलानि ३ धनिष्ठाशतभिषक्पूर्वाभाद्रपदा ४इति प्रवेशे द्वादश । पुन अनु बाह्यकाण शालबाह्यकोणसमीपात् अत्यस्थतारा निखिला अतरालगतद्वादशभानि बुधैर्निर्गमगा विचिंत्या ॥ पुनर्वसुपुष्याश्लेषा १ चित्रास्वातीविशाखा २उत्तराषाढाऽभिजिच्छ्रवणा ३रेवत्यश्विनीभरण्य ४॥पूर्वादिदिक्षु आर्द्रे हस्त पूर्वाषाढोत्तराभाद्रपदा इति स्तभनक्षत्रचतुष्कं॥ यत 'कोटचक्र लिखेच्चादौ चतुरस्र त्रिनाडिक । कृत्तिकादीनि भान्यत्र चाभिजित् तत्र दापयेत् ॥ १ ॥ बहि प्राकारमध्ये च मध्ये दुर्गे बहिर्बहि । प्रवेशो निर्गमस्तत्र ज्ञातव्य स्वरवेदिभि ॥२॥ बहिर्द्वारेशमान्येवं प्राकारे तारकाष्टक । दुर्गमध्ये तथा चाष्टौ तन्मध्ये स्तभतुर्यक ॥३॥ प्राच्या रौद्र यमे हस्त पूर्वाषाढा च पश्चिमे । कौबेर्यामुत्तराभद्रा एतत्स्तभचतुष्टय ॥४॥ कृत्तिकाद्य मघाद्य च मैत्राद्य वासवादिक । त्रीणि त्रीणि प्रवेशे च द्वादशान्यानि निर्गमे ॥५॥ चतुरस्रं तथा दार्वे त्रिकोण वृत्तदार्धक । अर्द्धचद्र तथा ज्ञेय गोस्तन धनुराकृति ॥ ६ ॥ चतुरस्रे यथा न्यासो भूमिभागक्रमेण च । प्रवेशनिर्गमस्तभास्तथा वृत्तादिसप्तके ॥७॥ इत्यादि नरपतिजयचर्यादिशास्त्रतो ज्ञेय ॥८४॥*

* आकृति नंबर ११

विदधत्यनसाधवो बहिस्था द्युसदो वप्रविभंगमप्यसंतः ॥
इह मध्यगता विलोमगा वा कलिना वेष्टकवाहिनीलयं ते ॥८५॥

अथ शालचक्रे ग्रहस्थानफलमाह—विदधतीति ॥ इह शालेऽनसाधवः शुभा द्युसदो ग्रहाः बहिस्था वप्रविभंगं प्राकारभंगं विदधति कुर्वंति । अपि पुनः असंतः पापग्रहा मध्यगता वप्रभंगं विदधति केन कलिना संग्रामेण। वेति पक्षांतरे। इह ते एते विलोमगाः मध्यगताः सौम्याः ग्रहाः बहिस्थाः पापाश्च आवेष्टकवाहिनीलयं आयातसेनाक्षयं विदधति ॥ यतः 'क्रूरा गर्भे शुभा बाह्ये गृह्यते निश्चित पुरं। सौम्या मध्ये बहिः क्रूरा असाध्यं दुर्गमुच्यते' ॥८५॥

इतपापचतुष्टयं तदंतर्यदि शालः ससमस्तसाधुखेटः
कलिना किल तत्र भेदभंगोऽरमृते स्यादमुनान्यथेतभंगः ॥ ८६॥

अथातगतक्रूरग्रहचतुष्केण कोटग्रहणमाह—इतेति ॥ यदि चेत् तदंतस्तस्य शालस्य मध्ये इतपापचतुष्टयं गतक्रूरग्रहचतुष्कं भवति । यदि ससमस्तसाधुखेटः समग्रसौम्यग्रहैः सह वर्तमानः शालो भवति किलेति सत्ये तदारं शीघ्रं तत्र शाले भेदभंग उपजायते भंगः स्यात् । केन अमुना कलिना युद्धेन कृतेन विना यतः 'क्रूर चतुष्टय मध्ये प्राकारे सौम्यखेचराः । भेदभंगो भवेत्तत्र विना युद्धेन गृह्यते' ॥१॥ इति ॥ अन्यथेति ॥ एवं पूर्वोक्ताभावे भगः पराजयः स्यात् । आगतस्य पलायनमित्यर्थः॥ उपजापः पुनर्भेद इति 'पराजयो रणे भंग' इति हैमः॥८६॥

यदि शालकमध्यगाः सदन्ये त्वसदन्ये गगनायना बहिस्थाः ॥
अतिकृच्छ्रवताहवेन दुर्गंन्नधिभूर्भज्यति तत्र नास्य वेशः ॥ ८७ ॥

अथ मध्यबाह्ययोः पापसौम्यैः समयुद्धमाह—यदीति ॥ यदि चेत् शालमध्यगता प्राकारमध्यगताः सदऽन्ये पापग्रहाः तु पुनर्बहिस्था असदन्ये शुभा गगनायना ग्रहाः सति तदानभिभूर्नृपतिर्भज्यति भनक्ति केनातिकृच्छ्रवता महत्कष्टयुक्तेन आहवेन संग्रामेण कृत्वा पुनरस्य आयातनृपस्य वेशः प्रवेशो नास्ति ॥ भज्यते इति भज्यः भज्य इव आचरतीति भज्यति अन्यथायं प्रयोगो महाकविगम्य. ॥ ८७ ॥

कृतशालकबाह्यवासखेटास्त्वसदन्यग्रहयुक्तगर्भदुर्गः ॥
यदि तत्र न जायतेऽपि भंगः प्रबले द्वेषिणि चास्तु खंडिपातः॥८८॥

अथवा स्वमध्ययोः पापसौम्यैः पुरोऽभगतामाह—कृतेति ॥ यदि कृतो बाह्यकशाले वासो यैस्ते च खेटाश्च प्राकारबाह्यस्थिताः पापखेटाः संति तु पुनरसदन्यग्रहयुक्तगर्भदुर्गः दुर्गमध्यगतशुभग्रहाः संति तदा तत्र शाले भंगो न जायते कस्मिन्प्रबले द्वेषिणि सति अपि च पुनः खंडिपातः किंचित् कोटपतनमस्तु ॥ यतः 'प्राकारे बाह्यगाः क्रूराः सौम्या मध्यगता यदि ॥ युद्धं प्राकारखंडिश्च पुरभंगो न जायते' ॥१॥ इति ॥ ८८ ॥

बहिरंतरगाः खलाः खपांथाः स्युरपापा यदि शालधिष्ण्यसंस्थाः ॥
उभयोश्च चमूक्षयोऽतियुद्धान्नियतं भूमिभुजोस्तयोर्निवृत्तिः ॥ ८९ ॥

अथ बाह्यमध्ये पापसौम्यग्रहमिश्रे फलमाह—बहिरिति ॥ यदि खलाः क्रूराः खपांथाः ग्रहाः बहिरंतरगाः स्युः अपापाः शुभा ग्रहाः शालधिष्ण्ये संस्थाः प्राकारनक्षत्रे स्थिताः स्युस्तदा नियतं निश्चितं तयोरुभयोर्भूमिभुजोश्चमूक्षयः सेनाविनाशःस्यात् ॥ कस्मादतियुद्धात् च पुनरुभयोर्भूमिभुजोर्निवृत्तिः कल्याणं स्यात् ॥ यतः ' सौम्यमध्ये च कोटे च बाह्ये पापग्रहा यदि। दैवैर्ब्रह्मादिभिर्दुर्गं रणारंभे न गृह्यते' ॥ ८९ ॥

सखलग्रहशालतारका चेद्बहिरंतर्गतशोभनग्रहेंद्राः ॥
समसंगरयामनंति संतः प्रतिवारं च पतत्यपीह खंडिः ॥ ९० ॥

अथोक्तवैपरीत्ये फलं दर्शयति—सखलेति ॥ चेद् यदि सखलग्रहशालतारका खलग्रहयुक्तप्राकारनक्षत्रं स्यात् बहिरंतर्गतशोभनग्रहेंद्राः संतः पंडिताः समसगरं समानसंग्राम आमनंति कथयति च पुनरिह प्रतिवारमष्टमवारपर्यंतं वर्तमानवारतोऽष्टवार इति प्रतिवारं खंडिरपि पतति किंचित् किंचित् कोट्योद्वादिक्षय स्यादित्यर्थ ॥ यतः ' प्राकारस्था ग्रहाः क्रूरा बहिर्मध्ये शुभाः स्थिताः। समयुद्ध भवेत्तत्र खंडिपातो दिने दिने' ॥ ९० ॥

युगपत्सदसद्वियच्चरेंद्रा यदि मध्यस्थलदुर्गबाह्यगाः स्युः ॥
युधि घोरतरेऽतकास्ययानं भवतीलातलपालयोर्द्वयोर्वा ॥ ९१ ॥

अथ मध्यबाह्ये युगपच्छुभाशुभग्रहे सर्वक्षयं दर्शयति—युगपदिति ॥ यदि चेत् यत् समकाले सदसद्वियच्चरेंद्राः शुभाशुभग्रहाः मध्यस्थलदुर्गबाह्यगाः स्युस्तदा घोरतरे उग्रे युधि संग्रामे द्वयोः इलातलपालयोर्भूतलस्वामिनोरंतकास्ययानं प्रयाणं मृत्युर्भवतीत्यर्थः ॥ यतः ' क्रूराक्रूरग्रहाश्चापि प्राकारे मध्यबाह्यग। एकस्था यत्र कुर्वंति संग्रामं तत्र दारुणं ॥ न कश्चित् विजयं युद्धे द्वयं याति यमालयं ' इति ॥ ९१ ॥

सममानतया शुभाशुभाश्चेत्सहिता बाह्यविमध्ययोर्नभोगाः ॥
परिवेष्टकशालपालराज्ञोरिह संधिं कथयंति कोविदा वा ॥ ९२ ॥

अथवा समध्ये समभागस्थितशुभाशुभग्रहे फलमाह—समेति ॥ चेद् यदि शुभाऽशुभाः सममानतया तुल्यप्रमाणेन सहिताः युक्ताः नभोगाः ग्रहाः बाह्यमध्ययोः बाह्यमध्यगाः स्युस्तेनि पक्षांतरे इह तदा कोविदाः पंडिताः परिवेष्टकशालपालराज्ञोः वेष्टकभूपते. शालभूपते अन्योन्यं संधिं कथयंति ॥ यतः 'समसंख्याः शुभाः क्रूरा बहिर्मध्ये च संस्थिताः ॥ तदा संधिर्विजानीयात्सैन्ययोरनयोरपि' ॥ ९२ ॥

चरतोरवनीतजन्मचांद्र्योरहनि स्तांभ्य उत प्रवेशभे भे ॥
पुरगोधमवेहि जीवपक्षे त्वकुलर्क्षे हिमभासि भूरिकालम् ॥ ९३ ॥

अथ भौमबुधचंद्रनक्षत्रसंयोगे पुररोधं दर्शयति—चरत इति ॥ हे राजन् त्वं पुररोधमवेहि जानीहि कस्मिन् अवनीतजन्मचांद्र्योः अवनिर्भूमिस्तस्या इतं प्राप्त जन्म येन स अवनीतजन्मा चंद्रस्यापत्यं चांद्रिर्बुधः अनयोर्द्वंद्वे एतयोरहनि दिने किंभूतयोर्भौमबुधयोः स्तंभे भवं स्ताम्यं तस्मिन् स्तंभसंबंधिनि भे नक्षत्रे उत अथवा प्रवेशनक्षत्रे चरतोर्गच्छतो. तु पुनरकुलर्क्षे कुलसंज्ञमवर्जितनक्षत्रे जीवपक्षे हिमभासि चंद्रे भूरिकालं पुररोधं जानीहि ॥ ९३ ॥

दिशि मंत्रिणि संस्थिते मघोनः क्षितिजे दंडभृतः सिते परस्यां ॥
विदि वित्तविभोश्च जिह्मभावे नु मिथः शैबिरशालभेदभंगः ॥९४॥

अथात्र पूर्वादिदिक्षु स्थितगुरुभौमशुक्रबुधानां फलमाह—दिशीति ॥ नु वितर्के मिथः परस्परं शैबिरशालभेदभंगः सैन्यरचनापटमंडपादिः शालः प्राकारभेदः उपजाप एषां भंगः स्यात् कस्मिन् मघोन इंद्रस्य दिशि पूर्वस्यां मंत्रिणि गुरौ सति पुनः क्षितिजे भौमे दंडभृतो यमस्य दिशि दक्षिणस्यां संस्थिते सति पुनः सिते शुक्रे परस्यां पश्चिमायां दिशि संस्थिते सति पुनर्विदि बुधे वित्तविभोर्धनदस्य दिशि उत्तरस्यां संस्थिते सति किंभूते गुरुप्रमुखे जिह्मभावे वक्रगतिं प्राप्ते ॥ ९४ ॥

ससदन्यनिरीक्षितद्विजेशो द्युसदोऽसंत उतास्ति यत्र तत्र ॥
खलु खंडिनिपात ईक्षितास्तैः पुरवेशो विशतोऽसतोऽयनेन ॥९५॥

क्रूरग्रहविलोकितस्थाने फलं दर्शयति—ससेति ॥ उत वितर्के यत्रासंतः क्रूरा द्युसदो ग्रहाः संति किंभूताः ससदन्यनिरीक्षितद्विजेशः क्रूरग्रहविलोकितचंद्रसहिताः द्विजेट् द्विजेशो द्विजेशः इति बहुवचनं खलु निश्चितं तत्र खंडिपातो वप्रभंगोऽस्ति पुनर्यत्र तैः पापैरीक्षिताः क्रूरग्रहाः संति तत्र विशन् तस्य विशतः प्रवेशकारस्य राज्ञः पुरवेशो नगरप्रवेशः स्यात् शत्रु पुरं गृह्णातीत्यर्थः । केनासतः पापस्यायनेन मार्गेण दारुणयुद्धे बहुजनयुद्धे क्षयत्वात् ॥९५

इह निर्गमभे निहंति पापः कुटिली बाह्यविशालशालभित्तिं ॥
स तु शालगतो हि मध्यभागं जठराद्वाममिदं भवेत्प्रवेशे ॥ ९६ ॥

अथ वक्रिग्रहाश्रितस्थाने फलमाह—इहेति ॥ हि युक्तार्थे इह निर्गमभे कुटिली वक्री सन् पापो ग्रहो बाह्यविशालशालभित्तिं बाह्यबृहत्प्राकारकुड्यं निहंति तु पुनः स वक्री पापग्रहः शालगतः सन् मध्यभागं हंति पुनरिदं फलं जठरान्मध्यभागात् वामं विलोमं प्रवेशे भवेदित्यर्थः ॥ ९६ ॥

यदि दुर्गविभुः खला विमध्ये निखिलास्तंभभवर्तिनो भवंति ॥
पुरुहूतपराक्रमोऽपि शालं बत मुक्त्वा विपलायते खपांथाः ॥९७॥

अथ स्तंभनक्षत्राश्रितक्रूरग्रहाणां फलमाह—यदीति ॥ यदि विमध्ये शालकोटके निखिलाः समस्ताः खलाः पापाः खपांथाः ग्रहाः स्तंभवर्तिनः स्तंभभनक्षत्रेषु वर्तमाना भवंति तदा

वतेति खेदे दुर्गविभु प्राकारस्वामी शालं मुक्त्वा विपलायते गृहीतदिग् भवति । किंभूतः इद्रसमानवीर्योऽपि ॥ ९७ ॥

इह शालवदेव देशचक्रे कथितस्तारकखेचरादिभेदः ॥
पुरनामभपंचभागधिष्ण्यात्पुरचक्रे च सदोदितः प्रबुद्धैः ॥ ९८॥

अथ कोटचक्रोपसहारेणान्यदपि दर्शयति—इहेति ॥ इह चक्राधिकारे सदा प्रबुद्धैः पण्डितैः तारकखेचरादिभेदः नक्षत्रग्रहादिस्थापनाभेदः शालवत् प्राकारवत् एव कथितः । कस्मिन् देशचक्रे जनपदसाधनचक्रे च पुनः पुरचक्रे नगरचक्रे पुरनामभपचभागधिष्ण्यात् नगरनामनक्षत्रात् पञ्चभागस्थानात् तारकखेचरादिभेदः उदितः प्रोक्तः चतुर्दिक्षु मध्यभागे चेति पञ्चभागेन स्थापना इति शालादिचक्राधिकारः सपूर्णः ॥ सालो दस्यस्तालव्यश्च ॥ ९८ ॥

समिताजपदृक्षवैश्वमिश्रैर्द्विनगेनैंदवघस्त्रवर्तमानैः ॥
रविमंदरथद्युगद्युभी राट् पुरवेशी बहुदेशवेशकः स्यात ॥ ९९ ॥

अथ युद्धे नगरपुरादिप्रवेशे तिथिवारशुद्धिमाह—समितेति ॥ राट् राजा समिता संग्रामेण पुरवेशीनगरप्रवेशको बहुदेशवेशको भूरिजनप्रवेशकारकः स्यात् ॥ कैः अजपदृक्षवैश्वमिश्रैः पूर्वाभाद्रपदा उत्तराषाढा मिश्रे कृत्तिकाविशाखे एषा द्वंद्वे एभिः किंभूतैः द्विनगेति । द्वौ द्वितीया २ नगा सप्तमी ७ इना द्वादशी १२ भद्रास्तिथयः एते चैंदवघस्राश्चाद्रदिनाश्चैषु वर्तमानैः पुनः किंभूतैः रविमदेति । रविः सूर्यः मदो रथो वेगो गमनं यस्य स मदरथः शनिः द्युमौ च द्युगो च रविमदरथद्युगौ तयोर्द्यू दिनौ एषु तानि ते द्युभी राट् इत्यत्र पुरतो विसर्गस्य रस्य लोपे च कृते पूर्वस्वरस्य दीर्घे द्युभीराट् इति जातं ॥ ९९ ॥

सुखवृत्तिभृतः पुरादिवेशेऽधिभुवो मैत्रलघुध्रुवैस्त्वार्तं ॥
भगभार्गवभाग्यजीववारा ददतींद्वीरितकैः सुयोगलग्नाः॥१००

अथ प्रवेशेऽशुभाशुभवारान् दर्शयन्नाह—सुखेति ॥ अधिभुवो नृपस्य पुरादिवेशे नगरादिप्रवेशे भगभार्गवभाग्यजीववाराः सूर्य शुक्र भगस्य सूर्यस्यापत्य भाग्य शनि गुरु द्वंद्वे एते वारा अवार्तमभद्रं ददति कैः कृत्वा मित्रलघुध्रुवैर्मित्रमनुराधा लघुसज्ञानि ध्रुवसज्ञानि एभिर्नक्षत्रैः किंभूतैरिंद्वीरितकैः चन्द्रेण प्रेरितश्चन्द्रेण युक्तैरित्यर्थः । किंभूता सुष्ठु योगो यस्मिन् तत्सुयोग एव विध लग्न एषु ते । किंभूतस्य अधिभुवः सुखवृत्तिभृतः सुखवर्तनधारकस्य ॥१

स्थिरभोदयभाज्यनेहसीज्ये सुख ४ धाम्नो १० सखवर्मनोश्च दुष्टैः ॥
अरिदलब्धिगतैर्हितः प्रवेशः पुरि संक्रीडितमुस्थिरैर्द्धवस्थैः ॥ १०१

अथ स्थिरलग्नादौ प्रवेशं दर्शयति—स्थिरेति ॥ पुरि नगर्यां राज्ञः प्रवेशो हितो हितकारी स्यात् । कस्मिन् स्थिरभोदयभाजि स्थिरराशिलग्नयुक्ते अनेहसि काले इज्ये गुरौ च पुनः सखवर्मनोः मद्रे छह वर्तमानयोः सु ४ धाम्नः १० चतुर्थदशमभावयोः

पुनः कैः भरिलग्नगतैः तृतीयषष्ठैकादशभावगैः दुष्टैः पापग्रहैः किंभूतैर्दुष्टैः संक्रीडि-तसुस्थिरेंद्ववस्थैः संक्रीडिता १ सुस्थिरा २ इमे चंद्रावस्थे द्वे एषु ते तैः ॥ १०१ ॥

प्रवासा विनष्टा मृताख्या जया च प्रहास्या रतिः क्रीडिता सुप्तभुक्ते ॥
ज्वरा कंपिता सुस्थिरैवानुभं स्युः क्रमेण क्रियादर्कमा इंद्ववस्थाः॥१०२

अथ भुजंगप्रयातेन चंद्रस्य द्वादशावस्था आह—प्रवासेति ॥ क्रियात् मेषात् क्रमेणानुभं राशिं राशिं प्रवासादय इंद्ववस्थाश्चंद्रावस्था अर्कमा अर्कैर्मीयंते इत्यर्कमा द्वादश-संख्याः स्युः ॥ मेषराशिस्थचंद्रात् प्रवासादयः १२ वृषराशिस्थचंद्रात् विनष्टादयः १२ एवं सर्वा अपि । सुप्ता च भुक्ता च मनयोर्द्वंद्वे सुप्तभुक्ते एव निश्चितम् ॥ १०२ ॥

प्रवासे श्रमो वा प्रवासोदयोऽब्जे विनष्टश्रुतिःस्याद्विनष्टानुयाते ॥
मृतायां कलिर्वा रुगार्तिर्जयायां जयःसर्वतःस्मैतयोगः स्मितायाम्॥१०३

अथासां फलमाह काव्यत्रयेण—प्रवास इति ॥ प्रवासोदये प्रवासावस्थायामब्जे चंद्रे सति प्रवासे बहिर्गमने श्रमः स्यान्नरस्येति शेषः ॥ एवं विनष्टानुयातेऽब्जे विनष्टश्रुतिः विनाशस्य श्रवणं पुनर्मृतायामब्जे कलिर्वाथवा रुगार्तिः रोगपीडा पुन-र्जयायामब्जे सर्वतो जयः पुनः स्मितायामब्जे स्मैतयोगः हास्यसंयोगः स्यात् ॥ १०३ ॥

रतौ रात्र्यधीशे रतीशे रतिर्वा जनैः क्रीडितायां वशाभिर्विलासः ॥
मदालस्यमोहः प्रसुप्तानुगे स्यात्सुभुक्तिश्च भुक्ताश्रितेऽर्तिर्ज्वरायां १०४

रताविति ॥ रतौ रात्र्यधीशे रत्यवस्थायां चंद्रे सति रतीशे कामविषये रतिः स्यात् ॥ वा पुनः क्रीडितायां चंद्रे वशाभिर्वध्यास्त्रीजनैः सह विलासः । पुनः प्रसुप्तानुगे चंद्रे मदालस्यमोहः मदतंद्राभ्यां मौढ्यं स्यात् ॥ पुनर्भुक्तामिश्रिते चंद्रे भुक्तिः पुनर्ज्वराया चंद्रेऽर्तिः पीडा स्यात् ॥ १०४ ॥

दरो वेपथुः कंपितायामितींदौ स्थितिः स्थायिनी जायते सुस्थिरायां ॥
समामासघस्रप्रवेशे च याने दरे पूःप्रवेशे कलौ चिंत्यमेतत ॥ १०५ ॥

दर इति ॥ कंपितायामिंदौ चंद्रे दरो भयं वेपथुः कंपश्च जायते । पुनः सुस्थिराया-मिंदौ स्थायिनी तिष्ठच्छीला स्थितिर्जायते इति एवमेतच्चिंत्यं । कस्मिन् समादिप्रवेशे समा वर्षं मासः घस्रः एषां प्रवेशे च पुनर्याने प्रयाणे पुनर्दरे भये पुनः पूःप्रवेशे नगरीप्रवेशे पुनः कलौ संग्रामे ॥ १०५ ॥

विपक्षं विजित्वा तदर्थं च नीत्वा समापूरयत्यात्मकोशालयं यः ॥
स जीवे शुभे भोदयेऽब्जे स्थिरे स्वे सपूर्णे शनीज्यान्हि यात्यर्थवृद्धिम्१०६

अथ भंडारभरणशुद्धिमाह—विपक्षमिति ॥ यो नृपः आत्मकोशालयं निजभंडारगृहं समापूरयति किं कृत्वा विपक्षं शत्रुं विजित्वा न पुनस्तदर्थं शत्रुधनं नीत्वा गृहीत्वा कस्मिन्

स्वे धनभावे स्थिरे भोदये धनभावस्थस्थिरराशिलग्ने पुनरब्जे चंद्रे जीवे गुरौ च शुभे पूर्णातिथिसहिते शनीज्यान्हि शनिगुरुदिने सति सो नृपोऽर्थवृद्धिं याति प्राप्नोति ॥ १०

कलौ भविष्यंत्यथ भारतावनौ महीभुजो बाहुभुवोऽप्यनेकशः
शकास्तथैषामभिषेचनादिकं हितं सदोदीरितकालसाधितम् ॥१

अथ वंशस्थेन कलौ राजाभिषेकं पूर्ववद्दर्शयति—कलाविति ॥ अथानंतरं युगे भारतावनौ भरतक्षेत्रेऽनेकशो बहवो बाहुभुवः क्षत्रिया महीभुजो राजानो भवि तथा शकाः म्लेच्छा अपि राजानो भविष्यंति सदा तेषामभिषेचनादिकं हितं स्यात् । तमभिषेचनादिकं उदीरितकालसाधितं पूर्वोक्तकालसाधितं ॥ १०७ ॥

धराधिभृन्भिल्लशकादिजातिजस्तदासनस्थोऽभिजनैर्नमस्कृतः ॥
स्तुतः स राजाधिजनैः प्रतिष्ठितो न मंत्रभेदाद्यभिषेचनोचितः॥

अथ भिल्लादिजातिनृपाणामभिषेकादिकं निषेधति—धरेति ॥ भिल्लशकादिज धराधिभूः राजा मंत्रभेदाद्यभिषेचनोचितो न स्यात् । किंभूतः धराधिभूः तदासनस्थः पूर्वो नस्थितः पुनः किंभूतः अभिजनैः यो कुलजनैर्नमस्कृतश्च पुनः किंभूतः स्तुतः ॥ अथवाभिजना नाख्या इति यादवाः नियति ॥ पुनः किंभूतो राजाधिजनैः राज्ञोऽधिकारम प्रतिष्ठितः ॥ १०८ ॥

युधिष्ठिराद्वेदयुगांबराग्नयः ३०४४ कलंवविश्वे १३५
ऽभ्रखखाष्टभूमयः १८००० ॥ ततोऽयुतं लक्षचतुष्टयं
४०००००क्रमाद्धराष्टगष्टा ८२१ विति शाकवत्सराः ॥ १११ ॥

अथ युधिष्ठिरादीनामंतरालवर्षाण्याह—युधिष्ठिरादिति ॥ युधिष्ठिरात् कलिसंक्रमणकालः स्यात् ॥ वेदयुगांबराग्नयः ३०४४ चतुश्चत्वारिंशदधिकसहस्त्रत्रयं शाकवत्सरा भवंति एतावत्काले युधिष्ठिरशाकः ॥ ततः कलंबविश्वे कलंबा वाणाः ५ विश्वे त्रयोदश १३५ पंचत्रिंशदधिकशतं एतावत्काले विक्रमशाकः ॥ 'रोपः कलंवशरमार्गणाचित्रपुंखा' इति हैमः ॥ ततोऽभ्रखखाष्टभूमयः १८००० अष्टादशसहस्रा एतावत्कालं शालिवाहनशाकः ॥ ततोऽयुतं १००००दशसहस्रा एतावत्काले विजयाभिनंदनशाकः ॥ ततो लक्षचतुष्टयं ४००००० एतावत्कालं नागार्जुनशाकः ॥ ततो धराष्टगष्टौ धराष्टकुअष्टौ८२१ 'महीद्विनागाः' इत्यपिपाठः॥ एकविंशत्यधिकाष्टशत एतावत्काले बलिशाकः॥ इति इह कलौ क्रमात् शाकवत्सराः स्युः॥१११

युधिष्ठिरोऽभूद्भुवि हस्तिनापुरे तथोज्जयिन्यां पुरि विक्रमाव्हयः ॥
शालेयधाराभृति शालिवाहनः सुचित्रकूटे विजयाभिनंदनः॥११२॥

अथोपजातयेषा जन्मभूमिमाह—युधिष्ठिरादिति ॥ स्पष्टं नगरं शालेयधाराभृति शालेरमोलेरनाम्नि गिरौ ॥ ११२ ॥

नागार्जुनो रोहितके क्षितौ बलिर्भविष्यतींद्रो भृगुकच्छपत्तने ॥
कृतप्रवृत्तिस्तदनंतरं भवेत्तदा भविष्यंत्यवनीभृतोऽर्कतः ॥ ११३ ॥

नागेति ॥ पूर्वार्द्धं स्पष्टं । नगरं रोहितके क्षितौ रोहितासभूमौ ॥अनुक्तान्यप्यत्र ग्रंथांतरादेषां वंशनामान्याह ॥ यतः 'युधिष्ठिरोभूत्किल राजवंशजः स राजपुत्रः परमारवंशभूः ॥ श्रीविक्रमार्को ननु शालिवाहनो गोहिल्लभूर्वै विजयाभिनंदनः ॥ १ ॥ शिशोदरान्वायभवो भविष्यत्ततोऽत्र नागार्जुनसंज्ञको नृपः ॥ राजाधिराजः किल कल्किरात्मभूस्तत्स्थापितो, राट् बलिरत्र दीक्षकः ॥ २ ॥ इति ॥ अथ उत्तरार्द्धमाह ॥ तदनंतरं कृतप्रवृत्तिः सत्ययुगप्रवर्तनं भवेत्तदार्कतः सूर्यतोऽवनीभृतो राजानः सूर्यवंश्या भविष्यंति ॥ ११३ ॥

समस्तकाष्ठाचरतामिलाभृतामेषामृतं दिग्विजयोऽनिशं भवेत् ॥
इति प्रयत्नाद्गणकैरुदीरितं यानं सदा कालगमेषु कामदम् ॥११४॥

अथैषा सदाकालप्रयाणमाह—समस्तेति ॥ अनिशं निरंतरं इलाभृता महीपतीना समस्तकाष्ठाचरता सर्वदिक्षु गच्छता सता अनेकभूपदेशेषु गमनशीलाना एषा चक्रवर्तिनां दिग्विजयो भवेदिति हेतोः ऋतं सत्यं गणकैर्यत्नादुद्यमात् सदाकालम सर्वकालमार्ग यानं प्रयाणं कामदमभीष्टदायकमुदीरितं प्रोक्तं केषु एषु चक्रवर्तिषु ॥ ११४ ॥

गजपतिरधिमत्तो वांतरं योऽधिदेशो हयपतिरचलेशः सोऽपि साधारणः स्यात् ॥ नरपतिरिह मंदो लेशदेशावनीशो निजबलवशतोऽमी दिग्जये सत्वभाजः ॥ ११५ ॥

इति श्रीकविकालिदासोदिते ज्योतिर्विदाभरणे राजसत्ताध्यायो दशमः ॥ १० ॥

अथ मालिन्यैषां सर्वेषां बलं वर्णयति ॥ गजपतिर्वाधिमत्तोऽधिकारयुक्तो वाऽधिदेशोऽधिकदेशवान् वा हयपतिर्वाचलेशः पर्वतेशो भूमीशो वा नरपतिर्वा लेशदेशावनीशः स्वल्पदेशवान् स्वल्पभूमीशो वा यः स्यात्सोऽपि मंदः सन् साधारणः सामान्यः स्यात् । किमस्मिन्निह दिग्विजयेऽनंतरं पश्चात् अमी षट्चक्रवर्तिनो दिग्जये सत्वभाजोऽभग्नशक्तियुक्ताः स्युः कस्मान्निजबलवशत इति ॥ ११५ ॥

इति श्रीपौर्णिमीयगच्छाधिराजभट्टारकपुरंदरश्रीमहिमाप्रभसूरीश्वरचरणसरोरुहचञ्चरीकायमाण शिष्यभावरत्नविरचितायां श्रीकविकालिदासकृतज्योतिर्विदाभरणस्य सुखबोधिकायां राजसत्ताध्यायो दशमः ॥ १० ॥

त्रिविधयात्राध्यायप्रकरणम् ।

अथ प्रयाणं त्रिविधं बृहत्समं मितं भवेदेतदपि त्रिभेदकृत् ॥ कलिक्रियं तीर्थफलं च पण्यवत् किलेति तत्कालनयं ब्रवीम्यहम् ॥ १ ॥

अथ राजसत्तामाश्रित्य प्रयाणं स्यादतो वक्ष्यस्थेन प्रयाणाध्यायसंधानमाह—अथेति अथानंतरं किलेत्यवधारणे बृहत् मौढं १ समं तुल्यं न्यूनाधिकविवर्जितमित्यर्थः २ मितं स्वल्पं ३ इति त्रिविधं प्रयाणं भवेत् ॥ अपि पुनरेतद्बृहत्समलघुत्रिविधमपि प्रयाणमेकैकं त्रिभेदकार्यभेदयुक्तं स्यात्तदाह ॥ कलिक्रियं स्वर्गुद्धस्य क्रिया यस्मिंस्तत् पुनः किंभूतं तीर्थस्य फलाभो यस्मात्तत् 'फलशस्यामिव्युष्टिलाभयो 'रित्यनेकार्थः ॥ पुनः किंभूतं पण्यवत् पणितव्ययुक्तं 'पणितव्यं तु विक्रेयपण्यमिति' हैम ॥ यथा बृहत्प्रयाणं कलिक्रियं तीर्थफलं पण्यवत् इति त्रिधा तथा बृहत् समं लघु च त्रिधा योज्यमिति ॥ अहं तत्कालनयं तेषां प्रयाणानां समयनीतिं समयनिर्णयं वा ब्रवीमि कथयामि ॥ १ ॥

शुचे शुचिः स्याच्च नभो नभोगहृन्नभस्यमासो गुरुभस्यसंगदः । बृहद्गमस्योशनसश्च गीष्पतेस्तुदुमो मुद्गमनं सृजत्यरम् ॥ २ ॥

अथ बृहत्प्रयाणे आषाढादीन् दूषयति—शुचे इति ॥ गुरोरस्य शुचिराषाढः शुचे शुद्धे तस्मै शोकाय स्यात् । किंभूतस्य तु बृहद्गमस्य बृहद्गमो गमनं यस्य स तस्य अर्थाद्बृहत्प्रयाणे निषेधो न । च पुनरेव नभ श्रावणो भोगहृत् स्यात् । अयं नभ शुद्धाश्चाश्वि

शब्दप्रभेदे दृश्यतेऽपरस्तु नभाः सकारातः पुंसि सुवचः शब्दवत् । पुनर्नभस्यमासो भाद्रपदमासो नरस्याभस्य संगदो मृत्युदायकः स्यात् ॥ भातीति भा नास्ति भा कांतिर्यस्य-स-अभो यमः कालः अदृश्यरूपत्वादभ इति पदं युक्तं तस्याभस्येति ॥ च पुनरुशनसः शुक्रस्य गीष्पतेर्गुरोश्चानुद्गमोऽस्तकालोऽरं शीघ्रं नरस्योद्गमनं मरणं सृजति करोति हि युक्तार्थे ॥ २ ॥

सिते समांशावुदयानुगे सदानुकूलवर्तिन्यधिवृत्तिकृद्गमः ॥
भवत्यसौ च त्रिविधो जनुर्विभावनस्तगे न्यस्तफलस्तमीश्वरे ॥ ३ ॥

अथ शुक्रादिशुद्धौ प्रयाणमाह—सित इति ॥ सदाऽसौ त्रिविधो गमो गमनमाधिवृत्तिकृत् अधिका वृत्तिं करोतीति तथा भवति । कस्मिन् सिते शुक्रे सति । किंभूते शुक्रे समांशौ कोऽर्थः ग्रहयुतौ अन्यग्रहेण विजितो न स्यात्स समाशुः पूर्णवीर्यस्तस्मिन् । पुनः किंभूते शुक्रे उदयानुगे उदयप्राप्ते पुनः किंभूते अनुकूलवर्तिनि पुनः कस्मिन् सति अनगस्ते उदयप्राप्ते जनुर्विभौ जन्मलग्नस्वामिनि किंभूतो गमः तमीश्वरे चंद्रे न्यस्तफल आरोपितफलः गृहीतशुभचंद्र इत्यर्थः ॥ ३ ॥

न तीर्थकामः सति पाणिजायुधेऽनृजौ शिशौ वृद्धघने च नीचगे ॥
नरोऽमरार्च्ये गमनं प्रकारयेद्विनैव कुंभस्थलगौतमीगयाः ॥ ४ ॥

अथानिष्टगुरौ तीर्थप्रयाणं निषेधति—न तीर्थेति ॥ तीर्थकामस्तीर्थगमनेच्छुर्नरो गमनं न कारयेत् । कस्मिन् पाणिजायुधे पाणिजा नखास्त एवायुधं यस्य स सिंहस्तस्मिन् सिंहराशौ अमरार्च्ये गुरौ सति । किंभूते गुरौ अनृजौ वक्रिणि पुनः किंभूते शिशौ बाल्यावस्था गते पुनः किंभूते वृद्धघने वृद्धावस्था गते पुनः किंभूते नीचगे स्पष्टं किंविना कुंभस्थलगौतमीगयाः विनायोगे द्वितीया अत्र कुंभस्थलादिष्वेव गमनं कुर्यादित्यर्थः ॥ यतः कुंभराशिगुरौ कुंभस्थलं हरिद्वारं गच्छेत् । सिंहगुरौ गोदावरीं गच्छेत्सर्वकाले गयां गच्छेदित्यादि ॥ यतः ' हरिद्वारे प्रयागे च गंगासागरसंगमे ॥ सर्वत्र दुर्लभा गंगा त्रिषु स्थाने विशेषतः ' ॥ १ ॥ वासिष्ठया गोमती तद्वत् गोतमी स्यादिति शब्दप्रभेदः ॥ ४ ॥

स्वधामतो द्वादशयोजनावधि प्रयाणमार्यैरिह तीर्थमानिभिः ॥
नोदीरितं तैर्ध्यमशेषधर्मदं परैरुदन्वद्द्युतिनिम्नगावधि ॥ ५ ॥

अथानिष्टे गुरौ निष्फलतीर्थप्रयाणमाह—स्वधामेति ॥ तीर्थमानिभिस्तीर्थफलवेदिभिरार्यैः पुरातनैर्बुधैरिह पूर्वोक्तगुरावनिष्टे सति तैर्थ्यं तीर्थभवं प्रयाणमशेषधर्मदं नोदीरितं न कथितं ॥ किंभूतं प्रयाणं स्वधामतो निजगृहात् द्वादशयोजनावधि अष्टाचत्वारिंशत्क्रोशपर्यंतं पुनः परैरपरैरुदन्वद्द्युतिनिम्नगावधि न कथितं उदन्वान् समुद्रस्तस्मिन् द्युतिर्मिलितं यस्याः साऽसौ च निम्नगा नदी च तस्या अवधिर्मर्यादा यस्मिंस्तादिति गंगासागरसंगमपर्यंतमिति ॥ ५ ॥

गतिर्नृणामृत्वनुकूलगामिनी मुदि प्रधानेव सदैव भामिनी ॥
सुशुद्धिगाशाश्रयसिद्धिकारिणी समस्तयानोत्सवकार्यचेतसां ॥६॥

अथ गमने सामान्येन ऋतुशुद्धिमाह—गतिरिति ॥ समस्तयानोत्सवकामे चेतो येषां ते तेषां नृणां गतिर्गमनं ऋत्वनुकूलगामिनी सदैव मुदि हर्षनिमित्तं प्रधाना वरा स्यात् पदृक्नू नामनूकूले योग्यतां गच्छतीत्येवंशीला यादृक् ऋतुस्तादृक् प्रयाणं शुभमित्यर्थः ॥ किंभूता गतिः सुशुद्धिगा अतिशयशुद्धिं प्राप्ता पुनः किंभूता गतिः आशाश्रयसिद्धिकारिणी इच्छाधारकस्य सिद्धिकरणशीला अथवा समस्तं पदं अतिशुद्धिं प्राप्ता चासौ आशा दिक् च तस्यामाश्रयो निवासो यस्य स तस्य नरस्य सिद्धिकारिणी केव भामिनीव भामिनी वधूरप्येवंविधा भवति किंभूता भामिनी ऋत्वनुकूलगामिनी ऋतुकालानुगमनशीला सती प्रधाना पुनः किंभूता सुशुद्धिगा ऋतुस्नानानंतरं शुद्धिं प्राप्ता पुनराशाश्रयस्य इच्छाधारकस्य भर्तुः सिद्धिकारिणी ॥६॥

ईषत्तडिद्वासवतीमधिक्रियां घनांबरामिंद्रधनुःकटाक्षिणीं ॥
शिखिस्वना वृत्तपयोधरां सुधीः प्रावृड्वशामेत्य न यानमिच्छति॥७॥

अथ काव्यद्वयेन वर्षासु वर्णनद्वारेण प्रयाणं निषेधति—ईषदिति ॥ सुधीः प्रावृड्वशा वर्षाऋतुरेव स्त्री तामेत्य प्राप्य ईषत् स्तोकमपि यानं प्रयाणं न इच्छति किंभूतां प्रावृड्वशा तडिद्वासवती तडिता विद्युता वासोऽवस्थानमस्यास्तीति सा ता विद्युत्स्थितिमती यथा 'सरस्वती वासवती मुखे' इति नैषधद्वितीयसर्गे॥ अथवा ईषच्छब्दोऽत्रापि योज्यः ॥ ईषद्वारं वारं तडितामिति तथैव ॥ पुनः किंभूता प्रावृड्वशा अधिक्रिया अधिका क्रिया कर्षणादिका बहुत्पन्नजंतुहिंसादिरूपा वा यस्या सा ता पुनः किंभूता प्रावृड्वशा घनांबरा घना मेघा एव अंबराणि वस्त्राणि यस्याः सा ता पुनः किंभूता इंद्रधनुःकटाक्षिणीं इंद्रधनुरेव कटाक्षोऽक्षि विकूणितमस्यास्तीति ता पुन किंभूता शिखिस्वना शिखिना मयूराणा स्वनाः शब्दा यस्या सा ता पुनः किंभूता वृत्तपयोधरा वृत्ता सर्वत्र प्रसरणशीला पयोधरा मेघा यस्या सा ता॥ अथ स्त्रीपक्षं दर्शयति ॥ किंभूता वशा तडिद्वत् वासवती स्थितिमती तडिदुपमानेन चंचलत्वोजसादिस्वभावः प्रोक्तः ॥ अथवा तडिद्वत् वासवती वारांगना यस्याः सा तां पुन. किंभू आधिका क्रिया षोडशालंकाररूपा यस्याः॥ पुनः किंभूता घनानि सूक्ष्माणि वस्त्राणि यस्य सा पुनः किंभूता इंद्रधनुर्वत् कटाक्षा यस्याः सा। पुनः किंभूता शिखिनः स्वन इव स्वनो यस्य सा। पुनः किंभूता वृत्तौ मंडलाकारौ पयोधरौ स्तनौ यस्याः सा तामिति रूपकालंकारः॥ य 'रूपकं यत्र साधर्म्यादर्थयोरभिधा भवेत् ॥ समस्तं वासमस्तं वाखंडं वा खंडमेव वा ॥ १ कीर्णांधकारा कलशालमाना निबद्धताराऽस्थिमणिः कुतोऽपि ॥ निशापिशाची व्यचरद्दधा महांत्युलूकध्वनिफेत्कृतानि ॥ २ ॥ इति वाग्भटालंकारे ॥ ७ ॥

इयं लसच्छाडुलकार्द्रचीवरा धुनीभुजाबंधितपांथपद्धतिः ॥
नवांबुदासिंचितपर्वतस्तनावनीव वर्षासु चरद्धृतस्पृहा ॥ ८ ॥

इयमिति—इयमवनी भूमिरेवंविधा स्यात् किंभूतावनी लसदिति ॥ लसंतो देदीप्यमाना ये शाद्वलका बालतृणयुक्तस्थानानि त एव आर्द्राणि चीवराणि यस्याः सा । पुनः किंभूता धुन्यो नद्यस्ता एव भुजौ हस्तौ ताभ्यां बंधिता रुद्धा पाथस्य पथिकजनस्य पद्धतिर्मार्गो ऽथवा पांथश्रेणिर्यया सा । पुनः किंभूता नवांबुदैर्नवीनमेघैः सिंचिताः पर्वताः शैला एव स्तनौ यस्याः सा । अवनी केव चरद्वधूसखी इव यथा चरतो देशांतरं गच्छतो नरस्य वधूर्वधूटी तस्याः सखी अथवा वधूरेव सखी सध्रीची एवंविधा भवेत् ॥ किंभूता चरद्वधूसखी लसच्छाद्वलकवत् आर्द्राणि छिन्नानि चीवराणि यस्याः सा । पुनः किंभूता धुनिवत् भुजौ दीर्घबाहू ताभ्यां बंधिता पाथस्य गच्छद्भर्तुः पद्धतिर्यया सा । पुनः किंभूता नवांबुदैः सिंचितौ पर्वतवत् स्तनौ यस्याः सा इति वर्षासु गमनं निषिद्धमित्यर्थः ॥ ८ ॥

शरद्गते मुक्तपयःपयोधरे पयोनिधौ वर्षति शौक्तिकेयतां ॥
तद्बिंदवो वाथ विभूषयंत्यतो जगत् शरत्स्याद्गमनोचिता गुणात् ॥ ९ ॥

अथ काव्यद्वयेन वर्णनद्वारेण शरदृतौ प्रयाणं दर्शयति—शरदिति ॥ शरद्गते शरत्कालमाप्ते मुक्तपय-पयोधरे मुक्तजले मेघे पयोनिधौ समुद्रे वर्षति सति तद्बिंदवोऽपि तस्य मेघस्य जलकणा अपि जगद् विभूषयंति आधाराधेयोपचारात् जगज्जनानलंकरोति किंकृत्वा शौक्तिकेयतां मुक्ताफलत्वमवाप्य प्राप्य समुद्रे अतो हेतोर्गुणात् शरद् गमनोचिता प्रयाणाय योग्या स्यात् ॥ ९ ॥

केदारपात्रधृतशालिभिरिष्टगंधैः शुद्धांबरा विकचदंबुजमंजुनेत्राः ॥
सिद्धेःपुरः शरदि हीवनुलक्ष्मेतत्तद्यायिनो दिगबलाः समवाकिरंति ॥ १०

अथ वसंततिलकेनाह—केदारेति ॥ शरदि ऋतौ दिगबला दिग्वध्वस्तद्यायिनस्तासु दिक्षु गमनशीलान्नरान् समवाकिरंति वर्द्धापयंति कैः केदारेति । केदाराः क्षेत्राणि त एव पात्राणि तेषु धृताः शालयो व्रीहयस्तैःकृत्वा किंभूतैः इष्टगंधैर्मनोहरगंधैः किंभूता दिगबलाः शुद्धानि निर्मलानि अंबराणि नभांसि यासु ताः । पुनः किंभूताः विकचेति । विकचंति विकस्वराणि च तानि अंबुजानि कमलानि च तान्येव मंजूनि मनोहराणि नेत्राणि यासां ताः । यथा स्त्रियोऽपि दिग्यायिनं वर्द्धयंति केदारेभ्यः केदारवत् वा पात्रे रौप्यादिभाजने धृतशालिभिः मनोहरगंधैः किंभूताः स्त्रियः शुद्धाबराः पवित्रवस्त्राः पुनः किंभूताः स्त्रियः विकचदंबुजवत् मंजूनि नेत्राणि यासां ता इत्युक्तिलेशः ॥ हि युक्तार्थे नु वितर्के पुरोऽग्रे सिद्धेः सिद्धिकार्यस्यैतल्लक्ष्म चिन्हमिव यतोऽग्रतः शुभशकुन कार्यसिद्धिं कथयति ॥ १० ॥

मंदं महोऽतकदिशं व्रजतोंऽगभाजो हेमंतमत्तहिमसंपदसह्यवृत्तां ॥
युक्तं भवेत्तिमिरनाशविधेरिवैनां प्रोझ्येतियानमतिमानपरंपराशां ॥ ११

अथ वर्णनद्वारेण हेमंततौ ऋतावपि प्रयाणमनिष्टं दर्शयति—मंदमिति ॥ अंगभाजः प्राणिनो महस्तेजो मंदं क्षीणं भवेत् । किंभूतस्याणपा ा. एनां अंतकदिशं नपरिकाता

मनतो गच्छतः किंभूतामतकादिशं हेमंतेन शीतकालेन मता पुष्टा चासौ हिम संपच तयाऽसह्य सोढुमशक्य वृत्तं शीलं यस्याः सा ता कृत्स्नेन तिमिरनाशविधेः सूर्यस्येव यथा अंतकादिशं दक्षिणाशा मनतस्तिमिरनाशविधेर्महो मंदं भवति तथैव हे नर,त्वं यान प्रयाण जहि। किंभूतं यानं अतिमानपरंपराशं अतिक्रांतमाना परपराशा दिग् यस्मिंस्तत्॥ यथा सूर्योऽपि दक्षिणायने बृहत्पयान त्यजति इति युक्तोऽयमर्थ. । लघुप्रयाणेऽपि शीतपराभवत्वात् बृहत्प्रयाणं सर्वथा निषिद्धमित्यर्थ. ॥ ११ ॥

आशाविनीतगमने शिशिरेऽभ्युपेयान्नीहारपेलवकला-
स्यसरोजशोभाः ॥ सर्वा वशा इव नरो गमना-
भिलाषी भाक्षीणभानुतनुतापपराः प्रियाशाः॥ १२॥

अथ वर्णनद्वारेण शिशिरर्तौ प्रयाणमाह—आशेति ॥ आशया काष्ठया इच्छया वा विनीत प्राप्तं गमन यस्मिन् स तस्मिन् आशाविनीतगमने शिशिरे ऋतौ नर गमनाभिलाषी सन् सर्वा. प्रियाशा ईप्सितकाष्ठा अभ्युपेयात् गच्छेत्। किंभूताः प्रियाशा. नीहारेति. नीहारेण हिमेन पेलव श्लक्ष्ण कृश क जल तस्मिन्नास्यानि दैदीप्यमानानि सरोजानि कमलानि तेषां शोभा यासु ता । अथवा नीहारपेलवेन हिमस्तोकेन कलानि मनोहराणि आस्यानि मुखानि तद्वत् सरोजानि तेषां शोभा यासु ता । अथवा नीहारेण पेलवानि स्तोकानि कलानि आस्यवत्सरोजानि शेष तथैव।पुन किंभूता प्रियाशा भाक्षीणेति। भाभि प्रभाभिः क्षीणश्चासौ भानु. सूर्यश्च तस्य तनुः सूक्ष्मश्चासौ तापश्च तेन परा उत्कृष्टाः का इव वशा इव यथा नरः सर्वाः वशा इयात् किंभूता वशा. प्रिया श्रेष्ठा आशा इच्छा यासा ता अथवा प्रियेषु भर्तृषु आशा यासा ता । पुन किंभूता आस्यान्येव सरोजानि शेष सर्वमपि पूर्ववत्॥ १२ ॥

प्रेत्यानिलो मलयमद्रिमृतो विधत्ते पांथश्रमं त्रिगुण-
भावमपोहितुं किं ॥ कर्तुं मधाविति पराभवमन्यस-
त्वं शक्यं यियासुरखिलासु ककुप्सु तस्मिन्॥ १३ ॥

अथ वर्णनद्वारा वसंततौ सर्वदिक्षु प्रयाणमाह—प्रेत्येति ॥ अनिलो वायुर्मलयमद्रिं मलयाचल प्रेत्य प्राप्य मधौ वसंते तस्मिन् ऋतौ त्रिगुणभाव शीतमंदसौरभत्व विधत्ते विधर्ति किंकर्तुं उत्प्रेक्ष्यते। पांथश्रम पथिकजनश्रममपोहितु निरसितु किंभूतोऽनिल इति अखिलासु ककुप्सु दिक्षु इयासुर्गमनेच्छु किंकर्तुं शक्य समर्थमपि अन्यसत्व विरहिजन पराभव कर्तुं किं यदाह हर्षकवि 'विषमो मलयाहिमण्डलीविषफूत्कारमयो मयोदित ॥ लगकालकरालविग्रहः पवनस्तद्विरहानलैधसा' ॥ १ ॥ १३ ॥

अवकीर्णरसासु दिक्षु कामं गमनं मानव वामलोचनासु ॥
दवथुव्यथितासु घर्मकाले स्वशिवं वांछसि चेदिव त्यज त्वं॥१४

अथ मालभारिण्या वर्णनद्वारेणोष्मकाले प्रयाणं निषेधति—अवकीर्णेति ॥ हे मानव चेद्यदि त्वं स्वशिवमात्मनि भद्रं वांछसि तदा त्वं घर्मकाले, ग्रीष्मकाले काममत्यर्थं गमनं प्रयाणं त्यज मुंच कासु दिक्षु किंभूतासु अवकीर्णरसासु अवकीर्णोऽवध्वस्तो विसंस्थुलप्राप्तो रसो यासु ताः अथवाऽवध्वस्ता रसा भूमिर्यासु तासु 'अवकीर्णेत्ववध्वस्तम्' इति हैमः ॥ पुनः किंभूतासु दिक्षु दवथुना दाहेन व्यथितासु पीडितासु कासु इव वामलोचनासु इव ग्रीष्मे एवंविधासु स्त्रीषु यथा गाढं गमनं त्याज्यमिति ॥ १४ ॥

समेऽयने शीतलगूष्मरश्म्योर्गमोऽथ सर्वत्र भवेदतुल्ये ॥
तस्मिन् शुनेतुर्द्युनि रात्रिनेतू रात्रौ प्रयाणे त्वयनेऽन्यथा न॥१५

अथोपमात्यायनदिक्शूलचक्रमाह—समइति ॥ शीतलगूष्मरश्म्योः चंद्रसूर्ययोः समेऽयने एकस्मिन्नयने सति गमः प्रयाणं सर्वत्र सर्वस्मिन् काले भवेत् । कोऽर्थः यदि चंद्रार्कावुत्तरायणगतौ स्यातां तदा उत्तरस्यां प्राचीं वा व्रजेत् । यदि रविचंद्रौ दक्षिणायनगतौ स्यातां तदा प्रतीचीं दक्षिणां वा व्रजेत्तद्दिङ्मुखा यात्रा शुभेति ॥ अथ पुनर्द्युनेतुः सूर्यस्यातुल्ये भिन्नेऽयने चंद्रारब्धगयने द्युनि दिवसे प्रयाणं भवेत् ॥ द्युशब्दो नपुंसकः यतः 'द्युरत्नयत्व्ययमप्यहः' इति शब्दप्रभेदे साधुसुंदरगणयः ॥ तु पुनः रात्रिनेतुश्चंद्रस्यातुल्ये सूर्याद्भिन्नेऽयने रात्रौ प्रयाणं भवेत् । कोऽर्थः यस्मिन्नयने रविः स्यात्तदयनस्य दिशि दिवा प्रयाणं स्यादेवं चंद्रस्य रात्रावीति ॥ उत्तरस्या पूर्वस्या अंतर्भाव. दक्षिणस्या पश्चिमाया अंतर्भाव इति । अन्यथेति । पूर्वोक्तरीत्या अभावे प्रयाणं न भवेत् ॥ १५ ॥

न देवसुप्तौ गमनं गृणंति प्रभूतमार्गं च समं प्रबुद्धाः ॥
होलांतपक्षे न समस्तयानं दोषस्तदीयो नहि नित्ययाने ॥ १६ ॥

अथ चतुर्मासकादौ प्रयाणं निषेधति—न देवेति॥ प्रबुद्धाःपंडिताःप्रभूतमार्गं बृहत्प्रयाणं च पुनः समं मध्यगमने प्रयाणं न गृणंति न कथयंति कस्यां देवसुप्तौ चातुर्मासके च पुनर्हो लांतपक्षे फाल्गुनशुक्लप्रतिपदमारभ्य पूर्णिमांतं समस्तयानं न गृणाति पुनर्नित्ययाने तदीयो दोषो देवसुप्तिहोलांतपक्षयोर्दोषो नहि स्यात् ॥ गृणंतीति गॄ निगरणे धातुः ॥ १६ ॥

बृहद्गमो नो विषमैर्वियच्चरैरुत्पातवर्तिन्ययने च मंगिनीं ॥
यानं तु नारुह्य तरंगिणीश्वरे समीककामस्त्रिविधो गमो दिशां॥१७॥

अथ विषमग्रहैः प्रयाणं निषेधति—बृहद्गमेति ॥ बृहद्गमो बृहत्प्रयाण १ च पुनस्तरंगिणीश्वरे समुद्रे मंगिनीं नावं समारुह्य यानं प्रयाणं २ पुन समीककामो युद्धकामो गमः ३

इति त्रिविधो गम प्रयाणं विशा नृणा न स्यात् । कस्मिन् विषमैर्विषमेरै. सूर्यमगलशनैश्चर ग्रहै. कृत्वा उत्पातवर्तिनि उपरागादिदोषयुक्तेऽयने मासपद्मलक्षणे सति ॥ १७ ॥

महोनिधौ द्विप्रकृतिं प्रयाते प्रयातुरत्तावनिदूरयाने ॥
तथा भवेत्तावुरिलेयकौर्प्यां ८ नधिष्ठिते नारपथप्रयाणे ॥१८॥

अथ द्विस्वभावादिराशिगते रवौ वृद्धप्रयाणादि निषेधति—महोनिधाविति ॥ द्विप्रकृतिं प्रयाते द्विस्वभावराशिगते महोनिधौ सूर्ये महसा तेजसा निधिस्तस्मिन् सति प्रयातु प्रयाणकारकस्य नरस्यात्ता मरणं भवेत् । कस्मिन्नवनिदूरयाने भूम्या दीर्घप्रयाणे तथा पुनस्तावुरिवृषराशि लेय सिंहराशि कौर्प्यो वृश्चिकराशिरेषा द्वन्द्वे तान् राशीन् अधिष्ठित आश्रिते सूर्ये सति नारपथप्रयाणे जलपथगमने प्रयातुर्मरण स्यात् ॥ नार यथा नारे जलेऽयन गृह यस्य स नारायणो विष्णु नारमिति शब्दप्रभेद ॥ १८ ॥

जनो गमं भाद्रपदे प्रयातोऽखिलासु नो भद्रपदं प्रयाति ॥
मितेतरं दिक्षु तथाऽश्विनेऽस्मिन्निजास्थितिं तीर्थमियाददोषे ॥१९॥

अथ भाद्रपदादौ वृद्धप्रयाणादि निषेधति —जन इति ॥ जनो भाद्रपदे मासेऽखिलासु दिक्षु मितेतरे मितात् इतरे बृहन्मध्यप्रयाणे द्वे यस्मिन् स त गम गमनं प्रयात प्राप्त सन् भद्रपद कल्याण न प्रयाति न प्राप्नोति । तथास्मिन्नशेषे आश्विने मासे निजस्थितितीर्थं नीन कुलागततीर्थ प्रयात सन् भद्रपद न इत्यन्न प्राप्नुयात् ॥ १९ ॥

पक्षद्वयेऽसद्ग्रहवाररिक्तापक्षादिमध्यातितिथीरपास्य ॥
विष्टिं कुयोगं कचिदप्यजाहः षष्ठीमशेषं गमनं च हारि ॥ २० ॥

अथ कुयोग हित्वा पक्षद्वयेऽपि प्रयाणमाह—पक्षेति ॥ पक्षद्वयेऽशेष त्रिविधमपि गमन हारि शुभ स्यात् ॥ किंकृत्वा असदिति ॥ असद्ग्रहवारान् क्रूरग्रहवारान् रिक्तातिथी पक्षयो रादितिथि प्रतिपद् मध्यतिथिमष्टमीं अततिथिं पञ्चदशी च अपास्य विहाय च पुनर्विष्टि कुयोग च कचित् अजाह अजस्य विष्णोर्दिन द्वादशीं षष्ठीं चापास्येति ॥ २० ॥

विकर्तनेलामरराजमध्ये द्विराशिमानाधिकमंडलं चेत् ॥
महागमश्चाहवकामयानं भवेदलुप्ताधिककालमाने ॥ २१ ॥

अथार्केन्दुद्विराशिमानविचाले स्यनन्प्रयाणमाह—विकर्तनेति ॥ चेद्यदि विकर्तन सूर्य इलामरराजो द्विमराजश्चन्द्र अनयोर्मध्येऽन्तर विचाल द्विराशिमानाधिक भवेत् ॥ कोऽर्थ कृष्ण दशमीमारभ्य शुक्ल चमीं यावत् सूर्यचन्द्रयोर्द्विराशिमान विचाल स्यात् ॥ तद्विचालं क्षीणचन्द्र कालत्वात्याज्यमित्यर्थ ॥ तदा महागमो वृद्धप्रयाण च पुनराहवकामयान संग्रामकार्यप्रयाण न भवेत् । कस्मिन्नलुप्ताधिककालमाने क्षीणाधिकवर्षमासदिनवर्जिते काले ॥ २१ ॥

सुरासुराचार्यगमोऽतिमान्यो मध्यो विदब्जांशुगमोऽपि निंद्यः ॥
पतंगजारयुगमो वियासोरात्मीयनामानुगुणोऽयमुक्तः ॥ २२ ॥

अथ गुरुप्रमुखवारेषु शुभसमाशुभप्रयाणमाह—सुरेति ॥ सुराश्चासुराश्चानयोराचार्यौ गुरुशुक्रौ एतयोर्दिने गमो गमन वियासो नरस्यातिमान्यो भृशमंगीकार्यः श्रेष्ठतम इत्यर्थः ॥ विदब्जांशुगमो बुधचंद्ररविदिने गमो मध्य. सम. पतगजः शनिरारो भौमोऽनयोर्युगे दिने गमोऽतिनिंद्यः स्यात् ॥ अयं गुण आत्मीयनामानुसदृश उक्त. । शुभनामा ग्रह.शुभोऽशुभनामाऽशुभ इति ॥ २२ ॥

संसिद्धियोगे समिति प्रयाणं प्रभाकरारान्ह्यपि वाग्र्यमाहुः ॥
तथा स्वपूर्वेशमितप्रयाणं शनौ च नौयानमरौद्रकेतौ ॥ २३ ॥

अथ सिद्धियोगादौ प्रयाणमाभिष्टौति—संसिद्धीति ॥ पंडिताः समिति संग्रामे प्रयाणमग्र्यं श्रेष्ठमाहुः वदंति कस्मिन् संसिद्धियोगे सम्यक्सिद्धियोगे च पुन प्रभाकरः सूर्यः आरो भौमोऽनयोरन्हि तथा पुनः स्वपूरीति । स्वपू. निजनगरी तस्या वेशाय प्रवेशाय मितं लघुप्रयाणमग्र्यमाहु ॥ कस्मिन् शनौ शनिवारे च पुनर्नौयानं नौकायाः प्रयाणमग्र्यमाहु । कस्मिन्नरौद्रकेतौ अरौद्रा सौम्या केतव. किरणा यस्य स चंद्रस्तद्दिने ॥ २३ ॥

लघुश्रवोऽचित्रमृदुश्रविष्ठादित्यानि भान्याहुरशेषयाने ॥
शुभानि साजेंद्रवतेशतारां साधारणां गाणितिकास्त्रियुग्मीम् ॥ २४

अथ काव्यद्वयेन प्रयाणे उत्तममध्यमशुभभान्याह—लध्विति ॥ गाणितिकाः दैवज्ञा. अशेषयाने समस्तप्रयाणे लघ्वादीनि भानि शुभानि आहुः वदंति । लध्विति । लघुसंज्ञानि अश्विनीपुष्यहस्ता. श्रव श्रवण अचित्रमृदूनि चित्रावर्जितमृदुसंज्ञानि अनुराधा रेवती मृगशीर्षाणि श्रविष्ठा धनिष्ठा आदित्य पुनर्वसु एषा द्वंद्वे इमानि नव भानि शुभयात्रेयाणि । पुनर्गाणितिकास्त्रियुग्मीं साधारणा मध्ययात्रियाण्याहु । व्याख्यामाहु त्रयाणा पूर्वाभाद्रपदाउत्तराभाद्रपदा इति युग्म १ पूर्वाषाढा उत्तराषाढा इति युग्म २ पूर्वाफल्गुनीउत्तराफल्गुनी इति युग्म ३ इति एषा युग्माना समाहारस्त्रियुग्मीता किंभूता त्रियुग्मीं साजेति । अजो ब्रह्मा रोहिणी इंद्रो ज्येष्ठा वनेश जलेशो वरुणस्तस्य तारा शतभिषक् आभिः सहवर्तमाना इति नवभानि मध्ययात्रेयाणि ॥ २४ ॥

मिते समे वापि विमिश्रभावास्ताराचरास्त्यत्र सदापकामाः ॥
निरिंद्रतीक्ष्णांतकमिश्रचित्राप्रभंजनादिप्रभवेंदुवामाः ॥ २५ ॥

मितेऽतिमिते लघुनि समे वा प्रयाणे हि युक्तार्थे विमिश्रभावास्ताराः रोहिण्यादि नव मध्ययात्रेयतारा वरा स्यु । पुनरत्र त्रिविधे प्रयाणे सदा निरिंद्रतीक्ष्णादितारा अपकामाः निर्गतकामा नेष्टा इत्यर्थ. । निरिंद्रतीक्ष्णानि ज्येष्ठावर्जिततीक्ष्णसंज्ञानि आर्द्राश्लेषामूल अंतको

भरणी मिश्रे द्वे विशाखा कृत्तिकाश्चेति चित्रा प्राभंजनं प्रभंजनस्य इदं स्वाती आदिममघा भग्रजा पितर मघा एता इदुवामा नक्षत्राणि इति नव भानि अथात्रेयाणि ॥ २५ ॥

प्रयाणभं क्ष्मा७द्रि१गुणे३पु५तारं वारं गमेहस्य किमंगिनश्चेत्॥
जाताडलं तच्च हि यामघंटं घटं स्वमुझ्झ्यासव उत्पतंति॥२६॥

अथ प्रथमतारादियुक्त प्रयाणनक्षत्र नेष्टमाह—प्रयाणेति ॥ चेद्यदि अगिनः प्रयाणभ यात्रानक्षत्रमेवंविध स्यात्तदा गमेहस्य गमे गमने ईहा इच्छा यस्य स तस्य इच्छावतो नरस्य किं गमने इच्छा व्यर्थेत्यर्थ ॥ किंशब्दो निषेधार्थस्तेन साभिप्रायविशेषणानिषिद्ध तदाह । किंभूत प्रयाणं क्ष्मा १ द्रि ७ गुणे ३ पु ५ तार प्रथमा सप्तमी तृतीया पंचमी च वा तारा यस्मिंस्तत् । पुन किंभूतं प्रयाण जाताडल उत्पन्न आडलो यस्मिंस्तत् । पुनस्तत्प्रयाणभ यामघट यमघटं भवमिति हि यस्मात्कारणात् अर शीघ्र अगिनोऽसव प्राणा स्व घट निजं शरीर उझ्झ्य विहाय उत्पतति ऊर्ध्वं गच्छति यात्रिकनरो मृत्युमेतीत्यर्थ ॥ यत ' यमघटे गते मृत्यु कुलच्छेद करग्रहे ' इत्यादि उक्तप्रयोगश्चित्य ॥ २६ ॥

सम्भूपणे दूपणवर्जिते भे स्फुरत्प्रभादीपितमंडलेऽस्मिन् ॥
यात्रागमित्राणसहायिनी स्याद्गोशुद्धिता चेद्दिनभादिभूता॥२७

अथ दिगादिशुद्धौ प्रयाणमाह—सभूषण इति ॥ चेद्यदि दिनभादिभूता दिननक्षत्रादिना गोशुद्धिता गोशब्दोऽत्र दिग्वाची दिक्शुद्धिता स्यात्तदास्मिन् दूषणवर्जिते भे नक्षत्रे यात्रा प्रयाण गमित्राणसहायिनी यात्रिकनरस्य रक्षणाय सहचारिणी स्यात् ॥ किंभूते सभूषणे सुयोगान्विते पुन किंभूते स्फुरत्प्रभादीपितमडले रव्याद्याक्रमणरहिते इत्यर्थ ॥ २७

कु१नंद९नेत्री३श११म अक्ष५विश्व१३मे युगे४नमे१२ऽ-
गेंद्र१४मितेऽचल७द्यु१५मे ॥ द्वि२दिक् १०समे
त्रिश३०दहि८प्रमे क्रमादैंद्यास्तिथी स्तो नु च योगिनिवहे ॥२

अथ योगिनीचक्रमाह—कुनदेति ॥ नु वितर्के च समुच्चये ऐंद्या पूर्वदिशात क्रमा योगिनीवहे योगिनीधारिण्यौ तिथी स्त द्वंद्व तिथी भवत इत्यर्थ ॥ विशेषणद्वारेणाह । किं तिथी कुनंदमे कु१नदा९भ्या प्रतिपन्नवमीभ्या मिमीते इति मा स्त्रीलिंगे प्रथमाद्विवचने मे सर्वत्रैव ज्ञेय । प्रतिपदि नवम्या च पूर्वस्यां योगिनीत्यर्थ ॥ एव किंभूते तिथी त्री३शमे त्रयश्च ईशाश्चेति तृतीयायामेकादश्यामाग्नेय्या योगिनी । पुन किंभूते तिथी अक्ष५विश्व१ पचम्या त्रयोदश्या याम्या योगिनी । पुन किंभूते तिथी युगे४न१२मे युगानि च इना सूर्य चतुर्थ्यां द्वादश्या च नैर्ऋत्यां योगिनी । पुन किंभूते तिथी अगेंद्र१४मिते षष्ठ्या चतुर्दश च वारुण्या योगिनी । पुन किंभूते तिथी अचल७द्यु १५ मे अचला पर्वताश्च तिपक्षश्चेति सप्तम्यां पूर्णिमायां वायव्या योगिनी । पुन किंभूते तिथी द्वि२दिक् १०

द्वितीयायां दशम्यां च उत्तरस्यां योगिनी। पुनः किंभूते तिथौ त्रिंशद ३० हि ८ मने अमावास्यायामष्टम्यां ऐशान्यां योगिनी तिष्ठति। अत्र काव्ये रकारांत द्विवचने सांधिकार्यं मतांतराश्रितं ज्ञेयम् ॥ २८ ॥ *

मंदो हि राजा च हरेरिहाशामाशामहेंगभुवो गुरुः स्यात् ॥
शूरः कविः पाशकरस्य शूली भौमो बुधश्चैलविलस्य यातुः॥२९॥

अथ वारदिक्शूलमाह—मंद इति ॥ हीत्यवधारणे हरेरिंद्रस्य आशा पूर्वां प्रति इह गमने यातुर्यात्रिकनरस्य मंदः शनिः राजा चंद्रश्च शूली शूलयुक्तः स्यात् ॥ एवमहेः सूर्यस्यागभुवो यमस्याशां दक्षिणां प्रति गुरुः शूली स्यात्॥ पुनः पाशकरः पाशः करे यस्य स पाशपाणिर्वरुणस्तस्याशां पश्चिमां सूर्यः कविश्च शूली स्यात् ॥ एलविलस्य धनदस्याशामुत्तरां प्रति भौमो बुधश्च शूली स्यात् ॥ 'अहिर्वृत्रविशेषः स्यात् सूर्योऽहिरहिरध्वग' इत्यनेकार्थध्वनिमंजर्यां ॥ २९ ॥ *

वरोपलब्धिर्यदि यानयोगिनी न योगिनी सन्मुखचारिणी तदा ॥
तच्छूलिकाष्ठं गमनं शरीरिणः सशूलिकांगं गमिनं सृजत्यरम्॥३०

अथ योगिनीं शूलं सन्मुख त्यजन्नाह—वर इति ॥ यदि सन्मुखचारिणी योगिनी यानयोगिनी न स्यात्तदा शरीरिणः उपलब्धिर्मतिः शुद्धिर्वा वरा प्रधाना स्यात्। अरं शीघ्र शूलिकाष्ठं मंदादिवारशूलिनः काष्ठा दिग् यस्मिंस्तदेवंविधं गमनं कर्तृवद् गमिनं यात्रिकनरं सशूलिकागं शूलरोगयुक्तदेहं सृजति करोति ॥ यथा शूलिकाष्ठं शूलिदारु चौरादिदेहे प्रपीडां करोति इत्यनेव श्लिष्टार्थेन प्रोक्तं ॥ ३० ॥

शुदिनादिदिनानि पूर्वतो निखिलाशासु सदेहकालवान् ॥
हरिभूः कलितस्तु पाशवान्विधुभूस्तावहितौ हि सन्मुखौ॥३१

अथ वैतार्थेयेन शनिबुधौ कालपाशवंतौ दर्शयति—शुदिनेति ॥ शुदिनादिदिनानि शुशब्देन यः उदयप्राप्तवारस्तस्य दिनमादौ एषा तानि एवंविधानि दिनानि पूर्वतो निखिलाशासु सर्वदिक्षु न्यसेत्। यत्र हरिभूः शनिः कलितः संख्याप्राप्तस्तत्र शनिः कालवान् स्यात्। यतः 'जेऊगइते पूरविदी जइ सूरिवंदिसहारगणी जइ सातवार इंणी परिसभालिः जिहां शनि तिहा निश्चयकाल.' ॥१॥ च पुनरेव विधुभूर्बुधः पाशवान् स्यात्॥ तु इत्यवधारणे हि युक्तार्थे तौ शनिबुधौ सन्मुखावहितावनिष्टकारकौ स्याता ॥ ३१ ॥ *

अवि१गो२जितुमा३ऽब्धि४राशिभिः शरमैर्भैर्नव९मैस्तु संयुतैः ॥
हरिदिङ्मुखदिक्चतुष्टये क्रमतः कल्पितमिंदुमंडलम् ॥ ३२ ॥

अथ पूर्वादिदिक्षु मेषादिराशिस्थचंद्रगृहाणि कल्पयति—अवीति ॥ बुधैः हरिदिङ्मुखदिक्चतुष्टये पूर्वादिदिक्चतुष्के क्रमत इंदुमंडलं कल्पितं कथितं। कैः कृत्वाऽविर्मेषराशिः

* नं. १२. * नं. १३।१४. * न १५.

गौर्वृषः जितुमो मिथुनं अब्धिराशिः कर्कः एषां द्वंद्वे एभिः किंभूतैरेभिः शरभैः शरैर्बाणैर्मीतीति शरमाः तैः पंचमेन पंचमेन राशिना संयुतैः। यथा मेषात् पंचमो राशिः सिंहः एवं वृषमिथुनकर्केभ्यः। तु पुनः किंभूतैरेभिर्नवभैर्नवमप्रमाणैर्नवमेन नवमेन संयुतैः यथा मेषान्नवमो धनुराशिरेवं वृषमिथुनकर्केभ्यः। कोऽर्थः मेषे वृषे धनुषि च चंद्रगृहं पूर्वस्यां एवं वृषकन्यामकरेषु याम्यां मिथुनतुलाकुंभेषु पश्चिमायां कर्कवृश्चिकमीनेषु उत्तरस्यां॥ यथा 'मेषे च सिंहे' इत्यादि॥ ३२॥ *

वनितावदनेंदुमंडलं विदुरभ्याननमिंदुमंडलं॥
गमनार्थिनि दत्तवांछितं गमनेऽपीव च दक्षिणाशगम्॥ ३३॥

अथ सन्मुखदक्षिणगं चंद्रगृहं लाभदं विशिनष्टि—वनितेति॥ बुधा अभ्याननं सन्मुखमिंदुमंडलंइव कर्मपदं वनितावदनेंदुमंडलं स्त्रीमुखं गमनार्थिनि यातरि नौ दत्तवांछितं पूरितेच्छं विदुः। च पुनर्गमनेऽपि दक्षिणाशगं दक्षिणदिग्गतं चंद्रमंडलमिव स्त्रीमुखं दत्तवांछितं विदुः॥ ३३॥

गतचांद्रदिने चतुःस्थिते खयमाब्ध्यंगयुते ०।२।४।६ हृते गजैः॥
स्वादीशि त्यज पाशघातकेऽभिमुखे कालनिपातने गमिन्॥ ३४॥

अथ तिथिपाशघातकालनिपातान्सन्मुखास्त्यजन्नाह—गतेति॥ गतचांद्रदिने किंभूते चतुःस्थिते पृथक् चतुःस्थानस्थापिते पुनः किंभूते खयमाब्ध्यंगयुते शून्यद्विचतुष्षड्युक्ते० २।४।६ पुनः किंभूते गजैरष्टाभिर्हृते भाजिते सति हे गमिन् हे यायिंस्त्व स्वादीशि निजगमनकाष्ठायां पाशघातने कालनिपातने अभिमुखे सन्मुखे त्यज विजहीहि। पाशघातने इत्यत्र द्वितीयाद्विवचनमेवमन्यदपि। स्वदिशीति। शेषांकप्रमितपूर्वादिदिग्गणनया क्रमेण तिथिपाशघातनकालनिपातनानि भवंतीत्यर्थः॥ ३४॥ *

बहुलादिभचक्रपद्धतीष्विह काष्ठासु विचिंतयेद्ग्रहान्॥
उत यानविलग्नदिक्स्थितानुदयाशास्थितिगांश्च सन्मुखान्॥ ३५॥

अथ कृत्तिकादिषु स्थितान् ग्रहान् सन्मुखांस्तर्कयति—बहुलेति॥ सुधीर्ग्रहान् सन्मुखान् विचिंतयेत्। तासु इह काष्ठासु दिक्षु किंभूतासु बहुलादिभचक्रपद्धतीषु कृत्तिकादिनक्षत्रश्रेणीषु किंभूतान् ग्रहान् उत यानविलग्नदिक्स्थितीन् प्रयाणलग्नस्य दिशि स्थितिर्येषां ते तान् उत पुनः किंभूतान् उदयाशास्थितिगान् पूर्वदिक्स्थानगतान् वामविलग्नदिक्स्थितीनिति। कोऽर्थः प्राच्याद्यष्टदिक्षु क्रमेण विलग्नसदनादेषु भावेषु सूर्यादिग्रहाः स्थिताः कालटिकाः स्युः। यथा लग्नस्थः सूर्यः प्राच्यां गंतुर्नरस्य कालटिकः स्यात्। एवं लाभ ११ व्यय १२स्थः शुक्र आग्नेयां कर्मस्थो १०भौमो दक्षिणस्यां नवाष्टम८भावस्थो राहुर्नैर्ऋत्यां सप्तमभावस्थः शनिः पश्चिमायां पञ्चषष्ठ ५।६भावस्थश्चंद्रो वायव्यां चतुर्थभावस्थो बु

* नं. १६. * नं. १७।१८.

उत्तरस्या द्वितीयतृतीयभावगो गुरुरीशान्यां । अत्र लग्नाटव्यतिरिक्ते कंटके स्थाने यदि दिग्धीशस्तिष्ठति तदा यात्रा शुभान्यथाऽशोभनेति तत्वमिति ॥ ३५ ॥

न सितेऽभिमुखे समागते रुचिरं यानमलंघ्यपत्तनं ॥
वनिताऽमिथुनाऽऽलये तथा खरदीधावपि वोभवीति हि ॥ ३६ ॥

अथ काव्यद्वारेण तदेव विस्तारयति—न सित इति ॥ हि निश्चितं अलंघ्यपत्तनमेकनगरांतरगतं यानं प्रयाणं रुचिरं मनोहरं न वोभवीतितरां कस्मिन् सिते शुक्रेऽभिमुखे समागते सति अपि पुनः कस्मिन् तथा वनितामिथुनालये कन्यामिथुने आलयौ गृहे यस्य स बुधस्तस्मिन् बुधे सन्मुखे सति तथा पुनः खरदीधौ सूर्ये सन्मुखे सति ॥ ३६ ॥

प्रधने जनकास्थितौ सितस्तुपसर्गे नरमेकपत्तने ॥
न हि दोर्ग्रहपूर्वमंगले गमिनं दुष्यति सन्मुखोऽपि वित् ॥ ३७ ॥

अथ संग्रामादौ शुक्रबुधसन्मुखत्वानवलोकनमाह—प्रधन इति ॥ सन्मुखः सितः शुक्रोऽपि पुनर्वित् बुधोऽपि गमिनं नरं नहि दुष्यति न दुःखाय करोति कस्मिन् प्रधने संग्रामे पुनर्जनकस्थितौ पितृगृहे पुनरुपसर्गे दुर्भिक्षादौ पुनरेकपत्तने एकग्रामे पुनर्दोर्ग्रहपूर्वमंगले पाणिग्रहणादिमंगले ॥ ३७ ॥

भृगुवत्सवसिष्ठकश्यपात्रिभरद्वाजकुला जना भृगुं ॥
गणयंति न सन्मुखं त्वमी विदमप्यांगिरसान्वयान्विताः ॥ ३८ ॥

अथ भृग्वादिगोत्रोत्पन्नजनानां मते शुक्रादिसन्मुखत्वमवगणयति—भृग्विति । अमी जनाः भृगुं शुक्रं सन्मुखं न गणयंति न मन्यंते किंभूता जनाः भृगुवत्सादि भृग्वादीनां कुलानि गोत्राणि येषां ते तु पुनरांगिरसान्वयान्विताः आंगिरसवंशयुक्ताः जना विदं बुधमपि सन्मुखं न गणयंति ॥ ३८ ॥

कुरुभोजकटांध्रहूणकानरिमिणद्रविडांगनान्वितान् ॥
न च दुष्यति सन्मुखोशनाः सुमुखोऽर्को विदतोऽन्यनीवृतः ॥ ३९ ॥

अथ देशविशेषेण शुक्रादिसन्मुखत्वमवगणयति—कुर्विति ॥ सन्मुखोशनाः सन्मुखशुक्रः कुर्वादीन् देशान् न दुष्यति किंभूतान् अरिमिणाद्यान्वितान् तत्रांगनान्वितः स्त्रीराज्यदेशविशेषः प्रतीतः । पुनः सन्मुखोऽर्कोऽप्येवं पुनर्वित् बुधोऽन्यराज्योन्यनीवृतोऽन्यदेशान् दुष्यति ॥ ३९ ॥

बृहतीहामिते समे गमे न समियात्प्रतिशुक्रमंगभृत ॥
हिमरोचिषि पौष्णमेषभेऽभिमुखोऽथोऽस्ति कविर्न दोषकृत् ॥ ४० ॥

बृहतीति ॥ इह बृहति १ मिते २ समे ३ त्रिविधे गमे प्रयाणेऽङ्गभृत् पुरुषः प्रतिशुक्रं सन्मुखं शुक्रं न समीयात् नोगच्छेत् । पुनर्हिमरोचिषि चंद्रे पौष्णमेषभे रेवतीमेषराशिस्थिते सति तदा कविः शुक्रोऽग्रेऽस्ति अथः सः दोषकृत् नो ॥ ४० ॥

पविपाणिदिशं त्यजेंद्रभेऽजपदक्षे दिशमांतिकीं जनः ॥
वननेतुरिहाजभे गमिन्फलबुद्धेऽर्यमभे च गौह्यकीम् ॥ ४१ ॥

अथ सन्मुखां नक्षत्रकीला त्यजन्नाह—पवीति ॥ हे गमिन् जन हे फलबुद्धे फले फलाय बुद्धिर्यस्य स तत्सबद्धौ त्वं इन्द्रभे ज्येष्ठाया पविपाणिरिन्द्रस्तस्य दिशं पूर्वां त्यज । एवमजपदक्षे पूर्वभाद्रपदायामांतिकीं दिशं दक्षिणां त्यज । पुनरजभे रोहिण्या वननेतुर्वरुणस्य दिशं पश्चिमां त्यज । पुनरर्यमभे उत्तरफाल्गुन्या गौह्यकीं कौबेरीं उत्तरां त्यज ॥ ४१ ॥

दिनकृत्सितमंगलागवो यमशीतिच्छविसौम्यमंत्रिणः ॥
हरितामधिपाश्च दिग्विभौ गमलग्ने न ललाटगे गमः ॥ ४२ ॥

अथ ललाटयोग प्रयाण निषेधति—दिनकृदिति ॥ सूर्यशुक्रभौमराहव शनिचंद्रबुधगुरवश्चै हरितां काष्ठानामधिपाः स्वामिनः सन्ति तत्र गमलग्ने गमलग्नविषये ललाटगे ललाटगते दिग्विभौ सति गमो न स्यान्नेष्टत्वाल्ललाटगतसूर्यादीनां । स्पष्टार्थस्तु पूर्वं दिग्द्वारकोष्ठे प्रोक्तोऽस्ति ॥ ४२ ॥

कृपीटयोनेरुडुतः कुमंडले भचक्रवेदांश ४ समेतदिङ्मुखे ॥
जनो हुताशश्वसनाशमत्र तत्सूत्रं समुल्लंघ्य न पारिघं व्रजेत् ॥४३

अथोपमात्या परिघयोगचक्रमाह—कृपीटेति ॥ कृपीटयोनेरुडुत. कृत्तिकानक्षत्रात् कुमंडले भूमीतले भचक्रस्य नक्षत्रगणस्य वेदांशाश्चतुर्भागाः सप्तानां चतुष्केणाष्टाविंशतिनक्षत्राणि तेषां समेतानि सहितानि दिङ्मुखानि यस्मिंस्तस्मिन् विषयेऽत्र तत् पारिघं परिघमव सूत्रमुल्लंघ्य जनो हुताशश्वसनाशमिवाग्निदिश न व्रजेत् ॥ यत. प्राच्य दिदिक्चतुष्केषु क्रमाच्चतुर्भिरन्यादिसप्तकचतुष्के प्रागुत्तरयो. प्रत्यग्याम्योर्मध्ये मध्योऽन्यथा परिघः 'अग्निमारुतयोर्मध्ये परिघस्तिष्ठते मही । देवा अपि न लंघति न दैत्या न च मानवा.' ॥ ४३ ॥

अयोगिनीशूलकुकालपाशा नाथा यदा पारिघसूत्रमस्मिन् ॥
तदापि यायादुपसर्गलब्ध्यावियात्तदुल्लंघ्यतु शुद्धकाष्ठाम् ॥ ४४ ॥

अथावश्यके परिघोल्लंघनमाह—अयोगिनीति ॥ यदा योगिनीशूलकुकालपाशादिक आशाः संति पुनरस्मिन्नदिग्विभागे पारिघसूत्रमस्ति तदापि जनो न यायात्तो गच्छेत् पुनरुपसर्गलब्धौ आवश्यके तु तदुल्लंघ्य पारिघं भित्त्वा शुद्धकाष्ठां दूषणरहितदिशामियाद्व्रजेत् ॥ ४४ ॥

आशाविरुद्धे यदि सन्मुखःस्याद्राजा तदा मानफलाय यानं ॥
स नीचगो हीनकथबलश्यो न चेद्विगुलादिकुदिग्गुणाप्त्यै ॥४५॥

अथाशाविरुद्धे प्रयाणशुद्धि निश्चिनोति—आशेति ॥ यदि चेत् आशाविरुद्धे दिशि विरुद्धे राजा चेत् सन्मुखोऽस्ति तदा यानं मानफलाय विजोन्नतिफलाय स्यात् । चेत्

चन्द्रो नीचगो न स्यात् ॥ पुनः इनकरावलब्धः सूर्यकिरणव्याप्तो न स्यात् । पुनर्विशूला दिक् दिक्शूलादिदोषवर्जिता दिगस्ति तदा यानं गुणाप्त्यै गुणप्राप्तये स्यात् ॥४५॥

याने समेऽल्पे च विलोक्यमेतच्छूलादिनीतित्वमतिप्रयाणं ॥
शस्तं तु शूलादिकृते विरुद्धे न राजवत्यां हरितीति सत्यम् ॥४६

यान इति ॥ समेऽल्पे च याने प्रयाणे एतच्छूलादिनीतित्वं शूलादिनिर्णयत्वं विलोक्य निभर्तना कर्तव्या इत्यर्थः ॥ तु पुनरतिप्रयाणं बृहत्प्रयाणं न शस्तं कस्मिन् शूलादिकृते विरुद्धे सति पुनर्हरिति दिशि राजवत्यां चंद्रयुक्तायां सत्यां सन्मुखचंद्रेऽपीत्यर्थः ॥ इति सत्य॥४६

व्यवहृतिफलयानं मंजु पंचांगशुद्ध्या समुदयजययानं
लग्नदिक्शुद्धिवामं ॥ त्रिविधमलमनेहःशुद्धिमत्तीर्थ-
यानं त्वखिलगमनभेदः शाकुनोत्साहदृष्टः ॥ ४७ ॥

अथ मालिन्या त्रिविधप्रयाणे व्यवहारादित्रिविधफलशुद्धिं दर्शयति—व्यवेति ॥ पंचांगशुद्ध्या कृत्वा व्यवहृतेर्व्यवहारस्य फलाय यानं व्यवहृतिफलयानं मंजु श्रेष्ठं स्यात् ॥ पुनः समुदयस्य शत्रुग्रामस्य जयस्तस्मै यानं प्रयाणं लग्नदिक्शुद्धिवामं लग्नस्य दिशश्च शुद्ध्या मनोहरं स्यात् ॥ पुनस्तीर्थयानमनेहःशुद्धिमत् कालशुद्धियुक्तं मनोहरं स्यात् ॥ इति त्रिविधं प्रयाणं अलमित्यवधारणे ॥ अथ तु पुनः अखिलगमनभेदः शाकुनोत्साहेन दृष्टः विलोकितः शाकुनोत्साहदृष्टः । अखिलगमनभेदे शाकुनोत्साहइष्ट इत्यपि पाठः । एतेन शकुनविचारोऽपि भृशं चिंत्यः ॥ ४७ ॥

भवति तदनु मुख्या सोमपां भद्युशुद्धिः खचरयुति-
विशुद्धिर्भूभुजां च क्षणाद्या ॥ इतरजनगणानां शुद्धि-
रातस्कराणां शकुननयभवातः शेषशुद्धिर्विचिंत्या ॥ ४८॥

अथ विप्रादीनां मुख्यामुख्यप्रयाणशुद्धिं दर्शयति—भवतीति ॥ सोमपां ब्राह्मणानां भद्युशुद्धिर्नक्षत्रादिनशुद्धिर्मुख्या भवति । तदनु पश्चात् भूभुजां क्षत्रियाणां खचरयुतिविशुद्धिर्मुख्या भवति । इतरजनगणानां शूद्राणां क्षणाद्या मुहूर्ताद्या शुद्धिर्मुख्या भवति । आतस्कराणां नीचचौरपर्यंतानां शकुननयभवा शुद्धिर्मुख्या भवति । तदनु तस्या मुख्यायाः पश्चाच्छेषशुद्धिर्गौणी चिंत्या इति ॥ ४८ ॥

जनीशराशीशदशेशलग्नपाः स्फुरत्प्रभाः सारभृतो गमे नृणां ॥
ददत्यलं चारुफलं तु दिक्पतिः सकंटको भूरिमहा महार्थकृत ॥ ४९ ॥

अथ प्रयाणे जन्मादिस्वामिनो वर्णयति—जनीशेति ॥ जनीशो जन्मेशः राशीशो राशिस्वामी दशेशो दशास्वामी लग्नपो लग्नस्वामी एषां द्वंद्वे एते नृणां गमे गमनेऽ-

ळमत्यर्थं चारु मनोहरं फल ददाति । किंभूता एते स्फुरत्प्रभाः अस्तरहिता इत्यर्थः ।।पुनः किंभूताः सारभूता बलयुक्ताः तु पुनः सकंटकः केंद्रसहितः भूरिमहा, भूरि बहु महस्तेजो यस्य स एवंविधो दिक्पतिर्निर्णयार्थकृत्स्यात् ॥ ४९ ॥

चरे चरांशे च गमं गुरुं विदो विदुः सतद्विप्रकृतौ समं वरं ॥
मितं समस्तेषु गृहेषु लग्नगैर्गमत्रयं नालि८कुलीर४शक्रि१२भिः॥५०

अथाग लग्नशुद्धिमाह—चरेति ॥ विद. पंडिताः गुरुं गमं बृहत्प्रयाण वरं विदुः कस्मिन् चरे चरलग्ने चरांशे चरनवांशे च पुनरेवं सतद्विप्रकृतौ द्विस्वभावराश्यंशयुक्तद्वि स्वभावराशौ सम प्रयाण वरं विदु. । पुन. समस्तेऽपि उदये लग्ने मितं प्रयाणं वरं विदु । पुनरलिकुलीरशक्रिभि. वृश्चिककर्कमीनराशिभिर्लग्नगै. कृत्वा गमत्रयं न विदुरिति ॥ ५० ॥

स्वोदीरितै राशिभिरंगगैर्गमे शीर्षोदयो यातुरभीष्टसिद्धिकृत् ॥
पृष्ठोदयो यानफलापकृद्यथा तथा क्वचिचार्थमलोलभोदयः ॥५१॥

स्वोदीरितेरिति ॥ शीर्षोदयो मिथुनसिंहकन्यातुलावृश्चिककुंभ इति गमे गमने यातुर्नरस्या भीष्टसिद्धिकृत् स्यात् । कै. स्वोदीरितैर्निजमानैरुद्गतै राशिभि किंभूतैरंगगे. प्रथमभावगतै कृत्वा पुनः पृष्टोदयो मेषवृषधनुकर्कमकरमीना इति पृष्ठोदयनत्रो यथा यातुर्यानफलापकृत् प्रयाण फलनाशकृत्स्यात् ॥ तथाच पुन क्वचिद्दलोलभोदय. स्थिरलग्नोदयोऽयं तथा यान फलापकृत्स्यात् ॥ ५१ ॥

यदाष्टमं संभवराशिलग्नतो गमांगमंगापकरं तु यायिनः ॥
तच्छासितारावितगौ तदावृदौ षष्ठं ६ समिष्टापदमातनोति ॥ ५२

अथ प्रयाणे निषिद्धलग्न दर्शयति—यदेति ॥ यदा समवराशिलग्नतो गमांगं गमनलग्न मष्टमं स्यात्तदा यायिनो नरस्यांगापकरं शरीरनाशकरं स्यात् ॥ तु पुनस्तच्छा सितारौ जन्मलग्नगमनलग्नस्वामिनौ इनगौ सूर्यमंडलगतौ तदाऽवृदौ मरणदायकौ स्याताम् । पुनर्वाथवा जन्मलग्नतो गमनलग्नं षष्ठ तत् समिष्टापद सम्यक् वांछितपदार्थेषु व्यापद् तनोति ॥ ५२ ॥

समुद्यतो जेतुमरिव्रजं व्रजेल्लग्ने जनुष्पार्थिवयोगयोजिते ॥
जनेश्वरो यः स हि सर्वसंपदो जिताहितव्रातमुपैत्यसंशयम् ॥ ५३

अथात्र जन्मराजयोगान्दर्शयति—समुद्यत इति ॥ यो जनेश्वरो नृपतिररिव्रजं रिपुसमूहं जेतु समुद्यत सन् व्रजेत् गच्छेत् कस्मिन् जनुष्पार्थिवयोगयोजिते जन्मराजयोगयुक्ते एवंविधे लग्ने हि युक्तार्थे स नृपाऽसंशयं निश्चित अहितव्रातं रिपुसमूहं जित्वा सर्वसंपदः सर्वान्दे उपति प्राप्नोति । अथवा स नृपोऽहितव्रातं जित्वा सर्वाः संपदो यस्य स सर्वसंपद सन् उपैति स्वस्थानं समायाति ॥ ५३ ॥

यदा हि ते राशितनूनिमीलने प्रयाणलग्नेऽरिजनेरथावुत ॥
उत प्रयाणोदयगैस्तदीश्वरैर्यायी जनो याति यमालयं तदा ॥ ५४

यदेति ॥ हीत्यवधारणे यदा ते राशितनूजन्मराशिर्जन्मलग्नं च ताभ्यां निमीलनेऽष्टमराशौ उत वितर्के अरिजनेः शत्रोर्जन्मराशिजन्मलग्नाभ्यामरौ षष्ठराशौ प्रयाणलग्ने चेद्यायी जनो यमालयं मृत्युं याति । उत यदा तदीश्वरैर्जन्मराशिजन्मलग्नादष्टमराशिस्वामिभिः शत्रोर्जन्मलग्नराशिभ्यां षष्ठभवनस्वामिभिर्वा प्रयाणोदयगैः प्रयाणलग्नगतैः प्रयाणं भवति तदा यायी गमनशीलो जनो यमालयं मृत्युं याति प्राप्नोति ॥ ५४ ॥

सारी सुतौ व्योमचारी सलग्नो राशिर्योऽसौ वेशराशिश्च राशेः ॥
स्वस्यादोषः पर्यवस्थातुरुच्चैः कालो यातुः संपदं संदधाति ॥ ५५॥

अथ मालिन्याह—सारीति ॥ सूतौ जन्मलग्ने सारी वक्रयुक्तो व्योमचारी ग्रहः सलग्न प्रयाणलग्नमूर्तिस्थः च पुनः स्वस्य राशेः सकाशात् योऽसौ वेशिराशिः स निर्दोषो भवति तदा उच्चैरत्यर्थं पर्यवस्थातुः शत्रोः कालः स्यात् । यातुर्गमिनः संपदं दधाति पुष्णाति ॥ ५५ ॥

देह१काम७वल३गेह४वैरिगैः६ काव्यजीवयमराजमंगलैः ॥
यो जनो व्रजाति योजनायुतं याति सोऽपि खलु तज्जयश्रियम् ॥५६॥

अथ रथोद्धतया प्रयाणलग्ने ग्रहभावशुद्धिमाह—देहेति ॥ यो जनो योजनायुतं योजनाना दशसहस्रं व्रजति गच्छति कैः कृत्वा काव्येति शुक्रगुरुचन्द्रभौमैः किंभूतैरेभिः देहस्तनुभवन ? कामः सप्तमं ७ वलं तृतीयं ३ गेहं चतुर्थं ४ वैरिः षष्ठं ६ एषु गतैः खलु निश्चितं सोऽपि जनस्तज्जयश्रियं रिपुजयलक्ष्मीं याति प्राप्नोति ॥ ५६ ॥

शूराहित६च्छिद्र८विदार्यविग्रहो१गमोदयोऽसौ प्रतिपक्षहा भवेत् ॥
अनीककामस्य हि नुस्तथोदयो विमानभावोपचयेऽनिमंगलः ॥५७

अथोपजात्याह—शूरेति ॥ तदा नुः पुरुषस्य असौ गम प्रयाण प्रतिपक्षहा वैरिघातको भवेद्यदा गमोदयः प्रयाणलग्नमस्ति किंभूतोऽसौ गमोदयः शूरः सूर्योऽहिते षष्ठे यस्मिन् स शूराहित. पुनः किंभूतश्छिद्रेऽष्टमे विद्वो यस्मिन् स छिद्रवित् पुनः किंभूतः आर्यो गुरुर्विग्रहे तनुभावे यस्य स आर्यविग्रह. तथा पुनः किंभूतः विमानभावेषु दशमभावरहितेषु उपचयेषु त्रिषडेकादशभावेषु ३।६।११ एभिः शनिर्मंगलश्च यस्य स इति । किंभूतस्य नु. अनीककामस्य संग्रामाभिलाषिणः हि युक्तार्थे ॥ ५७ ॥

घना१रिध्माना१०नि हरीनजेंदवो घनारिमानानि समेत्य यायिनः ॥
ददत्युतेज्येऽगगतेऽर्थश्लाभ११गाः परे यियासोरलमर्थलाभदाः ॥ ५८॥

धनेति ॥ हरि सूर्य इनज शनि इंदुश्चन्द्र एषा द्वंद्वे रविशनिचंद्रा यायिनो नरस्य धनारिमानानि स्वारिपुसन्मानानि ददति सर्वेऽपि स्वशत्रवो नमतीत्यर्थं ॥ किंकृत्वा धनारिमानानि धनं प्रथम भवन १ अरि षष्ठ ६ मान दशम १० एतानि समेत्य प्राप्य एते गता सत इत्यर्थ ॥ उताथवा इज्ये गुरौ अंगगते लग्नगते सति अपरे ग्रहा अर्थे२लाभ११गा मतोऽलमत्यर्थमर्थलाभदा स्यु कस्य यियासोर्गमनाभिलाषिणः ॥ ५८ ॥

कौशेरभवेत्कमलिनीपरिणायकश्चेत्स्मारः७ सवित्कविरिहाहवयानकाले ॥ यो ना प्रयात्यरिचमूभटकुंभिकुंभकंठीरवो भवति भूतलगीतकीर्तिः ॥ ५९ ॥

अथ वसंततिलकेनाह—कौशेति ॥ चेद्यदि कमलिनीपरिणायक अब्जिनीपति सूर्य कुर्श जल तत्र भव कौशस्तस्मिंश्चतुर्थभावे भवेत् । पुन सवित्कवि बुधयुक्तशुक्र स्मार सप्तमभावगतो भवेत्तदा इहास्मिन् आहवयानकाले संग्राम प्रयाणकाले यो ना पुमान् प्रयाति गच्छति स पुमान् अरिचमूभटा रिपुसैन्यसुभटा एव कुंभिनो गजास्तेषां कुंभेषु कंठीरव सिंहसमो भवति । किंभूत स भूतले गीता प्रसिद्धा कीर्तिर्यशो यस्य स. ॥ ५९ ॥

मित्रोदयं१राजमदं७स्वराज्यं राज्यं रिपोरिच्छति यो जनेशः ॥ नेतुं समेत्योदयमेवमीयात्तमादराद्वैरिजनेरितार्थः ॥ ६० ॥

अथोपजात्याह—मित्रेति ॥ यो जनेशो नृपो रिपो शात्रवस्य राज्य नेतु गृहीतुमिच्छति स नृपो मित्रोदय लग्नस्थसूर्य पुना राजमद सप्तमभावस्थचन्द्र पुन स्वराज्य रवे धनभावे राज्यो बुधो यस्मिन् स त एवंविधमुदय लग्न समेत्य प्राप्य ईयाद्गच्छेत् । नृप किंभूत आदरात् वैरिजनेन ईरिता अर्पिता अर्था यस्मै स ॥ ६० ॥

क्ष्मापत्यपूर्वैरपि पंचभिर्ग्रहैरमित्रवार्मार७घनो१द्यमा३नुगैः ॥ नृपः स यो दिग्विजयोद्यमं चरेत्सर्वसहानायकनीतमो भवेत् ॥ ६१ ॥

क्ष्मापत्येति ॥ यो नृपो दिग्विजयोद्यमं चरेत् गच्छेत् के क्ष्माया भूमेरपत्य मंगल क्ष्मापत्यपूर्वैर्भौमादिभि पंचभिर्ग्रहै कृत्वा किंभूतैर्भौमादिभि अमित्र षष्ठ ६ वार्जल चतुर्थ मार कंदर्प सप्तम ७ घन शरीर प्रथम १ उद्यमस्तृतीय ३ ष्पु गतै स नृप इह लोके सर्वसहा भूमिस्तस्या नायका राजानस्तेभ्यो नाता गृहीता मा लक्ष्मी येन स एवंविधो भवेत् ॥ ६१ ॥

सराजमंत्रिमंगलक्रियोऽदयो जयाय वा ॥ ग्रहत्रयं यियासतः सकंटका १।४।७।१०ऽऽ गमे ११शुभम्॥६२॥

अथ प्रमाणिकाछंदसाह—सराजेति ॥ यियासतो गमनाभिलाषिणो नरस्य सह राजमंत्रिमंगलैश्चंद्रगुरुभौमैर्वर्तते यः स एवंविध क्रियोदयो मेषलग्न जयाय भवेत् । वा पुनर्ग्रहत्रयं चंद्रगुरुभौमत्रय सह कंटकेन प्रथमचतुर्थसप्तमदशमभावेन वर्तते यः स चामौ आगमो लाभ एकादशभावश्च तस्मिन् शुभ शुभकारकं स्यात् ॥ ६२ ॥

भवंति जातकोदिता महीशयोगसंचयाः ॥
त एव यानलग्नगा यियासतां जयप्रदाः ॥ ६३ ॥

अथ राजयोगानभिप्रैति—भवतीति ॥ त एव महीशयोगसंचयाः राजयोगसमूहा यियासतां गमनाभिलाषिनराणां जयप्रदा विजयदायकाः स्यु ॥ किंभूता जातके जन्मजातकशास्त्रे उदिता उक्ताः । पुन. किंभूताः यानलग्नगाः प्रयाणलग्ने आयाताः ॥ ६३ ॥

यथाबलं महीशयुक् तथा बलं धराधवे ॥
प्रयच्छति प्रयाणगं तदेव दर्शयाम्यहम् ॥ ६४ ॥

यथेति ॥ यथा महीशयुग् राजयोगो यद् बल धराधवे नृपे प्रयच्छति ददाति तथाह तदेव प्रयाणगं प्रयाणवेलाप्राप्त बल दर्शयामि प्रकटीकरोमि ॥ ६४ ॥

शशिनि मंदवति स्मरगे७ऽस्त्रभे ९ऽमरपुरोधसि पूष्णयजभे भवेत् ॥
उदयगे जनितोऽवनिपो गमे निखिलनिर्जितभूतलभूमिपः ॥ ६५॥

अथ द्रुतविलंबितेन राजयोगानाह—शशिनीति ॥ अवनिपो भूः निखिलनिर्जितभूतलभूमिप. समस्तविजितभूमंडलनृपो भवेत् । कस्मिन् सति गमे प्रयाणे जनितो जन्मनः स्मरभे सप्तमभावे शशिनि चंद्रे किंभूते मंदवति शनियुक्ते पुन कस्मिन् अस्त्रभे धनराशौ अमरपुरोधसि गुरौ सति पुन क अजभे मेषराशौ पूष्णि सूर्ये किंभूते सूर्ये उदयगे मूर्तिस्थे सति ॥ ६५ ॥

मकर१०मंगलमंगलसच्छ्रियं रविजभाजमुपेत्य न नेति ना ॥
धनुषि९राजविकर्तनयोः स वै नरपतित्वमुपैत्यखिलेंदिरम् ॥ ६६ ॥

मकरेति ॥ वै इति हेतौ स ना पुमान्नरपतित्वं भूपत्वं न उपैति इति न द्वौ नकारौ प्रकृत्यर्थं सूचयतः प्राप्नोतीत्यर्थ. । किंकृत्वा मकरमगल मकरराशिस्थमंगल उपेत्य प्राप्य किंभूतं मकरमंगल रविजभाज शनियुक्त पुन किंभूत अंगे लभतो श्रीर्यस्य स न अगलच्छ्रियं पुनः कयोः सतो धनुषि धनुराशौ राजविकर्तनयो चंद्रार्कयोः सतो ' द्युपतिर्विकर्तन ' इति हेमः ॥ किंभूतं नरपतित्व अखिला समस्ता इंदिरा लक्ष्मीर्यस्मिंस्तत् अखिलेंदिरं ॥ ६६ ॥

धवलभासि मृगो१०दयशालिनि श्रितरसाभुवि भूमिसुतस्त्र९भे ॥
भवति भास्वति पौरुषपावकज्वलितवैरिकुलोऽरिकुलो नरः ॥ ६७ ॥

धवलेति ॥ नरो भविभुर्भूपो भवति गमे प्रयाणे इति शेषः ॥ कस्मिन् मृगोदयशालि मकरलग्नशोभायुक्ते धवलभासि चंद्रे किंभूते धवलभासि श्रितरसाभुवि आश्रितभौमे पुनः क अस्तमे घनराशौ भास्वति सूर्ये सति किंभूतो नरः वैरुपे प्रतापे एव पावके ज्वलितानि दग्धा वैरिकुलानि रिपुसमूहा येन सः । पुनः किंभूतो नरः अरीणां शात्रवाणां कु भूमिं ददाति गृण्हा इति क्ष्मत्पयेऽरिकुल इति ॥ १७ ॥

यदि समेत्य विनेतुमरिश्रियं सविधुतावुरिभोदयमीहते ॥
गुरुमदं७हरिशं४हरिजांबरं१०वसुमतीपतिराशु समाव्रजेत् ॥ १

यदीति ॥ यदि चेत् वसुमतीपतिर्भूपोऽरिश्रियं विनेतुं विनाशीकर्तुं गृहीतुं ईहते इच्छति तदा आशु शीघ्रं समाव्रजेत् गच्छेत् । किंकृत्वा सविधुतावुरिभोः चंद्रसहितवृषलग्नमेत्य प्राप्य ।किंभूतं तावुरिभोदयं गुरुर्मदे सप्तमे यस्य स तं गुरुमदं पु किंभूतं हरिः सूर्यः शे चतुर्थे भावे यस्य स तं हरिशं पुनः किंभूतं हरिजः शनिरंबरे दशमभा यस्य स तं हरिजांबरं ॥ १८ ॥

मिहिरजन्मनि ना मकरो१०दये व्रजति राजगुरुज्ञरसाभवैः ॥ सहज रिःफ१२नभो१०ऽहितद्चारिभिर्नयति योऽर्जुनवीर्यविरोधिगाम् ॥६९

मिहिरेति ॥ मिहिरजन्मनि शनौ मकरोदये मकरलग्नविषये सति यो ना पुमान् व्रजति गच्छे के कृत्वा राजा चंद्रः गुरुः ज्ञो बुधः रसाभवो भौमः एषां द्वंद्वे तैः किंभूतैः तैः सहजस्तृतीय रिःफं द्वादशः १२ नभो दशमः १० अहितः षष्ठ ६ एषु भावेषु चारिभिर्गमनशीलैः स ज अर्जुनवीर्यविरोधिगा नयति प्राप्नोति अर्जुनस्य पार्थस्य वीर्यं पराक्रम इव पराक्रमो येषां च ते विरोधिनो रिपवश्च तेषां गां भूमिं नयति ॥ येऽर्जुनवीर्यविरोधिनामित्यपि पाठे स्पष्ट यथा कश्चित् बलिष्ठोऽर्जुनवीर्येण पराक्रमेण विरोधिनीं रोधशीलां गां सौरभेयीं वा नय इत्युक्तिलेशः ॥ ६९ ॥

झष१२विशेषभुजा सयमासृजा धिषणधिष्ण्यमृगांकवहं धनुः ॥
विदि वशोदय६भाजि यदा गमे हरिबलारिबलापकरो नरः ॥ ७०

झषेति ॥ यदा गमे प्रयाणे धिषणो गुरुः धिष्ण्यः शुक्रः मृगांकश्चंद्रः एषां द्वंद्वे एता वहति बिभर्ति एतद्व्रहयुक्तं धनुः स्यात् ॥ किंभूतं धनुः यमेन शनिना सह वर्तते य स सयम चासौ असृग् भौमश्च तेन उपलक्षितं। किंभूतेन सयमासृजा झषेषु मीनेषु विशेषः श्रेष्ठः झषा शेषो मकरस्तं भुनक्ति इति भुक् तेन भुजा मकरराशियुक्तेन तदा नरः पुमान् हरिबला बलापकरो भवेत् हरेः सिंहस्य बलमिव बलं एषां ते च तेऽरयश्च तेषां बलं वीर्यं बलं तद वाऽपकरोति हरतीति कस्मिन् सति वशोदयभाजि कन्यालग्नयुक्ते विदि बुधे सति ॥ ७०

१ विनेतुमिति कन्याचित्पाठः ।

अनिमिषोदय१२गेऽमृतदीधितौ करिकरे१०ऽसृजि पूष्णि सलेयभे५ ॥
कलशवर्तिनि११ योंऽशुभुवि व्रजेदखिलमैलविलस्वमिहानयेत् ॥ ७१ ॥

अनिमिषेति ॥ यः पुमान् व्रजेत् कस्मिन् सति अमृतदीधितौ चंद्रेऽनिमिषोदयगे मीनलग्नगते पुनः क असृजि भौमे करिकरे मकरे सति पुनः क पूष्णि सूर्ये लेयभे सिंहराशौ सति पुनः क अंशुभुवि शनौ कलशवर्तिनि कुंभराशियुक्ते सति स इह जगति अखिलं संपूर्णं ऐलविलस्य कुबेरस्य स्वं धनमिव धनं नयेत् प्राप्नुयात् ॥ ७१ ॥

मतिसखाश्रिततुंगपदोंऽगगो गवि२ कवींदुविदः मिहिरोऽज१गः ॥
यदि गमी लभते परसंपदं नरवरो रवरोषितशात्रवः ॥ ७२ ॥

मतिसखेति ॥ यदि अंगगो लग्नगतः श्रिततुंगपदः उच्चस्थानगतः एवंविधो मतिसखा गुरुः स्यात् । पुनः कवींदुविदः शुक्रचंद्रबुधाः गवि वृषराशौ स्युः । पुनरजगो मेषराशिगतो मिहिरः सूर्यः स्यात्तदा गमी पुमान् परसंपदं शत्रुलक्ष्मीं लभते प्राप्नोति । किंभूतो गमी नरवरः पुरुषश्रेष्ठः पुनः किंभूतः रवेण शब्देन रोषिताः क्षुभिताः शात्रवा येन स रवरोषितशात्रवः ॥७२॥

अवि१कुलीर४तुला७जितुमानि३ चेद्विभुयुतानि समंदमृगो१०दये ॥
शयगतैव गतस्य नुरिंदिरा क्षितिभुजोऽतिभुजोत्कटतावतः ॥ ७३ ॥

अवीति ॥ चेद्यदि समंदमृगोदये शनियुक्तमकरलग्ने विभुयुतानि निजस्वामिभिर्युक्तानि अविकुलीरतुलाजितुमानि मेषकर्कतुलामिथुनानि स्युस्तदा गतस्य प्रयाणकारस्य नुः पुंसः शयगता एव हस्तगता एव इंदिरा लक्ष्मीर्भवति । किंभूतस्य नुः क्षितिभुजो भूमिभोक्तुः पुनः किंभूतस्य अतिभुजोत्कटतावतः प्रलंबभुजयोरुत्कटता तद्वतस्तद्युक्तस्य ॥ ७३ ॥

सविदि[1] भीरुघने १ कविमानभे१० ऽनु मद७राजगुरौ मति५मंगले ॥
गमनमाशु विधाय मतीन५जे वृणु नृवीर१० विरोधिजयश्रियम् ॥७४ ॥

सविदीति ॥ हे नृवीर नृणां मध्ये शूर त्वं विरोधिजयश्रियं शत्रुजन्यादलक्ष्मीं वृणु प्राप्नुयाः किंकृत्वा आशु शीघ्रं गमनं विधाय कस्मिन् भीरुघने कन्यालग्ने सविदि बुधयुक्ते पुनः किंभूते कविमानभे दशमभावे शुक्रे पुनः किंभूते अनु पश्चात् मदराजगुरौ सप्तमभावे चंद्रे गुरौ च पुनः मतिमंगले पंचमभावे भौमे पुनः मतीनजे पंचमभावे सूर्ये। एतानि सर्वाणि भीरुघनेत्यस्य विशेषणानि ॥ ७४ ॥

---

[1] क्वचित् सविधुरितिपाठः

सुखमगोगतयः क्रतु९केंद्रगाः १।४।७।१०। श्रितवि-
खोपचय ३।६।१०।११खला ग्रहाः ॥ यदि भवंति
तदा गमकृज्जनोऽसहनसंचितरायमिहाश्नुते ॥ ७५ ॥

सुखेति ॥ यदि सुखेन मीयते इति सुखमाः 'सुखमा सुखमानि शोभन' इति हैम । अथवा सुखमा सौम्याश्च ते गोगतयो ग्रहाश्च ते सौम्यग्रहा क्रतुर्नवम ९ केंद्राणि १।४।७।१० एषु गता भवति च पुन खला ग्रहा श्रितविखोपचयर्क्षा दशमवर्जितेषु उपचये गता भवंति विगत ख दशम येभ्य ३।६।११ इति तदा गमकृत् गमनकारको जन पुमान् इह जगति असहनै शत्रुभि संचिता मीलिता राय लक्ष्मीं अश्नुते प्राप्नोति ॥ ७५ ॥

योगा कियंतो नृपनाम३भूताः प्रकीर्तिता ये भुवि होरिकैयैः ॥
मयोदितास्ते त्वपरे विलोक्या जयाय यातुः खलु जातकोक्ताः ॥७६॥

योगा इति ॥ होरिकैयै होराज्ञानविद्भिर्भुवि पृथ्व्या ये नृपनामभूता राजसंज्ञका याः प्रकीर्तिता मया ते कियंतो योगा खलु निश्चित यातु प्रयाणकारकस्य जया उदिता उक्ता तु पुनरपरे योगा जातकोक्ता विलोक्या ॥ ७६ ॥

महत्प्रयाणेऽखिलवर्णलोकैरमी प्रदृश्याः पृथुराजयोगाः ॥
तथा त्रिधाभ्यागमयानकाले सर्वत्र भावस्थितिखेटयोगाः ॥७७॥

अथ राजयोगानामुपसंहारमाह—महदिति ॥ अखिलवर्णलोकैः चतुर्वर्णजनैरमी पृथुराजयोगा महत्प्रयाणे प्रदृश्या विलोकनीया । तथा त्रिधाभ्यागमयानकाले त्रिविधग्रामप्रयाणसमये भावस्थितिखेटयोगा द्वादशभावस्थग्रहयोगा सर्वत्र विलोक्याः ॥ ७७ ॥

कलेवर १ कोशभ२मस्त्र३वाहने ४मंत्रो५ऽहितः ६
पद्धति७रायु८मानसे ९ ॥ व्यापारभं १० लब्धि११
रलब्धि१२रित्यमी भावा विचिंत्या विबुधैर्गमोदयात् ॥ ७८

अथ प्रयाणलग्ने द्वादशभावनामान्याह—कलेवरमिति ॥ विबुधैरिति ॥ अमी गमोदयात् प्रयाणोदया भावा विचिंत्या इति किं तानाह ॥ कलेवर शरीर १ कोशभ भांडारगेह धनभवन अस्त्र धानुष्क ३ वाहन ४ अनयोर्द्वंद्वे मंत्र आलोचन ५ अहित शत्रु पद्धतिर्मार्गः ७ आयु ८ मानस चित्त ९ अनयोर्द्वंद्व व्यापार. १० लब्धि अलब्धिर्व्यय १२ ॥ ७८ ॥

सराजराजग्रहमंदराहवो गमोदयस्था विसृजंति चापदः ॥
विराजयंतोऽखिलसंपदं नृणामरोपयाने सततं यियासताम् ॥७९॥

अथ द्वादशभावेषु प्रयाणलग्ने प्रथमभावफलमाह—सराजेति ॥ सह चंद्रेण वर्तते सराजौ च ते राजग्रहौ रविभौमौ च मंद शनिश्चर राहुश्च

चंद्रबुधगुरुविभौमशनिराहवो गमोदयस्थाः सततं निरंतरं यियासतां गमनाभिलाषिणां नृपाणामापदं विसृजंति कुर्वंति कस्मिन्नशेषयाने समस्तप्रयाणे चपुनर्विराजः संतः शुभग्रहाः अखिलसंपदं विसृजंति शेषं योज्यं इति प्रयाणलग्नप्रथमभावफलं !! ७९ ॥

शुभा गमर्द्धिं ददतीह सारगाः सारं हरंत्यन्यखगामिनो गमे ॥
सहोत्थगाः सर्वसमृद्धिदायिनोऽनिलाध्ववेगा निखिला उदीरिताः॥८०

अथ द्वितीयभावफलमाह—शुभेति ॥ सारगाः धनभावस्थाः शुभाः शुभग्रहाः गमर्द्धिं प्रयाणलक्ष्मीं ददति कस्मिन्निह गमे प्रयाणे पुनरन्यखगामिनः पापग्रहाः धनस्थाः सारं द्रव्यं हरंति ॥ अथ प्रयाणे तृतीयभावफलमाह ॥ हि निश्चितं निखिलाः सर्वे अनिलाध्वनि मरुत्पथे आकाशे वेगो गमनं एषां ते ग्रहाः सहोत्थगाः सहजभावस्था. सर्वसमृद्धिदायिन उदीरिता उक्ताः ॥ ८० ॥

संतो वने ४ शं वितरंत्यशं परेऽपरे कवीज्येंदुज-
तोऽपसिद्धये ॥ भवंत्यपत्ये५ गमिनोऽभ्रगामिनो
विरोहिणीशा निखिला रिपौ ६ हिताः ॥ ८१ ॥

अथ प्रयाणे चतुर्थभावफलमाह—संत इति ॥ वने जले चतुर्थभावे संतः शुभग्रहाः शं सुखं वितरंति ददति परे अपरेऽशुभग्रहाः अशं दुःखं वितरंति ॥ अथ प्रयाणे पंचमभावफलमाह ॥ अपत्ये पंचमभावे कवीज्येंदुजतः शुक्रगुरुबुधेभ्यः सकाशात् अपरेऽन्ये रविचंद्रभौमशनयो-ऽपगता सिद्धिर्येभ्यस्तेऽपसिद्धयो निष्फला भवंति । अर्थात् शुक्रगुरुबुधाः सिद्धिकारका भवंति ॥ अथ प्रयाणे षष्ठभावफलमाह ॥ रिपौ षष्ठभावे विरोहिणीशाश्चंद्ररहिता अखिला अभ्रगामिनो ग्रहाः हिता हितकारिणो भवति गमिनः पुंस इति सर्वत्रापि योज्य ॥ ८१ ॥

जयं दधत्यार्यविदिंदवो मदे७ मदं परे पालयितुं सुशक्तयः ॥
न यानजं चात्तरि८वित्सितोऽगिरा गिराप्तये चात्तकृतोऽपरे ग्रहाः॥८२

अथ प्रयाणलग्ने सप्तमभावफलमाह—जयमिति ॥ मदे सप्तमभावे आर्यविदिंदवो गुरुबुध चंद्राः जयं दधति पुष्णंति पुनर्मदे सप्तमेऽपरे रविभौमशुक्रशनयो यानजं प्रयाणप्राप्तं पुमांसं पालयितुं रक्षणाय न सुशक्तयो न समर्था भवंति गंता नरः क्षयं यातीत्यर्थः ॥ अथ प्रयाणे ऽष्टमभावफलमाह ॥ अत्तरि मृत्यौ अष्टमभावे विद् बुधः सितः शुक्रः च पुनरगिरा गुरुश्चैते गिराप्तये वाणीप्राप्तये देशलब्धये वा भवंति 'गौस्तु वाचि सरस्वत्या दुर्गायां ककुभि स्मृता' इति महीपः॥ च पुनरष्टमे भावेऽपरे ग्रहा अत्तकृतो मृत्युकारकाः स्युः ॥ ८२ ॥

नेनेनिराजारतमांसि भाग्यं भाग्याश्रिता९नीह दिशंति यातुः ॥
सिद्ध्यै परेऽर्कार्यमा नभ१०स्थास्त्वपात्वायात्शुभा ःशुभाः स्युः ॥८३॥

अथ शार्दूलविक्रीडितेन रात्रौ पञ्चदशमुहूर्ताधिपानाह—शाजेति ॥ शः शिवः १ अजाग्निरजपाद २ अहिर्बुध्न्यक. ३ पूषा ४ दस्रो ५ यम॰ ६ अनलोऽग्निः ७ अजो ब्रह्म ८ इंदुः ९ अदिति॰ १० इनवंद्यो गुरुः ११ जिनो विष्णुः १२ रविः १३ त्वष्टा १४ महाबलाख्यो वायुः १५ 'पृषदश्वो महाबलः' इति हैमः । एषां द्वन्द्वे बहुवचनं सदा निशि रात्रौ एते क्षणेशाः मुहूर्तनायकास्तिथिमाः पंचदशसंख्याः स्युरत्रापि नक्षत्राणि ग्राह्याणि ॥ ९० ॥

आर्यम्णस्तरणौ विधौ विधिलवो रक्षोलवःक्ष्माजनौ पैत्र्यो धौमनिकेतनः क्षण इमेऽसद्रौहिणेयेऽष्टमः॥ जीवे यातुजलक्षणावुशनसि ब्राम्ह्याग्रजौ भास्करौ शार्वौ वैपधरौ गमे बुधवरैर्हेयास्तथा मंगले ॥ ९१ ॥

अथ रव्यादिवारेषु त्याज्यमुहूर्तानाह—आर्येति ॥ तरणौ रविवारे अर्यम्ण. सूर्यस्यायं आर्यम्णो लवो मुहूर्तो हेयस्त्याज्य एवं विधौ चंद्रवारे विधिलवो रक्षोलवश्च द्वौ पुनक्ष्माजनौ भौमवारे पैत्र्य.पूर्वजलव. १ धौमनिकेतनोऽग्निसंबंधिलव इमौ द्वौ पुना रौहिणेये बुधवारेऽष्टममभिजिदसदुष्ट पुनर्जीवे गुरुदिने यातु राक्षमो जल च तौ क्षणौ लवौ पुनरुशनसि शुक्रवारे ब्राम्ह्याग्रजौ ब्रह्मपूर्वजसंबंधिलवौ पुनर्भास्करौ शनिवारे शार्वौ रुद्रसंबंधिलवश्च बुधवरैरिमे लवा गमे प्रयाणे तथा मंगले विवाहादौ हेयास्त्याज्याः ॥ ९१ ॥

यद्धिष्ण्यं हि यथा गतौ विकलितं तस्मिंस्तदीये क्षणे यानं मानपरं गमे भवति नो मध्ये क्षणे दक्षिणां ॥ यायाच्चापरादिक्षु तत्र गमनं सिद्ध्यै सदा या क्रिया यस्मिन्भे गदिता तदृक्षविरहे स्यात्तत्क्षणेऽपीष्टदा ॥ ९२ ॥

अथैषा व्यवहारमाह—यद्धिष्ण्यमिति ॥ हि निश्चितं यद्धिष्ण्य नक्षत्र यथा गतौ गमने निगदितं तथा तस्मिन् नक्षत्रे तदीये क्षणे तस्य नक्षत्रस्य लवे यान प्रयाण मानपरं श्रेष्ठ भवेत् । कस्मिन् गमे पुन॰ पुमान् मध्ये क्षणेऽभिजिन्मुहूर्ते दक्षिणा दिशं नो यायात् । च पुनस्तत्राभिजिन्मुहूर्तेऽपरदिक्षु दक्षिणावर्जितदिक्षु गमन सिद्ध्यै स्यात् । पुनर्यस्मिन् भे नक्षत्रे सदा या क्रिया गदिता प्रोक्ता पुनस्तदृक्षविरहे तत्क्रियोक्तनक्षत्राभावे तत्क्षणे तस्य नक्षत्रस्य मुहूर्तेऽपि सा क्रिया इष्टदा स्यात् ॥ ९२ ॥

मिश्रैरलोलैः प्रथमान्हि भैः क्षणैर्न दारुणैर्मध्यादिनेऽपराण्हके ॥ क्षिप्रैः प्रदोषे मृदुभिस्तमीदले क्रूरैर्निशांते च चलैर्गमो भवेत् ॥ ९३ ॥

अथोपजात्या प्रयाणे क्षणनक्षत्रे कालनिर्णयमाह—मिश्रैरिति ॥ प्रथमान्हि पूर्वाह्णके मिश्रैरलोलैः स्थिरैर्भैर्नक्षत्रैर्गमो गमनं न मध्यदिने दारुणै क्षणैर्भैर्गमो न पुनरपराण्हके

क्षिप्रैः क्षणैर्भैर्गमो न पुनः प्रदोषे यामिनीमुखे मृदुभिर्गमो न स्यात् । च पुनस्तमीदले ऽर्द्धरात्रे क्रूरैर्गमो न पुनर्निशांते चरैर्गमो न भवेत् ॥ ९३ ॥

इति प्रसन्नास्तु विशेषकालतस्ताराः समस्ता गमने बभाण यः ॥
अतोऽन्यकालानुगतास्तदन्वयान्मतं तदीयं यदनुद्धतं बत ॥ ९४॥

अथात्र कस्यचिन्मतमाह—इति प्रसन्नेति ॥ यः कश्चित् गमने प्रयाणे तुरित्यवधारणे विशेषकालतः समस्तास्तारा नक्षत्राणि बभाण जगौ किंभूतास्तारा इति प्रकारेण प्रसन्ना निर्दोषाः अतःकारणात् पुनः किंभूतास्तारास्तदन्वयात्तत्सद्भावात् अन्यकालानुगता अन्यसमयप्राप्ताः बत वितर्के यतः कारणात्त्वदीयं मतमनुद्धतं नीतिगतं ॥९४ ॥

दधिघृतफलमीनक्षौद्रगोरोचनाब्जध्वजमुकुरपयोन्नोष्णीषभृंगारवीणाः ॥ कुसुमधवलधान्यछत्रशंखांजनास्त्रज्वलदनलनृयानेभाश्वशुक्लोऽक्षकन्याः ॥ ९५ ॥

अथ मालिन्या काव्यत्रयेण दक्षिणगान् शुभसूचकशकुनानाह—दधीति ॥ दधि घृतं फलानि मीनो मत्स्यः क्षौद्रं मधु गोरोचना गोपित्तं ओषधिश्च अब्जं कमलं ध्वजः पताका मुकुरो दर्पणः पयो दुग्धं अन्नं उष्णीषं मुकुटः ' भृंगारः कनकालुका ' इति हैमः ॥ शुक्लकुंभ इति रत्नमाला ॥ वीणा घोषवती कुसुमानि पुष्पाणि धवलधान्यं छत्रं शंखः अंजनं कज्जलं अस्त्रं धनुरादि ज्वलदनलो निर्धूमोऽग्निः नृयानं शिबिका इभो हस्ती अनुन्मत्तः अश्वो घोटकः शुक्लोऽक्षः श्वेतवृषभः अबद्धः कन्या कुमारी एषां द्वंद्वे ॥ ९५ ॥

फलकुशवसुसिद्धार्थाक्षतछागमृत्स्नाः सजलकलशवेश्यारत्नभद्रासनानि ॥ नकुलसुरभिभूषाव्यालभक्ष्याखुविप्राः सतनयवनिता व्याघ्राटकीरेक्षुभूपाः ॥ ९६ ॥

फलेति ॥ फलानि मदनफलानि कुशो दर्भः वसु द्रव्यं सिद्धार्थः श्वेतसर्षपः अक्षता लाजाः छागोऽजः मृत्स्ना शुभमृत्तिका सजलकलशो जलपूर्णकुंभः वेश्या गणिका रत्नानि भद्रासनं सिंहासनं नकुलः सुरभिर्धेनुः भूषालंकारः व्यालभक्ष्या मयूराः आखुः मूषकः विप्रौ द्वौ बहवो वा नत्वेकः सतनयवनिता पुत्रसहितस्त्री व्याघ्राटो भारद्वाजपक्षी कीरः शुकः इक्षुः अखंडितदंडः भूपो राजा एषां द्वंद्वे ॥ ९६ ॥

दूर्वाकरीषांकुशदीपकौषधीःसमिच्च धौतांबरवर्धमानकौ ॥
दृष्ट्वेह वद्धैकपशुर्गमे नयेदेतान्यभीष्टान्यथ सव्यगानि तु ॥९७॥

अथोपजात्याह—दूर्वेति ॥ दूर्वा करीषः गोमयं अंकुराः दीपकः ओषधिः आसां समाहारद्वंद्वे एकत्वं च पुनः समित् एधः तु पुनः धौतांबरः प्रक्षालितवस्त्रजनकः वर्द्धमानकः शरावः । यदुक्तं

श्रीहर्षकविना ' भ्रमयत्यमितं विदर्भजाननीराजनवर्द्धमानकं ' इति ॥ अथवा बहुपुत्रादिपरिवारयुत पुरुष बद्धैकपशु रज्वादिना बद्ध एकादिश्छाग इह गमे प्रयाणे पुमान् एतानि शकुनानि अभीष्टानि दृष्ट्वापसव्यगानि दक्षिणगतानि नयेत् कुर्यात् ॥ ९७ ॥

मृदंगभेरीमृदुशंखनादान्वेदध्वनिं मंगलगीतघोषान् ॥
श्रीवाद्यवीणानकवेणुशब्दान् श्रुत्वा च याता लभते गमर्द्धिम् ॥९८॥

अथ वाद्यशकुनान्याह—मृदंगेति ॥ याता पुमान् गमर्द्धिं प्रयाणलक्ष्मीं लभते प्राप्नोति किंकृत्वा मृदंग मुरज भेरी दुंदुभि मृदुर्मर्दलमत्यादिवादित्र शख कबु एषा द्वंद्वे एषां शब्दान् च पुनर्वेदध्वनिं पुनर्मंगलगीतघोषान् पुन श्रीवाद्यं वीणा घोषवती आनक पटह वेणुर्वंश एषा द्वंद्वे एषा शब्दान् श्रुत्वा । वाद्यभेदो बहुधा यतो मृदंगो मृण्मय काष्ठमयश्चेत्यादौ तेन सुधियां विचारे पुनरुक्तदूषणा एका शंका हृता ॥ ९८ ॥

रलावला शूकरिका शिवा पिका कपोतकी क्रौञ्च्यनुगंधमूषिका ॥
स्यात्पिंगला वासकगोधिका सदा यियासतां वामविभागगा वरा ॥९९॥

अथ वामभागगतशकुनान्याह—रलेति ॥ रलावला आरे काशकापी छोडी अथवा नवु विशेषः शूकरिका 'सूघरी' इति भाषा । शिवा सृगाली पिका कोकिला कपोतकी पारावती क्रौञ्ची अनु पश्चात् धमूषिका छुछुंदरी गंधमूख्या' इति हैम ।पिंगला भैरवी चीवरी भाषा आवासकगोधिका गृहगोधिका यियासतां पुंसा वामविभागगा एषा सदा वरा स्यात् ॥ ९९ ॥

भासो मृगश्छिक्करपिप्पलाख्याः श्रीकंठशाखामृगपुष्कराख्याः ॥
शुभा यियासोरपसव्यगाः स्युर्वंशाभिधा ये पतगास्तथा ते॥१००॥

अथ दक्षिणगतशुभशकुनान्याह—भासेति ॥ भासः शकुंतपक्षिविशेषः 'भासे शकुंतको यष्टो' इति हैम ॥ मृग छिक्करो मृगविशेष पिप्पलश्चटकविशेष ऋक्षो भरद्क श्रीकंठः चाषः शाखामृगो वानर पुष्कराख्य सारस पुष्कराख्य कुरकर' इति हैमः ॥ यियासो गंमिच्छत पुंस एते अपसव्यगा दक्षिणगताः शुभाः स्यु । तथा पुनर्ये वंशाभिधाः स्त्रीसंज्ञका पतगा पक्षिणस्तेऽपि दक्षिणगा शुभा ॥ १०० ॥

निशाटनारिष्टकपोतदुर्गागोमायुवार्ध्रीणसरासभाख्याः ॥
विनिर्गमे वामगता वरा स्युः प्रवेशने दक्षिणभागसंस्थाः ॥ १०१

अथ निर्गम प्रवेशे च शकुनविविक्ततामाह—निशेति ॥ निशाटो घूक अरिष्ट काक कपोतो रक्तलोचन दुर्गा देवसजिका गोमायु सृगाल वार्ध्रीणसः खड्गी रासभाख्य एते विनिर्गमे वामगता वरा स्युः । पुन प्रवेशने दक्षिणभागसंस्था वराः स्यु ॥ १०१ ॥

शस्ता यदा यांति वनौकसो मृगास्तदौजसंख्यानुमिताः प्रदक्षिणं ॥
गमे गमो यानकृतासुतांगिनामशेषयानाखिलभेदसिद्धये ॥ २ ॥

अथ विषमसंख्यया शकुनान्याह—शस्तेति ॥ यदा वनौकसो वानरा मृगाश्च ओजसंख्याप्रमाणा यानकृता नराणां गमे प्रयाणे दक्षिणभागं यांति तदा शस्ताः स्युः । उत वितर्के यानकृतामंगिनां गमोऽशेषयानाखिलभेदसिद्धये स्यात् ॥ २ ॥

असिद्धये यानकृतां गुडौषधिक्लीबाहितैलास्थिवसोपलाहिताः ॥
पिचव्यजंबालतुषामयिश्रमिप्रभ्रष्टचर्मप्रतिरूपभूतयः ॥ ३ ॥

अथ काव्यद्वयेनाशुभशकुनान्याह—असिद्धेति ॥ यानकृता पुंसामसिद्धये निष्फलाय एते स्युस्तानाह ॥ गुडः इक्षुरसः औषधं क्लीबो नपुंसको अहिः सर्पः तैलं अस्थिवसा मेदः 'तेजोजे गौतमं वमा' इति हैमः ॥ उपलः पाषाणः अहितः शत्रुः एषां द्वंद्वः पिचव्यः कार्पासः 'कार्पासस्तु बादरः स्यात्पिचव्य' इति हैमः ॥ जंबालः पंकः तुषो धान्यकोशः 'तुषो बुधासे कडंगर' इति हैमः ॥ आमयी रोगी श्रमी क्लमयुक्तः प्रभ्रष्टो विकलः चर्मप्रतिरूपभूतिः चर्मकारः ॥ ३ ॥

आम्लं कटुक्षारतृणांधभस्मभृत्प्ररोषिनग्नांगविमुक्तकेशिनः ॥
क्षुधालुवंध्यारजका रजस्वला विण्मूत्रगोधाशशदारुजाहकाः ॥४॥

आम्लमिति ॥ आम्लं कटु क्षारः तृणानि घास अंधो गताक्षः भस्मभृत् भस्मधारी रोषी क्रोधी प्ररोषी इति पाठांतरं नग्नांगो वस्त्ररहितः विमुक्तकेशिनोऽसयतकेशाः क्षुधालुः क्षुधितः वंध्या रजको निर्णेजकः रजस्वला ऋतुयुक्तास्त्री विट् विष्ठा मूत्रं गोधा निहाका ...विका शशः दारु काष्ठं जाहको गात्रसंकोची ॥ ४ ॥

इहासितान्नाजिनलोहतस्करा विनासिकांगारखरोष्ट्रवाहनाः ॥
कुब्जस्त्वयोजीवनफांटमाहिषा मुंडो भुगेतानि भवंत्यसंपदे ॥ ५ ॥

इहेति ॥ असितान्नं कृष्णधान्यं अजिनं चर्म लोहं तस्कराः विनासिकः छिन्ननासिकः अंगारा अग्निनार्द्धदग्धाः खरवाहनः उष्ट्रवाहनः कुब्जो हीनांगः तु पुनरयोजीवनो लोहकारः फांट तक्रं माहिषः कासारः महिषारूढो वा मुंडः केशरहितः भुक् भक्षः एतानि शकुनान्यसंपदे दुःखाय भवंति ॥ ५ ॥

आवासदाहं स्खलितं च रोषता कुटुंबवादं धनहानिमार्तवं ॥
भुगाहवं कासरसंगरं गमे ह्यवाप्य कष्टं नखिदष्टमेति ना ॥ ६ ॥

अथाशुभसूचकशकुनान्याह—आवासेति ॥ ना पुमान् गमे प्रयाणे कष्टमेति प्राप्नोति किंकृत्वा आवासदाहं गृहज्वलनं स्खलितं वाहनादीनां स्खलनं रोषता क्रोधत्वं कुटुंबवादं

१ भवत्यसत्यपि इति पाठभेदः क्वचित् दृश्यते ।

कुद्धेषु परस्परकलहं धनहानिं आर्तवं स्त्रीधर्मं भुगाहवं भक्षकयुद्धं कासरसंगरं महिषयु नखिदष्टं सारमेयादिदंष्ट्राविदीर्णं चावाप्य प्राप्य हीत्यवधारणे ॥ ६ ॥

नखिध्वनिं च क्षुतमत्र रोदनं भस्त्रास्वनं दारुविदारणस्वनं ॥
अयःशिलाताडनमोतुकद्रवं श्रुत्वेति याता परिपंथिविग्रहम् ॥ ७ ॥

अथाशुभशकुनान्याह—नखीति ॥ अत्र याता पुमान् परिपंथिविग्रहं शत्रुकलहमे 'दुर्हृत् परिपंथिकपंथिनौ' इति हैमः ॥ किं कृत्वा नखिध्वनिं नखरायुधाना शब्दं च पु क्षुतं छिक्कां रोदनं भस्त्रास्वनं चर्मप्रसेविकायाः शब्दं दारुविदारणस्वनं भिद्यमानकाष्ठशब्दमय शिलाताडनं लोहशिलाकुट्टनं ओतुकद्रवं विडालविहितशब्दं च श्रुत्वा ॥ ७ ॥

समुद्यते गंतुमरं नरे स्यात्स्वप्नो विरुद्धो यदि दुष्टभाषणं ॥
गुरोरनाज्ञान्यविरोधवार्ता तदा गमो नागमहेतुरंगिनः ॥ ८ ॥

अथ विरुद्धस्वप्नादीनशुभशकुनान्याह—समुद्यतइति ॥ अरं शीघ्रं यदि चेत् नरे पुंसि गं समुद्यतेऽभ्युद्यमवति विरुद्धो दुष्टः स्वप्नः स्यादथवा दुष्टभाषणं वा गुरोः पित्रादेरनाज्ञा मा भ्रम इति लक्षणा वा अन्यविरोधवार्ताऽन्यैः सह विद्वेषवार्ता स्यात्तदा गमः प्रयाणं गिनः पुंसोऽनागमहेतुः पुनरावर्तनहेतुः अलाभहेतुर्वा स्यात् ॥ ८ ॥

यांगारगाशा ज्वलिता च धूमिता तदाश्रिता ये शकुनाः शकुंतजाः ॥
कुर्युस्तदाशाभ्रमवारवर्णतो विवर्णभावं गमनं यियासुषु ॥ ९ ॥

अथांगारादिदिगाश्रितान् शकुनान्निष्फलान् दर्शयति—यांगारेति ॥ या आशा दिग् अंगा रगा १ज्वलिता२ धूमिता ३ चास्ति तदाश्रिता तया दिशा आश्रिता ये शकुनाः शकुंतना पक्षिजाता भवेयुस्ते शकुना यियासुषु पुंसु गमनं विवर्णभावं श्यामभावं कुर्युः ॥ कस्मात् दाशाभ्रमवारवर्णतः सा च आशा तदाशा तस्या भ्रमो यस्य स चासौ वारश्च तस्य वर्णतो रागात् 'वैवर्ण्यं कालिकाथाश्रु' इति हैमः ॥ पुनरस्मिन्नेवोक्तं 'रघुवंशे विवर्णभावं स स भूमिपालः' इति ॥ अथ प्रभातरादंगारादिलक्षणानि लिख्यंते 'राजन्यतार्द्धयामादि यावद्यामा र्द्धकं दिने । एवं यामोदयो भानु पूर्वाद्यष्टदिशो भ्रमेत् ॥ १ ॥ दिनरात्रिप्रमाणेन याममान तु तद्भवेत् । तन्मानेन भ्रमेद्भानुर्दिशोऽष्टौ प्रहराष्टके ॥२ स्यादंगारा ज्वालिनी सूर्ययुक्ता दग्धा च रविणो झिता । गम्या धूमवती ज्ञेया तिस्रो दीप्ता इमा दिशः ॥ ३ ॥ ताभ्यः पंचमिका याता शातास्तिस्रः प्रकीर्तिताः । शेषं दिशाद्वयं मिश्रं यथासन्नस्वभावकं ॥४॥ मिथुनस्यस्थिते सूर्ये ज्वालिनी वासवी दिशा । दग्धाशा शांकरी ज्ञेया धूमिता पावकी मता ॥ ५ ॥ कर्कादयगे सूर्ये ज्वालिनी शूलभृद्दिशा । दग्धा सोमदिशा ज्ञेया शक्राशा धूमिता तदा ॥ ६ ॥ मकरा द्यष्टके सूर्ये पावकी ज्वालिनी भवेत् । सहस्राक्षदिशा दग्धा यमाशा धूमिता भवेत् ॥ ७ ॥ वासरातादष्टभागे च निशायामहरार्द्धके । ज्वलत्यवि गता गम्या दग्धा धूमवती दिशा ॥ ८ ॥ अशुभाः स्युर्दिशो दीप्ताः शुभाः शाताः प्रकीर्तिताः । पदिशा द्वितयं मिश्रं यथासन्नक

यत् ॥ ९ ॥ ज्वलिताद्यष्टकोष्ठानां प्रमाणार्थं भणाम्यहं । सूर्यवारवशाच्चक्रं दिग्विशेषकदर्शकं ॥ १० ॥ चतुरस्रं भवेच्चक्रं मध्येऽष्टदिग्विभेदनं । सप्त सप्त लिखेद्रेखास्तद्वाह्ये दिक्चतुष्टये ॥ ११ ॥ चक्रे बाह्ये भवन्त्येवं समास्तत्र समन्विताः । भागा रेखांतरास्थाश्चतुर्विंशतिसंख्यकाः ॥ १२ ॥ दिक्प्राच्यां सप्तरेखासु स्थाप्या द्वादश राशयः । कर्कादिमिथुनांतास्ता दक्षिणोत्तरमार्गगाः ॥ १३ ॥ विषुः स्यान्मध्यरेखाया तुलामेषाद्यवासरे । भवेदीशानरेखातः कर्काद्यं दक्षिणायनं ॥ १४ ॥ भवत्याग्नेयरेखातो मकराद्युत्तरायणं । एवं तच्छेषरेखासु राशीना स्याद् द्विकं द्विकं ॥ १५ ॥ रेखारेखांतराले च त्रिंशद्भागान् प्रकल्पयेत् । राशित्रिंशद्विभागास्ते चक्रदिशांगभोजकाः ॥ १६ ॥ भागैर्नवतिसंख्यैस्तैर्दिगेकैका भवेदिह । तदर्द्धांशैर्दिशार्द्धे स्यात्त्रिभागं त्रिंशदंशकैः ॥ १७ ॥ कुंभार्द्धे पश्चिमं मीनमेषवृषादिमंडलं । एवं प्राची नवत्यंशैर्मामावुत्तरचारिणि ॥ १८ ॥ वृषार्द्धं पश्चिमं कामकर्कसिंहादिमदनं । एतैर्नवतिसंख्यांशैर्जायते शाकरी दिशा ॥ १९ ॥ सिंहार्द्धं पश्चिमं कन्या तुले वृश्चिकमप्युदिशं । पुनः प्राची भवत्येतैः सूर्ये दक्षिणचारिणि ॥ २० ॥ वृश्चिकार्द्धयदलं चाप मृगे कुंभादिमंडलं । दिगाग्नेयी भवत्येतैर्भागैर्नवतिसंख्यकैः ॥ २१ ॥ एवं राशिवशाद्भानुर्यत्र स्यात् त्रिंशदंशकैः । ततः पूर्वांशपृष्ठाशान् दहेत् पंचाब्धिसंख्यया ॥ २२ ॥ ज्वलत्पृष्ठाशाष्टस्था दग्धांशाः खाकसंख्यया । ज्वलत्पूर्वांशकाग्रस्था नवत्यंशाश्च धूमिताः ॥ २३ ॥ यद्दिने यत्र गश्यंशे विषुवादौ स्थितो भवेत् । उदयादि तदंशादि याति सव्येन भास्करः ॥ २४ ॥ घुराशिना तथा वामः कृत्वा पलभयं च तत् । नवत्यात्तपलैर्भुक्तिरेकैकाशस्य जायते ॥ २५ ॥ एवं यामवशाद् भानुर्यत्र काष्ठांशके स्थितः । तत्रोक्तांशकमानेन दिग् ज्वाला दग्धधूमिता ॥ २६ ॥ चक्रमध्ये भवेन्मेरुः सूर्यस्तस्य प्रदक्षिणं । भूमावहर्निशं भुंक्ते दिशोऽष्टौ प्रहराष्टके ॥ २७ ॥ अन्योन्यमार्गचारेण भानुर्याति दिने दिने । एवं भवति मार्गाणामशीत्या संयुतं युतं ॥ २८ ॥ तद्दिने मार्गतो गत्वा रविर्यस्यां दिशि स्थितः । तत् प्रभृति नामानि विज्ञेयानि दिशाष्टके ॥ २९ ॥ ज्वलिता धूमिता छाया जला कर्दमिता धरा । भस्मांगारवती ज्ञेया सूर्ययुक्ता दिशा क्रमात् ॥ ३० ॥ वधो बंधः सुखं राज्यं लाभः क्षेमं भयं रुजः । ज्वलिताद्यासु, काष्ठासु फलं स्याच्छकुनोदये ॥ ३१ ॥ ज्वलितादिदिशैकैका त्रिधा ज्ञेया क्रमेण तु । तासां नामानि वक्ष्येऽहं चतुर्विंशतिसंख्यया ॥ ३२ ॥ ज्वलिना ज्वालिनी ज्वाला चैवं प्राज्वालिनी त्रिधा । संधुक्षिता च धूमाया धूमिनी च त्रिधा परा ॥ ३३ ॥ छाया मिश्रा च शुभ्रा च त्रिधा छाया दिशा मता । शीतला हैमकी चैव तुषारी च जला त्रिधा ॥ ३४ ॥ गडुला च कला पंका चेति कर्दमितात्रयं । सस्नेहा शाद्वला शेषा चैवं च त्रिविधा धरा ॥ ३५ ॥ रेणुश्च भस्म तापः स्यादिति भस्मान्वितात्रिकं । दाह दाहा निदाघी च चैवमंगारिणी त्रिधा ॥ ३६ ॥ चतुर्विंशति नामानि प्रोक्तानि च क्रमेण तु । पृथक् पृथक् फलं चासां वक्ष्यते शकुनोदये ॥३७॥ घातं मृत्यु रुज चैव बंधनं हानिर्भ्रमौ । मोहं चैव सुखं लोभं धनार्तिं राज्यमुन्नतिं ॥ ३८ ॥ अभिषेकं तथा राजनगाद्

पुत्रसपद। स्त्रीलाभं भोगवृद्धिं च विदेशं निग्रह तथा ॥ ३९ ॥ भर्ग चैव तथा काठ सताप शोकमेव च। प्राप्नुवति क्रमादेव शकुनान्मानवा फल ॥ ४० ॥ प्राक यत्प्रहराष्टके रवि दशादग्धादिकाकाष्ठक तस्यैकैकदशास्त्रिधा क्रमवशाद्भेदाश्चतुर्विंशतिः । तेषा नामनिदान भावजफलं विंदति ये शाकुने ते जानति फलस्य तस्य विवर हालाहल चामृत ॥ ४१ ॥ इति दिशाप्रकरण अथातरादवमेय ॥ ९ ॥

छायोरजध्वजसुभूरुहतोरणेषु क्षीरद्रुमांबुनिकटेषु मनोहरोर्व्यां ॥
प्रासाः प्रसन्नकलशाः शकुना यियासोरारामशालसुरभूकुलशांतदिक्षु॥१०॥

अथ वसंततिलकेन शुभस्थानेषु प्राप्तशकुनान् दर्शयति—छायेति ॥ छायाऽनातप उरज गृह ध्वज पताका सुभूरुह शुभवृक्ष तोरण एषा द्वंद्वे एषु पुन क्षीरद्रुमो राजादनादि अबु जल निकटं समीपदेश एषु पुनर्मनोहरोर्व्यां शुभभूमौ पुन आराम उपवन शालो वृक्ष प्राकारश्च सुरकुल चैत्य भूकुल नद्यादितट शातदिशो ज्वलितादित्रयात् अन्य दिश शाता आसा द्वंद्वे तासु एतत्स्थानेषु प्राप्ता लब्धा शकुना यियासोर्नरस्य प्रसन्नेन हर्षेण कलेन मनोहरशब्देन श सुख येभ्यस्ते प्रसन्नकलशा स्यु ॥ १० ॥

भस्मास्थिशुष्कपतितद्रुमदग्धभिन्नक्षोणीरुहावकरकंटकिविड्रसासु ॥
आहुः सदा शकुनमार्यवरा निरर्थं व्यर्थं तथाप्यशकुना गमनं प्रकुर्युः॥११॥

अथाशुभस्थानेषु लब्धशकुन व्यर्थ दर्शयति—भस्मेति ॥ आर्यवरा शाकुनिका बुधा सदा शाकुन निरर्थं निष्फलमाहु कासु भस्म रक्षा अस्थि शुष्क पतितश्च द्रुम. दग्धो भिन्नो विदारितश्च क्षोणीरुहो वृक्ष अवकर कटकी बदर्यादिवृक्ष विट् विष्ठा रसा भूमि एतासु तथाऽशकुना अपि गमन व्यर्थ प्रकुर्युः ॥ ११ ॥

शांताश्रयो मिथुनतांडवभक्ष्यचंचुतारप्रयाणयम-
दिग्भववार्विलासाः॥ वामस्वनच्छदविलाससुशाल-
रोहाः श्यामाविचेष्टितमिहाभिमुखीति रम्यम् ॥ १२ ॥

अथ पोतकीशकुनमाह—शांतेति ॥ इह प्रयाणेऽभिमुखी श्यामा पोतकी दुर्गादेवी इति नामांतराणि इति विचेष्टित रम्य सिद्धं कार्यं गमिन इति शेष । किंभूता श्यामा शाताश्रया शाता शुभा आश्रयाः स्थानानि यस्या सा। यथोक्त प्रथातरे 'प्रासादः पर्वतो हर्म्यं प्राकारो मंदिर मठ । यत्रिकाचक्रक यंत्र प्रतोली विद्या वेश्मकी॥ सत्रागार प्रपा गोष्ठ गोगृह नवगोमय॥ कोष्ठागार गृह कोश टंकशाला घटीगृह' । इत्यादि श्लोकैरष्टाविंशत्यधिकशत मितानि शातस्थानानि उक्तानि। शुभस्थानमिता इत्यर्थ । अथवा शातदिगाश्रिता श्लिष्टार्थेनेत्यपिश ब्दार्थ । पुन किंभूत श्यामाविचेष्टित मिथुनेनि मिथुन दपत्योर्द्वद्व ताडव नर्तन भक्ष्ये चचुर्म स्यचचु तार शुभनाद 'तारोत्युच्चैर्ध्वनि' इति हैम । प्रयाणयमादिग्भव प्रयाणात्

दक्षिणदिशि शब्दः वार्षु जलेषु विलासः क्रीडनं एताः चेष्टा यस्याः सा समासे समप्रपदं पुनः किंभूतं । श्यामाचेष्टितं वामेति वामे भागे स्वनः अथवा वामो मनोहरः स्वनः शब्दः यस्याः छदेषु पर्णेषु विलासः क्रीडा यस्याः सा सुशाले शुभवृक्षे रोहः आरोहणं यस्याः सा समासे समप्रपदं । अथवा इति श्यामाचेष्टितं शुभमितीति किं शांताश्रयमित्यादि शांताश्रयो मिथुनेति वामस्वन इति च पाठोपि शुभ । यतः ' उत्साहसन्मुखत्वं च सन्मुखं शुभवीक्षणं । उत्फुल्लास्यमसन्नत्व रोमाचोन्नर्तनं धृतिः ॥ १ ॥ औदार्यं स्थिरता धैर्यं प्रकटत्वं सकामता । उद्यमः खेलनं प्रीतिरुच्चाश्रयसुनादता ॥ २ ॥ एभिरष्टादशैर्भेदैर्भावः शांतोऽभिधीयते ' इति ग्रंथांतरेप्युक्तं ॥ १२ ॥

अतोऽन्यथा चेष्टितमीप्सितापहं दुर्गाकृतं यायिनि पुंसि संततं ॥
समस्तयानेष्वपि शाकुनं नयं प्रद्रष्टुमर्हं गमकामसिद्धये ॥ १३ ॥

अथ श्यामादुश्चेष्टितमशुभं दर्शयति—अतइति ॥ उक्तचेष्टितात् अन्यथा विपरीतचेष्टितं दुर्गाकृतं सततं सदा ईप्सितापहमभिलषितघातकं भवति कस्मिन् यायिनि गमनशीले पुंसि यतः ' पराङ्मुखत्वं संकोचो मुखबंधोऽथ ईक्षणं । वैकल्यं सैन्यता निद्रानाशश्वासौ विचेष्टिता ॥१॥ वियोगो विस्वरत्वं च नीचस्थानाश्रमस्थिता । अधःपातोऽगभंगश्च कंपनं धुननं भयं ॥ २ ॥ एभिरष्टादशैर्भेदैर्भावो दीप्तोऽभिधीयते । दुष्टोऽसौ शोभने कार्ये दीप्ते दीप्तविनाशकः ॥ ३ ॥ इति शाकुननिर्णयं शाकुनं नयं समस्तयाने सर्वप्रयाणे प्रद्रष्टुमर्हं योग्यं स्यात् । किमर्थं गमकामसिद्धये गमनकार्यफलाप्तये ॥ १३ ॥

प्राणायामानत्र पंच५स्मरन्वा यायादाप्ते शाकुने
वै विरुद्धे ॥ दि१०ङ्मान्कृत्वैवं द्वितिये तृतीये
घस्र १५ प्रख्यान्वो चतुर्थे गमः स्यात् ॥ १४ ॥

अथ शालिन्या गमनसमये दुष्टे शकुने जाते यत्कर्तव्यं तदाह—प्राणेति ॥ वै पादपूर्तौ तत्र गमने ना पुमान् विरुद्धे दुष्टे शाकुने आप्ते जाते सति पचप्राणायामान् श्वासोच्छ्वासरोधनानि स्मरन् यायात् गच्छेत् । प्राणायामस्तु यतः ' दक्षिणे रेचयेद् वायुं वामेन पूरितोदरं । कुंभेन धारयेन्नित्यं प्राणायामं विदुर्बुधाः ' ॥ १ ॥ इति ॥ अतर्गतेष्टदेवभावना इत्यर्थः ॥ एवं द्वितीये वारे गमने विरुद्धे शकुने सति दिङ्मान् दशसंख्यान् प्राणायामान् कृत्वा गच्छेत् । एवं तृतीये वारे घस्रप्रख्यान् पंचदशसंख्यान् कृत्वा गच्छेत् । एवं चतुर्थे वारे विरुद्धे शकुने गमं प्रयाणं न स्यात् ॥ १४ ॥

उल्कापातोपप्लवस्फूर्जथुस्त्वे धाराकंपे गर्जितेऽकालजेऽब्दे ॥
शंपापाते वैकृतेऽगादिभूते पक्षं हित्वाऽतो महद्यानमाहुः ॥ १५ ॥

अथोत्पातादौ प्रयाणविलंबं दर्शयति—उल्केति ॥ आर्या अत उत्पातात् पर्व हित्वा त्यक्त्वा प्रधानं वृद्धप्रयाणमाहुः कथयंति । कस्मिन् सति उल्कापाते आकाशात् ज्वालापतनं उपप्लवे उपरागः स्फूर्जथुर्वज्रनिर्घोषः 'अतिभीः स्फूर्जथुर्ध्वनिः' इति हैमः ॥ अकस्मात् खे महाशब्दो जायते स स्फूर्जथुः स्मृतः एषां भावे तत्प्रत्ययस्तस्मिन् पुनः धराकंपे भूकंपने पुनरकालजेऽब्दे मेघे गर्जिते सति पुनः शंपापाते विद्युत्पाते 'चलाशपाऽचिरप्रभा इति' हैमः । पुनरगादिभूते वृक्षादिभूते वैकृते विकृतिभावं प्राप्ते सति ॥ १५ ॥

गमो विवाहाननमंगलागमे न स्यात्समाशोचनकालसंभवे ॥
समागतैः श्रोत्रियमित्रराजभिर्वा तन्निवृत्तौ क्रियते गमोऽयमः ॥१६॥

अथोपजात्या इष्टादिवस्तुनि समागते प्रयाणविलंबं दर्शयति—गमइति ॥ गमः प्रयाणं न स्यात् कस्मिन् विवाहाननमंगलागमे उद्वाहमुखमंगलकार्ये समागते पुनः समाशोचनकालसंभवे सूतकसमये प्राप्ते सति पुनः कैः श्रोत्रियमित्रराजभिः छांदसमित्रनृपैः समागतैरायातैर्वा कृत्वेति तन्निवृत्तौ मंगलादिसंपूर्णे श्रोत्रियादिस्वस्थानगते गमोऽयम क्रियते पुंसेति शेषः ॥ १६ ॥

हरित्यसौ केतुरुदेति यस्यामियादिलायोऽरिजयाय तस्याः ॥
न तूदयद्वादशधिष्ण्यकाले पुच्छभ्रमाशं गमनं तथैव ॥१७॥

अथोदितकेतुदिशि प्रयाणविलंबं दर्शयति—हरितीति ॥ यस्यां हरिति दिशि असौ केतुरुदेति तस्यां दिशि असौ इलायां भूपो न इयात् न गच्छेत् । कस्मै अरिजयाय कस्मिन् सति उदयद्वादशधिष्ण्यकाले केतोरुदयादारभ्य द्वादशधिष्ण्यकाले द्वादशराशिराशिकोऽर्थः केतूदुगमराशितः सप्तविंशतिनक्षत्रचक्रे भ्रमपरिवर्तनं यावत्तस्मिन् तु पुनः पुच्छभ्रमाशं पुच्छभ्रमणदिग्गतं गमनं तथैव तावत्कालं न स्यात् ॥ १७ ॥

सुशुद्धिलब्धिर्गमवासरे यदा गंतुं न शक्नोति यथादशावशात् ॥
प्रस्थानयानं प्रवसेद्विधाय राट् मध्यभद्रं फलसिद्धिहेतुमत् ॥ १८ ॥

अथ प्रस्थानमोचनं दर्शयति—सुशुद्धीति ॥ यदा राट् नृपः सुशुद्धिलब्धा सत्या गमवासरे प्रयाणदिने गंतुं न शक्नोति कस्मात् यथादशावशात् यथावस्थावशात् तदा प्रस्थानस्य यानं प्रयाणं विधाय प्रस्थानयानं विधाय प्रस्थानं कृत्वा प्रवसेत् पथिकभावं गृह्णीयादित्यर्थः । किंभूतं प्रस्थानयानं मध्यभद्रं मध्ये भद्रं कल्याणं यस्य तत् पुनः किंभूतं फलसिद्धिहेतुमत् शुभफलप्रदम् ॥ १८ ॥

वृहद्भमे चापशतावधेर्विदुर्धनुःशतार्धात्तु समे निजस्थितेः ॥
प्रस्थानमूर्ध्वं विबुधा वरं मितेऽल्पपंचविंशत्यवधेःस्वयं कृतम् ॥ १९ ॥

अथ प्रस्थानमोचने मर्यादामाह—वृहद्भमइति ॥ विबुधाः पंडिताः वृहद्भमे चापशतावधेः धनुःशतात्पूर्वं प्रस्थानं वरं विदुः । पुनस्तु पुनः समे प्रयाणे शतार्धात् पंचाशद्धनुः

ऊर्ध्वं पुनर्मिते लघुप्रयाणेऽस्वपंचविंशत्यवधे पंचविंशतिधनुषोऽग्रे किंभूतं प्रस्थानं स्वयं कृतं आत्मना विहितं कस्याः सकाशात् निजस्थितेर्निजस्थानाद्गृहादित्यर्थः ॥ १९ ॥

प्रस्थानयेद्वाहमिलाधिपोऽथवा हेतिं सपूगांबरपुस्तकं द्विजः ॥
विडर्थयुक्तांबरमन्यविट् सदा सशालिचैलं त्वपरेंबरादिकम् ॥ २० ॥

अथ नृपादीनां भिन्नप्रस्थानविधिं दर्शयति—प्रस्थानेति ॥ सदा इलाधिपो भूपो वाहं घोटकमथवा हेतिं शस्त्रं प्रस्थानयेत् प्रस्थानं कुर्यात्। करणे भिन्नत्वयत्नः। द्विजो विप्रः सपूगांबरपुस्तकं पूगफलयुक्तवस्त्रं पुस्तकं च प्रस्थानयेत्। विट् वैश्य अर्थयुक्तांबरं द्रव्ययुक्तं वस्त्रं प्रस्थानयेत्। अन्यविट् शूद्रः सशालियुक्तवस्त्रं प्रस्थानयेत्। तु पुनरपरे कारुकादयोऽम्बरादिकं वस्त्रादिकं प्रस्थानयेत् ॥ २० ॥

प्रभूतभूपालकिरीटघृष्टपद्धराधिभूरश्वगजौ तु शैबिरौ ॥
शालाधिपालः शिबिरं बहिर्नयेद्यात्राद्युपादावधिगा शुभा स्थितिः ॥२१॥

अथ नृपादीनां प्रयाणविधिमाह – प्रभूतेति ॥ प्रभूतानां बहूनां भूपालानां किरीटैर्मुकुटैर्घृष्टौ उत्तेजितौ पूजितौ पादौ यस्य स चासौ धराविभूश्चक्रवर्ती अश्वगजौ बहिर्नयेत् किंभूता अश्वगजौ शैबिरौ शिबिरे पटमंडपादौ भवौ तु पुनः शालाधिपाले दुर्गाधिपः शिबिरं पटमंडपादिकं बहिर्नयेत् ॥ यात्रायाः प्रयाणस्य घु दिन तस्य आदश्चतुर्भागस्तदवधिगा तत्प्रमाणा स्थितिः शुभा स्यात् एकप्रहरमात्रमित्यर्थः ॥ २१ ॥

याता यायादलकाशा पुरोऽह्नि मध्याह्ने कामर्द्धये पौरुहूतीं ॥
कैनाशीमत्रापराण्हे निशीथे पाथोनाथाशामिवाशाधिनाथः ॥२२॥

अथ शालिन्योत्तरादिषु प्रयाणवेला दर्शयति—यातेति ॥ यत्र प्रयाणे याता पुमान् पुरोऽह्नि पूर्वाण्हे कामर्द्धये कार्यसिद्धये अलकाशा उत्तरा यायात् ॥ एवं मध्याह्ने पौरुहूतीं पुरुहूतस्येन्द्रस्येयं तां दिशं पुनरपराण्हे कैनाशीं कीनाशस्य यमस्येयं दिक् तां पुनर्निशीथे पाथोनाथो जलपतिर्वरुणस्तस्याशा पश्चिमा क इव आशाधिनाथ इव यथा निजनिजाशाधिनाथो निजां दिशं कार्यसिद्धये व्रजति ॥ २२ ॥

याने येन प्रास्यमुक्तं न मुक्तं तारावाराशोदितं यत्तदुग्रः ॥ तत्तत्प्राग्याशागते नुर्विगेयस्तस्मात्सम्यग्वारदिक् प्रास्यमर्हम् ॥ २३ ॥

अथ प्रयाणे नक्षत्रप्रास्यं दूषयन् वारदिक्प्रास्यं द्रढयति—याने इति ॥ याने प्रयाणे येनाचार्येण यत् तारावाराशोदितं नक्षत्रवारकाष्ठासु कथितं प्रास्यं प्रस्थमुक्तं प्रोक्तं तत्

न युक्त यतो नुः पुरुषस्य उग्रो महान् विरोधः स्यात् । किंभूतस्य नु' तत्तन्नक्षत्रोक्त वा' रादिप्रोक्त च प्राश्यं भुक्त्वा आशायां गतिर्गमनं यस्य स तस्येति। कथ विरोध उच्यते यतो नक्षत्रमाश्यमन्यदिति तस्मात् कारणात् सम्यग् वारविक् प्राश्यमर्हे योग्यं स्यात्॥ २३॥

मज्जिकाधारयुक् पायसं कांजिकं संभृतक्षीरमुस्राभवं सदधि ॥
द्रागपक्वं पयः प्राश्य तैलोदनं गम्यतेऽर्कादिवारेषु धाराभृता ॥ २४ ॥

अथ स्रग्विण्यार्कादिवारेषु प्राश्यमाह—मज्जिकेति ॥ धाराभृता भूपेन द्राक्, शीघ्र गम्यते गमनं क्रियते किंकृत्वाऽर्कादिवारेषु मज्जिकाद्य प्राश्य भुक्त्वा यथा रविवारे म- ज्जिका शिखरीणी ' शर्करादधिमरीचकर्पूरैलामिश्रिता रसालाया तु मार्जिता ' इति हैम ॥ म र्जिता इति शब्दभेद । मज्जिका तु वैद्यामरश्रेति ॥ सोमवारे आधारयुक् पायस घृतयुक्प रमान्न एषा समाहारैकत्व भौमवारे कांजिकामारनालं बुधवारे संभृतक्षीर पक्व पयः भृत शब्दोऽत्र श्राक पाके इति धातोरदादेः। किंभूतं पय उस्राभव गव्य ' उस्राभ्मारोहिणी इति हैमः । गुरुवारे सदधि गव्य शुक्रवारेऽपक्व पय शनिवारे तैलोदन तिलान्न ॥ २४ ॥

कौशिकाशागमे प्राश्यमाज्यं भवेन्मंजु तैलोदनं शामिनीदिश्यनु ॥
मीनविस्रं पयःपालकाष्ठागमे सौरिभेयीपयो राजराजस्य हि ॥ २५ ॥

अथ दिक्प्राश्यमाह—कौशिकेति ॥ कौशिक इन्द्र कौशिकाशागमे पूर्वस्या गमने आज्य घृत प्राश्य भक्ष्य मंजु भवेत्। अनु पश्चात् शमनस्य यमस्येय दिक् शामनी तस्यां द- क्षिणस्या तैलोदन प्राश्य पुनः पय पाटो जलपतिर्वरुणस्तस्य काष्ठा तद्गमने मीनवि- मत्स्यरुधिर प्राश्य पुना राजा गुह्यक 'यक्ष पुण्यजनो राजा' इति हैम ॥ तस्य रा- स्वामी कुबेरस्तस्य दिशि उत्तरस्या सौरभेयीपयो गोक्षीर प्राश्यं भवेदिति हि युक्तार्थ ॥ २५

ऐंद्रीं समारुह्य गजं नराधिभूरियादरं स्यदनमांतिकीमिह ॥
तुरंगमं दिग्विजयाय वारुणीं नृयानकं हि प्रति नारवाहिनिम् ॥२६॥

अथोपजात्या दिग्योग्यानि वाहनान्याह—ऐंद्रीमिति ॥ अरं शीघ्रमिह गमे नराधिभूर्नृपो ग- समारुह्य ऐंद्रीं दिश पूर्वामियात् गच्छेत् । एव स्यदन रथ समारुह्य आंतिकीं दिश दक्षि- गच्छेत् । तुरगमश्व समारुह्य वारुणीं पश्चिमा दिश ग च्छेत् । नृयानक शिबिका समारु- नरवाहनस्य कुबेरस्य इय दिग नारवाहनी तामुत्तरा प्रति गच्छेत् ॥ २६ ॥

बृहद्भमोक्ते समयेऽम्बुभोदये सितद्रुमत्र्यन्हि विदूषणे भवेत ॥
यानोत्तमर्क्षैश्च सपातवारुणैर्ग्रहैर्भाष्टैर्जलयानमुत्तमम् ॥ २७ ॥

अथ जलयात्राशुद्धिमाह—बृहदिति ॥ बृहद्भमोक्ते समय बृहत्प्रयाणोक्तशाड नरप नरप्रयाणमुत्तम भवत् । क अम्बुभोदये जलराशिलग्ने पुन सित शुक्र इड मती

रेषामन्हि दिने किंभूते विदूषणे दूषणरहिते च पुनः कैर्यानोत्तमर्क्षैः प्रयाणश्रेष्ठनक्षत्रैः किंभूतैः यानोत्तमर्क्षैः सवातवारुणैः वातः स्वाती वरुणस्येदं शतभिषक् आभ्यां सहवर्तमानैः पुनः कैरभीष्टैर्ग्रहैर्जलस्येदं यानं उत्तमं श्रेष्ठं भवेत् ॥ २७ ॥

राजा नरः प्राकृतकोऽपि वा यो मानानुगो त्त्हष्टमनाः प्रयायात् ॥
शुभांबरो भूषितभूषणांगो नयेदसौ याननयेन लक्ष्मीम् ॥ २८ ॥

अथ प्रयाणौत्सुक्येन सफलतां दर्शयति—राजेति ॥ यो राजा नरो वा प्राकृतकोऽपि हृष्टमनाः प्रमोदितचित्तो मानानुगः सन्मानप्राप्तः सन् प्रयायाद्गच्छेत् सोऽसौ राजा याननयेन प्रयाणकरणेन नीत्या वा लक्ष्मीं संपदं नयेत् प्राप्नुयात् । किंभूतो राजा शुभांबरः पुनः किंभूतो राजा भूषणभूषितांगः ॥ २८ ॥

गमं विमृश्येति करोति यो नरो दिगीश्वरानिष्टसुरान्नभश्चरान् ॥
स्मरन्प्रणम्यादिभुवो वरीकृतानुपैति राजाखिलयानसंपदम् ॥ २९ ॥

अथोपसंहारेण गमनसमयव्यवहारमाह—गममिति ॥ यो राजा इति पूर्वोक्तप्रयाणनीत्या विमृश्य विचार्य गमं गमन करोति किं कुर्वन् दिगीश्वरान् दिक्पालान् इष्टसुरान् निजेष्टदेवान् नभश्चरान् ग्रहांश्च स्मरन् किंकृत्वा आदिभुवो विप्रान् वरीकृतान् दत्तदक्षिणान् प्रणम्य स राजाऽखिलयानसंपदमुपैति प्राप्नोति ॥ २९ ॥

गुरूशनोज्ञेंदुदिनेषु वारुणानिलश्रविष्ठेज्यमृदुस्थिरोडुभिः ॥
याता विरिक्तान्यकुयोगविष्टिभिर्नृभाजि लग्ने गमनस्थलं विशेत ॥३०॥

अथ प्रथमप्रयाणवासस्थानक्रमाह—गुर्विति ॥ गुरुः उशनाः शुक्रः ज्ञो बुधः इंदुः एषां दिनेषु याता पुमान् नृभाजि लग्ने नरराशौ गमनस्थलं स्थेयस्थानं विशेत् प्रविशेत् । कैः कृत्वा वारुणं शतभिषक् अनिलं स्वाती श्रविष्ठा धनिष्ठा इज्यः पुष्यः मृदुसंज्ञभानि स्थिरसंज्ञोडूनि तेषां द्वंद्वे एतैः किंभूतैर्विरिक्तास्तिथयः अन्यकुयोगाः विष्टिः अमावास्या विगता येभ्यस्तानि तैः ॥ ३० ॥

स्थानं प्रविश्य क्रियते प्रवासिना ततोऽन्ययानं च चरोदये वरं ॥
सदन्हि चेद्दिक्समयेंदुभांगे प्रवेकादिग्राशितमीशमंडले ॥ ३१ ॥

अथ गमनस्थलादग्रे अन्यप्रयाणशुद्धिमाह—स्थानमिति ॥ प्रवासिना पथिकेन पुंसा स्थानं प्रविश्य ततः स्थानादवरं श्रेष्ठमन्ययानं इतरप्रयाण क्रियते कस्मिंश्चेद्यदि चरोदये चरलग्ने च पुनः सदन्हि शुभग्रहदिने किंभूते सदन्हि दिक् च समयश्च इंदुभोरुर्नक्षत्रं च तानि गच्छतीति इमत्यये तस्मिन् पुनः किंभूते सदन्हि प्रवेकं प्रधानदिग्राशिभ्या तमीशमंडलं चंद्रबिंबं यस्मिंस्तत् सन्मुखोऽर्थेऽभायेत्यादि 'अनुत्तरं माग्रहरं प्रवेकं' इति हेम. ॥ ३१ ॥

निजं पुरं याननिवर्तितो नरो जीवादिपंचद्युषु संविशेदसौ ॥
सवासवक्षिप्रमृदुध्रुवेष्वथ स्थिरोदये शुद्धलयांत्यकंटके ॥ ३२ ॥

अथ पुनरायाते निजपुरप्रवेशमुहूर्तमाह— [illegible] ॥ याननिवर्तित प्रयाण कृत्व आयातो नरोऽसौ निज पुर सविशेत् प्रविशेत्। कपु जीवादिपचद्युपु गुरुशुक्रशनिरविचन्द्रवारे किंभूतेपु सवासवेत्यादि वासव धनिष्ठा क्षिप्रमृदुध्रुवसज्ञानि एभि सहितेपु पुन स्थिरोदये स्थिरलग्ने किंभृते स्थिरोदये शुद्धलयात्यकंटके दूपणरहिता अष्टम ८ द्वादश १२ कटक भावा १।४।७।१० यस्मिन् स तस्मिन् ॥ ३२ ॥

न द्वादशी पक्षतिदर्श३०सप्तमी७रिक्ता४।९।१४तिरि-
क्ताऽजदिनेष्वतत्रकृत् ॥ विविष्टियोगेषु पुरप्रवेशनं
त्ववामवामैः शकुनैर्विलोमगैः ॥ ३३ ॥

अथ पुरप्रवेशे दुष्टतिथ्यादीन् वर्जयन्नाह—न द्वादशीति ॥ पुरप्रवेशन अतत्रकृत् तु ख कृत्र स्यात् शुभकृदित्यर्थ ॥ कपु द्वादशी पक्षति प्रतिपत् दर्शोऽमावास्या सप्तमी रिक्ता स्तिथय एताभ्योऽतिरिक्तेपु वर्जितपु अजमदिनेपु चान्द्रादिनेपु किंभूतेष्वजदिनेपु विविष्टियोगेपु विष्टिवर्जितयोगेपु तु पुनरवामवामैरपसव्यसव्ये शकुनैर्विलोमगैः कृत्वा अथवा वामे दक्षिणभागे वामैः शुभैर्विलोमगैः शकुनैः 'यत्र शास्त्र कुल तत्र तत्र सिद्धोपधक्रिया। तत्र सुख नख तत्र तत्र पवनसाधन' ॥ १ ॥ इत्यनेकार्थ ॥ ३३ ॥

विधाय वामं द्युमणिं निवेशयेदवाममिंदु हरिदाननर्क्षं ॥
उतोदयर्क्षभ्रमगं तथा गमी सूर्यान्वयोऽस्तोदयशैलगः पुरा ॥३४॥

अथ सूर्यवंशोद्भवनृपस्य प्रवेशविधानमाह—विधायेति ॥ उत चेत् गमी सूर्यान्वय सूर्यवशो राजाऽस्ति तदासौ पुर निवेशयेत् प्रविशेत् । किंकृत्वा वाम द्युमणि सूर्य विधाय तथाऽवाम दक्षिणभागगमिंदु [illegible] । किंभूत सूर्य हरिदाननर्क्ष पूर्वादिदिक्षु राशिग तथा उदयर्क्षभ्रमग, उदयो लग्नराशिस्तस्य भ्रमणगत कोऽर्थोऽष्टमराशित आरभ्य पचसु राशिपु वर्तमानोऽर्क पूर्वाभिमुखगृहे प्रविशता वामो भवति। एव पचमराशित आरभ्य पचसु राशिपु गतोऽर्को दक्षिणाभिमुखे गृहे प्रविशता वामो भवति । द्वितीयात् पचसु गत पश्चिमाभिमुखे गृहे वामो भवति। एकादशात् पचसु गत उत्तराभिमुखे गृहे वामो भव तीत्यर्थ । तथास्तोदयशैलगमस्तान [illegible] पुरमपि प्रविधाय प्रविशदित्यर्थ ॥ ३४ ॥

भवत्यसौ चेदिति चंद्रवंशज पुरस्तदावेशनकेऽन्यथोदित ॥
दिने दिनेशान्वयभूरुपाति गद निशीदिवशी च निवेशनाद्दरम् ॥ ३५ ॥

अथ चन्द्रवंशोद्भवस्य प्रवेशविधिमाह—भवतीति ॥ यद्यदि असौ चन्द्रवशभो यद भवेत् तदासौ राजा [illegible] प्रवेशेऽन्यथादित पूर्वोक्तविपरीतेन विशेत्। द्युमणि

कृतोपयमोऽथ पुमान् गृहित्वं वृद्धापनाद्दीपदिने समेति ॥
यथासतारायुति राजवीर्ये तमीमुखानंदितमेपलग्ने ॥ ९१ ॥

अथ दीपवृद्धापनमाह—कृत इति ॥ अथ कृतोपयामो विहितविवाहः पुमान् वृद्धापनात् दीपदिने दीपमालिकायां गृहित्वं गृहस्थाश्रमभावं समेति प्राप्नोति कस्मिन् यथासतारायुति राजवीर्ये यथायोगप्राप्तनक्षत्रयोगचंद्रबले तमीमुखानंदितमेपलग्ने रजनीमुखसमृद्धमेपलग्ने प्रभाताश्विनांतदर्शः दीपोत्सव इति भावः ॥ ९१ ॥

आदित्यदैत्यार्चितपादपुष्करौ हितौ तु नैत्यादिह हंसलीनगू ॥
खगोपरागो हरिप्गो हरिप्रियो दीपोत्सवस्त्रीगृहवेशने हितः ॥ ९२ ॥

अथ दीपोत्सवस्त्रीगृहप्रवेशने गुर्वस्तादिकं निर्दोषमाह—आदित्येति ॥ तुरित्यवधारणे आदित्या देवाः दैत्या असुराः एभिरर्चितं पादपुष्करं पूजितं पादपंकजं ययोस्तौ गुरुशुक्रौ नैत्यान्नित्यत्वादिह दीपदिने हंसलीनगू हंसे सूर्ये लीना गावः किरणा ययोस्तौ अस्तगतावपि हितौ शुभौ स्याताम् । खगोपरागः चंद्रसूर्यग्रहणं हरेरिंद्रस्य प्रियो गुरुर्हरिगः सिंहराशिगो हितः शुभः स्यात् कस्मिन् दीपोत्सवस्त्रीगृहवेशने स्पष्टं ॥ ९२ ॥

दीपद्युवृद्धापनकृत्यसंभवो दैवाद्यदा स्याद्विषमे विवाहतः ॥
उक्तक्षणाद्यखिलकालभूषिते गोधूलिलग्ने समयेऽपि तद्धितम् ॥ ९३॥

इति श्रीकविकालिदासोदिते ज्योतिर्विदाभरणे विवाहाध्यायस्त्रयोदशः ॥ १३ ॥

दैवाद्दीपवृद्धापनाभावे वधूप्रवेशे विवेकमाह—दीपेति ॥ यदा दैवात् दीपद्युवृद्धापनकृत्यसंभवो दीपने वृद्धापनकृतेरसंभवः स्यात्तदा विवाहतो विषमे समये वर्षे तत् वधूप्रवेशनं हितं शुभं स्यात् कस्मिन् उक्तक्षणाद्यखिलकालभूषिते एतादृशे गोधूलिकलग्ने इति कोऽर्थः षोडशदिनानंतरं विषमवर्षे विषममासे विषमदिने च वधूप्रवेशः कार्यः पंचवर्षानंतरं विषमवर्षादिनियमो नास्ति किंतु दोषरहिते काले वधूप्रवेशो विधेय इति ॥ ९३ ॥

इति श्रीपौर्णिमायशिष्यभावरत्नविरचितायां श्रीकालिदासकृतज्योतिर्विदाभरणस्य सुखबोधिकाया विवाहाध्यायस्त्रयोदशः ॥ १३ ॥

वस्त्रालंकारधारणाध्यायः ॥ १४ ॥

अथोपयमादनयोरनंतरं कालेऽशुकालंकृतिधारणं ब्रुवे ॥
सद्भूषणे भूषणधारिणी प्रिया नृभूषणे दूषणदायिनी यतः ॥ १ ॥

अथ विवाहप्रकरणानंतरं वस्त्रादिधारणशुद्धिर्वर्तते ऽतोऽलंकाराध्यायसंधानमाह—अथो इति ॥ अथानंतरं उपयमाद् विवाहदनंतरमनयोर्वरवध्वोरंशुकालंकृतिधारणं वस्त्रभूषणधारणं

निजं पुरं याननिवर्तितो नरो जीवादिपंचग्रुपु संविशेदसौ ॥
सवासवक्षिप्रमृदुध्रुवेष्वथ स्थिरोदये शुद्धलयांत्यकंटके ॥ ३२ ॥

अथ पुनरायाते निजपुरप्रवेशमुहूर्तमाह — निजमिति ॥ याननिवर्तितः प्रयाणं कृत्वा आयातो नरोऽसौ निजं पुरं संविशेत् प्रविशेत्। केषु जीवादिपंचग्रुपु गुरुशुक्रशनिरविचन्द्रवारेषु किंभूतेषु सवासवेत्यादि वासवं धनिष्ठा क्षिप्रमृदुध्रुवसंज्ञानि एभिः सहितेषु पुनः स्थिरोदये स्थिरलग्ने किंभूते स्थिरोदये शुद्धलयांत्यकंटके दूषणरहिता अष्टम ८ द्वादश १२ कंटक भावा १।४।७।१० यस्मिन् स तस्मिन् ॥ ३२ ॥

न द्वादशी पक्षतिदर्श३०सप्तमी७रिक्ता४।९।१४तिरि-
क्ताब्जदिनेष्वतंत्रकृत ॥ विविष्टियोगेषु पुरप्रवेशनं
त्ववामवामैः शकुनैर्विलोमगैः ॥ ३३ ॥

अथ पुरप्रवेशे दुष्टतिथ्यादीन् वर्ज्यपञ्चाह—न द्वादशीति ॥ पुरप्रवेशनं अतंत्रकृत् तु न कृतं स्यात् शुभकादित्यर्थः ॥ केषु द्वादशी पक्षति प्रतिपत् दर्शोऽमावास्या सप्तमी रिक्तास्तिथय एताभ्योऽतिरिक्तेषु वर्जितेषु अब्जदिनेषु चान्द्रदिनेषु किंभूतेष्वब्जदिनेषु विविष्टियोगेषु विष्टिवर्जितयोगेषु तु पुनरवामवामैरपसव्यसव्यैः शकुनैर्विलोमगैः कृत्वा अथवा वामे दक्षिणभागे वामैः शुभैर्विलोमगैः शकुने ' यत्र शास्त्रं कुत्र तत्र तंत्र सिद्धोपपक्रिया। तत्र सुखं यत्र तत्र तत्र पवनसाधनं ' ॥ १ ॥ इत्यनेकार्थः ॥ ३३ ॥

विधाय वामं द्युमणिं निवेशयेदवाममिंदुं हरिदाननर्क्षं ॥
' उतोदयर्क्षभ्रमगं तथा गमी सूर्यान्वयोऽस्तोदयशैलगं पुरा ॥३४॥

अथ सूर्यवंशोद्भवनृपस्य प्रवेशविधानमाह—विधायेति ॥ उत चेत् गमी सूर्यान्वयः सूर्यवंशो यात्राऽस्ति तदासौ पुरं निवेशयेत् प्रविशेत् । किंकृत्वा वामं द्युमणिं सूर्यं विधाय तथाऽवामं दक्षिणभागगमिंदुं विधाय । किंभूतं सूर्यं हरिदाननर्क्षं पूर्वादिदिक्षु राशिगं तथा उदयर्क्षभ्रमगं उदयो लग्नराशिस्तस्य भ्रमणगतं कोऽर्थोऽष्टमराशितः आरभ्य पंचसु राशिषु वर्तमानोऽर्कः पूर्वाभिमुखगृहे प्रविशता वामो भवति। एवं पंचमराशितः आरभ्य पंचसु राशिषु गतोऽर्को दक्षिणाभिमुखे गृहे प्रविशता वामो भवति । द्वितीयात् पंचसु गतः पश्चिमाभिमुखे गृहे वामो भवति। एकादशात् पंचसु गत उत्तराभिमुखे गृहे वामो भवतीत्यर्थः । तथाऽस्तोदयशैलगमस्ताचलोदयाचलगतं पुरमपि प्रविधाय प्रविशेदित्यर्थः ॥ ३४ ॥

भवत्यसौ चेदिति चंद्रवंशजः पुरस्तदावेशनकेऽन्यथोदितं ॥
दिने दिनेशान्वयभूरूपतिर्गतः निशींदुवंशी च निवेशनादरम् ॥ ३५ ॥

अथ चन्द्रवंशोद्भवस्य प्रवेशविधिमाह—भवतीति ॥ चेदि असौ चन्द्रवंशभवो भवति तदासौ राजा ... तथा आवेशनके प्रवेशेऽन्यथोदितं पूर्वोक्तविपरीतेन विधेयं । द्युमणिं

नरेण भर्त्रा हरिणीदृशा भवेत् सितांगिरोविद्युपु सर्वसिद्धिदम् ॥
लघुध्रुवत्वाष्ट्रचतुष्कवासवादितेयपौष्णैर्धवलांशुकं धृतम् ॥ ६ ॥

अथ श्वेतवस्त्रधारणशुद्धिमाह—नरेणेति ॥ नरेण भर्त्रा हरिणीदृशा स्त्रिया वा धवलांशुकं श्वेतवस्त्रं सत् शुभं धृतं सर्वसिद्धिदं भवेत् केषु सितांगिरोविन्दुषु शुक्रगुरुबुधदिनेषु पुनः कैः कृत्वा लध्विति लघुभानि ध्रुवभानि त्वाष्ट्रचतुष्कं चित्रास्वातीविशाखानुराधाः वासवं धनिष्ठा आदितेयं पुनर्वसु पौष्णं रेवती एभिर्भैरिति ॥ ६ ॥

त्रिदशदोषविदृक्षधनिष्ठयोरिनभपंचभनष्टरदोडुषु ॥
भवति शोणनिभांवरधारणं शुभतरं द्विजराजखगद्युषु ॥ ७ ॥

अथ रक्तवस्त्रधारणशुद्धिमाह—त्रिदशेति ॥ शोणनिभांवरधारणं रक्तवस्त्रधारणं शुभतरं भवति केषु द्विजेति द्विजौ गुरुशुक्रौ राजानौ रविभौमौ ते च ते खगा ग्रहश्च तेषां द्युषु दिनेषु पुनः केषु त्रिदशानां दोषविदौ वैद्यौ अश्विनीकुमारौ तयो ऋक्षमश्विनी धनिष्ठा च तयोः पुनरिनभपंचकं हस्तपंचकं नष्टरदः पूषा रेवती एषु उडुषु ॥ ७ ॥

ध्रुवलघुव्द्यसुरद्वयरेवतीवसुभनिर्जरवार्द्धकिमंत्रिभिः ॥
विदिनजीवदिनैः परिधानतः कपिलपीतपटस्य शमश्नुते ॥ ८ ॥

अथ पीतरक्तपीतवस्त्रधारणशुद्धिमाह—ध्रुवेति ॥ मानवः कपिलपीतपटस्य पीतरक्तवस्त्रस्य पीतवस्त्रस्य च परिधानतो धारणात् शं सुखमश्नुते प्राप्नोति कैः कृत्वा ध्रुवेति ध्रुवाणि लघूनि द्वे असुरभे इति द्व्यसुरं मूलं पूर्वाषाढा 'द्विमुख'मिति पाठे विशाखा इति द्वयं रेवती वसुभं धनिष्ठा निर्जरवार्द्धकिश्चित्रा मंत्री पुष्यः एभिः पुनः विदू बुधः इनः सूर्यः जीवो गुरुः एषां दिनैः ॥ ८ ॥

त्रियमलीवसुभैनचतुष्टयादितिभदस्रयुगोडुषु धारयेत् ॥
अनुपलाशशितिद्युतिचीवरं तरणिजे तरणौ तरुणी नरः ॥ ९ ॥

अथ नीलश्यामवस्त्रधारणे शुद्धिमाह—त्रियमलीति ॥ तरुणी युवतिर्नरः पुमान् वा अनुपलाशशितिद्युतिचीवरं नीलं श्यामं च वस्त्रं धारयेत् केषु त्रियमलीति त्रयाणां यमलानां समाहारे उत्तरात्रयं पूर्वात्रयमिति वसुभं धनिष्ठा एनचतुष्टयं हस्तचतुष्कं हस्तः चित्रा स्वाती विशाखेति अदितिभं पुनर्वसु दस्रयुगं अश्विनी भरणी एतेषु पुनस्तरणिजे शनौ तरणौ सूर्ये च वारे ॥ ९ ॥

धवलचीवरधारणमैन्द्रजोडुषु शशिनकवीज्यविदां दिनैः ॥
नयति पट्टकुलस्य कृतिव्रजो धृतिमपापवति स्थिरभोदये ॥ १० ॥

अथ पट्टकूलधारणशुद्धिमाह—धवलेति ॥ कृतिव्रजो युवसमूहः पट्टकूलस्य धृतिं धारणं नयति करोति केषु धवलेति श्वेतवस्त्रधारणनक्षत्राणि इंद्रमृगशीर्षैः शशी चन्द्रः इनः सूर्यः कविः

शुभे कथयामि यतो हेतोः सदूषणे दोषयुक्ते काले समये भूषणधारिणी धृतभूषणा सती प्रिया स्त्री दूषणदायिनी स्यात् कस्मिन् नृभूषणे नररत्ने पत्यौ ॥ १ ॥

नृयोपितोर्भूषणचीरधारणे विचारणीयं धवलच्छवेर्बलं ॥
नरस्य राशौ नियतं च जन्मनो विजन्मबोधस्य हि नामवर्णभे ॥ २ ॥

अथ वस्त्रभूषणधारणे चन्द्रबलं वर्णयति—नृयोपितोरिति ॥ नृयोपितोर्वधूवरयोः धवलच्छवेश्चन्द्रस्य बलं विचारणीयं चिन्त्यं कस्मिन् भूषणचीरधारणेऽलंकाराणां वस्त्राणां धारणे च पुनर्नरस्य जन्मनो राशौ नियतं निश्चितं बलं विचारणीयं विजन्मबोधस्याज्ञातजन्मनो नरस्य नामवर्णभे नामाक्षरराशौ बलं नियतं ॥ २ ॥

सर्वत्र भद्राखिलपातवैधृता विरुद्धयोगास्तिथिवारधिष्ण्यजाः ॥
सदर्शरिक्तास्तिथयस्तथोचिता न चीरनेपथ्यधृतौ चरोदयाः ॥३॥

अथ वस्त्रधृतौ भद्रादियोगास्त्यजति—सर्वेति ॥ सर्वत्र सर्वदेशेषु भद्रा अखिलपाताः क्रान्तिपात व्यतीपात ग्रहपात वैधृत एषां द्वन्द्वे तथा तिथिवारधिष्ण्यजास्तिथिवारनक्षत्रजाताः एवंविधा विरुद्धयोगाः तथा सदर्शरिक्तायुक्तास्तिथयस्तथा चरोदयाश्चरलग्नानि एते समस्ताश्चीरनेपथ्यधृतौ वस्त्रवेषधारणे नोचिता न योग्याः स्युः यतः 'नेपथ्यं स्याद्यवनिका रङ्गभूमिप्रसाधनं । रामादिव्यञ्जको वेषो नटनेपथ्यमिष्यते' ॥ ३ ॥

सितेज्यसोमेनदिनेषु नूतनं स्याच्चीरनिर्माणमलं सुलग्ने ॥
कुर्विंदवेमाख्यतुरीयसंपलघ्वानलादित्यमृदुस्वरर्यभैः ॥ ४ ॥

अथ प्रथमं वस्त्रोत्पादनशुद्धिमाह—सितेति ॥ अलमित्यवधारणे नूतनं नवीनं चीरनिर्माणं वस्त्रोत्पादनकर्म स्यात् कस्मिन् सितेज्यसोमेनदिनेषु शुक्रगुरुचन्द्रसूर्यदिनेषु पुनः सुलग्ने पुनः कैः कृत्वा लघ्विति लघुनक्षत्राणि आनलं कृत्तिका आदित्यं पुनर्वसु मृदुसंज्ञभानि स्वः स्वर्गस्तस्यार्यः स्वामी इन्द्रस्तस्य भं ज्येष्ठा एभिर्नक्षत्रैः किंभूतं चीरनिर्माणं कुर्विंदस्तन्तुवायः वेमा रूपो वायदण्डः तुरी ताभ्यः जाता कुर्विंदवेमाख्यतुरीया तथाभूता संपत् समृद्धिर्यस्य तत् तुरीयेति भवार्थेऽर्थिम ॥ ४ ॥

कुर्विंदमुक्तक्रियमंबरं सकृत् धौतं यदहं किल कृत्स्नमंगले ॥
धर्तुं तदेवाहतमादिकोविदैर्ज्ञेयं कुयोगोत्करदोषभूपितम् ॥ ५ ॥

अथोद्वाहादौ सकृद्धौतवस्त्रं परिधानयोग्यमाह—कुर्विंदेति ॥ किलेत्यवधारणे यदंबरं वस्त्रं कुर्विंदमुक्तक्रियं कुविंदेन मुक्ता क्रिया यस्मिंस्तत् सकृद्धानमेकवारमक्षालितं स्यात् 'निपासु' इति भाषा तत् वस्त्रं कृत्स्नमंगले समग्रमंगलकार्ये धर्तुं परिधानाय अर्हं योग्यं स्यात् आदिकोविदैस्तदेव वस्त्रमाहतं द्वितीयादिवारमक्षालितं छेदभोगात् वा कुयोगोत्करदोषभूषितं ज्ञेयं ॥ ५ ॥

नरेण भर्त्रा हरिणीदृशा भवेत् सितांगिरोविद्युपु सर्वसिद्धिदम् ॥
लघुध्रुवत्वाष्ट्रचतुष्कवासवादितेयपौष्णेषु धवलांशुकं धृतम् ॥ ६ ॥

अथ श्वेतवस्त्रधारणशुद्धिमाह—नरेणेति ॥ नरेण भर्त्रा हरिणीदृशा स्त्रिया वा धवलांशुकं श्वेतवस्त्रं सत् शुभं धृतं सर्वसिद्धिदं भवेत् केषु सितांगिरोवित्सुयु शुक्रगुरुबुधदिनेषु पुनः कैः कृत्वा लघ्विति लघुभानि ध्रुवभानि त्वाष्ट्रचतुष्क चित्रास्वातीविशाखानुराधाः वासवं धनिष्ठा आदितेयं पुनर्वसु पौष्णं रेवती एभिर्भैरिति ॥ ६ ॥

त्रिदशदोषविद्दक्षधनिष्ठयोरिनभपंचभनष्टरदोडुषु ॥
भवति शोणनिभांवरधारणं शुभतरं द्विजराजखगद्युषु ॥ ७ ॥

अथ रक्तवस्त्रधारणशुद्धिमाह—त्रिदशेति ॥ शोणनिभांवरधारणं रक्तवस्त्रधारणं शुभतरं भवति केषु द्विजेति द्विजौ गुरुशुक्रौ राजानौ रविभौमौ ते च ते खगा ग्रहश्च तेषां द्युषु दिनेषु पुनः केषु त्रिदशानां दोषविदौ वैद्यौ अश्विनीकुमारौ तयो र्भमश्विनी धनिष्ठा च तयोः पुनरिनभपंचकं हस्तपंचकं नष्टरदः पूषा रेवती एषु उडुषु ॥ ७ ॥

ध्रुवलघुव्यसुरद्वयरेवतीवसुभनिर्जरवार्द्धकिमंत्रिभिः ॥
विदिनजीवदिनैः परिधानतः कपिलपीतपटस्य शमश्नुते ॥ ८ ॥

अथ पीतरक्तपीतवस्त्रधारणशुद्धिमाह—ध्रुवेति ॥ मानवः कपिलपीतपटस्य पीतरक्तवस्त्रस्य पीतवस्त्रस्य च परिधानतो धारणात् शं सुखमश्नुते प्राप्नोति कैः कृत्वा ध्रुवेति ध्रुवाणि लघूनि द्वे असुरभे इति द्व्यसुर मूलं पूर्वाषाढा 'द्विमुर'मिति पाठे विशाखा इति द्वय रेवती वसुभं धनिष्ठा निर्जरवार्द्धकिश्चित्रा मंत्री पुष्यः एभि पुनः विदू बुध. इनः सूर्यः जीवो गुरुः एषां दिनैः ॥ ८ ॥

त्रियमलीवसुभेनचतुष्टयादितिभदस्रयुगोडुषु धारयेत् ॥
अनुपलाशशितिद्युतिचीवरं तरणिजे तरणौ तरुणी नरः ॥ ९ ॥

अथ नीलश्यामवस्त्रधारणे शुद्धिमाह—त्रियमलीति ॥ तरुणी युवतिर्नरः पुमान् वा अनुपलाशशितिद्युतिचीवरं नील श्यामं च वस्त्रं धारयेत् केषु त्रियमली त्रयाणां यमस्रानां समाहारे उत्तरात्रयं पूर्वात्रयमिति वसुभं धनिष्ठा एनचतुष्टयं हस्तचतुष्क हस्त. चित्रा स्वाती विशाखेति अदितिभं पुनर्वसु दस्रयुगं अश्विनी भरणी एतेषु पुनस्तरणिजे शनौ तरणौ सूर्ये च वारे ॥ ९ ॥

धवलचीवरधारणभेंद्रजोडुषु शशीनकवीज्यविदां दिनैः ॥
नयति पट्टकूलस्य कृतिव्रजो धृतिमपापवति स्थिरभोदये ॥ १० ॥

अथ पट्टकूलधारणशुद्धिमाह—धवलेति ॥ कृतिव्रजो बुधसमूहः पट्टकूलस्य धृतिं धारणं नयति करोति केषु धवलेति श्वेतवस्त्रधारणभानि इंदुर्मृगशीर्षः अजो विधुः श्रवण. ६-

स्वत्वा शशी इनो रवि कवि शुक्र इज्यो गुरु विद् बुध एषा दिने पुन कस्मिन् अपाववनि पापग्रहरहिते स्थिरभोदये स्थिरलग्ने ॥ १० ॥

कचिददारुणभोग्रभमिश्रभेहड्डुभिरेव पटः कृमिजो धृतः ॥
दिनमणीज्यतमीशदिनेषु शं मनुभुवानुभुवामनुलभ्यते? ॥ ११ ॥

अथ कौशेयवस्त्रधारणशुद्धिमाह—क्वचिदिति ॥ नु वितर्के मनुभुवा नरेण कृमिज कृमिकोशोत्थपटो धृतोऽनु पश्चात् भुवा भूम्ना शं सुखं अनुलभ्यते प्राप्यते केरुडुभि र्नक्षत्रैः कैर्भैरदारुणेति दारुणनक्षत्राणि उग्रभानि मिश्रभे द्वे एभिर्भैः रहिते पुन केषु दिनमणि सूर्य इज्यो गुरु तमीशश्चन्द्र एषा दिने ॥ ११ ॥

शयचतुष्कवसूडुयुगत्रयं।त्रिदशसूडुयुगाश्विनभांत्यभैः ॥
खरकरास्फुजिदैनिदिनेषु वै भवति लोमपटस्य धृतिः श्रियै ॥ १२ ॥

अथ कम्बलादिलोमपटधारणशुद्धिमाह—शयेति ॥ वै पादपूर्तौ लोमपटस्य धृति कम्बल धारण स्थिरमाधारण वा श्रियै भवति कै शयचतुष्क हस्तचतुष्क वसूडु धनिष्ठा युगत्रयी पूर्वोत्तरत्रय त्रिदशसूडुयुगं देवमातृयुग पुनर्वसु पुष्य अश्विनीभ अत्यभ रेवती एषा द्वंद्वे एभि पुन केषु खरकर सूर्य अस्फुजिच्छुक्र ऐनि शनि एषा दिने ॥१२॥

क्षयाधिकेऽह्नि भार्गवेज्ययोरस्तेऽशुगुर्वोस्तु मिथस्तदोकसोः ॥
दधाति योषिच्छयने तथामरे करे न दंतोद्भवकैमिचूडकम् ॥१३॥

अथ क्षयाधिकादिकाले स्त्रीणा दंतादिचूडकधारण निषेधति—क्षयेति ॥ योषित् स्त्री करे पाणौ दंतोद्भवकौर्मचूडक दंतसंबंधिचूडकं कच्छपसंबंधिचूडक न दधाति नो बिभर्ति कस्मिन् क्षयाधिकेऽह्नि काले तथा भार्गवेज्ययो शुक्रगुर्वोरस्तेऽस्त गते तु पुनस्तथाशुगुर्वो सूर्यगी ष्पत्योर्मिथ परस्पर तदोकसो सतो धनुर्मीनस्थे सूर्ये सिंहस्थे गुरौ तथा अमरस्वपे आमर तस्मिन् शयने देवशयने चातुर्मास्ये इत्यर्थ ॥ १३ ॥

अकुप्यभूषांशुमदश्मशंबुका मुक्ताकिविद्रुमदंतचुडकाः ॥
द्विजातिराजद्युषु पाणिपंचके सरासवांत्याश्विनभे श्रियै धृताः ॥१४

अथ सुवर्णादिभूषणाना धारणशुद्धिमाह—अकुप्येति ॥ अकुप्यभूषादयो धृता श्रियै स्यु अकुप्य हेमरूप्ये। सावर्ण रूप्य तन्मिश्रित भूषण अंशुमदश्मा सूर्यकान्तमणि 'सूर्यकान्त सूर्यमणि सूर्याश्मा दहनोपल' इति। शंबुक। 'शंबुकास्त्वम्बुशुक्तयः' इति हेम। शंखश्च इति। मुक्ता मुक्ताफल अर्किरुक् अर्कोपल इति भाषा रक्तमणि विद्रुम प्रवाळ दंतचूडक एषा द्वंद्वे एते केषु द्विजाती गुरुशुक्रौ राजानौ रविभौमौ एषा दिनेषु पुन पाणिपंचके हस्तपंचके ... पाणिपंचके ... धनिष्ठा ... रेवती अश्विनिभं एषा द्वंद्वे एभि सह वर्तमाने ॥१४॥

मघेशमैशेनमृदुद्विनायकानिलांबुनाथाद्यभगर्क्षवासवैः ॥
गुरुद्वयेनद्वयवासरे करे दध्याद्वशा कौर्ममणेरलंकृतिम् ॥ १५ ॥

अथ कौर्मचूडकधारणशुद्धिमाह—मघेशेति ॥ वशा स्त्री करे पाणौ कौर्ममणेः कच्छपसंबंधिरत्नचूडकस्यालंकृतिं भूषणं दध्यात् बिभृयात् कैः कृत्वा मघा ऐशं आर्द्रा मैशं मापा लक्ष्म्या ईशो मेशस्तस्येदं श्रवणः इनो हस्तः मृदुभानि द्विनायकं विशाखा आनिलं स्वाती अंबुनाथो वरुणः शततारा आद्यमश्विनी भगर्क्षं पूर्वाफाल्गुनी वासवं धनिष्ठा एषां द्वंद्वे एतैः पुनः कस्मिन् गुरुद्वयेनद्वयवासरे गुरुद्वयं इनद्वयं चेति गुरुशुक्रसूर्यसोमदिने ॥ १५ ॥

वाध्रीणसं पारशवं च माधुकं धीरैरुदाहारि विधानमादरात् ॥
वैडूर्यकं कौर्ममणिक्रियोदिते धिष्ण्ये दिने वा क्वचिदंशुसंभवे ॥ १६ ॥

अथ खड्गपात्रादिकार्यशुद्धिमाह—वाध्रीणसमिति ॥ धीरैः पंडितैर्वाध्रीणसं खड्गपात्रादिकं पारशवं लोहं पिंडं 'पारशवं धन'मिति हैमः। माधुकं त्रपुसंबंधि 'मधुकं त्रपु यष्टिश्चेति' हैमानेकार्थः। वैडूर्यकं च विधानं कार्यं वाध्रीणसस्येदं विधानं कर्म इत्यण् एवं पारशवं माधुकं च ज्ञेयं उदाहारि कथितमित्यर्थः। कस्मात् आदरात् कस्मिन् धिष्ण्ये नक्षत्रे दिने च किंभूते धिष्ण्ये दिने च कौर्ममणिक्रियोदिते कच्छपसंबंधिवलयरत्नक्रियासु प्रोक्ते पुनः क्वचिदंशुसंभवे शनौ दिने वा इति मतांतरं ॥ १६ ॥

अदारुणोग्रैरुडुभिस्त्वमिश्रैरार्येनराजद्युषु संगतेषु ॥
ससीसशुल्बादि च कर्म वामं सपद्मरागादि सिते क्वचित्स्यात् ॥ १७ ॥

अथ ताम्रादिकर्माह—अदारुणेति ॥ ससीसशुल्बादि सीसपत्रकसहित ताम्रादिकर्म च पुनः सपद्मरागादि रक्तमणिप्रमुखसहितं कर्म वामं श्रेष्ठं स्यात् कैरुडुभिः किंभूतैः अदारुणोग्रैस्तीक्ष्णक्रूरनक्षत्ररहितैः पुनः किंभूतैरमिश्रैः साधारणनक्षत्ररहितैः पुनः केषु आर्येनराजद्युषु गुरुरविचंद्रदिनेषु संगतेषु संयुक्तेषु तु पुनः क्वचित् सिते शुक्रे दिनेऽपि स्यात् ॥ १७ ॥

सशुभे हयचरोदयेऽपि केंद्रे वसनं धारितमातनोति धाम ॥
चरचापिवशाविसारलग्ने धृतमंजीरवशा विसारमेति ॥ १८ ॥

अथ मालभारिण्या वस्त्रनूपुरधारणे लग्नशुद्धिं दर्शयति—सशुभइति ॥ धारितं परिहितं वस्त्रं कर्तृपदं धाम तेज आतनोति विस्तारयति कस्मिन् सशुभे शुभग्रहयुक्ते हयचरोदये कन्यास्थिरलग्ने सशुभे केंद्रेऽपि धृतमंजीरवशा चरणधृतनूपुरा स्त्री विसारं शुभतरमेति प्राप्नोति कस्मिन् चरेति चरलग्ने चापिनि धनुषि वशायां कन्यालग्ने विसारे मीनलग्ने ॥ १८ ॥

कटकांगदकर्णिकादिभूपारशनाहारभराद्यलंकृतिः स्यात् ॥
हरिगोलिवशाभिथुनमलग्ने सति के खे च विषे श्रुतौ धृतेष्टा ॥ १९ ॥

अथ कटकाद्यलंकृतिधारणशुद्धिमाह—कटेति ॥ कटकाद्यलंकृतिर्धृता इष्टा स्यात् कटको वलयं अंगदं केयूरं कर्णिका कर्णभूषणं इत्यादि भूपालंकारः रशना मेखला हार-

भरा मुक्ताफलादीनां हारभेदा इत्याद्यलङ्कृतिरिति ॥ कस्मिन् हगिः सिंह गौर्वृष अलिर्वृश्चिक वशा कन्या स्त्री धनु युग्म मिथुन एषा लग्ने च पुन के प्रथमभावे खे दशमे विषे जले चतुर्थे श्रुतौ कर्णे तृतीये एकादशे सन् शुभग्रह तस्मिन् सति शुभग्रहयुक्तप्रथमा दिभावे इत्यर्थ ॥ १९ ॥

गुरुभश्रुतिधीरवासवैशैरविदोरैंद्रपयोर्यधिष्ण्यपौष्णैः ॥
रविसत्सु विवित्सु पापमुक्ते मुकुटं मस्तकभोदये विदध्यात् ॥२०॥

अथ मुकुटधारणमुहूर्तमाह—गुरुभेति ॥ सुधीर्मुकुटं विदध्यात् बिभृयात् कै गुरुभेति गुरुभ पुष्य श्रुति श्रवण धीरभानि ध्रुवभानि वासव धनिष्ठा ऐशमार्द्रा एभि पुन कै अधि दोर्हस्त ऐंद्र ज्येष्ठा पयोर्यो वरुणस्तस्य धिष्ण्यं शततारा पौष्णं रेवती एभि पुन केषु रवि सत्सु सूर्यशुभग्रहदिनेषु किंभूतेषु विवित्सु बुधरहितेषु पुन कस्मिन् पापमुक्ते पापग्रहरहिते मस्तकभोदये शीर्षोदयलग्ने ॥ २० ॥

लघुलोलमृदूग्रधन्ववार्भैरलपन्सत्द्युषु लग्नपुंविलग्नैः ॥
घनसारकुरंगनाभिवर्णागुरुगोरोचनमालयादिकृत्यम ॥ २१ ॥

अथ घनसारादिकृत्यशुद्धिमाह—लघ्विति ॥ सुधियो घनसारादिकृत्यमलपन् अकथ यन् घनसार कर्पूर कुरगनाभि कस्तूरी वर्णो हिंगुलादि कुङ्कुमादिर्वा अगुरु कृष्णागरु गोरोचन प्रतीत मलये भवं मालय चदन इत्यादीना कृत्य मडनमिति कैर्लघु इति लघूनि लोलानि च भानि मृदूनि उग्र रुना इन्द्रो ज्येष्ठा 'पूतनाषाढुग्रधन्वा' इति हैम । वा जलं तद्व पूर्वाषाढा एते किंभूतैर्लग्नपुंविलग्नै आश्रितनरलग्नै पुन केषु सत्द्युषु शुभग्रहदिनेषु ॥२१॥

सचिवे दितिजन्मनां मघोनोऽमृतमालिन्यनु च प्रसूनकार्यं ॥
मृदुतिष्यमुरारिभत्रये स्याच्छ्वसनर्क्षे नृदये च चंद्रदृष्टे ॥ २२ ॥

अथ कुसुमकार्यशुद्धिमाह—सचिवेति ॥ प्रसूनकार्यं पुष्पकार्यं स्यात् कस्मिन् दिति-जन्मनां दैत्यानां सचिवे शुक्रदिने च पुनर्मघोन इन्द्रस्य सचिवे गुरुदिनेऽनु पश्चादमृतमा लिनि अमृतं मालयति धरति इति मलधारणे धातो प्रयोगत्वात् तस्मिन् अमृतधारिणि चन्द्रे दिने पुनर्मृदूनि तिष्य पुष्य मुरारिर्विष्णुस्तद्भत्रय श्रवणत्रय पुन श्वसनर्क्षे स्वातीभे तु पुनश्चन्द्रदृष्टे चन्द्रेण विलोकिते नृदये नरलग्ने ॥ २२ ॥

लघुधीरवसूडुपुष्यपौष्णैः सुरवर्द्धक्यनिलोडुदास्रमैत्रैः ॥
सदहस्सु विवित्सु देहदुर्गः परिधेयोऽचरभोदये सुरेंद्रे ॥ २३ ॥

अथ कवचादिधारणशुद्धिमाह—लघुधीरेति ॥ देहदुर्ग सन्नाह परिधेय परिधार्य सुभटैरिति शेष कैर्लघूनि धीराणि वसूडु धनिष्ठा पुष्य पौष्णं रेवती एषा द्वद्वे एभि पुन कै सुरवर्द्धकिश्चित्रा अनिलोडु स्वाती दास्रमश्विनी मैत्रमनुराधा एषा द्वद्वे एभि पुन केषु

सदहस्सु शुभग्रहवासरेषु दिवसेषु किंभूतेषु बुधरहितेषु पुनः कस्मिन् अचरभोदये स्थिरलग्नोदये किंभूते अचरभोदये सुकेंद्रे शुभग्रहयुक्तकेंद्रे ॥ २३ ॥

काचकाचमणिकज्जलक्रिया भानुभानुजभृगुप्रसूतिषु ।
वातवासवमृदुद्विदैवतैरादितारकयुतैः प्रशस्यते ॥ २४ ॥

अथ काचादिकार्यशुद्धिमाह—काचेति ॥ काचः काचमणयः काचमणिकाः कज्जलं एषां क्रिया प्रशस्यते प्रशंसनीया केषु स्यात् भानुः भानुजः शनिः भृगुप्रसूतिः शुक्रः एषां दिनेषु पुनः कैः वातः स्वाती वासवं धनिष्ठा मृदूनि द्विदैवतं विशाखा एषां द्वंद्वे एतैः किंभूतैः आदितारकयुतैः स्पष्टं ॥ २४ ॥

व्यंतकाग्रमृदुमिश्रदारुणैर्भास्करींदुभवभास्करद्युभिः ॥
चर्मकर्म कलितं ह्युपानहौ धारिते विदधतोऽतिशं विशाम् ॥२५॥

अथ चर्मकर्मशुद्धिमाह—व्यंतेति ॥ हि अवधारणे चर्मकर्म विदधतः कुर्वतः चर्मकारस्य अथवा विदधतः कुर्वाणात् तु पुनः धारिते उपानहौ विशां मनुष्याणां अतिशं महत्सुखं कलितं प्रोक्तं कैर्व्यंतकानि भरणीरहितानि उग्रभानि मृदूनि मिश्रे द्वे दारुणानि एषां द्वंद्वे एतैः पुनः कैः भारकरिः शनिः इंदुभवो बुधः भास्करः सूर्यः एषां दिनैः ॥ २५ ॥

भूपदत्तमुपयामवासरे स्नेहिलब्धमचलामराज्ञया ॥
सिद्धवाक्यवशतः शमंबरं धारितं तु तनुतेऽस्त्रभूषणम् ॥ २६ ॥

इति श्रीकविकालिदासोदिते ज्योतिर्विदाभरणे वस्त्रालंकरणपरिधानाध्यायश्चतुर्दशः॥ १४

अथ भूपादिभ्यो लब्धवस्त्रादीनां तत्कालधारणमाह—भूपेति ॥ हि अवधारणे अंबरं वस्त्रं तु पुनरस्त्रभूषणं शस्त्रं भूषणं च कर्तृपदं शं सुखं तनुते किंभूतं अंबरादिकं अचलामराज्ञया विप्रदेशेन सिद्धवाक्यवशतो महत्पादेशात् धारितं कस्मिन् अभे नक्षत्रादियोगरहितेऽपि सति पुनः किंभूतं अंबरं भूपदत्तं राज्ञा प्रदत्तं पुनः उपयामवासरे लब्धं स्वजनेनार्पितं स्नेहिलब्धमिति पाठः स्नेहितः प्राप्त ॥ २६ ॥

इति श्रीपौर्णिमीयशिष्यभावरत्नविरचितायां श्रीकालिदासकृतज्योतिर्विदाभरणस्य सुखबोधिकायां वस्त्रालंकरणपरिधानाध्यायश्चतुर्दशः ॥ १४ ॥

कस्मिंश्चित्समये नृपस्य सदसि श्रीविक्रमार्कस्य यो
विद्वद्भिः परिपूरिते च सुजनैस्तर्कि सदोषा जगौ ॥
दैवज्ञस्य ततो वराहमिहिरस्यानेन मूर्खीकृतो
न ज्ञोऽस्यामिति कालिदासकविना दुर्बोधशास्त्रं कृतम् ॥ २ ॥

व्याख्या श्रीविक्रमार्कसभायां श्रीकालिदासेन वराहमिहिरकृतशास्त्रे दूषणं दत्तं ततस्तेनासौ त्वं मूर्खं इति भणितं यतोऽस्मदुक्तौ त्वमज्ञोऽसि ज्योतिर्मार्गत्वात् ततः कालिदासेनापि तन्मदापहरणाय इदं शास्त्रं कृतमिति ॥

अन्वयमन्वयः प्रतिभाति—व्यांतकाग्रमृदुमिश्रदारुणैः भास्करींदुभास्करद्युभिः चर्मकर्म कलितं हि धारिते उपानहौ तदा अतिशं विदधतः कुरुत इत्यर्थः ॥

प्राकाराध्यायः १५

दुर्गं विना नैव हि निर्भयं पुरं पुरे स्वराशिस्थलगं गृहं वरं ॥
क्रमादहं शालपुरौकसामतो वक्ष्यामि तावत् घटनाभिनिर्णयं ॥१

अथालंकाराध्यायकथनानंतरं भूपणादि सुस्थानं विना विनश्यति अतः प्राका ध्यायसंधानमाह—दुर्गमिति ॥ हि युक्तार्थे दुर्गं कोटं विना दुर्गमं शत्रुभिर्दुष्प्राप्यं नैव स्यात् ॥ यतः ' यस्याश्रयबलेनैव राज्यं कुर्वंति भूतले । विग्रहं चतुराश सीमान्तैः शत्रुभिः सह ॥ १ ॥ विषमं दुर्गमं घोरं वक्रं भीरुभयावह । कपिशीर्षैश्च शोभ रौद्राट्टालकमंडितं ॥ २ ॥ प्रतोली पत्रकालास्या परिखा कालरूपिणी । रणमंडपकूना दिकुलीयंत्रयात्रित ॥३॥ मुशलैर्मुद्गरैः पाशैः कुंतखड्गैर्धनुःशरैः ॥ सयुक्तं सुभटैः शूरैरिति निवेशयेत् ॥ ४ ॥ प्रथमं मृण्मयं कोटं जलकोटं द्वितीयकं । तृतीयं ग्रामकोटं च चतुर्थं गि गव्हरं ॥ ५ ॥ पंचमं पर्वतारोहं षष्ठं कोटं च डाबरं । सप्तमं वक्रभूमिस्थं विषया तथापरं ॥६॥ इति पुरे नगरे स्वराशिस्थलग निजराश्युचितस्थानमितं गृहं वरं स्यात् । हेतोस्तावत्प्रथमं क्रमात्क्रमेणाह शालपुरौकसां प्राकारनगरगृहाणां घटनया रचनया अभिनि वक्ष्यामि कथयिष्यामि ॥ १ ॥

नगेंद्रशालोऽस्त्यनुवारिशालो भूशालको गव्हरशाल एषां
नगांबुशालावतिदुर्गमौ स्तो मध्याधमौ गव्हरभूमिशालौ ॥

अथ प्रथम पर्वतादिस्थानगतशालभेदानाह—नगेति ॥ नगेंद्रशालः पर्वतोपरि वप्रो अनुवारिशालो जलमध्यगतोऽस्ति पुनर्भूशालो भूमिप्रतिष्ठितोऽस्ति पुनर्गव्हरशालो बिलप्रति कुजप्रतिष्ठितो वा 'बिले तु गव्हर गुहा' इति हैम ॥ इत्यादिति चतुर्णां एषां वप्राणां मध्ये न शालौ पर्वतजलस्थौ वप्रौ अतिदुर्गमौ गृहीतुमशक्यौ स्तः भवत. गव्हरभूमिशालौ प्र मध्याधमौ भवतः गव्हरशालो गृहीतुं शक्याशक्य भूमिशालो गृहीतु शक्य इत्यर्थ ॥

शिलामयश्चोत्तम इष्टिकामयो मध्योऽधमो मृद्रचितोऽत्र दारवः ॥
शालः सुधीभिस्त्वधमाधमाभिधः प्रभाषितः सन् विबलोऽप्यसौ वली

अथैतानेव पाषाणादिनिर्मित नुत्तममध्यमाधमानाह—शिलेति ॥ सुधीभिः शिल दषद्भिर्निर्मितो वप्र उत्तम. श्रेष्ठ प्रभाषित. । च पुनरिष्टिकामयो मध्यो मध्यम पुनर्मृद मृत्तिकामयोऽधमो नेष्टः पुनर्दारव' काष्ठमयस्त्वधमाधमोऽधमतम इति असौ विबलोऽपि असमर्थोऽपि सन् शाले बलीष्ठ' स्यात्तत्कारणमाह ॥ २ ॥

अनेकयंत्रास्त्रनिकायसज्जितो भटाचितो धान्यरसादिपूरितः ॥
स दुर्गमस्तुच्छबलोऽपि शालको भवेदसौ मंडलरक्षणक्षमः ॥

अनेकेति ॥ सोऽसौ तुच्छबलोऽपि स्तोकसैन्योऽपि शालको दुर्गमः सन् मंडलरक्ष देश रक्षणाय समर्थो भवेत् किंभूतोऽनेकेति अनेकयंत्रास्त्रनिकायो नानाविस्फोटादियंत्रम

समूहस्तेन सज्जितः उद्धटीकृतः पुनः किंभूतः शालः भटाचितः सुभटैर्व्याप्तः पुनः किंभूतः शालः धान्यरसादिपूरितः धान्यघृततैलतृणकाष्ठादिभिः पूर्णः ॥ ४ ॥

नृवाहनाशायनवर्तिनीने शालो विधेयोऽश्मभिरिष्टकाभिः ।
इहैव मार्गे त्विषकोर्जयोर्वा मृत्स्नामयोऽन्योऽनु च सर्वकाले ॥५॥

अथ कोटकरणकालमाह—नृवाहनेति ॥ अश्मभिः पाषाणैः शालो विधेयः कर्तव्यः वाऽथ वा इष्टकाभिः शालो विधेयो वा मृत्स्नामयः शुभमृण्मयः शालो विधेयः कस्मिन् इह नृवाहनो धनदस्तस्याशा उत्तरा तस्यामयनवर्तिनि उत्तरायणयुक्ते इने सूर्ये सति पुनः कस्मिन् मार्गशीर्षे तु पुनः कयोरिषकोर्जयोः आश्विनकार्तिकयोः अनु पश्चाच्च पुनरन्यो दार्वादिमयः शालः सर्वकाले विधेयः ॥ ५ ॥

न द्विस्वभावे ३।६।९।१२। तरणौ प्रतिष्ठामितेऽङ्गिरस्यास्फुजिती द्विबिंबे ॥
दौर्ग्यं समारंभणमाहुरार्या दुष्टैश्च पाकेशकुजांशुसोमैः ॥ ६ ॥

अथ द्विस्वभावराश्यादौ शालप्रारभणं निषेधति—न द्विस्वभावेति ॥ आर्या आचार्या दौर्ग्यं दुर्गस्य शालस्येदं समारंभणं उपक्रमणं नाहुः नोचुः कस्मिन् द्विस्वभावे द्विस्वभावराशौ ३।६।९।१२ तरणौ सूर्ये सति पुनः अंगिरसि गुरौ आस्फुजिति शुक्रे चंद्रबिंबे प्रतिष्ठामस्ततामिते गुरुशुक्रचंद्रास्ते सति च पुनः पाकेशो महादशास्वामी कुजो भौमः अंशुः सूर्यः सोम इंदुः एषां द्वंद्वे एतैः किंभूतैर्दुष्टैः दुष्टभावप्राप्तैः ॥ ६ ॥

मार्गात्तमः शक्रदिशि त्रयेऽतिमाद्याम्यां परस्यामनुशुक्रतोऽस्त्युदिक् ॥
नभस्यतःशालविधानकादरो रथ्याभिवक्त्रे न विधुंतुदे भवेत् ॥ ७ ॥

अथ मार्गादीनां त्रये राहुनिवासस्थानं वदन् सन्मुखं निषेधति—मार्गादिति ॥ मार्गात् मार्गशीर्षात् त्रये मार्गादिमासत्रये शक्रदिशि पूर्वस्यां तमो राहुर्भवति । पुनरतिमात् फाल्गुनात् त्रये याम्यां दक्षिणस्यां तमो भवति । अनु पश्चात् शुक्रतो ज्येष्ठमासात् त्रये परस्यां पश्चिमायां तमो भवति । पुनर्नभस्यतो भाद्रपदात् त्रये उदक् उत्तरस्यां तमोऽस्ति । एतत्कारणमाह शालविधानकादरो वप्रकार्योद्यमो न भवेत् कस्मिन् रथ्याभिवक्त्रे प्रतोलीसन्मुखे विधुंतुदे राहौ सति ॥ ७ ॥

भद्रा त्वभद्रातिभयाय रिक्ता ४।९।१४ दर्शः समारंभितदुर्गकाले ॥
सौम्यारवारौ विडलाडलाद्या कुयोगताऽसद्धतशालतारा ॥ ८ ॥

अथ शालप्रारंभे कुतिथिवारयोग निषेधति—भद्रेति ॥ समारंभितशालकाले प्रारंभितवरणसमये भद्रा भद्रासंज्ञा तिथिः च पुनर्भद्रा विष्टिः पुनः रिक्तातिथिः दर्शोऽमावास्या पुनः सौम्यारवारौ बुधभौमवारौ पुनर्विडलाडलाद्या कुयोगता पुनरसद्धतशालतारा असद्भिः पापग्रहैः हता विद्धा युक्ता भोग्ययुक्ता शालतारा प्राकारप्रारंभनक्षत्रं अतिभयाय स्यात् एते नेष्टा इत्यर्थः ॥ ८ ॥

औमेश मेशेनमृदुध्रुवेज्यप्राभंजनांभोयमवासवेषु ॥
नृभोदये पापरिपोऽस्तुकेंद्रे प्राकारकोपक्रममाहुरार्याः ॥ ९ ॥

अथ नक्षत्रादिशुद्धौ प्राकारप्रारंभणमाह—औमेति ॥ आर्याः प्राकारस्य वरणस्य उपक्रमं प्रारंभमाहुः केषु उमायाः पार्वत्या ईश उमेशस्तस्येदमार्द्रा माया ईशो मेशस्तस्येदं श्रवण इनो हस्तः मृदुनि ध्रुवाणि इज्यः पुष्यः प्राभंजनमानिलं स्वाती अंभोयमं जलस्वामिनक्षत्रं शततारा वासवं धनिष्ठा एषां द्वंद्वे एषु पुनः कस्मिन् नृभोदये मिथुनतुलाकन्याधनुरादयसंज्ञानामन्यतमलग्ने पापरिपौ षष्ठभावस्थपापग्रहे शुभकेंद्रे सति ॥ ९ ॥

अथ त्रिरेखे वलये चतुर्भुजे कार्शानवादीशदिशो भपंजरं ॥
कोणांशवेशं दिशि निर्गमं यथा न्यसेत्तथा दुर्गविधानसिद्धये॥१०*

अथ दुर्गचक्रे कृत्तिकादिनक्षत्राणि स्थापयति—अथेति ॥ अथ वप्रप्रारंभे चत्वारो भुजा यस्य स चतुर्भुजः चतुरस्र इत्यर्थः तस्मिन् त्रिरेखेति तिस्रो रेखा यस्य स तस्मिन् एवंविधे वलये वप्रचक्रे सुधीर्भपंजरं तथा तेन प्रकारेण कृशानोरिदं कार्शानवं तस्मात् कृत्तिकानक्षत्रात् ईशादिश ईशानदिशातो न्यसेत् स्थापयेत् यथा येन प्रकारेण कोणांशवेशं चतुष्कोणे वेशः प्रवेशो यस्य तत् स्यात् । पुनर्निर्गमदिशि चतुर्दिक्षु बहिर्गमनं स्यात्तदा दुर्गविधानसिद्धये कोटसाधननिष्पत्त्यै स्यात् ॥ उक्तं च 'कृत्तिकाद्यं मघाद्यं च मैत्राद्यं वासवादिकं ॥ त्रीणि त्रीणि प्रवेशे च द्वादशान्यानि निर्गमे' इति ॥ १० ॥

शालोदितं शालनिवेशगं वरं प्रमुक्तमाद्यैरहिता बहिः खलाः ॥
आरंभणे मंगलमंदमध्ययुग्दुर्गस्य भंगाय विचिंत्यमित्यनु ॥ ११ ॥

अथ शालचक्रगतनक्षत्रादिफलं दर्शयति—शालोदितमिति ॥ आर्यैराचार्यैः शालोदितं वप्रयोग्यकथितं शालनिवेशगं प्राकारप्रवेशगतभं नक्षत्रं वरं श्रेष्ठमुक्तं प्रोक्तं, पुनर्बहिः खला बाह्यस्थाः क्रूराः ग्रहा अहिता नेष्टाः आरंभणे वप्रारंभे पुनर्मंगलमंदमध्ययुक् भौमशनियुक्तमध्यदुर्गमं दुर्गस्य वप्रस्य भंगाय विचिंत्यं ज्ञातव्यं अनुक्रमादिति ॥११॥

आरंभलग्ने यदि मंगलो यमो ह्यमंगलायेह यमो भवेदयं ॥
एवं पुरे स्यात्पुरनामधिष्ण्यतो विलोकनीया पुरधिष्ण्यशुद्धिता ॥१२

अथात्र लग्नगतभौमादिफलं दर्शयति—आरंभेति ॥ लग्ने आरंभ इति आरंभलग्ने तस्मिन् यदि चेत् मंगलो भौमोऽस्ति तदा सोऽमंगलाय दोषाय स्यात् । इह लग्ने यदि यम शनिर्भवेत्तदायं यमो भवेत् यमतुल्यत्वान्मृत्युदः स्यादित्यर्थः । हि युक्तार्थे । पूर्वोक्तप्रकारेण पुरनामधिष्ण्यतो नगरनामनक्षत्रात्पुरधिष्ण्यशुद्धिता नगरनक्षत्रस्य निर्दोषता विलोकनीया ॥१२

* भाकुवि न.४८ २६।२०

प्रवेशने मानवकीर्णमध्यकं दुर्गं सदा स्तंभितभे च दुर्गमं ॥
शून्यं तदारंभविधौ विनिर्गमे निवृत्तिवृत्तं नृनिविष्टनस्थले ॥ १३ ॥

अथ प्रवेशादिगतभेषु शालफलमाह—प्रवेशन इति ॥ तदारंभविधौ दुर्गप्रारंभणकार्ये प्रवेशने प्रवेशस्थाने भे सति मानवकीर्णमध्यकं मनुष्यपूर्णमध्यभागमेवंविधं सदा दुर्गं स्यात् । च पुनः स्तंभितभे स्तंभनक्षत्रे दुर्गं दुर्गमं स्यात् । पुनर्विनिर्गमे भे दुर्गं शून्यं स्यात् ॥ पुनर्नृनिविष्टनस्थले दुर्गं निवृत्तिवृत्तमुपरामवृत्तं स्यात् सुखयुक्तमित्यर्थः ॥ १३ ॥

परिभ्रमोऽसौ समयैकयैकः फणीश्वरस्यापि रसातले स्यात् ॥
लांगूलगत्या परिवाममार्गे रौद्र्या दिशो गोश्मुखभत्रयेंऽशौ ॥१४॥

अथात्र सर्पपरिभ्रमणमाह—परिभ्रमेति ॥ रसातले भूतले परिवाममार्गे फणीश्वरस्य शेषनागस्यापि असौ एकया समया एकवर्षेण एकः संपूर्णः परिभ्रमः स्यादित्यर्थः॥कुतो लांगूलगत्या पुच्छगमनेन रौद्र्या दिश ईशानकोणात् गोमुखभत्रये वृषादिराशित्रयेंऽशौ सूर्ये सति ॥ १४॥

यदा फणेश्यामुदरं च वायव्यां ल्दनं तदा यातुहरित्यहेः स्यात् ॥
पृदाकुशून्याग्निककुप च खातं गदंति दर्वीकरशून्यकोणे ॥१५॥

अथाहिचक्रे खातं दर्शयति—यदेति ॥ यदा ऐश्यामीशानकोणेऽहेः सर्पस्य फणा स्यात् फणाशब्दः पुंस्त्रीलिंगः च पुनर्यदा वायव्यां वायुकोणेऽहेरुदरं स्यात् पुनर्यदा यातुहरिति नैर्ऋत्यकोणेऽहेर्ल्दनं पुच्छं स्यात्तदा पृदाकुशून्या सर्परहिताऽग्निककुप् अग्निदिक् स्यात्।'काकोदरो विषधरः फणभृत्पृदाकुर्दष्टकर्गकुंडलिबिलेशयदंदशूका.' इति हैमः । च पुनस्तदा सुधियो दर्वीकरशून्यकोणे सर्पवर्जितकोणे खातं गदंति वदंति ॥ १५ ॥

एवं भचक्रभ्रमरीतिगत्या भ्रमोऽयमुक्तो मुनिभिः प्रधानैः ॥
ईशानतो दक्षिणभागगत्या संतर्कयंति भ्रममस्य जैनाः ॥ १६ ॥

अथाहिभ्रमे जैनमतं दर्शयति—एवमिति ॥पुराणैः पुरातनैर्मुनिभिर्ऋषिभिरयं भ्रम उक्तः कथं एवममुना प्रकारेणाग्निकोणतो वाममार्गेण भचक्रभ्रमरीतिगत्या नक्षत्रचक्रभ्रमरीतिगमनेनेति पुनर्जैनाः श्वेतांबरादयोऽस्य सर्पस्य भ्रमं संतर्कयंति कथयंतीत्यर्थः कया ईशानतो दक्षिणभागगत्या ॥ १६ ॥

दुर्गे पुरे चोकसि मंडपे हरेः प्रपामरागारकयोः शदिक्त्रिभेः ॥
वेद्यादि सर्वत्र फटेति गोत्रयं जगाद वादाय नु जैनदर्शनम् ॥१७॥

अथाहिभ्रमे जैनमतविवेकं दर्शयति—दुर्ग इति ॥ नु वितर्के जैनदर्शनमिति वादाय जगाद इतीति किं दुर्गे वने पुरे नगरे ओकसि गृहे मंडपे च हरेः सिंहराशितस्त्रयं शदिक् शस्य ईश्वरस्य दिक् यस्याः सा फटा फणा स्यात् ॥ सिंहादिराशित्रये ईशानकोणे सर्पमुखमित्यर्थः ॥ ए।

आकृति न. २८ आकृति न. २९ आकृति न. ३०

मपामरागारकयोः पानीयशाला देवालयस्तयोर्विषये तिमेर्मानात् त्रयं शादिक् फणा स्यात् । एवं वेद्यादि सर्वत्र स्थाने गोवृषात् त्रय शादिक् फणा स्यात् ॥ १७ ॥

यदेककाले निखिलावटक्रिया स्याद्दंदशूकभ्रमणेकता तदा ॥
भुजंगशून्यं घटतेऽवटं सदा प्रमाणतोऽत्रेति न तन्मतं धृतम् ॥१८॥

अथ जैनमतं स्वयं नागीकरोति—यदेकेति ॥ यदा दंदशूकभ्रमणैकता सर्पभ्रमैक्य स्या. त्तदा एककाले निखिलावटक्रिया समस्ता खातक्रिया स्यात्॥अत्र खाते सदा प्रमाणतो भुजंग. शून्यं खातं वरं घटते हि युक्तार्थे इति हेतोस्तन्मतं जैनमत ऋतं सत्य न स्यात् स्वयं नागी-कृतमित्यर्थः ॥ १८ ॥

भोगानुगं मंदिरखातमादृतं कुतार्किकः कश्चिदुवाच वेत्यपि ॥
निर्ग्रंथपक्षादृतदंभवानसौ वदत्यवेक्ष्येति कुलादिकं हरेः ॥ १९ ॥

अथ पुन. कस्यचिन्मत दूषयति—भोगेति ॥ वा इति पक्षांतरे भोगानुग सर्पकायगत मंदिरखातमादृत श्रेष्ठ स्यादित्यपि कश्चित् कुतार्किको दुष्टविचारी उवाच असौ कुतार्किक इति पूर्वोक्त हरे सिंहराशित कुलादिक गृहादिकमवेक्ष्य विलोक्य वदति किंभूतोऽसौ निर्ग्रंथपक्षादृतदंभवान् वेषधारितोऽगीकृतकपटवान् ‘ निर्ग्रंथो निःस्वमूर्खयोः श्रवणे ’ इति हैमः ॥ १९ ॥

समीरमार्गाष्टपदांशपेटके चरत्यहिर्वासनयारमंदगः ॥
इत्याह कश्चित्किल वास्तुशास्त्रविन्न तेन दृष्टं भ्रमणं तु दृक्श्रुतेः॥२०॥

अथाहिचक्रेऽष्टपदचक्रं वास्तुशास्त्रे दित दूषयति—समीरेति ॥ किलेत्यलीके समीरमार्गे व्योम्नि अष्टपदांशपेटकेऽष्टचरणभागचक्रेऽहिः सर्पश्चरति गच्छति कस्मिन् खलांतरे पापग्रहविचाले कया वासनया निषेधान्वये वासनयेति पदप्रयोगः ‘वासना भावना संस्कार’ इति हैमः । इति कश्चिदाह ब्रूते किंभूत कश्चित् वास्तुशास्त्रवित् गेहभूशास्त्रज्ञः तेन केनचित् दृक्श्रुते सर्पस्य भ्रमण न दृष्टं ॥ २० ॥

चतुर्भुजाग्निस्तु चतुर्भुजेषु रौद्र्यादिकेष्वत्र फणास्थितिः स्यात् ॥
इति प्रमाणं प्रकटं प्रवीणैरुदीरितं वासनया पुराणैः ॥ २१ ॥

अथ ऋषिमतचक्रमाश्रित्य स्वमत द्रढयति—चतुर्भुजेति ॥ अत्र व्योम्नि चतुर्भुजाग्निः चत्वारो भुजा हस्ता अग्नयः पादाश्च यस्याः सा एवंविधा स्थितिः स्यात् । केषु रौद्र्यादिषु ईशानकोणादिषु च पुनश्चतुर्भुजेषु त्रिराशिप्रमिते भचक्रे चत्वारो भुजा एषु तेषु इत्यर्थ । इति प्रकारेण पुराणे. पुरातनै प्रवीणै पठितै प्रकट प्रमाणमुदीरित प्रोक्त ॥ २१ ॥

उक्तेषु भेष्वाहुरधोमुखैः क्षणैः कोणे किलाशीविषवर्जितेऽवटं ।
चरोदये भूषणभाजि कोविद स्तारानुदास्यैस्तनुयादिह क्षणेः ॥२२॥

आकृति न. ३१

अथ खातकरणशुद्धिमाह—उक्तेष्विति॥ किंचेत्यवधारणे कोविदाः पण्डिता आशाविषवर्जिते कोणेऽवटखातमाहुः कथयंति केषु उक्तेषु शालकर्मोक्तेषु भेषु पुनः केरधोमुखैः क्षणैरधोमुखनक्षत्रक्षणैः पुनः कस्मिन् चरोदये चरलग्ने किंभूते चरोदये भूपणभाजि शुभयोगाश्रिते सुधीरिह उक्तेषु भेषु स्तंभान् तनुयात् आरोपयेत् कैरुदास्यैः क्षणैरूर्ध्वमुखनक्षत्रमुहूर्तैः॥२२॥

आयव्ययांशादिवले वलेंदिरा दुर्गे पुरे सद्मानि वेदिकादिषु ॥
भवेदतोऽयं तदुपक्रमोऽधुना यद्वास्तुशास्त्रोदितरीतिरुच्यते ॥२३॥

अथायव्ययांशादिवलं वर्णयन् वास्तुशास्त्रोदितं संदधाति—आयेति ॥ दुर्गे पुरे सद्मनि वेदिकादिषु विषये आयव्ययांशादिवले सति इंदिरा लक्ष्मीर्वला बलिष्ठा भवेत् । ततस्मात्कारणादयमुपक्रमः प्रारंभः क्रियते यद्वास्तुशास्त्रोदितरीतिरुच्यते स्पष्टं ॥ २३ ॥

क्षेत्रे भवेत्क्षेत्रफलं चतुर्भुजे तत्कोटिदोराहतिरेवमायते ॥
त्र्यस्रेऽपि दोःकोटिहतेर्दलं फलं दोःकोटिलंबैर्विषमे च कल्पितम्॥२४॥

अथ क्षेत्रफलं साधयति—क्षेत्रे इति ॥ चतुर्भुजे चतुरस्रे क्षेत्रफलं क्षेत्रमानं भवेत्। आयते दीर्घे क्षेत्रे कोटिदोषयोः कोटिभुजयोराहतिर्हननं गुणनमेव क्षेत्रफलं स्यात् । अपि पुन त्र्यस्त्रे त्रिकोणे क्षेत्रे दोःकोटिहतेर्भुजकोट्योर्हतिर्गुणना तस्या दलमर्धं तत् फलं क्षेत्रमानं स्यात् । पुनर्विषमे क्षेत्रे दोःकोटिलंबैर्भुजकोटिलंबनैः क्षेत्रफलं कल्पितं ॥ २४ ॥

विष्कंभपादे परिणाहनिघ्ने वृत्ते सदा क्षेत्रफलं च चापे ॥
वृत्तार्द्धवत्स्यादिह वृत्तमध्यं वृत्तात्रिभागोऽनियतं यदन्यत् ॥ २५ ॥

विष्कंभेति—वृत्ते वर्तुलक्षेत्रे परिणाहनिघ्ने परिधिगुणिते सति विष्कंभपादे विस्तृतितुर्यांशे क्षेत्रफलं स्यात् । यदुक्तं लीलावत्यां ‘ वृत्तक्षेत्रे परिधिगुणितव्यासपादः फलं स्यात्’ इति । च पुनश्चापे धनुराकारक्षेत्रे वृत्तार्द्धवत् वर्तुलक्षेत्रार्धतुल्यप्रमाणं स्यात् । वृत्तत्रिभागः वर्तुलत्र्यंशो वृत्तमध्यं स्यात् । यदन्यदुक्तक्षेत्रेभ्यो विपरीतमस्ति तत्क्षेत्रमनियतं नियामकरहितं स्यात् । इह दुर्गादिके सर्वत्र योज्यं ॥ २५ ॥

षडक्षतै राजमिहांगुलं भवेत्सप्ताक्षतैर्वैष्णवमैशमंगुलं॥
यवोदरैरष्ट८भिरत्र तत्करो जिनांगुलै२४स्तैश्च धनुश्चतुःकरम्॥२६॥

अथ ब्रह्मादीनामंगुलादिमानं दर्शयति—षडक्षतैरिति ॥ इह प्रासादादिमाने षडक्षतैः षड्यवैः भाजं अजस्येदं ब्राह्ममंगुलं भवेत् । सप्ताक्षतैः सप्तयवैर्वैष्णवं विष्णोरिदं कार्ष्ण्यमंगुलं भवेत् । अत्र प्रमाणे तैर्जिनांगुलैश्चतुर्विंशतिमितैस्तत्करस्तेषां करः कोऽर्थः अजांगुलैरजकरः कृष्णांगुलैः कृष्णकर ईशांगुलैरीशकरः स्यात् च पुनश्चतुःकरं धनुः स्यात् ॥२६॥

प्रासादकुंडादिकपीठवेदिकाद्विजालयेषु स्मृतमाजमंगुलं ॥
जलाशयारामविधौ नृपालये निधौ हितं वैष्णवमन्यदन्यगम्॥२७

अथानांगुलादीनां ग्राह्यस्थानानि दर्शयति—प्रासादेति ॥ प्रासादो देवालयः कुंडादिकं वेदिका द्विजालयो विप्रगृहं एषां द्वंद्वे एषु आजं ब्रह्मसंबंधि अंगुलं हित शुभं स्यात् । जलाशयः तटाकादिः आराम अनयोर्विधौ कार्यें नृपालये राजगृहे निधौ निधाने वैष्णवं विष्णुसंबंधि अंगुल हितं स्यात् । अन्यत् रौद्रांगुलं अन्यगं क्षेत्रक्रोशादिके हित स्यात् ॥ २७ ॥

ध्वजधूम्रहरिश्वगोखरा द्विरदो ध्वांक्ष इहायकाः क्रमात् ॥
ननु चापकरांगुलोन्मिता गदिता मंडलशालधामसु ॥ २८ ॥

अथ वैतालीयेनात्राष्टौ आयकानाह—ध्वजेति॥ ननु निश्चितं मंडलशालधामसुव सुवेशवप्रगृहेषु इह क्रमात् ध्वजादयआयका गदिताः प्रोक्ताः । ध्वजः १ धूम्रः २ हरिः सिंहः ३ श्वा श्वानः ४ गो वृषः ५ खरो रासभ. ६ द्विरदो गजः ७ ध्वांक्षः काकः ८ इति किंभूता एते चापकरांगुलोन्मिता. धनुर्हस्तांगुलप्रमिताः ॥ २८ ॥

ध्वजपूर्व इहायुरष्टभिर्विहृते क्षेत्रफले समोऽशुभः ॥
निखिलासु हरित्स्वलं ध्वजो व्यपराशासु च केसरी वरः ॥२९॥

अथायाना ग्राह्यस्थानान्याह—ध्वज इति ॥ इह शालादौ अष्टभिर्विहृते क्षेत्रफले सति ध्वजपूर्वो ध्वजप्रमुख आयः सम. समसंख्याक अशुभ स्यात् । अलमित्यवधृतौ निखिलासु हरित्सु दिक्षु ध्वज आयो वरः श्रेष्ठः स्यात् । च पुनर्व्यपराशासु पश्चिमदिशं विना सर्वदिक्षु केसरी सिंहो वरः श्रेष्ठः स्यात् ॥ २९ ॥

करिजोऽनकदिङ्मुखे शुभोऽनु च सुत्रामदिगानने वृषः ॥
ध्वजसिंहगजर्षभा हिताः क्षितिदेवाननजातिषु क्रमात् ॥ ३० ॥

करिज इति ॥ अंतकदिङ्मुखे करिजो गजायः शुभ स्यात् । अनु पश्चाच्च पुन. सुत्रामदिगानने इंद्रदिङ्मुखे वृष शुभ स्यात् । क्षितिदेवाननजातिषु विप्रप्रमुखजातिषु ध्वजसिंहगजर्षभा हिताः शुभाः स्युः क्रमात्क्रमेण ॥ ३० ॥

इह ये खलसत्त्वजीविनो मनुजास्तच्छरणादिकर्मणि ॥
खलसत्वगमायुरुत्तमं गदितं गाणितिकैरसंशयम् ॥ ३१ ॥

इहेति—ये खलसत्त्वजीविन. क्रूरप्राणिजीविनो मनुजा अत्यजाः संति असंशयं निश्चितं तच्छरणादिकर्मणि तेषां चांडालानां गृहादिकार्ये गाणितिकैर्ज्योतिर्विद्भिः खलसत्वगमायुः क्रूरजीवाभिधानं आयुः उत्तमं गदित प्रोक्त । अत्र आयशब्दस्य आयुष इति पर्यायोऽभिहित. ॥ ३१ ॥

द्विरदैर्गुणिते फले हृते त्रिघनेनो२७र्वरितं भमुच्यते ॥
भगणेऽष्टहृते व्ययस्थलं व्ययहीनं त्वधिकायमुत्तमम् ॥ ३२ ॥

अथ वास्तुनक्षत्रादिज्ञानं साधयति–द्विरदैरिति ॥ फले क्षेत्रफले द्विरदैरष्टभिर्गुणिते पुनस्त्रि- घनेन हते सप्तविंशतिभाजिते यत् उर्वरित शेषं तत् भं वास्तुनक्षत्रमुच्यते । सप्तविंशतिभाजिते यल्लब्धफलं तद्गणसंज्ञं तस्मिन् भगणेऽष्टघ्नेऽष्टाभिर्भाजिते यच्छेषं तत् व्ययः व्ययसंज्ञं स्यात् । तु पुनर्यत्र वास्तुनि व्ययहीनं व्ययस्वल्पता अधिकायं आयाधिकं एवं यत् स्थलं तदुत्तमं ॥ ३२ ॥

व्ययान्विते क्षेत्रफले समन्विते ध्रुवादिवर्णैस्त्रिहतेंऽशका गृहे ॥
हर्यंतकोर्वीपनयो यमोऽशुभःस्वनामवर्गैस्तु परत्र कीर्तिताः ॥३३॥

अथ क्षेत्रफलादिभिरंशकान् साधयति–व्ययान्वित इति ॥ क्षेत्रफले व्ययान्विते व्यययुक्ते पुनः क्षेत्रफले ध्रुवादिवर्गैर्ध्रुवादिषोडशगृहनामाक्षरैश्च समन्विते युक्ते पुनः क्षेत्रफले त्रिहते त्रिभिर्भाजिते सति गृहे हर्यंतकोर्वीपनयः इंद्रः यमः राजा अंशका इति संज्ञाः कीर्तिताः एषु यमोंऽशकोऽशुभः स्यात् । तु पुनः स्वनामवर्णैर्निजनामतुल्यैरेते कीर्तिताः कस्मिन् परत्र परस्मिन् कोऽर्थः सर्वे स्वनामतुल्यफलदा इत्यर्थः ॥ ३३ ॥

सिंहायुरिष्टोऽचलमौलिशाले शाले गजायोंऽबुवृतौ व्ययोने ॥
ककुद्मदायोऽवनिगव्हरस्थे ध्वजो हि सर्वत्र यथाव्ययःस्यात् ॥ ३४ ॥

अथ पर्वतप्राकारादिषु आययोग्यतामाह—सिंहायुरिति ॥ व्ययेन ऊने हीने व्ययोने व्ययस्वल्पतायां सत्यामिति सर्वत्र योज्यं अचलमौलिशाले पर्वतमूर्ध्नि प्राकारे सिंहायु इष्टः स्यात् । आयु शब्द उकारांतोऽपि शब्दप्रभेदे ॥ अंबुवृतौ जलवेष्टितशाले गजाय इष्टः शुभः स्यात् । अवनिगव्हरस्थे भूमिस्थे शाले ककुद्मदायो वृषभाय इष्टः स्यात्। 'उक्षानड्वान् ककुद्मान् गौः' इति हैमः । हि युक्तार्थे सर्वत्र ध्वज इष्टः स्यात् किंभूतो यथाव्ययः व्ययस्वल्पतेत्यर्थः ॥ ३४ ॥

प्राकारपूर्गेहकभर्तृतारयोः सभाजनं दोर्ग्रहवद्विलोकयेत् ॥
निजोदितेऽनेहसि शस्त्रयंत्रकैः प्रपूरितःपूरितश्रो हि शालकः॥३५

अथ वप्रादिनक्षत्रकर्तृनक्षत्रमेलापकेन शालपूरणमाह–प्राकारेति ॥ सुधीः प्राकारो वप्रः पूः नगरी गेह एषां भं नक्षत्रं भर्तृतारा तत्कारकपुरुषस्य नक्षत्रं एतयोः सभाजनं परस्पर सख्यलक्षण विलोकयेत् किंवत् दोर्गृहवत् पाणिग्रहणतुल्या मैत्री कस्मिन् निजोदिते प्राकारादिषु उक्तेऽनेहसि काले हि युक्तार्थे शस्त्रयंत्रकैः खड्गादिपाषाणादियंत्रकैः प्रपूरितः सन् शालकः प्राकारः पूरितश्रीः स्यात् पूरिता श्रीः लक्ष्मीर्यस्मिन्निति लक्ष्मीपूर्णदुर्ग इत्यर्थः ॥ ३५ ॥

समीरसुत्रामभदेवमूड्डाभिर्मृदूड्डाभिः क्षिप्रयुतैः सुकंटके ॥
विदारमंदान्यदिनेषु सत्तिथौ स्थिरोदये संघटयेत्प्रतोलिकाम् ॥ ३६ ॥

अथ प्रतोलिकाकरणशुद्धिमाह—समीरेति ॥ सुधीः प्रतोलिका संघटयेत् कारयेत् कैः समीर स्वाती सुत्रामभ ज्येष्ठा देवमूड्ड पुनर्वसु पुष्या द्वे एभिः पुनः कैर्मृदूड्डाभिः

किंभूते. क्षिप्रयुते. चरनक्षत्रयुक्ते पुन कस्मिन् स्थिरोदये स्थिरलग्ने किंभूते सुकरके शुभग्रहयुक्तकेंद्रे पुन केषु विदारमदान्यदिनेषु बुधो भौमः शनिरेतान् विहाय अन्यग्रहदिनेषु पुनः कस्मिन् सत्तियौ ॥ ३६ ॥

विकर्तनाक्रांतभतो द्विपार्श्वगं तन्मौलितो दिक्षु चतुष्टयं न्यसेत् ॥
द्वयं विदिक्षु त्रयमंतरे क्रमादधो विदिक्स्थं न शुभं भमंडलम् ॥३७॥*

प्रतोलिकाचक्रे नक्षत्रस्थापन तत्फल च दर्शयति—विकर्तनेति ॥ सुधीर्विकर्तनाक्रांतभत सूर्यसक्रमणनक्षत्रात्तन्मौलित प्रतोलीमस्तकात् द्विपार्श्वग दिक्षु चतुष्टय विदिक्षु द्वय भतरे विषाले त्रय क्रमात् न्यसेत् स्थापयेत् । कोऽर्थ प्रतोलीमस्तकात् सव्यापसव्यादिमार्गतश्चतुर्षु दिक्षु चत्वारि२ नक्षत्राणि इति षोडश देयानि चतुर्षु विदिक्षु द्वय द्वय अष्टौ इति देयानि मध्ये त्रय देयमिति सप्तविंशतिभानि देयानि । प्रतोल्या अधो विदिक्स्थ अधोगतं विदिक्स्थित भमडलं न शुभ स्यात् ॥ ३७ ॥

प्राकारदेवायतनाननेऽसौ क्रमो भचक्रभ्रमणस्य चिंत्यः ॥
सदैव पार्श्वभ्रमरीतिभेदो गृहादिकद्वार्युदितैश्च भागैः ॥ ३८ ॥

अथ भचक्रस्य भेद दर्शयति—प्राकारे ति ॥ प्राकारदेवायतनानने दुर्गदेवालयद्वारेऽसौ भचक्रभ्रमणस्य क्रमश्चिंत्य स्यात् कैरुदितैर्भागै प्रोक्तभागैश्च पुनर्गृहादिकद्वारि पार्श्वतो भचक्रभ्रमणेन भदृश्चिंत्य स्यात्स निरतरम् ॥ ३८ ॥

वशादिभाज्जिष्णुदिशोऽश्रुमालिनि त्रये त्रये दिक्ष्वपि वत्ससंस्थितिः ॥
वत्से पुरोगे विशिखा च पृष्ठगे ज्वालानिवेशे न हिता भवेदिह ॥३९॥*

अथ दिग्वत्सचक्र दर्शयति—वशेति ॥ वशादिभात् कन्यादिराशितस्त्रये त्रये राशित्रिके त्रिकेंऽशुमालिनि सूर्ये सति जिष्णुदिश पूर्वतो दिक्षु अपि निश्चित वत्ससस्थिति स्यात् । इह दुर्गे विशिखा प्रतोलिका हिता शुभा न भवत् कस्मिन् पुरोगेऽग्रगे च वत्से सति किंभूते वत्से ज्वालाया ज्वालासज्ञादिशस्तस्या निवेश प्रवेशो यस्मिन् स ॥ ३९ ॥

विधुंतुदे नैव विधौ च संमुखे रथ्याकृतिर्वैकृतिदायिनी भवेत् ॥
अदुर्गपुर्या भतमोऽब्जवत्सजां शुद्धिं विना निस्सरणं समादृतम् ॥४०॥

अथ प्रतोलीकरणे सन्मुखं राहु चद्र च त्यजन्नाह—विधुतुद इति॥ अत्रैव दुर्गे विधुतुदे राहौ विधौ चद्रे च सन्मुखे सति रथ्याकृति प्रतोलीकर्म विकृतदायिनी विरूपकारिणी भवेत् 'रथ्या प्रतोली विशिखा समा' इति हैम। अदुर्गपुर्या दुर्गरहितस्य नगरस्य निस्सरण मुखं समादृत मगीकृत का विना भं नक्षत्र तमो राहु अब्जश्चंद्र वत्स एभ्यो जाता शुद्धि विना निस्सरण 'मुखौ उपाये गेहादिमुखे' इति हैम । येन गृहादिषु प्रविश्यते निर्गम्यते तन्निस्सरण ॥४०॥

आकृति न. ३२।३३

उदीरितायव्ययतारकाबलो नभोगशुद्धिः स्मृतनीतिसज्जितः ॥
समुक्तकालादृतसर्वसत्क्रियो विराजते मंडलशासिता स यः॥४१॥

अथ निर्दोषपक्षं शालं वर्णयति—उदीरितेति॥ यः शालो वर्तते किंभूतः शालः उदीरिता: प्रोक्ता आयव्ययतारकास्तासां बलं यस्मिन्सः पुनः किंभूतः शालः नभोगानां ग्रहाणां शुद्धिः निर्दोषिता यस्मिन्सः पुनः किंभूतः शालः स्मृता प्रोक्ता या नीतिस्तया सज्जितो निर्मितः पुनः किंभूतः शालः समुक्तः सम्यक् प्रकारेण प्रोक्तो यः कालस्तेन आदृता अंगीकृता सर्वा सत्क्रिया यस्मिन् स इति स शालो मंडलशासिता देशरक्षाकरः सन् विराजिते ॥ ४१ ॥

अरातिमत्तेभनिकायकुंभदो निराग्रहः शस्त्रनखोपघातकृत् ॥
निःशाणनादोऽचलमौलिशालको दधात्यसौ केसरिपौरुषश्रियम् ॥ ४२

अथ शैलस्थशालस्य सिंहोपमानं दर्शयति—अरातीति ॥ असौ अचलमौलिशालकः पर्वतशृंगदुर्गः केसरिपौरुषश्रियं सिंहविक्रमशोभां दधाति बिभर्ति किंभूतोऽसौ अरातयः शात्रवा एव मत्तेभा मदगर्जितकुंभिनस्तेषां निकायः समूहस्तस्य कुंभं कुंभस्थलं द्यति खंडयति इति पुनः किंभूतो निराग्रहः निर्गत आग्रहो ग्रहणं यस्य स पुनः किंभूतः शस्त्राण्येव नखास्तैरुपघातकृत् विनाशकारकः पुनः किंभूतो निःशाणाना नादाः शब्दा यस्मिन्सः सिंहोऽप्येवंविध स्यात् ॥ ४२ ॥

विरोधिवीरद्रुमसंघभंगो गंभीरभेरीध्वनिघोरघोषः ॥
असह्यपार्श्वः परिवारिशालो वहत्यसौ मत्तगजेंद्रलीलाम् ॥ ४३ ॥

अथ जलवेष्टितशालहस्तितुल्यं वर्णयति—विरोधीति ॥ असौ परिवारिशालः सर्वतो जलवेष्टितदुर्गो मत्तगजेंद्रलीलां वहति दधाति किंभूतोऽसौ विरोधिवीरा शत्रुसुभटा एव द्रुमा वृक्षास्तेषां संगः संगमस्तस्य भंग उन्मूलनं यस्मात् सः पुनः किंभूतो गंभीरभेरीध्वनिभिर्घोर उत्कटो घोषो यस्मिन् सः पुनः किंभूतः असह्यः सोढुं अशक्यं पार्श्वं सामीप्यं यस्य स इत्येवंविधः स्यात् ॥ ४३ ॥

दूराभियातीन्प्रति संक्षतक्षमः पलायनं वांछति वेष्टितोऽवनौ ॥
मुखग्रहाधृतपुरोऽतिगर्जितो दुर्गो वशी स्यात्सगुणो गुणग्रहः ॥ ४४ ॥

अथ भूमिशालं श्वानतुल्यं वर्णयति—दूरेति॥ अवनौ दुर्गोऽतिगर्जितः शब्दायमानः श्वगुणः पुनः श्वानस्य गुण इव गुणो यस्य स श्वानतुल्यः स्यात् । किंभूतो दूराभियातीन् दूररिपून् प्रति संक्षतक्षमः सम्यक् प्रकारेण घाताय क्षमः समर्थः। पुनःकिंभूतो वेष्टितः सन् दुर्गः पलायनं वांछति आधारे आधेयोपचारात् तत्रस्थजनः। पुनः किंभूतो मुखग्रहाधृतपुरः मुखस्य निस्सरणस्य ग्रहो ग्रहणं तेन आधृतं कंपितं पुरं नगरं अग्रभागो वा यस्य सः । पुनः किंभूतः गुणग्रहः गुणेन भेदेन ग्रहो ग्रहण यस्य सः 'कार्योद्देशे गुणो भेदे' इत्यनेकार्थ्यां हेमः। अतएव किंभूतो वशी स्वायत्तः श्वाप्येवंविधो गुणेन रज्ज्वा बद्धः सन् वशी स्यात् ॥ ४४ ॥

पार्श्वश्रितामित्रविघातसत्वो भीमाननः काहलवाद्यनादः ॥
अंतर्बहिर्धावनवल्गनौजाः स्यात्पुंडरीकप्रतिमोऽन्यदुर्गः ॥ ४५ ॥

अथ गह्वरशालं व्याघ्रतुल्यं वर्णयति—पार्श्वेति ॥ अन्यद्दुर्गं गह्वरशालं पुंडरीकप्रतिमो व्याघ्रसदृशः स्यात् 'व्याघ्रो द्वीपी पुंडरीकः' इति हलायुधः ॥ पार्श्वाश्रिताः समीपस्था येऽमित्राः शत्रवस्तेषां विघाताय हननाय सत्वं बलं यस्य सः । पुनः किंभूतो भीमाननः भयानकमुखः पुनः किंभूतः काहलवाद्यनादः स्पष्टः पुनः किंभूतः अन्तर्बहिर्मध्ये बाह्ये धावने शीघ्रगमने वल्गने उत्पतने ओजो बलं यस्य सः अतर्बहिर्धावनवल्गनौजा इति ॥ ४५ ॥

अनेकशाला भुवि संति दुर्गमा ये भूरिवीराः स्फुरदस्त्रसंकुलाः ॥
स्वार्यप्रतापोज्ज्वलिता नतीकृताः श्रीविक्रमार्कक्षितिपेन पालिताः ॥ ४६ ॥

अथ दुर्गग्रहणेन श्रीविक्रमार्के बलं वर्णयति—अनेकेति ॥ येऽनेकदुर्गा दुर्गमा गृहीतुमशक्या भुवि पृथिव्यां संति किंभूता ये भूरिवीरैर्बहुसुभटैः स्फुरदस्त्रैहस्तजनितशस्त्रैः संकुला व्याप्ताः श्रीविक्रमार्कक्षितिपेन ते दुर्गाः पूर्वं नतीकृता नम्रीकृताः पश्चात् पालिताः सेवकभावेन रक्षिताः किंभूतास्ते स्वार्यं स्वस्य अर्यः स्वामी श्रीविक्रमार्कस्तस्य शुभः प्रतापस्तेन उज्ज्वलिता मानमलरहितीकृताः ॥ ४६ ॥

दुर्गारंभस्य योऽनेहाः प्रोदितोऽसौ मयाधुना ॥
दुर्गमध्यपुरारंभे ग्राह्यो भूमिभुजादरात् ॥ ४७ ॥

अथ शालशुद्ध्युपसंहारमाह—दुर्गेति ॥ मया योऽसौ दुर्गारंभस्यानेहाः कालः प्रोदितो गदितः सोऽधुना कालो भूमिभुजादरात् आग्रहात् ग्राह्यः कस्मिन् दुर्गमध्यपुरारंभे वप्रस्य मध्यनगरारम्भणे ॥ ४७ ॥

अशालनगरारंभे गदितः कालनिर्णयः ॥
विशेषो यस्तमेवाहं ब्रवीमि सदृषीरितम् ॥ ४८ ॥

अथ स्वागतया पुरेऽनुक्तशुद्धिं दर्शयन्नाह—अशालेति ॥ अशालनगरारंभे प्राकाररहितनगरारम्भणे कालनिर्णयो गदितः प्रोक्तः पुनर्यः काले विशेषोऽस्ति अहं तमेव कालं ब्रवीमि किंभूतं सदृषीरितं शुभऋषिप्रोक्तं ॥ ४८ ॥

जितम३गो२मृग१०घट११ज१भसंस्थे वासयेत्पुरमशीतलकेतौ ॥
पौषषट्कवति वाश्विनमार्गादित्यजूक७मालिमुख८योगे ॥ ४९ ॥

अथ संक्रान्त्यादिशुद्धौ पुरवासमाह—जित्मेति ॥ सुधीः पुरं वासयेत् कस्मिन् जित्मः मिथुनः गौर्वृषः मृगो मकरः घटः कुंभः अजो मेषः एषु राशिषु संस्थेऽशीतलकेतौ उष्णरश्मौ सूर्ये किंभूते सूर्ये पौषषट्कवति पौषादिषण्मासयुक्ते वाऽथवा आश्विनेति आश्विने मासे मार्गमासे आदित्यजूकमालिमुखयोगे सूर्यतुलासंक्रमणवृश्चिकसंक्रमणयोगे ॥ ४९ ॥

लेय५गेऽमरपुरोधसि मौढ्ये वक्रगे पतितमास्यधिके वा ॥
हारिपूरचनमास्फुजितोऽस्ते क्षीणचंद्रमसि नो पुरकर्तुः ॥ ५० ॥

अथ गुर्वादिदोषे पुरारंभं निषेधति—लेयेति ॥ पुरकर्तुः नगरकारकस्य पूरचनं नगरकरणं हारि शुभं नो स्यात् कस्मिन् लेयगे सिंहराशौ अमरपुरोधसि गुरौ पुनर्मौढ्येऽस्तंगते वक्रगते सति च पुनःपतितमासि क्षीणमासेऽधिकमासे च पुनरास्फुजितोऽस्ते शुक्रास्ते पुनः क्षीणचंद्रमसि क्षीणचंद्रे ॥ ५० ॥

दुष्टयोगहरहृज्जनिरिक्ता४।९।१४मंदमंगलबुधाः स्युरभीष्टाः ॥
उग्रमिश्रकभदारुणतारा नैव संवसथसाधनकाले ॥ ५१ ॥

अथ ग्रामकरणशुद्धिमाह—दुष्टेति ॥ संवसथसाधनकाले ग्रामकरणकाले एते नैवाभीष्टा नो शुभाः स्युस्तानाह दुष्टयोगा हरस्य हृदि हृदये जनिर्जन्म यस्याः सा विष्टिः रिक्तातिथयः ४।९।१४।मंदः शनिः मंगलः बुधः एषां द्वंद्वे उग्रभानि मिश्रे द्वे को वायुस्तस्य भं स्वाती दारुणताराः क्रूरभानि आसां द्वंद्वे ॥ ५१ ॥

राम३वेद४युग४पावका३गमा४ंभोधि४राम३यम२भैस्तु तारकैः ॥
ग्रामवत्स इनभाच्छमुद्वसं स्थैर्यमादरकभीलयाः क्रमात् ॥ ५२ ॥

अथ रथोद्धतया ग्रामवत्सचक्रे भानि स्थापयति—रामेति ॥ ग्रामवत्से रविभात् सूर्याक्रांतभात् रामादिमितैस्तारकैःक्रमात् शादयः स्युः । कोऽर्थः ग्रामवत्से सूर्यनक्षत्रात् रामैस्त्रिभिस्तारकैः शं सुखं स्यात् । एवं वेदैश्चतुर्भिर्भैरुद्वसं जनशून्यं पुनर्युगैश्चतुर्भिर्भैः स्थैर्यं स्थिरता पुनः पावकैस्त्रिभिर्भैर्मा लक्ष्मीः स्यात् ॥ आगमैश्चतुर्भिर्भैर्दरो भयं स्यात् । अंभोधिभिश्चतुर्भिर्भैः कं धनं स्यात् । रामैस्त्रिभिर्भैर्भीर्भयं स्यात् । यमभैर्द्विभभिर्भैर्लयो मृत्युः स्यात् । एषां द्वंद्वः एवं सप्तविंशतिनक्षत्राणि देयानि । यतः ' यस्मिन्नृक्षे भवेद्भानुस्तदादौ त्रीणि मस्तके ॥ द्वे द्वे च पादयोर्न्यस्य स्थापयेत्रीणि पृष्ठतः ॥ १ ॥ चत्वारि वामकुक्षौ च याम्यां चत्वारि एव च ॥ पुच्छे त्रीणि च संस्थाप्य नासिकां द्वे नियोजयेत् ॥२॥ नासिका स्वामिनं भक्षेदुद्वासमग्रपादयोः ॥ शिरः पृष्ठे भवेल्लक्ष्मीः स्थिरं पश्चिमपादयोः ॥३॥ वामकुक्षौ च दारिद्र्यं याम्या चैव धनागमः ॥ पुच्छे च जायते हानिर्वृषचक्रमुदाहृतं ' ॥ ४ ॥ इति ॥ ५२ ॥

वत्सशुद्धिवति भे विपश्चितः प्रोक्तपूर्वलयभादिसंपदि ॥
नव्यपूरचनमाहुरैंदवं पाकपस्य च बलं समीक्ष्य भे ॥५३ ॥

अथ वत्सादिभशुद्धौ पुररचनमाह—वत्सेति ॥ विपश्चितः पंडिताः नव्यपूरचनं नूतनपुरीकरणमाहुः कथयंति कस्मिन् वत्सशुद्धिवति वत्सशुद्धियुक्ते भे नक्षत्रे पुनः कस्यां प्रोक्तपूर्वलयभादिसंपदि कथितनगरचक्रनक्षत्रादिशुद्धिमात्रौ सत्यां पुनः किंकृत्वा भे नगरराशौ ऐंदवं बलं चंद्रबलं च पुनः पाकपस्य नगरदशापतेर्बलं समीक्ष्य विलोक्य ॥ ५३ ॥

आकृति न. २४

विधीयते चेद्विशिखा तदा स्यात्तद्वत्समीक्ष्याखिलशुद्धिरस्मिन् ॥
यदा पुरे निःसरणप्रपंचो विनैव तच्छुद्धिमयं विधेयः ॥ ५४ ॥

अथ पुरप्रतोलीकरणशुद्धिमाह—विधीयतइति ॥ चेत् यदा सुधिया विशिखा प्रतोली विधीयते तदास्या प्रतोल्या तद्वत् पूर्वोक्तपुरशुद्धितुल्याखिलशुद्धिः समीक्ष्या विलोकनीया ॥ पुनरस्मिन् पुरेऽयं निःसरणप्रपंचो गृहादीना सुखविस्तारो विधेयः कर्तव्यः कां विना तच्छुद्धिं तस्याः शुद्धिं विना एव निश्चितं ॥ ५४ ॥

अमीनकीटद्वितनूचरोदये सत्कंटके संकरणं पुरस्य तत् ॥ असाधुभिर्वोपचया ३।६।१०।११। नुगैरुतांगिरोविधू चेद्धन४मान१०गौ तथा ॥ ५५ ॥

अथ लग्नशुद्धौ पुरकरणमाह—अमीनेति ॥ पुरस्य नगरस्य तत् संकरणं सम्यक्प्रकारेण करणीयं स्यात् कस्मिन् अमीनेति मीन कीटः कर्को द्वितनू द्विस्वभावलग्नं चरोदयश्चरलग्नं विद्यंते एते यस्मिन्स तस्मिन् मीनादिरहिते उदये सति किंभूते उदये सत्कटके संतः शुभग्रहाः कंटके यस्य स तस्मिन् उत वितर्के च पुनः चेत् यदि उपचयानुगे त्रिषड्दशैकादशभावगैरसाधुभिः खलग्रहै. कृत्वागिरोविधू गुरुचंद्रौ धनमानगौ चतुर्थदशमभावगौ भवतस्तदा तथा पुरस्य करणं स्यात् ॥ ५५ ॥

विशेदधिष्ठानमथायने नवं सौम्येऽन्त्रकीर्णांशुविसारवासरे ॥
सहोनभोहेल्यलिसिंहसंगमे दीपोत्सवद्यूदरमासि वा क्वचित् ॥५६॥

अथ पुरप्रवेशस्य शुद्धिमाह—विशेदिति ॥ अथ पुरकरणानंतरं सुधीरधिष्ठान पुर विशेत् प्रविशेत् 'निवेशममधिष्ठानं' इति हैम.॥ कस्मिन् सौम्येऽयने उत्तरायणे किंभूतेऽयनेऽप्रकीर्णांशुविसारवासरे मीनार्कदिनरहिते वा पक्षांतरे सहो मार्गशीर्षः नभः श्रावणः हेलिः सूर्यः अलिर्वृश्चिकः सिंह एषा सगमे संयोगे सति क्वचित् दीपोत्सवस्य द्यु दिन उदरे मध्ये यस्य स एवंविधो मा मासस्तस्मिन् कार्तिकमासे इत्यर्थ ॥ ५६ ॥

प्राचेतसश्वासनतिष्यवासवस्थिरश्रवोदोर्मृदुभिर्नवं विशेत् ॥
शालं पुरं चाशुभयोगवर्जितैरनारवारेषु सदेंदवद्युषु ॥ ५७ ॥

अथ पुर दिप्रवेशे भवारशुद्धिमाह—प्राचेतसेति ॥ सुधी. नवं नवीन शालं वा पुरं वा गृहं वा विशेत् प्रविशेत् कै प्राचेतसं शततारा श्वासनं स्वाती तिष्यः पुष्य वासव धनिष्ठा स्थिरसंज्ञानि श्रव. श्रवण. दोर्हस्त. मृदूनि एषा द्वंद्वे एभिर्नक्षत्रैः किंभूतैर्नक्षत्रै. अशुभयोगवर्जितैः पुनः केषु सदेंदवद्युषु शुभचांद्रदिनेषु किंभूतेषु अनारवारेषु भौमरहितदिनेषु ॥ ५७ ॥

स्थिरोदयेऽदूषितकेंद्रधीशुभे सपत्नवीर्यायखले भवेन्नवः ॥
पुरप्रवेशोऽधिकले विधौ हितो नलैर्दशाजन्मपराजमंत्रिणाम् ॥ ५८ ॥

अथात्र प्रवेशे लग्नशुद्धिमाह—स्थिरेति ॥ नवो नूतनः पुरप्रवेशो हितः शुभो भवेत् कस्मिन् स्थिरोदये स्थिरलग्ने किंभूते स्थिरोदये अदूषिताः दूषणरहिताः केंद्रभावाः १।४।७। १० पंचमभावः ५ शुभः पुण्यो नवमभावश्च यस्मिन् स तस्मिन् पुनः किंभूते सपत्ने षष्ठे वीर्ये तृतीये ३ आये एकादशे ११ खलाः क्रूरग्रहा यस्य तस्मिन् पुनः कस्मिन् अधिकले अधि अधिकाः पूर्णाः कला यस्य स तस्मिन् एवंविधे विधौ चंद्रे 'अधिबले' इत्यपि पाठः पुनः कैः दशाजन्मपराजमंत्रिणां दशापतेः जन्मपतेः राज्ञश्चंद्रस्य मंत्रिणो गुरोश्च एषां बलैः ॥ ५८ ॥

प्रयाणदिक्खेचरयोगशुद्ध्या जीवे कवौ दर्शितमंडले स्यात् ॥
छंदोध्वनौ वाद्यसुगीतघोषे पुरं समावेशितमर्थसिद्ध्यै ॥ ५९ ॥

अथ पुरप्रवेशे शेषशुद्धिं प्रयाणशुद्धिवत् दर्शयति—प्रयाणेति ॥ समावेशितं प्रवेशीकृतं पुरं नगरमर्थसिद्ध्यै कार्यनिष्पत्तये स्यात् कया प्रयाणदिक्खेचरयोगशुद्ध्या यात्रायां यथा दिग्ग्रहयोगानां शुद्धिस्तथात्रैव विलोकनीया इत्यर्थः। पुनः कस्मिन् जीवे गुरौ कवौ शुक्रे दर्शितमंडलेऽस्तवर्जिते पुनः कस्मिन् छंदोध्वनौ वेदघोषे सति ॥ ५९ ॥

दद्याद्धयं देवविदे पुरोधसे वसुंधरामर्थचयं द्विजव्रजे ॥
संतोषयेच्चैलधनैश्च मागधान् दीनानिहान्नैरुपवेशितो नृपः ॥६०॥

इति श्रीकविकालिदासोदिते ज्योतिर्विदाभरणे प्राकारपुरसाधनप्रवेशाध्यायः ॥ १५ ॥

अथ प्रवेशितस्य भूपस्य वदान्यतामाह—दद्यादिति ॥ नृपो भूप इह उपवेशितः पुरोपवेशितः सन् देवविदे देवज्ञाय हयमश्वं दद्यात् पुनः पुरोधसे पुरोहिताय वसुंधरां भुवं दद्यात् पुनर्द्विजव्रजे विप्रेऽर्थचयं धनसमूहं दद्यात् पुनर्मागधान् मंगलपाठकान् चैलधनैर्वस्त्रद्रव्यैः संतोषयेत् पुनर्दीनान् दीनजनान् अन्नैः संतोषयेत् ॥ ६० ॥

इति श्रीपौर्णिमीयशिष्यभावरत्नविरचितायां श्रीकालिदासकृतज्योतिर्विदाभरणस्य सुखबोधिकायां प्राकारपुरसाधनप्रवेशोनाम पञ्चदशोऽध्यायः ॥ १५ ॥

गृहप्रवेशदेवताप्रतिष्ठाप्रकरणम् ।

गार्हस्थो विपुलयशा यदाश्रमाणां धर्मो वेदवचनकर्मसारधर्मः ॥
तद्देवादिजमनुजाखिलाप्तकामो वक्ष्येऽहं कुलकरणस्य कालनीतिम् ॥१

अथ प्राकारपुरसाधनानंतरं तत्र गृहसाधनं घटतेऽतः प्रहर्षिण्या गृहारंभनिर्णयं संदधाति—गार्हस्थ इति ॥ यत् यस्मात् कारणात् आश्रमाणां चतुर्णां मध्ये गार्हस्थो गृहस्थसंबंधी धर्मो गृहस्थाचारो विपुलयशाः विस्तीर्णकीर्तिः स्यात् । किंभूतो गार्हस्थो वेदवचनेन यत् कर्म कृत्यं तेन सारः शुभो धर्मो न्यायो नीतिर्यस्मिन् सः । यदुक्तं 'धर्मोयमोपमापुण्यस्वभावाचा-

रभन्वसु । सत्सगेऽर्हत्यहिंसादौ न्यायोपार्जितदारापि ॥१॥ धर्म दानादिके' इति हैम ॥ पुन किंभूतो गार्हस्थो देवा हरिहराद्य आदिजा विप्रा मनुजा क्षत्रियादयस्तैरखिल समस्त आप्त प्राप्त काम ईप्सित यस्मात्स इति तत् तस्मात्कारणात् अह कुलकरणस्य गृहविधानस्य कालनीतिं समयनिर्णय वक्ष्ये कथयिष्यामि ॥ १ ॥

वृत्रारिस्वपतिवनेश्वरांतकानां दिक्षु स्याद्भवनमिहादिजादिकानां ॥ वर्णानां विदिशि शुभं च संकरस्य प्रासादे हरिशिवयक्षदिग्विमध्यम्॥२

अथ गृहकरणे दिग्योग्यतामाह—वृत्रेति ॥ आदिजादिकाना विप्रादीना वर्णाना भवन गृह शुभ स्यात् वृत्रादीना दिक्षु वृत्रारिरिंद्रस्तस्य दिशि विप्राणा गृह शुभ स्यात् । स्वपतिर्धनद स्तस्य दिशि क्षत्रियाणा गृह शुभ वनेश्वरो वरुणस्तस्यदिशि वैश्याना गृह शुभ अतको यमस्तस्य दिशि शूद्राणा गृह शुभ च पुन सकरस्य सकरजातीना विदिशि गृह शुभ स्यात् पुनरिह प्रासादे हरिदिग् शिवदिग् यक्षदिग् आसा विमध्य यस्मिस्तत् मध्यभाग गृह वर॥२॥

नागा८गे६न१२युग४नवा९ग७भूम११धिष्ण्यैर्नागारं हरिहरितो वरं ककुप्सु ॥ जन्मोत्थैरनु परभैः पुरस्य मध्ये स्यादेवं यमवति भस्थले नराणाम् ॥ ३ ॥

अथ दिग्राश्योरमेलने दूषणमाह—नागाग इति ॥ नराणा मनुष्याणामगार गृह वर न स्यात् कासु हरिहरित पूर्वदिशात ककुप्सु कैर्जन्मोत्थैर्नागादिमितधिष्ण्ये राशिभि अनु पश्चात् परभै वृषमिथुनसिंहमकरराशिभि कोऽर्थ पूर्वदिशि नरस्य नागराशिनाऽगारं वर न स्यात् वृश्चिकराशिमान् पुरुष पूर्वस्या न वसेदित्यर्थ । एव नरस्य अगेन कन्याराशिना अग्निदिशि, पुनरिनेन मीनराशिना दक्षिणस्या, पुनर्युगेन कर्कराशिना नैऋत्या पुनर्नवाभि धनूराशिना पश्चिमाया, पुनरगेन सप्तमराशिना वायव्या, पुनर्भुवा मेषराशिना उत्तरस्यां पुनरग्रेण ईश्वरेण कुभराशिना ईशान्यामिति पुन कस्मिन् यमवति शनियुक्ते भस्थले नक्षत्रचक्रे ग्रामचक्रे यत्र शनियुक्त भ राशिस्थानं स्यात्तदा त स्थाने गृह वर न स्यात् इत्यर्थः ॥ ३ ॥

मीना १२ली ८भरिपु५भवन्त्रुरिष्टमोकः प्रागास्यं मकर१०वशा६कुलीर४भस्य ॥ याम्यास्यं जितुम३तुलास्त्रभ९स्य पुंसः पश्चात् द्वारपरभवन्तु१।२।१२रुत्तरास्यम् ॥ ४ ॥

अथ दिङ्नरराश्योर्मेलने गृहसन्मुख शुभमाह—मीनेति॥ मीन अलिर्वृश्चिक इभरिपुभ सिंहराशि. अस्त्यर्थे वतु तेन एभिर्युक्तस्य नु पुरुषस्य प्रागास्य पूर्वदिङ्मुख ओको गृहमिष्ट शुभ स्यात् । पुनर्मकरवशाकुलीरभस्य मकरकन्याकर्कराशिर्यस्य स तस्य पुसो याम्यास्य दक्षिणदिङ्मुख ओको वरं पुनर्जितुमतुलास्त्रभस्य मिथुनतुलाधनूराशिर्यस्य स तस्य पुसः

पश्चात्तद्वाः पश्चिमादिङ्मुखं ओको वरं द्वाःशब्दो हसांतः पुनरपरमवश्यःउक्तेभ्योऽन्यराशियुक्त-पुरुषस्य उत्तरास्यं ओको वरम् ॥ ४ ॥

फाल्गुने नभसि सहस्यदः सहस्ये वैशाखे शरणमशेपशं विधत्ते ॥ आरब्धं द्वितनु ३।६।९।१२। भभानुयोगयुक्ते निर्लेयामरसचिवादिभूखगारते ॥ ५ ॥

अथ गृहारंभे मासादिशुद्धिमाह— फाल्गुन इति ॥ अदः शरणं गृहं कर्तृपदं आरब्धं प्रारंभितं सत् अशेपशं समस्तसुखं विधत्ते करोति कस्मिन् आरब्धं फाल्गुने मासे अत्र दीर्घ ऊकारः शब्दप्रभेदाद् दृश्यते । नभसि श्रावणे सहसि मार्गशीर्षे सहस्ये पौषे वैशाखे किंभूते एतन्मासे द्वितनुभभानुयोगयुक्ते द्विस्वभावराशौ सूर्ये योगयुक्ते सति पुनः किंभूते निः निर्गतः लेयामरसचिवः सिंहगुरुश्च आदिभुवौ खगौ विप्रग्रहौ गुरुशुक्रौ तयोरस्तश्च यस्मात्सः सिंहगुरुरहिते गुरुशुक्रास्तरहिते इत्यर्थः ॥ ५ ॥

मासेऽपागयनगतेऽपि चौकसःस्यादारंभोऽतिवरफलोऽत्र वेशनं न ॥ भेदत्वाद्धटननिवेशदेवतानां रिक्तामा ४।९।१४। ३०। शुभयुतिविष्टिमुक्तपक्षः ॥ ६ ॥

अथ गृहारंभे अयनादिशुद्धिमाह—मास इति ॥ ओकसो गेहस्यारंभोऽतिवरफलो भृशं फलकृत् स्यात् । कस्मिन् अपागयनगते दक्षिणायनगते मासेऽपि पुनरत्र दक्षिणायनगते मासे वेशनं गृहप्रवेशो न स्यात् घटननिवेशदेवताना भेदत्वात् घटनमुहूर्तस्य भिन्नदेवाः प्रवेशनमुहूर्तस्य भिन्नदेवास्तेनेति किंभूत आरंभः रिक्तास्तिथयः अशुभयुतिर्दुष्टयोगः विष्टिर्भद्रा एताभिर्मुक्तस्त्यक्तः पक्षोऽङ्गीकारो यस्य सः ॥ ६ ॥

भानौ केसरिणि ५ मृगे १० च कुंभ११कर्क्योश्चंद्राशा-परवदनं निशांतमुक्तं ॥ गो२जूक ७भ्रमर८पशू१४ष्णदृष्टि योगे कीनाशस्वपतिदिगाननं प्रवेकम् ॥ ७ ॥

अथोचितदिशि गृहसन्मुखत्वमाह—भानाविति ॥ केसरिणि भानौ सिंहसंक्रांतौ मृगे मकरसंक्रांतौ च कुंभकर्क्योः कुंभसंक्रांतौ कर्कसंक्रांतौ च इंद्राशापरवदनं पूर्वपश्चिमादिङ्मुखं निशांतं गेहं प्रवेकं श्रेष्ठमुक्तं प्रोक्तं पुनर्गोर्वृषः जूकस्तुला भ्रमरो वृश्चिकः पशुर्मेषः एतद्राशिषु उष्णवृष्णियोगे सूर्यसंक्रमे कीनाशस्वपतिदिगाननं दक्षिणोत्तरमुखं निशांतं श्रेष्ठं प्रोक्तं ॥ ७ ॥

मासो दर्श३०युगलकालमो यथा यो ग्राह्योऽसौ निलय कृतौ प्रमाणसिद्धः । सर्वत्रैव सुरधुनीकलिंदजांतर्देशे स्यादपविधुघस्रमध्यवर्ती ॥ ८ ॥

अथ गृहकरणे मासप्रमाणतामाह—मास इति ॥ यथा योऽसौ मासो दर्शयुगलकालेन अमावास्यायुग्मकालेन मीयते इति दर्शयुग्मकालप्रमाणो दार्शिको मासः स्यात् इत्यर्थ॥ असौ मासो निलयकृतौ गृहकरणे प्रमाणसिद्धोऽधिकक्षयकालमुक्तः सर्वत्र सर्वदेशे ग्राह्यः स्यात् । तथा सुरधुनी गंगा कलिंदजा यमुना एतयोरंतर्देशे विचालेऽपविधुघस्रमध्यवर्ती अपगतो विधुश्चंद्रो यस्याः सकाशात् सा अपविधुः अमावास्या तस्या घस्रं यस्य मध्ये वर्तते इत्येवं शीलं यस्य स पौर्णिमासिको मासो ग्राह्यः स्यादित्यर्थः ॥ ८ ॥

सद्वारे करणमुतोरजस्य भानौ तिष्यश्वासनमृदुवासवैनधीरैः ॥
आधत्ते सुपमफलं सवारुणर्क्षैरुत्सृष्टाशुभखगयोगविद्धबिंबैः ॥ ९ ॥

अथ गृहकरणे वारनक्षत्रशुद्धिमाह—सद्वारइति ॥ उत वितर्के उरजस्य गृहस्य करणं सुपमफलं मनोहरफलं 'वामरुच्यसुपमाणि शोभन' इति हैमः॥ अथवा कवर्गीयखकारोऽपि 'खं सुखं ज्ञानमित्यपि' इति एकाक्षरे । सु अतिशयेन खं सुखं तेन मीयते इति तत् च फलं च इत्यपिशब्दार्थः। आधत्ते बिभृयात् कस्मिन् सद्वारे शुभग्रहादिने पुनर्भानौ सूर्यवारे पुनः कैः तिष्यः श्वासनं स्वाती मृदूनि वासवं धनिष्ठा ऐनं हस्त. धीराणि एतैर्नक्षत्रैः किंभूतैः सवारुणर्क्षैः शततारासहितैः पुनः किंभूतैर्नक्षत्रैः उत्सृष्टानि त्यक्तानि अशुभखगयोगेन पापग्रहयोगेन, विद्धानि बिंबानि यैस्तानि तैः पापग्रहयोगविद्धमंडलरहितैः ॥ ९ ॥

पूर्वत्से क्रमरविधिष्ण्यचक्रभेदैस्त्रि३द्व्य२ब्धि४त्रि३यमा२
श्वि२वेद४ द्व२ ग्मैः ॥ द्वग्मा २ ग्रैः शवृजिनकायरुक्‌-
शधैर्यं दारिद्र्यं दरमरणे क्रमेण कर्तुः ॥ १० ॥ ⊛

अथ मतभेदेनेह वत्सचक्रमाह—पूर्वत्स इति॥ पूर्वत्से नगरचक्रे क्रमरविधिष्ण्यचक्रभेदैः सूर्याक्रांतनक्षत्रचक्रभेदैः किंभूतैः त्रिद्व्यादिमितैः द्वग्माग्रैश्च क्रमेण कर्तुः शालादिकारकस्य शवृजिनादिकं स्यात् । कोऽर्थः सूर्याक्रांतनक्षत्रचक्रे वत्सस्य शीर्षादिषु त्रिभिर्नक्षत्रैः कर्तुःसुखं स्यात्। एवं द्वाभ्यां वृजिनं पापं अर्थसामर्थ्यात्कष्ट अब्धिभिश्चतुर्भिर्भैःकं सुखं धनं वा स्यात् । त्रिभिर्भैरायो लाभः स्यात् । गुणैस्त्रिभिर्भैः रुक् रोगः स्यात्। यमैर्द्वाभ्यां भाभ्यां शं सुखं स्यात्॥ अश्विभ्यां द्वाभ्यां भाभ्यां धैर्यं स्यात् । वेदैश्चतुर्भिर्दारिद्र्यं स्यात् । द्वग्मैर्द्विमानाभ्यां भाभ्यां दरो भयं स्यात् । द्वग्माग्रैः द्विमितसंख्याभ्यां भाभ्यां मरणं स्यात् । दरमरणे इति द्वंद्वे प्रथमाद्विवचनं द्वग्मं द्विप्रमितं अग्रं संख्या येषां ते तैः अग्राग्रशब्दः संख्यावाची शवृजिनादीनां द्वंद्वैकत्वं नगरवत्सचक्रात् इदं मतभेदात् ज्ञेयमिति ॥ १० ॥

शाले पुरे चाष्ट८विभागभेदो दिग्भाग१०भेदो मठमंदिरादौ ॥
भेदाः षडग्रामरधाम्नि धीरैरन्यत्र वा द्वादश१२वत्सचक्रे ॥११॥

आकृति न. ३१

अथ वत्सचक्रे शालादीनां विभागभेदानाह—शालइति ॥ अत्र वत्सचक्रे शाले पुरे वा धीरैर्बुधैरष्टविभागभेदः अष्टौ भागा भेदाः स्थाप्याः । पुनर्मठमंदिरादौ दिग्भागभेदः दशभागाः स्थाप्याः । पुनरमरधाम्नि देवगृहे षड्भेदाः अन्यत्र द्वादशभेदाः स्थाप्याः ॥ ११ ॥

स्युः सप्तसप्तानलभादुडूनि प्राच्याश्चतुर्दिक्षु निशांतचक्रे ॥
पुरोगपृष्ठस्थमिहौषधीशं त्यक्त्वा तदारंभणमिष्टमुक्तम् ॥१२॥

अथ गृहे दिग्द्वारमचक्रमाह—स्युरिति ॥ इह निशांतचक्रे गेहचक्रे प्राच्याः पूर्वातश्चतुर्दिक्षु अनलभात् कृत्तिकातः सप्त सप्त उडूनि स्युः। तदारंभणं तस्य गेहस्य प्रारंभणमिष्टं शुभमुक्तं प्रोक्तं किंकृत्वा पुरोगपृष्ठस्थं अग्रगतं पश्चाद्भागस्थं ओषधीशं चंद्रं त्यक्त्वा ॥ १२ ॥

निकेतनं स्यात्त्रिविधं हि मृण्मयं हर्म्यं सदा पर्णकुटं बुधैः स्मृतं ॥
एको नयस्तत्करणस्य चोच्यते तथापि तत्प्रोक्तविशेषतन्नयः ॥ १३ ॥

अथ त्रिविधं गृहमाह—निकेतनमिति॥ निकेतनं गृहं त्रिविधं त्रिधा स्यात् हि अवधारणे एकं मृण्मयं मृत्तिकापिंडबद्धं १ द्वितीयं हर्म्यं 'यत्विष्टिकाद्यै रचितं तद्गेहं हर्म्यमादिशेत्' इति यादवः ॥'हर्म्यं तु धनिनां गृहं' इति हैमः॥ २ तृतीयं पर्णकुटं 'तृणपत्रादिभिर्बद्धं गेहं पर्णकुटं स्मृतं' इति यादवः ॥'पर्णशालोटज' इति हैमः ॥सदा इति बुधैःस्मृतं तत्करणस्य तेषां मृण्मयादिगृहाणां एको नयोऽस्ति वा पक्षांतरे तथापि तत्प्रोक्तः तेषु गृहेषु प्रोक्तश्चासौ विशेषश्चासौ तन्नयः स एव नयश्च इति तथापि विशेषनयोऽस्ति इत्यर्थः ॥ १३ ॥

न हारि हर्म्येऽभिमुखं तमः स्यात् दृश्यं न तत्पर्णकुटादिगेहे ॥
क्षपाकरः पर्णकुटेऽभिवक्त्रो न दर्शनीयोऽन्यकुले स दृश्यः ॥ १४ ॥

अथ हर्म्यादीनां दर्शनीयदोषमाह—न हारीति ॥ हर्म्ये गृहविशेषेऽभिमुखं सन्मुखं तमो राहुर्हारि श्रेष्ठं न स्यात् । पर्णकुटादिगेहे तत्तमो राहुर्न दृश्यं न विलोकनीयं स्यात् । क्षपाकरश्चंद्रः पर्णकुटेऽभिवक्त्रः सन्मुखो न दर्शनीयः स्यात् । अन्यकुले इष्टिकादिमृत्पिंडादिरचिते गेहे सन्मुखश्चंद्रो दृश्यो विलोकनीयः ॥ १४ ॥

लघुश्रवोधीरमृगांत्यचित्रामित्रांगिरोमैत्रसितारूयवारैः ॥
न्यासं शिलादारुकृतं सुधायाः कुर्वंति लेपं निबिडं च धिष्ण्ये ॥१५॥

अथ गृहे इष्टिकादिचयनसुधालेपशुद्धिमाह—लघ्विति ॥ सुधियो धिष्ण्ये एकभूमिद्विभूम्यादिगेहे शिलादारुकृतं पाषाणकाष्ठकृतं न्यासं प्रथमं इष्टिकादिचयनं च पुनः सुधाया लेपं कुर्वंति किंभूतं निबिडं दृढं कैः कृत्वा लघूनि श्रवः श्रवणः धीराणि मृगो मृगशीर्षं अंत्यं रेवती चित्रा मित्रोऽनुराधांऽगिरा गुरुः मैत्रः शनिवारः सितः शुक्रवारः एषां द्वंद्वे एभिः ॥ १५ ॥

अथ गृहकरणे मासप्रमाणतामाह—मास इति ॥ यथा योऽसौ मासो दर्शयुग्मकालेन अमावास्यायुग्मकालेन मीयते इति दर्शयुग्मकालप्रमाणो दार्शिको मासः स्यात् इत्यर्थः॥ असौ मासो निलयकृतौ गृहकरणे प्रमाणसिद्धोऽधिकक्षयकालमुक्तः सर्वत्र सर्वदेशे ग्राह्यः स्यात् । तथा सुरधुनी गंगा कलिंदजा यमुना एतयोरंतर्देशे विचालेऽपविधुघस्रमध्यवर्ती अपगतो विधुश्चन्द्रो यस्याः सकाशात् सा अपविधुः अमावास्या तस्या घस्रः यस्य मध्ये वर्तते इत्येव शीलं यस्य स पौर्णिमासिको मासो ग्राह्यः स्यादित्यर्थः ॥ ८ ॥

सद्वारे करणमुतोरजस्य भानौ तिष्यश्वासनमृदुवासवैनधीरैः ॥
आधत्ते सुषमफलं सवारुणैर्क्षैरुत्सृष्टाशुभखगयोगविद्धबिंबैः ॥ ९ ॥

अथ गृहकरणे वारनक्षत्रशुद्धिमाह—सद्वारेति ॥ उत वितर्के उरजस्य गृहस्य करणं सुषमफलं मनोहरफलं 'वामरुच्यसुषमाणि शोभनं' इति हैमः ॥ अथवा कवर्गीयखकारोऽपि 'खं सुखं ज्ञानमित्यपि' इति एकाक्षरे । सु अतिशयेन खं सुखं तेन मीयते इति तत् च फलं च इत्यपिशब्दार्थः । आधत्ते बिभृयात् कस्मिन् सद्वारे शुभग्रहादिने पुनर्भानौ सूर्यवारे पुनः कैः तिष्यश्वासनं स्वाती मृदूनि वासवं धनिष्ठा ऐनं हस्तः धीराणि एतैर्नक्षत्रैः किंभूतैः सवारुणैः शततारासहितैः पुनः किंभूतैर्नक्षत्रैः उत्सृष्टानि त्यक्तानि अशुभखगयोगेन पापग्रहयोगेन विद्धानि बिंबानि यैस्तानि तैः पापग्रहयोगविद्धमंडलरहितैः ॥ ९ ॥

पूर्वत्से क्रमरविधिष्ण्यचक्रभेदैस्त्रि३द्व्य२ब्धि४त्रि३यमा२
श्वि२वेद४ दृ२ ग्मैः ॥ दृग्मा २ ग्रैः श्वृजिनकायरुक्-
शर्धैर्यं दारिद्र्यं दरमरणे क्रमेण कर्तुः ॥ १० ॥

अथ मतभेदेनेह वत्सचक्रमाह—पूर्वत्स इति॥ पूर्वत्से नगरचक्रे क्रमरविधिष्ण्यचक्रभेदैः सूर्याक्रांतनक्षत्रचक्रभेदैः किंभूतैः त्रिद्व्यब्धि... पुनः नरराश्युदये खगन दशमभावगनागमादिकं स्यात् । कोऽर्थः सूर्याक्रमेण अंगिरसा गुरुणा च ओकः सिद्ध्यै स्यात् ॥ १८ ॥

द्वाभ्यां वृजिनं पापं अर्थसाधु... ॥ शउदयोऽपि कुले सुखास्थै दुष्टारिविनाश
लाभः स्यात् । गुणैः...
द्वाभ्या— ष्ट उदयो न कुले सुखास्त्यै ॥ आरंभकालवति
दुष्टमदोदयश्चेदारंभकालवति दुष्टमदोदयः स्यात् ॥ १९ ॥

दुष्टारीति ॥ दुष्टानामरीणां शत्रूणां नाशो यस्मिन् स एवंविध उदयो भाग्योदयः कुले गोत्रे सुखास्त्यै सुखलाभाय स्यात् । अपि संभावनायां कुले गेहे दुष्टारिनाशउदयः दुष्टौ क्रूरग्रहदूषितौ षष्ठाष्टमभावौ यस्मिन् स एवंविध उदयो लग्नं सुखलाभाय न स्यात् । चेद्यदि आरंभकालवति कुले गृहकरणप्रारंभे दुष्टमदोदयो दूषितसप्तमभावः स्यात्तदा आरंभकालवति प्रारंभिते कर्मणि दुष्टमदोदयः दुष्टानां दायादादीनां मदोऽहंकारस्तस्योदयस्त्रान्योन्यकलिः स्यादित्यर्थः । 'मदो रेतस्यहंकारे मद्ये हर्षेभदानयोः । कस्तूरिकायां क्षैब्ये च' इति हैमः॥१९॥

अथ वत्सचक्रे शालादीनां विमागभेदानाह—शालइति ॥ अत्र वत्सचक्रे शाले पुरे वा वीरैर्वेरैरष्टविमागभेदः अष्टौ भागा भेदाः स्थाप्याः । पुनर्मठमंदिरादौ दिग्भागभेदः दशभागाः स्थाप्याः । पुनरमरधाम्नि देवगृहे षड्भेदाः अन्यत्र द्वादशभेदाः स्थाप्याः ॥ ११ ॥

स्युः सप्तसप्तानलभादुडूनि प्राच्याश्चतुर्दिक्षु निशांतचक्रे ॥
पुरोगपृष्ठस्थमिहौपधीशं त्यक्त्वा तदारंभणमिष्टमुक्तम् ॥१२॥

अथ गृहे दिग्द्वारभचक्रमाह—स्युरिति ॥ इह निशांतचक्रे गेहचक्रे प्राच्याः पूर्वतश्चतुर्दिक्षु अनलभात् कृत्तिकातः सप्त सप्त उडूनि स्युः। तदारंभणं तस्य गेहस्य प्रारंभणमिष्टं शुभमुक्तं प्रोक्तं किंकृत्वा पुरोगपृष्ठस्थं अग्रगतं पश्चाद्भागस्थं ओषधीशं चंद्रं त्यक्त्वा ॥ १२ ॥

निकेतनं स्यात्त्रिविधं हि मृण्मयं हर्म्यं सदा पर्णकुटं बुधैः स्मृतं ॥
एको नयस्तत्करणस्य चोच्यते तथापि तत्प्रोक्तविशेषतन्नयः ॥ १३ ॥

अथ त्रिविधं गृहमाह—निकेतनमिति॥ निकेतनं गृहं त्रिविधं त्रिधा स्यात् हि अवधारणे एकं मृण्मयं मृत्तिकापिंडवद्धं १ द्वितीयं हर्म्यं 'यत्रिष्टिकाद्यै रचितं तद्गेहं हर्म्यमादिशेत्' इति यादवः ॥'हर्म्यं तु धनिनां गृहं' इति हैमः॥ २ तृतीयं पर्णकुटं 'तृणपत्रादिभिर्बद्धं गेहं पर्णकुटं स्मृतं' इति यादवः ॥ 'पर्णशालोटज' इति हैमः ॥सदा इति बुधैःस्मृतं तत्करणस्य तेषां मृण्मयादिगृहाणां एको नयोऽस्ति वा पक्षांतरे तथापि तत्प्रोक्तः तेषु गृहेषु प्रोक्तश्चासौ विशेषश्चासौ तन्नयः स एव नयश्च इति तथापि विशेषनयोऽस्ति इत्यर्थः ॥ १३ ॥

न हारि हर्म्येऽभिमुखं तमः स्यात् दृश्यं न तत्पर्णकुटादिगेहे ॥
क्षपाकरः पर्णकुटेऽभिवक्त्रो न दर्शनीयोऽन्यकुले स दृश्यः ॥ १४ ॥

अथ हर्म्यादीनां दर्शनीयदोषमाह—न हारीति ॥ हर्म्ये गृहविशेषेऽभिमुखं सन्मुखं तमो

ससितोदय१श्चेत् ॥ विनिर्मितं दृश्यं न निरीक्षणीयं स्यात् । क्षपाक-
कर्तुरुदारसंपत् ॥ २३ ॥ कुले इष्टिकादिमृत्पिंडादिरचिते

ससौम्येति ॥ चेत् यदि ससौम्यराजः बुधयुक्तदशमभ... ॥
सूर्यसहितैकादशो भावः स्यात् । पुनः सपूज्यकेंद्रः गुरुयुक्तकेंद्रं स्यात् । ...
कलग्नं स्यात्तदा यच्छरणं गृहं विनिर्मितं कृतं तत् गृहं कर्तुः पुंसश्चिरं दीर्घकाल...
रण्यं शरणे रक्षणे साधु भवेत् किंभूतं गृहं उदारा प्रधाना संपत् समृद्धिर्यस्मिंस्तत् ॥२३ ॥

समंगलं मातुलवर्गमादरात्सविक्रमं ३ सूरमगारसाधने ॥
गुरुं कविं सोदय१मिच्छसि स्थितिं गृहाण चेदन्दरातद्वयं गृहिन् ॥२४॥

समंगलमिति ॥ चेद् यदि हे गृहिन् त्वं अब्दशतद्वयं द्विशतवर्षपर्यंतं स्थितिं इच्छसि गेहे अनि शेषस्तदा स्वमगारसाधने गृहकरणे आदरात् मातुलवर्गं पञ्चमं समंगलं भौमयुक्तं गृहाण

नभस्यमासं परिहाय पक्षं त्विपोर्जयोरादिममंत्यमाहुः ॥
शुचेर्बुधाः पर्णकुटक्रियां वा समस्तवारेषु सितांगिरोऽस्तम् ॥१६

अथ पर्णकुटकार्यशुद्धिमाह—नभस्येति ॥ बुधाः पंडिताः पर्णकुटक्रियामाहुः कथयंति किंकृत्वा नभस्यमासं भाद्रपदं परिहाय त्यक्त्वा च पुनः इषोर्जयोः आश्विनकार्तिकयोरादिमं पक्षं विहाय पुनः शुचेराषाढस्यांत्यं पक्षं विहाय वा पुनः सितांगिरोऽस्तं शुक्रगुर्वोरस्तं परिहाय केषु समस्तवारेषु ॥ १६ ॥

कर्णत्रयं हारमृदुध्रुवाख्यैर्युतं सतिष्यानलमूर्ध्वभूमेः ॥
आरंभकृत्ये कृतिनो नयंति ज्ञादित्रये भूषणभाजि वारे ॥१७॥

अथोर्ध्वभूम्यारंभमाह—कर्णेति ॥ कृतिनो बुधाः ऊर्ध्वभूमेरारंभकृत्ये कर्णत्रयं श्रवणत्रयं नयंति कथयंतीत्यर्थः प्राप्नुवंति वा किंभूतं कर्णत्रयं हरस्येदं हारं आर्द्रा मृदूनि ध्रुवाख्यानि एभिर्युतं युक्तं पुनः किंभूतं सतिष्यानलं पुष्यकृत्तिकासहितं कस्मिन् ज्ञादित्रये बुधगुरुशुक्रवारे किंभूते भूषणभाजि कुयोगविष्टिरिक्तापर्वभ्योऽन्यसुयोगभूषणयुक्ते ॥ १७ ॥

स्यातद्विप्रकृत्यचरराश्युदये सकेंद्रैः सद्भिः सदोपचयव-
द्भिरसद्भिरोकः ॥ सर्वर्द्धये त्वुत विदांगरसा ख १० गे-
नागारा ४ नुगेन नरराश्युदये च सिद्ध्यै ॥ १८ ॥

अथ वसंततिलकेन गृहकरणे लग्नशुद्धिमाह—स्याद्विप्रेति ॥ सदा हि अवधारणे उत वितर्के ओकः गेहं सर्वर्द्धये समस्तसमृद्ध्यै स्यात् ॥ कस्मिन् द्विप्रकृत्यचरराश्युदये द्विस्वभावलग्ने स्थिरलग्ने च पुनः कैः सकेंद्रैः केंद्रसहितैः सद्भिः शुभग्रहैः पुनः कैः उपचयवद्भिः ३।६।१०।११।उपचयभवनयुक्तैरसद्भिः पापग्रहैः च पुनः नरराश्युदये खगेन दशमभावगेनागारानुगेन चतुर्थभावगतेन विदा बुधेन अंगिरसा गुरुणा च ओकः सिद्ध्यै स्यात् ॥ १८ ॥

दुष्टारिनाशउदयोऽपि कुले सुखाप्त्यै दुष्टारिध्नाश
८ उदयो न कुले सुखाप्त्यै ॥ आरंभकालवति
दुष्टमदोदयश्चेदारंभकालवति दुष्टमदोदयः स्यात् ॥ १९ ॥

दुष्टारीति ॥ दुष्टानामरीणां शत्रूणां नाशो यस्मिन् स एवंविध उदयो भाग्योदयः कुले गोत्रे सुखाप्त्यै सुखलाभाय स्यात् । अपि संभावनायां कुले गेहे दुष्टारिनाशउदयः दुष्टौ क्रूरग्रहदूषितौ षष्ठाष्टमभावौ यस्मिन् स एवंविध उदयो लग्नं सुखलाभाय न स्यात् । चेद्यदि आरंभकालवति कुले गृहकरणप्रारंभगे दुष्टमदोदयो दूषितसप्तमभावः स्यात्तदा आरंभकालवति प्रारंभिते कर्मणि दुष्टमदोदयः दुष्टानां दायादादीनां मदोऽहंकारस्तयोस्तत्रान्योन्यं वृद्धिः स्यादित्यर्थः । 'मदो रेतस्यहंकारे मद्ये हर्षेभदानयोः । कस्तूरिकायां क्षैब्ये च' इति हैम ॥१९॥

गुरौ घने १ राजसुते निवृत्तौ ७ मैत्रे बले ३ मातुल ६ आजि मित्रे ॥
कवौ कुले ४ भूसुवि विद्धि लाभे ११ क्षयं समारंभितमक्षयं हि ॥ २० ॥

गुराविति ॥ हि युक्तार्थे हे गृहकर्तः त्वं क्षयं गृहं समारंभितं प्रारंभितमक्षयमविनाशि विद्धि जानीहि कस्मिन् घने लग्ने गुरौ सति निवृत्तौ सप्तमभावे राजसुते बुधे सति बले तृतीयभावे मैत्रे शनौ सति मातुलभाजि मित्रे षष्ठभावे , सूर्ये सति एतावता एको योगो ज्ञेयोऽथवा पुनः कुले गेहे चतुर्थभावे कवौ शुक्रे पुनर्लाभे एकादशे भूसुवि भौमे सति ॥ २० ॥

सराजमंत्री कुल ४ मान १० वर्ती सहंसभूमंगललाभ ११ भावः ॥
निशांतकर्तुश्चिरधामसौख्यं यदोत जंबालचरोदयेऽब्जः ॥ २१ ॥

सराजेति ॥ यदा उत वितर्के कुलमानवर्ती चतुर्थदशमभावस्थः सराजमंत्री चंद्रयुक्तगुरुः स्यात् । पुनः सहंसभूमंगललाभभावः लाभभावगतशनियुक्तभौमः , पुनः जंबालचरोदये जंबाले पंके चरति गच्छतीति कर्कस्तस्योदये कर्कलग्नेऽब्जश्चंद्रः स्यात्तदा निशांतकर्तुः गृहकारकस्य चिरंधामसौख्यं दीर्घकालं गृहसुखं स्यात् ॥ २१ ॥

ग्रहेश्वरे नष्टबले गृहेश्वरो विधौ वधू मंत्रिणि शं च राः सिते ॥
क्षयं समेति क्षयसाधनेऽथवा नीचाश्रयिण्यंशुविलुप्तमंडले ॥ २२ ॥

ग्रहेश्वर इति ॥ हि अवधारणे क्षयसाधने गृहकरणे ग्रहेश्वरे सूर्ये नष्टबले सति गृहेश्वरो गृहस्वामी पुमान् क्षयं समेति प्राप्नोति पुनर्विधौ चंद्रे नष्टबले सति वधूः स्त्री क्षयं समेति पुनर्मंत्रिणि गुरौ नष्टबले सति शं सुखं कर्तृपदं क्षयं समेति च पुनः सिते शुक्रे नष्टबले सति राः लक्ष्मीः क्षयं समेति वाऽथवा नीचाश्रयिणि नीचराशिगते ग्रहे सति अंशुविलुप्तमंडलेऽस्तग्रहे एवं फलं ॥ २२ ॥

ससौम्यराज्य १० श्च सभास्वदायः ११ सपूज्यकेंद्रः १।४।७।१०
ससितोदय १ श्चेत् ॥ विनिर्मितं यच्छरणं शरण्यं भवेच्चिरं
कर्तुरुदारसंपत् ॥ २३ ॥

ससौम्येति ॥ चेत् यदि ससौम्यराज्यः बुधयुक्तदशमभावः स्याच्च पुनः सभास्वदायः सूर्यसहितैकादशो भावः स्यात् । पुनः सपूज्यकेंद्रः गुरुयुक्तकेंद्रं स्यात् । पुनः ससितोदयः शुक्रयुक्तलग्नं स्यात्तदा यच्छरणं गृह विनिर्मितं कृतं तत् गृहं कर्तुः पुंसश्चिरं दीर्घकाल शरण्यं शरणे रक्षणे साधु भवेत् किंभूत गृहं उदारा महती संपत् समृद्धिर्यस्मिंस्तत् ॥ २३ ॥

समंगलं मातुलवर्गमादरात्सविक्रमं ३ सूरमगारसाधने ॥
गुरुं कविं सोदय १ मिच्छसि स्थितिं गृहाण चेदब्दशतद्वयं गृहिन् ॥ २४ ॥

समंगलमिति ॥ चेद् यदि हे गृहिन् त्वं अब्दशतद्वयं द्विशतवर्षमिता स्थितिं इच्छसि गेहस्थिति शेषस्तदा त्वमगारसाधने गृहकरणे आदरात् मातुलवर्गं षष्ठभावं समंगलं भौमयुक्तं गृहाण

पुनरेवं सविक्रमं तृतीयभावयुक्तं सूरं सूर्यं गृहाण पुनर्गुरुं कविं च सोदयं लग्नसहितं गृहाण ॥ २४ ॥

कुल४मान१०गौ यदि च राजगुरू स्तः कुलमानदौ यदि निकेतनकर्तुः॥
कुसुते च मंदवति वै भव११भावे कुसुतेऽपि संभवति वैभवभावः॥२५॥

अथ कुटजनामच्छंदसाह—कुलेति ॥ यदि राजगुरू चंद्रगीष्पती कुलमानगौ चतुर्थदशमभावगौ स्तस्तदा तौ चंद्रगुरू निकेतनकर्तुः कुलमानदौ गोत्रसन्मानदायकौ स्याता च पुनर्निश्चितं भवभावे एकादशभावगते कुसुते भौमे मंदवति शनियुक्ते सति निकेतनकर्तुर्वैभवभावः समृद्धिभावः संभवति संजायते कस्मिन् कुसुतेऽपि दुष्टपुत्रेऽपि सति इति अमर इत्यन्यः इति छंदोऽनुशासने हैमः ॥ २५ ॥

उदये कविर्भवति सोच्चपदश्रीरमृतादनार्चितपदो वनवर्ती ॥
कुरुते कुलक्रमवपं कुलकर्तुर्यदि वा यमो घट७गतिर्भव११शाली ॥२६॥

उदय इति॥ यदि सोच्चपदश्रीरुच्चस्थानश्रीसहित उच्चगतो मीनस्थ इत्यर्थः एवंविधः कविरुदये लग्ने भवति वाथवा अमृतादना अमृतभोजिनो देवास्तैरर्चितौ पादौ यस्य स गुरुर्वनवर्ती च तुर्यभावस्थः कर्कस्थो भवति । अथवा यमः शनिर्घटगतिस्तुलास्थो भवशाली एकादशभावस्थो भवति तदा एवंविधः शुक्रो गुरुः शनिश्च कुलकर्तुर्गृहकारकस्य कुलक्रमवपं स्वगोत्रवर्णं कुरुते ॥ २६ ॥

स्वगृहोच्चसुहृत्कुलांशयातैरनिलाध्वानुचरैः प्रभूतकालं ॥
परितिष्ठति पस्त्यमर्थयुक्तं कृतनिर्माणमतोऽन्यगैरनर्थम् ॥ २७॥

अथ मालभारिण्याह—स्वगृहेति॥अनिलाध्वा मरुन्मार्गो व्योम तस्मिन्ननुचरति गच्छतीति ग्रहास्तैः कृतनिर्माणं कृतसाधनं पस्त्यं गृहं कर्तृपदं प्रभूतकालं प्रचुरकालं यावत् परितिष्ठति, किंभूतं पस्त्यं अर्थयुक्तं धनभूतं किंभूतैरनिलाध्वानुचरैः स्वगृह उच्चस्थानं सुहृत्कुलं मित्रगृहं अंशः स्वगृहादिनवांशः एषु स्थानेषु यातैः गतैः 'पस्त्य संस्त्याय आश्रय.' इति हैमः ॥एभ्यः स्थानेभ्योऽन्यगैरन्यस्थानगतैर्ग्रहैः कृतं गृहमनर्थं दारिद्र्याढ्यं भवति ॥ २७ ॥

द्युचरः परभागगो यदेको मद७गो वापबलोऽपि वर्णनाथः ॥
रचितं सदनं समेति सत्यं समया तच्छ्यमेकया परस्य ॥ २८ ॥

द्युचरेति—यदा एको द्युचरो ग्रहः परभागगः शत्रुनवांशगतो भवेत् वाथवा एको मदगः सप्तमभावगतो वाथवा वर्णनाथः यथा विप्राणां गुरुशुक्रौ स्वामिनौ क्षत्रियाणां सूर्यभौमौ इत्यादिवर्णपतिर्ग्रहोऽपबलो निर्गतबलोऽपि भवेत्तदा सत्यं निश्चितं रचितं विहितं तत् सदनं गृहं कर्तृपदं एकया समया एकवर्षेण परस्य शत्रोः क्षयं हस्तं समेति मागोति परहस्तगतं भवेदित्यर्थः ॥ २८ ॥

गणकं बहुशास्त्रभेददक्षं कृतहस्तं सदयक्षमं सुशीलं ॥
परिपृच्छ्य समारभेदगारं गतलोभं प्रतिघाभिमानमुक्तम् ॥ २९ ॥

अथ गणकादेशेन गृहारंभमाह—गणकमिति ॥ सुधीरगारं गृहं समारभेत् प्रारभेत् किंकृत्वा गणकं ज्योतिर्विदं परिपृच्छ्य संकथ्य किंभूतं गणकं बहुशास्त्रभेददक्षं अनेकशास्त्रभेदे कुशलं पुनः किंभूतं गणकं कृतहस्तं शिक्षितं 'कर्महस्तमुखाः कृताः' इति हैमः। पुनः किंभूतं सदयक्षमं दयाक्षमायुक्तं पुनः किंभूतं सुशीलं शोभनाचारं पुनः किंभूतं गतलोभं पुनः किंभूतं प्रतिघः क्रोधः अभिमानोऽहंकारस्ताभ्यां मुक्तं रहितं ॥ २९ ॥

तदुदीरितकालनीतिशुद्धौ खलु तेनैव सुसूत्रधारयुक्त्या ॥
घटयेदुरजं यथोपसारो नृवरो निर्मलमानसः सुदेशे ॥ ३० ॥

अथ सूत्रधारैर्गृहकरणमाह—तदुदीरितेति ॥ खलु निश्चितं नृवरो नरश्रेष्ठस्तथा तत् उरजं गृहं घटयेत् कुर्यात् तेनैव गणकेनैव, उदीरितकालनीतिशुद्धौ कथितकालनिर्णयशुद्धौ कथा कृत्वा सुसूत्रधारयुक्त्या सुशिल्पियुक्त्या किंभूतो नृवरः यथोपसारः यथा उप समीपे सारो द्रव्यं यस्य स पुनः किंभूतो निर्मलमानसः स्वच्छचित्तः पुनः कस्मिन् सति सुदेशे उत्तमदेशे सर्वा शुद्धिर्ग्राह्या इत्यर्थः अन्यत्र यथाप्तशुद्धौ वा॥ ३० ॥

आसन्ना ये कंटकक्षीरशाला ह्यावासे स्युः पर्यवस्थातृकामाः ॥
अभ्यर्णोद्रियोऽवकेशी स शश्वत्तत्कर्तारं नष्टसूतिं विधत्ते ॥ ३१ ॥

अथ शालिन्या समीपदुष्टवृक्षगृहं सापवादमाह—आसन्नेति ॥ हि अवधारणे ये आसन्ना गृहसमीपस्थाः कंटकीवदर्यादिक्षीरशालाः क्षीरवृक्षा राजादनादयः शालाः साधारणा वृक्षा 'शालः सर्जतरुः स्मृतः' इति वैजयंती । आवासे गृहे पर्यवस्थातृकामाः पर्यवं गृहं तत्र तिष्ठतीति पुमान् तस्यातृकामो मरणकामो येषां ते मरणदायका इत्यर्थः । पुनरभ्यर्णो गृहसमीपस्थो योऽद्रिवृक्षोऽवकेशी 'वंध्यवृक्षोऽवकेशी स्यात्' शश्वन्निरंतरं स वंध्यवृक्षस्तत्कर्तारं गृहकर्तारं नष्टसूतिं नष्टा मृता सूतिः संततिर्यस्य स तं विधत्ते करोति ॥ ३१ ॥

अर्कोन्मत्तःस्नुह्यरिष्टाख्ययासाःशाकव्याधग्रंथ्यपामार्गमुख्याः ॥
उद्धर्तव्यास्ते समूला मनुष्यैर्धामोन्मानक्षोणिगा धामकृत्ये ॥ ३२ ॥

अथ धामस्थानस्थानर्कादिवृक्षानुच्छेदनीयानाह—अर्कोन्मत्त इति ॥ ये अर्कः प्रतीतः उन्मत्तो धत्तूरः स्नुहिः थोहरिः 'स्नुहिर्वज्रो महातरु.' इति हैमः । अरिष्टाख्यः फेनिलः निंबो यियासः 'यवासक' इति निघंट । द्वंद्वे बहुवचनं शाकः सागः व्याधः 'कर्णिकारे परिव्याधश्च व्याधवत्' इति शब्दप्रभेदः। ग्रंथिस्तरुभेद अपामार्गः अघाडो इति भाषा इति मुख्याः प्रमुखाः संति मनुष्यैस्तेऽर्कादयो वृक्षाः समूला उद्धर्त्तव्या उत्पाटनीयाः कस्मिन् धामकृत्ये गृहनिर्माणे किंभूतास्ते धामोन्मानक्षोणिगा गृहप्रमाणभूमिगताः ॥ ३२ ॥

अग्न्यो बोधिः पृष्ठगश्चेदवासः स्यादावासे निर्मितोऽनंतरस्थः ॥
शस्ता धिष्ण्ये पूजिताश्चाग्निपा ये नैकट्यास्तद्योगतस्तेऽपि शस्ताः॥३३

अथ गृहसमीपबोधिवृक्षादिफलमाह—अग्न्य इति ॥ चेद्यदि अग्न्य आवासस्याग्रगतः च पुन पृष्ठग आवासपृष्ठगतो बोधिरश्वत्थ स्यात् । अनतरस्थोऽतररहितो निर्मित आवासः अवास न विद्यते वासो वसनं यस्मिन् स शून्य स्यात् इत्यर्थ । च पुन. ये अग्निपा वृक्षा पूजिता पूजा प्राप्तास्ते धिष्ण्ये गृहे शस्ता शोभना स्युस्तद्योगत पूजितवृक्षसयोगात् ये नैकट्याः समीपभवास्तेऽपि वृक्षा गृहे शस्ताः ॥ ३३ ॥

शाखी निंद्यो नीरसो निंबुशालस्तालः कालो द्वारि वाराशयश्च ॥
प्रासादो नो मंजुलः पृष्ठदेशे वानस्पत्यं दारु नेयं न गेहे ॥३४॥

अथ गृहमाश्रित्य शुष्कवृक्षादिदूषणमाह—शाखी इति ॥ द्वारि गृहद्वारे नीरस शुष्कः शाखी वृक्षो निंद्य स्यात्। निंबुशालो निंद्य स्यात्। काळ कृष्णस्तालो निंद्य स्यात्। च पुनर्वाराशयो जलाशय कूपादि निंद्य स्यात्। पुन पृष्ठदेशे गृहपृष्ठे प्रासादो देवगृहं मजुल शोभनो न स्यात् । पुनर्गेहे वानस्पत्य दारु काष्ठ न देयं न नेय 'फलति ये विना पुष्पं वनस्पतीन् विदुर्बुधा' इति हलायुध ॥ ३४ ॥

शालारंभे चेदपांपित्तकीला दृष्टा सन्नावासदाहादिपीडा ॥
ओतुर्वाहिस्तत्र दृष्टोऽरिपुष्टिर्वादो मांद्यं रोदनं संश्रुतं स्यात् ॥३५॥

अथ गृहारंभेऽग्निज्वालादिदूषण दर्शयति—शालारंभेति ॥ चेद्यदि शालारंभे गृहारंभे अपांपित्तकीलाऽग्निज्वाला दृष्टा स्यात्तदा आसन्ना समीपभूता आवासदाहादिपीडा भवेत् स्वल्पकालेन गृह भस्मसाद्भवेदित्यर्थ । पुनस्तत्र गृहारंभे ओतुर्मार्जारोऽहि सर्पो वा दृष्टस्तदाऽरिपुष्टि शत्रुवृद्धि स्यात् । यदा रोदन मार्जारादीना सश्रुत स्यात्तदा वादो मांद्य वा स्यात् ॥ ३५ ॥

शालादोष्णां साधने सूत्रपाते छेदोऽर्थे चेद्ग्रंथिरार्त्यै च कर्तुः ॥
कीलोभंगः स्याद्रुजे क्ष्मानिमग्नः कीलः शून्यं विस्मयः खातदेशे॥३६॥

अथ गृहारंभे सूत्रकीलच्छेदे दोषमाह—शालेति ॥ चेद्यदि शालादोष्णां गृहभुजानां सूत्रपाते सूत्रन्यासकरणे छेदस्त्रोटन ग्रंथिर्वा भवेत्तदा कर्तुर्गृहकारकस्य आर्त्यै पीडायै भवेत् । खाते देशे कीलभग कीलभग्नता रुजे रोगाय स्यात् । यदा क्ष्मानिमग्न कील स्तदा शून्यं विस्मय आश्चर्य स्यात् ॥ ३६ ॥

खाते तावत् खन्यमाने प्रपश्येद्ग्रावाणं वा केशमंगारमस्थि ॥
चर्मायश्चेदापदो राजभीतेः सत्सिद्धिं सद्वस्तु दृष्टं तनोति॥३७

अथ खाते दृष्टवस्तुफलमाह—खात इति ॥ चेद्यदि खन्यमाने खाते सुधीस्तावत् प्रथम ग्रावाण वा केश वाऽङ्गार वाऽस्थि वा चर्म वाऽयो लोह वा प्रपश्येत्तदा राजभीते. राज भयात् आपद स्यु । सद्वस्तु शुभवस्तु दृष्ट सत् ससिद्धि शुभसमृद्धि तनोति विस्तारयति ॥ ३७ ॥

सौम्येऽनेहस्यादृते साधयित्वा खातं तावत्स्वाययुग्गेहपीठं ॥
दृश्यं प्रोक्तं तद्व्ययाद्यं हि सर्वं मित्रं पश्चादुत्तराद्यं विधेयम्॥३८॥

अथ गृहारम्भे उत्तरायणादिशुद्धिमाह—सौम्य इति ॥ सौम्ये उत्तरायणेऽनेहसि काले आदृतेऽङ्गीकृते तावत् प्रथम खात साधयित्वा स्वायशुग् शुभाययुक्त गेहपीठं दृश्य विलोकनीय च पुनस्तद्व्ययाद्य सर्वं मित्र च प्रोक्त पूर्वोक्त दृश्य विलोकनीयं पश्चात् उत्तराद्य उत्तरदिग्गतं गृह विधेय कर्तव्यं ॥ ३८ ॥

धारामंडलशालपत्तनकुलप्रासादवापीप्रपाकासारांघ्रुष्ठ पीठमंडप-
दरीपट्टासनद्वार्षु च ॥ संसत्पीठनृयानवारणगृहानौसंगिनीखा-
रिकामंजूपाशयनादिचीवरगणे ग्राह्यः सदायो बुधैः ॥ ३९ ॥

अथ शुभायस्य ग्राह्यस्थानमाह—धारेति ॥ बुधै सदाय शुभायो ग्राह्य केषु धारा मंडलं पृथिवीपीठ शाल प्राकार पत्तन नगर कुल गृह प्रासादो देवालय वापी प्रपा पानीयशाला कासार सर अधु कूप एषा द्वंद्वे एषु पुन कासु पीठ मडप जनाश्रय दरी कंदरा पट्टासन द्वार आसु पुन कस्मिन् ससत्पीठ सभापीठ नृयान याप्ययान वारणगृह अंबारी अन शकट रथादि सगिनी नौका खारिका मजूषा पेटा शयनादिर्मंचकादि चीवर एषा गणे समूहे ॥ ३९ ॥

वेदीपीठसमस्तकुंडरचनापट्टातपत्रध्वजक्षेत्रारामसुखास्त्रतुर्यशिबि-
रासंदीवितानेष्वपि ॥ सौम्यायोऽर्हतमो भवेदिति सति क्ष्मादे-
वताया ध्वजो राजन्ये नखरायुधो विशि गजो गौःपत्सवेऽन्येऽन्यगः॥४०

अथाक्रूरायस्य ग्राह्यस्थानमाह—वेदीति ॥ वेदी पीठ समस्तकुंडरचना पट्ट आतपत्रं छत्र ध्वज क्षेत्र आरामो वाटिकादि मुख प्रमुख अस्त्र शस्त्र तुर्यं वाद्य शिबिर पटमडपादि आसदी वेत्रवृक्षघटितासन ' स्याद्वेत्रासनमासदी ' इति हैम ॥ विताम उल्लोच एषा द्वंद्वे एषु सौम्य आयोऽर्हतम शुभतमो भवेत् इति सत्यपि क्ष्मादेवताया विप्रे ध्वज आय शुभतमः स्यात् । राजन्ये क्षत्रिये नखरायुध सिंहाय शुभतमो भवेत् ' राजन्यो बाहुसंभव ' इति हैम । पुन. विशि वैश्ये गज आय शुभतमो भवेत् । पत्सवे पादजाते शूद्र गौराय शुभतमो भवेत् । अन्ये खला आया अन्यगा कुविंदचर्मकारादिवर्णमाप्ता शुभतमाः स्यु ॥ ४० ॥

करणे व्ययहीने स्यात्सिद्धिरायाधिके सदा ॥
विपरीतेऽन्यथा प्राग्वद्भगौर्मैत्रं सदत्र चेत् ॥ ४१ ॥

अथ व्यये आये न्यूनाधिके फलमाह–करण इति॥'करण कारण विद्या कारणं क्षेत्रमुत्तम॥ करणो जातिभेदश्च करणानीन्द्रियाण्यपि '॥१॥ इत्यनेकार्थध्वनिमञ्जर्याम् । करणे क्षेत्रे गृहे सदा व्ययहीने आयाधिके सति अत्र गृहे सिद्धि स्यात् विपरीतो व्ययाधिक आयहीनोन्यथाऽसिद्धि स्यात् । चेत् यदि प्राग्वत् पूर्ववत् भाद्यै राश्यादिभिर्मैत्रं स्यात्तदात्र गृहे सत् शुभं स्यात् ॥ ४१ ॥

गेहं षोडशभेदमुक्तमाद्यैः प्रस्तारैर्दिगलिंदभेदभूतैः ॥
वक्ष्ये तानहमेभिरन्यभेदास्त्वन्यत्रापि सदेति साधनीयाः ॥४२

अथ ग्रहाणां षोडशभेदानाह—गेहमिति ॥ आद्यैराचार्यैः षोडशभेदं गृहमुक्तं प्रोक्तं कैः दिग् दिशालिंदः ' प्रघाणः प्रघणोऽलिंद ' इति हैम ॥ एतयोर्भेदभूतैर्भेदोत्पन्नैः प्रस्तारैरन्यभेदाः साधनीया इति हेतोरहं तान् प्रस्तारान् वक्ष्ये ॥ ४२ ॥

विलिखेत्करणानुमान् गुरून्प्रथमाधो लघुमाग्न्यरूपकान् ॥
लघुपृष्ठगुरुस्ततोऽखिला लघवो यावदयं विधिर्भवेत् ॥ ४३ ॥

अथात्र प्रस्तारं दर्शयति–विलिखेदिति ॥ सुधीराग्न्यरूपकान् प्रथमरूपकान् करणानुमान् क्षेत्रप्रमितान् गुरून् विलिखेत् । 'करण क्षेत्रगात्रयो ' इत्यादि हैमानेकार्थे ॥ तत प्रथमाधो लघुं न्यसेत् लघुपृष्ठगुरून् लिखेत् यावत् अखिला लघवो भवति तावदयं विधिर्भवेत्॥यत ' पादे सर्वगुरावाद्ये लघुं न्यस्य गुरोरधः । यथोपरि तथा शेषं भूयः कुर्यादमुं विधिम्' १अन्यच्च 'पुढम गुरुहिट्ठाणे लहुया पिठविअप्यवुद्धि एसरि सासरि सापत्ती उवरिया पछिम देहि' २ ॥४३॥

सदनाभिमुखादिहभ्रमादपसव्यान्यदिशो लघुस्थले ॥
स्युरलिंदमुदीरितं बुधैरिति षोडशभेदजा गृहाः ॥ ४४ ॥

अथ लघुप्रघाणस्थानं दर्शयति—सदनेति ॥ बुधैरिह लघुस्थलेऽलिंदमुदीरितं प्रघाणं प्रोक्तं कस्मात् सदनाभिमुखात् गृहसन्मुखात् भ्रमात् अपसव्यान्यदिशि वामरीत्या वै निश्चित इति षोडशभेदजा गृहाः स्युः ॥ ४४ ॥

ध्रुव१धान्ये २ जय ३ नदो ४ खर ५ कांत ६ मनोरमं७सुमुखं ८ ॥
कुमुखं९क्रूर१०विपक्षे११धन१२क्षया१३क्रंद१४विपुलानि१५ ॥ ४५ ॥
विजयं१६षोडशभेदैरभिरूपैरुदीरितानि नामानि ॥
नाम्ना फलमिति सदृशं कलितं च वास्तुविभोरनिशम् ॥ ४६ ॥

अथ षोडशगेहनामान्याह—ध्रुवेति ॥ विजयेति ॥ युग्मं अभिरूपैः पंडितैः सद्वस्तुरूपैर्मनोरमैर्वा षोडशभेदैर्ध्रुवादीनि नामानि उदितानि प्रोक्तानि च पुनरनिशं निरंतरं वास्तुविप्रोगृहस्वामिनो नाम्ना ध्रुवादिनाम्ना सदृशं फलं कलितं कथितं ॥ ४५ ॥ ४६ ॥

परे वदंतीति बुधा दुष्टाख्यं तत्सदंत्यजातीनां ॥
शुभवर्णानां सौम्यं केचित्सर्वाणि सर्ववर्णेषु ॥ ४७ ॥

अथ वर्णभेदेऽत्रमतमाह—परं इति ॥ परे बुधा इति वदंति इतीति किं अंत्यजातीना तत् ध्रुवादि गृहं दुष्टाख्यं दुष्टनाम सत् शुभं स्यात्। शुभवर्णाना द्विजातीना सौम्यं सौम्यसंज्ञ गृहं वरं स्यात्। केचिदिति वदंतीति किं सर्ववर्णेषु सर्वाणि शोभनानि स्युः ॥ ४७ ॥

एवं द्विरञ्याश्दिग्कुश्भिर्भवंति धामन्यनेकधा भेदाः ॥
एभिश्च खंडमेरोर्ज्ञानाय जायतेऽत्र किल सिद्धिः ॥ ४८ ॥

अथानेकधा गृहभेदान् दर्शयति—एवमिति ॥ एवं धामनि गृहेऽनेकधा भेदा भवंति क्रमिर्द्विञ्यादिकुभिर्द्विञ्यादिभूमिभिः च पुनः किलेति सत्येऽत्र खंडमेरोर्ज्ञानाय सिद्धिर्नायते कैरेभिः ॥ ४८ ॥

मूलं भित्तेर्धर्मराजाशमुक्तं वारुण्याशं वा तदग्राशमग्र्यं ॥
कल्प्या भागा मूलतो व्योमगानामर्कादीनां द्वारमिष्टं सदंशे ॥ ४९ ॥

अथ दिगाश्रितभिन्नमूलफलमाह—मूलमिति ॥ धर्मराजाशं दक्षिणदिग्गतं भित्तेर्मूलमग्र्यं श्रेष्ठं स्यात् वाऽथवा वारुण्या पश्चिमदिग्गतं वा तदग्राश उत्तरदिग्गतं भित्तेर्मूलं श्रेष्ठ स्यात्। पुनरर्कादीना व्योमगाना ग्रहाणां मूलतो भागाः कल्प्या पुन सदंशे शुभग्रहाणामंशैर्द्वारमिष्टं श्रेष्ठ स्यात् ॥ ४९ ॥

शालालपत्वान्नावकाशः सदंशे द्वारो वान्यागारकोणादिवेधात् ॥
पापांशे तद्वामशाखा न दुष्या शेषं नेयं तत्तदा सौम्यभागे ॥५०॥

अथ द्वारे नवांशादिशुद्धिमाह—शालेति ॥ सदंशे शुभग्रहनवांशे द्वारोद्वारस्य अवकाशो न स्यात् कस्मात् शालाल्पत्वात् पट्टशालास्तोकत्वात् वाऽथवाऽन्यागारकोणादिवेधात् पुनः पापांशे दुष्टग्रहांशे तद्वामशाखा तस्य गृहस्य वामशाखा न दुष्या स्यात्तदा सौम्यभागे तद् द्वारमशेषं नेयं कर्तव्यं ॥ ५० ॥

दुष्टांशे तत्संभवश्चेत्तदा स्याद्वारे तत्र द्वारिकान्यत्र साध्वी ॥
कार्या केचित्सव्यगं तत्रिभागं मुक्त्वा द्वारं ज्ञांगिरोंऽशस्थमाहुः॥५१

अथ द्वारद्वारिकामोचनविवेकमाह—दुष्टांश इति ॥ चेद्यदि दुष्टांशे तत्संभवो द्वारसंभव स्यात् तदा तत्र द्वारं स्यात्। पुनरन्यत्र अग्रभित्तौ वा यथावकाशस्थले साध्वी शोभना द्वारिका कार्या ह्रस्वं द्वारमिति द्वारिका इति विग्रहः कर्तव्या। केचित् बुधाः ज्ञांगिरोंऽशस्थं कुर-

शुक्लपांशगतं द्वारमाहुः किंकृत्वा तद्विभागं तस्य गेहस्य त्रिभागं सव्यगं वामगं त्यक्त्वा ॥ ५१ ॥

एवं दुर्गे पूर्वतो द्वारशुद्धिर्ज्ञेया द्वारे स्तंभकूपाद्रिमार्गैः ॥
नीचोच्चोर्वीदेवताभिश्च वेधस्त्याज्यश्चोर्ध्वद्वारि नैवं गवाक्षे ॥५२॥

अथ दुर्गादिद्वारे वेधं त्यज्यन्नाह-एवं दुर्गे इति ॥ सुधीभिरेवं दुर्गे निर्वृतौ दुर्गे कृते सति द्वारशुद्धिर्ज्ञेया च पुनर्द्वारे वेधस्त्याज्यो वर्जनीयः कैः स्तंभकूपाद्रिमार्गैः स्थूणाकूपवृक्षमार्गैश्च पुनर्नीचोच्चोर्वीदेवताभिः उच्चनीचभूमीभिः देवतामूर्तिभिश्च पुनरूर्ध्वद्वारि गवाक्षे एवंविधो वेधस्त्याज्यो न स्यात् ॥ ५२ ॥

वेधे सत्यप्यत्र वेधो न दृश्योऽतश्चेत्तद्द्विघ्नैकसूत्रेण दूरे ॥
स स्यात्सर्वत्रैव वेधप्रबोधो ज्ञेयो विद्धज्ञानिभिर्नित्यवेध्ये ॥ ५३ ॥

अथ दूरवेधे निर्दोषतामाह-वेध इति॥ चेत् यदि अतो द्वारतस्तद्द्विघ्नैकसूत्रेण गृहाद् द्विगुणसूत्रेण दूरवेधे सति अत्र द्वारवेधो न दृश्यो विलोकनीयो न स्यात्। अपि निश्चितं स वेधप्रबोधो वेधज्ञानं सर्वत्रैव विद्धज्ञानिभिर्वेधज्ञैर्ज्ञेयः स्यात् कस्मिन् नित्यवेध्ये निरंतरवेधत्वप्राप्ते देशे यथा शरेण वेध्यं तत् शराख्यकं अन्यथा न ॥ ५३ ॥

मृदुलघुपुरुहूतर्क्षादितेयानिलेषु त्रिदशसचिवसोमज्ञोशनोवासरैश्च ॥
वलजकृतिरभीष्टा दुष्टयोगाद्यदुष्टैर्युवतिध्जितुम२धीरर्क्षोदये साधुकेंद्रे ५४

अथ द्वारकरणे नक्षत्रशुद्धिमाह-मृद्विति ॥ वलजस्य द्वारस्य कृतिः करणमभीष्टा शुभा स्यात् केषु मृदूनि लघूनि पुरुहूतो ज्येष्ठा आदितेयं पुनर्वसू आनिलं स्वाती एषु च पुनः कैः त्रिदशसचिवो गुरुः सोमः ज्ञो बुधः उशनाः शुक्रः एषां वासरैर्दिनैः किंभूतैः दुष्टयोगादिभिरदुष्टैरमिश्रैः पुनः कस्मिन् युवति- कन्या जितुमं मिथुनं धीरर्क्षाणि स्थिरराशयः एषा उदये लग्ने किंभूते साधुकेंद्रे ॥ ५४ ॥

दिनकरकिरणाक्रांतर्क्षतो द्वारचक्रे युग४यम२युग४दृग्वेद-
४द्वि२वेद४द्वि२रामैः ३॥ मितमुडगणभागं विन्यसेदूर्ध्वतो-
तर्नियममखिलदिग्गं नाप्यधःकोणभं सत्॥ ५५ ॥

अथ द्वारचक्रे भानि न्यस्यति-दिनेति॥सुधीरूर्ध्वतोऽन्तरानियम मध्यपर्यंतं उडुगणभागं न्यसेत् कस्मिन् द्वारचक्रे कस्मात् दिनकरकिरणाक्रांतर्क्षतः सूर्याक्रांतनक्षत्रात् किंभूत उडुगणभागं युग चत्वार ४ यमः द्वौ २ युगानि चत्वारः ४ दृग् द्वौ २ वेदाः चत्वारः ४ द्वौ २ वेदाः चत्वारः ४ द्वौ २ रामास्त्रय ३ एभिर्मितं अपि निश्चितं अखिलदिग्ग मध्ये समस्तदिग्गतं ॥ अथ फलं ॥ अथ कोणभं अधोदिग्गतं चतुःकोणगतं च नक्षत्र सत् शुभ न स्यात् ॥ ५५ ॥

ध्रुवधिपणभमेषादित्यदोमैत्रचित्रारुरुकवसुभपौष्णैर्मौ लिदारु प्रदद्यात् ॥ तरणिधिपणकाव्याहःसुधीस्त्र लग्ने विकुयुतिषु च ताराराजवीर्ये सुपक्षे ॥ ५६ ॥

अथ मोभद्दारुमोचने नक्षत्रादिशुद्धिमाह—ध्रुवेति ॥ सुधीः मौलिदारु पदकं प्रदद्यात् मोभ भारवट इति भाषा स्थापयेत् कैः ध्रुवाणि धिपणभं पुष्यः मेशं श्रवणः आदित्यं पुनर्वसू दोर्हस्तः मैत्रमनुराधा चित्रा रुरु मृगशीर्षं को वायुः स्वाती वसुभं धनिष्ठा पौष्णं रेवती एतद्भैः पुनः केषु तरणिः सूर्यः धिपणो गुरुः काव्यः शुक्रः एषामहस्सु दिनेषु किंभूतेषु विकुयुतिषु कुयोगरहितेषु च पुनः कस्मिन् धीरे स्थिरे लग्ने पुनस्ताराराजवीर्ये चंद्रबले सुपक्षे सतियै ॥५६

शालास्वशेषास्वयमादृतो विधिः प्रपाश्रमाद्यापणमंदुरादिषु ॥ गीर्वाणगेहे वलजोर्ध्वदारुजा दृश्या न शुद्धिः क्वचिदित्युदीरितं॥५७

अथोपसंहारेणाह—शालेति ॥ बुधैरयं विधिरादृतोऽगीकृतः क्व अशेषासु शालासु अथ पुनः प्रपा जलपर्व आश्रमादिः आश्रमस्तु मुनिस्थानं आपणः हट्टः मंदुरा 'वाजीशाला तु मंदुरा' इति हैमः । पुनर्गीर्वाणगेहे देवगृहे वलजोर्ध्वदारुजा द्वारोर्ध्वकाष्ठजाता शुद्धिर्न दृश्या नो विलोकनीया इति क्वचित्स्थाने उदीरितं ॥ ५७ ॥

गृहे न रामायणभारताहवं चित्रं कृपाणाहवमिंद्रजालवत् ॥ शिलोच्चयारण्यमयं सदासुरं भीष्मं कृताक्रंदनरं त्वनंतरम् ॥ ५८ ॥

अथ गृहे दुष्टलेख्यानि निषेधति—गृह इति ॥ गृहे एतच्चित्रं आलेख्य न सत् श्रेष्ठं न स्यात्तदाह रामायणभारताहवं रामायणभारतयुद्धयुक्तमालेख्यं कृपाणाहव खड्गयुक्तं चित्रं इंद्रजालवत् इंद्रजालयुक्तं चित्रं शिलोच्चयारण्यमयं पर्वतवनस्वरूपं चित्रं आसुरं असुर-संबंधि चित्रं भीष्मं भयानकं चित्रं कृताक्रंदनरं दीनरोदनकृन्नरचित्रं अनंतरं दिगंबरचित्रं ॥५८

वराहशार्दूलशिवापृदाकवो गृध्राभिधोलूककपोतवायसाः ॥ शशैणगोधादिबकादिपत्रिणो विचित्रिता नो शरणे शुभावहाः ॥५९

अथात्र दुष्टपशुपक्षिचित्रं निषेधति—वराहेति ॥ एते विचित्रिताः शरणे गृहे शुभावहाः सुखकारका न स्युः । तानाह वराह सूकरः शार्दूलो द्वीपी शिवा फेरव पृदाकुः सर्पः गृध्राभिधः सिंचाणकः उलूको घूकः कपोतः वायसः शशः एणो मृगः गोधादिः बकादिः पत्री पक्षी एषां द्वंद्वे एते ॥ ५९ ॥

एतत्तु रामायणभारतादिकं चित्रं गृहाग्राह्यमगर्हितं ग्रहे ॥ तदेव यच्चादरतो विचित्रितं मठप्रसादादिषु पुण्यसारदम् ॥ ६० ॥

अथ चित्रोपसंहारेण प्रासादिष्वनिषेधतामाह—एतदिति ॥ एतत् रामायणभारतादिकं चित्रं गृहाग्राह्यं गेहे न स्यात्। तु पुनर्ग्रहे नवग्रहप्रासादिषु अगार्हितं श्रेष्ठं स्यात्। च पुनर्यद् तदेव आदरतः सादरेण मठप्रासादादिषु विचित्रित पुण्यसारद धर्मबलकरं भवेत् ॥ ६० ॥

सुधावलेपश्च चितेरुपक्रमः स्यादिष्टकानामिनजेनवारयोः ॥
लघुध्रुवैंद्रांत्यमृगश्रवस्वलं स्थिरोदये वैंद्रसुवस्तिकाहनि ॥ ६१ ॥

अथेष्टकाचयनादिकृत्यमाह—सुधेति ॥ अलमित्यवधारणे इष्टकाना चितेरुपक्रमः चयनक्रिया च पुनः सुधावलेपः छोलेपः स्यात्। क इनजः शनि इनः सूर्य. एतद्वारयोः पुनः केषु लघूनि ध्रुवाणि ऐंद्रं ज्येष्ठा आत्यं रेवती मृगो मृगशीर्ष श्रवः श्रवणः एषु च पुनः स्थिरोदये स्थिरलग्ने वा इति पक्षांतरे इंद्रस्य सुवस्तिक. पुरोहितो गुरुस्तस्याहनि ' पुरोधास्तु पुरोहितः सुवस्तिक ' इति हैमः ॥ ६१ ॥

अनारमंदारुणसूतवासरा वैरंचनैरैनचलाद्यपैषणैः ॥
समैत्रवर्गैरुदिता नृभोदये सौधे कुलेऽन्यत्र च चित्रकर्मणि ॥६२॥

अथ सौधादौ चित्रकर्मशुद्धिमाह—अनारेति ॥ सौधे कुले सौधं तु नृपमंदिर सुधावलेपगृहेऽन्यत्र च चित्रकर्मणि अनारमंदारुणसूतवासरा उदिताः प्रोक्ताः आरो भौमः मंदः शनिः अरुणसूत: अरुणः सूतः सारथिर्यस्य स सूर्य एभ्योऽन्यवासरा. सौम्यवारा इति कैः वैरंचं रोहिणी नैर पूर्वाषाढा ऐन हस्तः चलसंज्ञानि आद्यं अश्विनी पैषणं पुष्यः एषां द्वंद्वे एभिः किंभूतैः समैत्रवर्गैः मैत्रसंज्ञनक्षत्रयुक्तैः पुन कस्मिन् नृभोदये नृलग्ने सति ॥ ६२ ॥

स्वस्थानमैंद्र्यां च महानसः शुचेर्दिश्यर्णसोऽशःसमवर्तिनोऽस्त्रगोः ॥
क्रव्यादकोणेशनगोरपोर्यगा सस्यस्थलं सद्दिशि मातरिश्वनः ॥ ६३ ॥

कुलकं। अथ पूर्वादौ धनन्यासादिगृहाणि दर्शयति—स्वयेति ॥ ऐंद्र्यां दिशि स्वस्थान धनगृहं सत् शुभं स्यात्। च पुन शुचेर्दिशि अग्निदिशि महानसः पाकस्थानं सत्। पुन समवर्तिनो यमस्य दिशि अर्णसो जलस्याशो जलस्थान सन् शुभः। 'समवर्ति काली' इति हैम ॥ पुन क्रव्यादकोणे नैर्ऋत्या अस्त्रस्य आयुधस्य गौर्भूमिरायुधगृह सतीत्यर्थः। पुनः अपोर्यगा अप.शब्दः सकारांतोपि क्लीबलिंग इति शब्दप्रभेदस्तेन अपोर्यगा इति वाक्यसिद्धिः। जलस्थामिदिग्गताऽशनगौर्भोजनभूः शुभा पुन सस्यस्य धान्यस्य स्थल गृहं मातरिश्वनो वायोर्दिशि सत् इति ॥ ६३ ॥

स्थलं भवेदोकसि शायनं शुभं स्वपालदिग्गं च सुरार्चनस्थलं ॥
शिवाशमाद्येरिति भाषितं बुधैस्तत्पार्श्वगं मध्यमतोऽन्यथाधमम् ॥६४॥

इति श्रीकविकालिदासोदिते ज्योतिर्विदाभरणे गृहारंभाध्यायः षोडशः ॥ १६ ॥

स्थलमिति ॥ ओकसि गृहे स्वपालदिग्गं धनदादिगुगतं शायनं शयने भवं स्थलं

शुभं भवेत् । शिवाशं ईशानकोणगतं सुरार्चनस्थलं देवार्चनगृहं शुभं भवेत् । च पुनस्तत्पार्श्वगं मध्यं मध्यमं अतोऽन्यथाधमं शायनस्थलं देवगृहं च स्यात् इति आचार्यैर्भाषितं ॥ १४ ॥

इति श्रीपौर्णिमीय गच्छाधिराजभट्टारकपुरंदरश्री महिमाप्रभसूरीश्वरचरणसरोरुहचंच-रीकायमाणशिष्यभावरत्नविरचितायां श्रीकालिदासकृतज्योतिर्विदाभरणस्य सुखबो-धिकायां गृहारंभाध्यायः षोडशः ॥ १६ ॥

गृहप्रवेशप्रकरणम्

अथेह शालारचनादनंतरं ब्रुवेऽहमावेशविनिर्णयं तथा ॥
यथा चतुर्वर्गफलं श्रियं कुलं प्रविश्य गेही लभतेऽपसंशयम् ॥ १ ॥

अथ शालादीनां करणानंतरं प्रवेशो घटतेऽतः प्रवेशाध्यायसंधानमाह—अथेति ॥ अथानंतरं इहाध्याये शालारचनानंतरं गृहकरणानंतरं तथा तेन प्रकारेणाहमावेशनिर्णयं गृहप्रवेशनिश्चयं ब्रुवे यथा येन प्रकारेणापसंशयं निश्चयेन गेही गृहस्थश्चतुर्वर्गफलश्रियं चतुर्वर्गाणां फललक्ष्मीं लभते प्राप्नोति किंकृत्वा कुलं गेहं प्रविश्य ॥ १ ॥

निकेतनावेशविधेरहर्पतेरमीनसौम्यायनमातनोति शं ॥
शुक्रांत्यवैशाखतपःसहस्यगं सुरासुराचार्यसुदर्शनावहम् ॥ २ ॥

अथ गृहप्रवेशेऽयनादिशुद्धिमाह—निकेतेति ॥ अहर्पतेः सूर्यस्य अमीनसौम्यायनं कर्तृपदं शं सुखमातनोति विस्तारयति कस्य निकेतनस्य गेहस्य आवेशविधिः प्रवेशविधिर्यस्य स तस्य पुरुषस्य किंभूतममीनसौम्यायनं शुक्रो ज्येष्ठः आत्यः फाल्गुनः वैशाखः तपो माघः सहस्यः पौषः एषां द्वंद्वे एषु गतं पुनः किंभूतं सुरासुराणां देवदैत्यानां आचार्यौ गुरुशुक्रौ तयोः सुदर्शनावहं शुभदर्शनधारकं ॥ २ ॥

रिक्ताकलाचारिणि राजनि प्रियो गृहप्रवेशो न च पर्वगामिनि ॥
कुयोगभद्रापमसाम्यवद्दिने दुष्टैर्दशामूर्तिभलग्नपेंदुभिः ॥ ३ ॥

अथ बलहीनचंद्रादिदोषे प्रवेशं निषेधति—रिक्तेति ॥ गृहप्रवेशः प्रियो न हितो नो स्यात् कस्मिन् रिक्ताकलाचारिणि रिक्ताकलाः रिक्तास्तिथयः ४।९।१४। तासु गामिनि पर्वगामिनि च राजनि चंद्रे सति पुनः कस्मिन् कुयोगः भद्रा अपसाम्यं क्रांतिसाम्यं एतानि संति अस्येति एतद्युक्तदिने पुनः दशापः मूर्तिभपः जन्मनक्षत्रस्वामी लग्नपो लग्नस्वामी इंदुः एषां द्वंद्वे एभिः किंभूतैः दुष्टैर्दुष्टस्वभावप्राप्तैः ॥ ३ ॥

दैत्यादितेयार्चितपादविद्यमा-वारा वरा वस्तुनिवेशने भृशं ॥
साधारणोऽत्र द्विजराजवासरे विगर्हितो राजनभोगवासरौ ॥४॥

अथ गृहप्रवेशे वारशुद्धिमाह—दैत्यादीति ॥ भृशमत्यर्थं दैत्यादितेयौ असुरसुरौ ताभ्यामर्चितौ पादौ ययोस्तौ शुक्रगुरू बिंदुबुध शनि एषां द्वंद्वे एते वारा वरा श्रेष्ठाः स्युः कस्मिन् वास्तुनिवेशने गृहप्रवेशे पुनरत्र प्रवेशे द्विजराजवासरश्चंद्रदिनं साधारणं स्यात्। पुनरत्र राजनभोगवासरौ क्षत्रियग्रहवासरौ रविभौमौ विगर्हितौ सक्तौ स्तः ॥ ४ ॥

मरुदांगिरसोडुवासवध्रुवयादोऽर्यमभैत्रवर्गभैः ॥
प्रविशेन्नवमालयं नरो गतदोषैरपि भूषणार्चितैः ॥ ५ ॥

अथ वैतालीयेन गृहप्रवेशे भशुद्धिमाह—मरुदिति ॥ नरः पुमान् नवमालयं नूतनगृहं प्रविशेत् कैः स्फुरति सूर्याक्रमणरहितानि आंगिरसोडु पुष्यं वासवं धनिष्ठा ध्रुवाणि यादोर्यं भं यादसां जलजंतूनामर्यः स्वामी वरुणस्तस्य भं शततारा मैत्रवर्गभानि मित्रसंज्ञानि एषां द्वंद्वे एतैः किंभूतैर्गतदोषैर्दोषवर्जितैरपि पुनर्भूषणार्चितैः सुयोगाढ्यैः ॥ ५ ॥

भरवींदुषु यैर्निवेशनं कलितं द्वित्वमिहापि जीवकैः ॥
इदमादृतमेभिरोकसोऽभिजिदंशुद्युसहोनभोनुगम् ॥ ६ ॥

अथात्र जैनमतेन स्वमतं द्रढयति—भरवीमिति ॥ यैर्जीवकैः क्षपणैर्दिगंबरैरिति शब्दपर्यायाः श्वेतांबरैरपि इह लोके भरवींदुषु राशिसूर्यचंद्रेषु द्वित्वं द्वौ द्वौ कलितं प्रोक्तं 'द्वौ द्वौ रवींदू भगणौ' इति शिरोमणौ। 'दोशशिदोरविपंदमे' इति जैनदर्शनोक्तेः। 'जीवको वृद्धिजीविनि। क्षपणे प्राणके पीतसालसेवकयोर्द्रुमे ॥ १ ॥ व्यालग्राहे' इति हेम॥ 'जीवको जैन इति हलायुध' तैरेभिर्जीवकैरपि ओकसो गेहस्य निवेशनं प्रवेशनमादृतमंगीकृतं किंभूतं निवेशनं अभिजिन्नक्षत्रं अंशुद्यु सूर्यदिनं सहा मार्गशीर्षो नभ श्रावणः एषु अनुगं प्राप्तं अतो मयापि एषां मतमंगीकृतमित्यर्थः ॥ ६ ॥

कलशेऽशुभचक्रसंभ्रमे कुकृतापचकरागरामभे ॥
कदिगंतरकंठपायुगे तलकंठापरसौम्यभैर्वरम् ॥ ७ ॥*

अथ कलशचक्रं तानि स्थापयति—कलश इति ॥ कलशे कुंभे किंभूते अशुभचक्रसंभ्रमे सूर्यनक्षत्रात् चक्रभ्रमगे पुनः किंभूते कु एक १ कृतानां चतुर्णां मानपंचकं मर्यादीकृत्य ४।४।४।४।४।रामास्त्रीणि ३ रामस्त्राणि भानि यस्मिंस्तस्मिन् पुनः किंभूते कं मूर्द्धनि १ दिक्षु चतुर्दिक्षु १६ अंतरे मध्ये ४ कंठे ३ पायौ गुदे ३ एतत्स्थानगते इति 'पानं पायुर्गुदं च्युति' इतिहैम ॥ एवं सप्तविंशतिभानि स्थाप्यानि ॥ अथ फलमाह प्रवेशने कलशस्थापनं वरं स्यात्। कैः गुदे तल ३ कंठे ३ अपरं पश्चिमं ४ सौम्यं उत्तरस्यां ४ एषु गतभैर्नक्षत्रैः फलं ॥ ७ ॥

अमृतादनवैद्यभं क्वचिद्वदितं धामनिवेशने शुभम् ॥
शरणं ह्युत यद्दिगानन नृवरस्तद्धरिदास्यभे विशेत् ॥ ८ ॥

अथात्र किंचिद्विशेषं दर्शयति—अमृतानि । तानि खादंति अमृतादना सुधाभुजो देवास्तेषां वैद्यौ तयोर्भमश्विनी धामनिवेशने गृहप्रवेशने शुभं गदितं प्रोक्तं। हि अवधारणे उत विकल्पे

---

* आकृति नंबर २७

यदिगाननं दिङ्मुखगत शरण गेह भवेत् नृवरो नृपस्तद् गेह विशेत् कस्मिन् हरिदास्यभे दिग्मुखनक्षत्रे ॥ ८ ॥

अतिमिद्विशरीरमस्थिरानुदयानाहुरगारवेशने ॥
चरमत्स्यलवान्यभागगानभिरूपाः शुभयोगवीक्षणात् ॥ ९ ॥

अथ गृहप्रवेशे लग्नशुद्धिमाह—अतिमीति ॥ अभिरूपा पंडिता अगारवेशने गेहप्रवेशने उदयान् लग्नानि आहु कस्मात् समयोगवीक्षणात् शुभयोगविलोकनेन किंभूतान् उदयान् अतिमिद्विशरीरमस्थिरान् मीनवर्जितद्विस्वभावस्थिरलग्नानि पुन किंभूतान् उदयान् चरमत्स्यलवान्यभागगान् चरमीननवांशेभ्योऽन्यनवांशगतान् ॥ ९ ॥

स्थिरराश्युदये प्रवेशनं विदधीतेति जगाद गालवः ॥
अपजूकनरोदये क्वचित्सदितीहोभयमादृतं मया ॥ १० ॥

अथात्रान्यमतेन स्वमत दृढयति—स्थिरेति ॥ गालवऋषिरिति जगाद इति किं सुधी स्थिरराश्युदये प्रवेशन विदधीत पुन क्वचित्स्थानेऽपजूकनरोदये तुलारहिते नृराश्युदये प्रवेशन सत् शुभ इति हेतोरिह प्रवेशे मया उभयमादृतमंगीकृत ॥ १० ॥

प्रतिभा५ध्वर९केंद्रगैः शुभैरशुभैः केंद्रलयांत्यभान्यगैः ॥
प्रविधाय निवेशमौकस विविधं धामपदे शमश्नुते ॥ ११ ॥

अथ गृहप्रवेश भावगतग्रहफलमाह—प्रतिभेति ॥ गेही धामपदे गेहास्पदे विविध श सुखमश्नुते प्राप्नोति किंकृत्वा ओकस गृहसद्मनि निवेश प्रविधाय कै. प्रतिभा पचमभाव ५ अध्वरो नवम ९ केंद्राणि १।४।७।१० एषु गते शुभैर्ग्रहे पुन कै केंद्राणि १।४।७।१० लयोऽष्टमः ८ आत्य भं द्वादशस्थान एभ्योऽन्यगतैरशुभग्रहे ॥ ११ ॥

जनिभादुत जन्मलग्नतः पृथुसारोऽत्र स राशिरोद्गमः ॥
चरराशिमपास्य तत्र वै कुलमावेशितमेति शं कुलात् ॥ १२ ॥

जनिभेति ॥ उत वितर्क जनिभात् जन्मराशितो जन्मलग्नत पृथुसार बहुवीर्य उपचयभवन गत इत्यर्थः । उद्गम भत एवंविध स राशि स्थिरद्विस्वभावराशि स्यात्तदा तत्र समये चरराशिमपास्य विहाय गेहिना कुल गेहमावेशित प्रवेशित सत् गेहा श सुखमेति प्राप्नोति कस्मात् कुलात् गृहात् ॥ १२ ॥

सघनः कविसूनुरुद्गमे समदो राजसुतो मदा तदा ॥
ससुखो गुरुरालयाश्रयादनिशं शासितशं तदालयम् ॥ १३ ॥

सघन इति ॥ यदा उद्गमे लग्ने सघनस्तनुभावस्थ कविसूनु शुक्र स्यात् । समद सप्तमभावस्था राजसुतो बुध स्यात् ॥ ससुखश्चतुर्थभावगतो गुरु स्यात्तदालयाश्रयात् गृहप्रवेशात् अनिश

सदा तद् गृहं शंसितश कथितसुखं स्यात् । किंभूतं गृहं आ लक्ष्मीस्तस्या आलयः स्थानं यस्मिंस्तत् ॥ १३ ॥

उदये १ च रसातले ४ शुभैरतितेजोभिरगारवेशनं ॥
निखिलश्रियमावहत्यदोऽपखलातर्येघरे पुरोदये ॥ १४ ॥

उदयइति ॥ अदोऽगारवेशनं कर्तृपद निखिलश्रियं सपूर्णलक्ष्मीमावहति बिभर्ति केरुदये लग्ने रसातले चतुर्थभावे चातितेजोभिर्बहुबलयुक्तै शुभैर्ग्रहैश्च पुन पुरोदये तनुलग्नेऽवरे स्थिरलग्ने किंभूतेऽपखलातरि अपगता खलाः क्रूरा अतरि मृत्यौ भावे यस्मिन् स तस्मिन् ॥१४॥

उदितं सुरसूड सूतिकावसथस्याद्यबुधैर्विनिर्मितौ ॥
चतुराननशौरिभांतरे स्मृतभे हारि च तत्प्रवेशनम् ॥ १५ ॥

अथ सूतिकागृहकर्मशुद्धिमाह—उदितमिति ॥ सूतिकावसथस्य 'अरिष्ट सूतिकागृह' इति हैम । तस्य विनिर्मितौ निर्माणकर्मणि आद्यबुधैः पुराणपण्डितै सुरसूड देवमातृनक्षत्रं पुनर्वसु उदित प्रोक्तं च पुनस्तत्प्रवेशन तस्य सूतिकागृहस्य प्रवेशन हारि शुभ स्यात् कस्मिन् चतुराननो ब्रह्मा रोहिणी शौरिभं श्रवण. एते अंतरे मध्ये यस्मिंस्तत्तस्मिन्नेवविधे स्मृतभे प्रोक्तनक्षत्रे ॥ १५ ॥

शयाश्विने शांकरससिवास्तुनः सुत्रामभं सिंधुरबंधसद्मनः ॥
कोशौकसोऽतभसुपर्णकेतुभे प्रवेशनिर्माणविधौ विगृह्यते ॥ १६ ॥

अथ वृषभतुरगमादीना शालाकर्माह—शयेति ॥ शाकरा वृषभा सप्तयस्तुरगमा एषा वास्तुनो गेहस्य प्रवेशनिर्माणविधौ सुधीभि शयाश्विने शया हस्त आश्विन अश्विनी अनयो द्वंद्वे प्रथमाद्विवचनेन पद विगृह्यते अर्थवशात् विभक्तिपरिणाम पुनरत्र सिंधुरबंधसद्मनो हस्तिबंधनगेहस्य प्रवेशनिर्माणविधौ सुत्रामभ ज्येष्ठा विगृह्यते पुन । कोशौकसो भंडारगेहस्य प्रवेशनिर्माणविधौ अतभमभिजित् नक्षत्रानंतर्गतत्वात् सुपर्णकेतुर्गरुडध्वजो विष्णुस्तस्यभ श्रवण इमे द्वे कर्मपदे विगृह्येते सगृह्येते ॥ १६ ॥

आवासनिर्माणमृगांकभीरव· सादित्यनासत्यशयर्क्षशौरिभाः ॥
आरंभणे देवकुलस्य मंजुला मुक्तादितेयाश्विनभाद्रमामठे ॥ १७ ॥

अथ देवगृहादिकर्मशुद्धिमाह — आवासेति ॥ देवकुलस्यारंभणे देवगृहारंभे आवासनिर्माणमृगांकभीरव गृहप्रारंभनक्षत्राणि मंजुला शोभना स्यु किंभूता आदित्य पुनर्वसु नासत्यमश्विनी शयर्क्ष हस्त शौरिभ श्रवण एते सहवर्तमाना पुनरिमास्तारा मठे छात्रव्रतिनां गेहे मंजुला किंभूता मुक्ते त्यक्त आदितेय पुनर्वसु आश्विनभ इमे द्वे यास्तिा ॥ १७ ॥

सदोचितं पुष्करभं प्रपाहृनावद्दस्यवेशोघटनं च तारयोः ॥
भगाजयोः क्षुद्रगणाश्रमक्रियापूर्वात्रयेशेष्वपि नैव गर्हिताः॥१८॥

अथ जलगृहादिकर्मशुद्धिमाह—सदोचितमिति ॥ प्रपाकृतौ पानीयशालाकरणे सदा पुष्करभं जलभं पूर्वाषाढा उचितं योग्यं । अट्टस्य आपणस्य वेश प्रवेशो घटनं मूल्यादिकृत्यं च भगाजयोस्तारयोः पूर्वाफल्गुनीरोहिण्योर्विषये शुभं स्यात् । क्षुद्रगणाश्रमक्रिया लघुदेवस्थानानि इत्यर्थः लघुदेवगणानां देहरी इत्यादि गृहकर्मणि नेत्र गर्हिता शुभा इत्यर्थः । केपु पूर्वात्रयैशे अपि पूर्वात्रिकं ऐशमार्द्रा एषु ॥ १८ ॥

विशेष एषोऽत्र मयोदितः पृथक् शेषं शुभाद्यं निखिलं गृहोदितम् ॥
ग्राह्यं प्रवेशे च तथा विनिर्मितौ तथैव तत्क्षुद्रवदासुरोरजम् ॥ १९ ॥

अथोपसंहारेणाह—विशेषेति ॥ यथात्राध्याये एष विशेषः पृथक् उदितः प्रोक्तः । यथा प्रवेशे निर्मितौ च शेषं निखिलं भाद्यं नक्षत्रादिकं गृहोदितं गृहेषु प्रोक्तं ग्राह्यं स्यात् । तथैव तत्क्षुद्रवत् लघुदेवगणवत् देहल्याद्यं तुल्यं आसुरोरजं असुरगेहं न गर्हितं ॥ १९ ॥

उग्रे नृपोत्तारमुपैति तीक्ष्णे राज्ञः कुमारः किल राजपत्नी ॥
मिश्रे क्वचित्कृत्तिकयाग्निदाहः समस्तभेदोरजसन्निवेशात् ॥ २० ॥

अथ गृहप्रवेशे उग्रादिभानि सापवादान्याह—उग्रइति ॥ उग्रे उग्रसंज्ञे भे समस्तभेदोरजसन्निवेशात् ग्रहान् सपूज्य प्रवेशात् समग्रग्रहवास्तुपूजनात् नृपोऽत्तारं मृत्युमुपैति । एवं तीक्ष्णे नक्षत्रे राज्ञः कुमारो नृपसुतो मृत्युमुपैति मिश्रे नक्षत्रे राजपत्नी मृत्युमुपैति क्वचित् कृत्तिकया सहाग्निदाहः स्यात् ॥ २० ॥

नोल्कानिपातावनिकंपवासरे काले निवेशोऽत्र वरो न दुर्दिने ॥
यानोदिताः सच्छकुना विलोमगा यच्छंति शं धामनिवेशकारिणः॥२१

अथोल्कादिदोषप्रवेशमाह—नोल्केति ॥ अत्र गृहे निवेशः प्रवेशो न वरः श्रेष्ठो नो स्यात् कस्मिन् उल्कानिपातोऽवनिकंपो यस्मिन् दिने इमौ जातौ तद्दिने इत्यर्थः । अनयोर्वासरे वारे पुनरकाले दुर्दिनेऽकालजातमेघजाततमसि न वरः ॥ अथ विलोमगा यानोदिता यात्रोदिता सच्छकुनाः शुभशकुनाः शं सुखं यच्छति ददति कस्य धामनिवेशकारिणः ॥ २१ ॥

न योगिनी मंदिरपृष्ठयोगिनी नियोजिनी वेश्मनिवेशिनो वशा ॥
भवेद्यदा शूलमगारपृष्ठगं त्वगारशूलो निलयप्रवेशकृत् ॥ २२ ॥

अथ गृहप्रवेशे योगिन्यादिदोषं स्पष्टमाह—न योगिनीति ॥ यदा योगिनी मंदिरपृष्ठयोगिनी गृहपृष्ठानुगामिनी न भवेत्तदा वेश्मनिवेशिनो गृहे प्रवेशकर्तुर्वशा स्त्री नियोजिनी विशेषणं योगिनी सयोगयुक्ता भवेत् । तु पुनर्यदागारपृष्ठगं शूलं भवेत्तदा निलयप्रवेशकृत् गृहप्रवेशकर्ताऽगारशूलो गृहात् शूलं रोगो यस्य स अथवा काष्ठकाष्ठकमायमहो भवेत् 'शूलं काष्ठे ॥ यागे शूलं तु पञ्चत्वे हेतुर्व कीलक' इति हैम०॥२२॥

काले निकाय्यानुगते निवेशिनो काले निकाय्यानुगतिस्त्वरं भवेत् ॥
पाशेऽपशोभे हि सराजमंडले स्वमंडले मंडलतामुपैति ना ॥ २३ ॥

कालइति—आदित्ये उत्तरे काल इत्यनुसारेण निकाय्यानुगते गृहप्रवेशगते काले सति निवेशिनः प्रवेशकर्तुर्नरस्य अरं शीघ्रं निकाय्यानुगतिः प्रेतगतिर्मृत्युर्भवेत् ॥ तु पुनः पाशे भे पाशनक्षत्रे निकाय्यानुगते सति अपगता शा लक्ष्मीः शं सुखं वा यस्मात्स अपश एवंविधो ना पुमान् भवेत्। हि युक्तार्थे राजमडले निकाय्यानुगते स ना पुमान् स्वमंडले स्वजनवर्गे मंडलता प्रभुत्वमुपैति ॥ २३ ॥

विधाय वामं द्युमणिं पुरोग्रजां सनीरकुंभं विमलांगमानसः ॥
नरश्च वेदध्वनिभिः सुमंगलैः सतोरणद्वारमगारमाविशेत् ॥ २४ ॥

अथ गृहप्रवेशविधिमाह—विधायेति ॥ नरः पुमान् सतोरणद्वारं तोरणयुक्तद्वारमगारं गेहमाविशेत् किंकृत्वा वामं द्युमणिं सूर्यं विधाय पुनरग्रजान् विप्रान् सनीरकुंभं जलभृतघटं च पुरोऽग्रे विधाय कैर्वेदध्वनिभिः सुमंगलैश्च किंभूतो नरो विमलांगमानसः निर्मलकायचित्तः॥२४॥

प्रविश्य पस्त्यं किल कालवेदिनं गुरुं च गोचीरधनैः समर्चयेत् ॥
विद्वांसमाप्तं गृहपस्तु शिल्पिनं दीनांस्तथा धान्यचयैश्च मागधान्॥२५॥

अथ गृहप्रवेशानंतर कृत्यमाह—प्रविश्येति ॥ किलेति युक्तं गृहपो गृहस्वामी पस्त्यं गेहं प्रविश्य कालवेदिनं दैवज्ञं गुरुं च गोचीरधनैः सुरभिवस्त्रधनैः समर्चयेत् पूजयेत् पुनर्विद्वांसं कोविदं आप्तं प्रधानं स्वजनादिकं वा तु पुनः शिल्पिनं कारुं समर्चयेत् । तथा दीनान् मागधान् मंगलपाठकान् धान्यचयैर्धान्यसमूहैश्च समर्चयेत् ॥ २५ ॥

तिष्येशनासत्यशयश्रवःस्थिरैरलिंजरालीं च वितानमालये ॥
कोष्ठादिकं तल्पमहानसस्थितिं सदन्त्यशेषं तदुपस्करं न्यसेत् ॥ २६ ॥

अथ गृहे भांडादिनिवेशशुद्धिमाह—तिष्येशेति ॥ पुमान् सदन्हि शुभदिने आलये गेहेऽशेषं समस्तं तदुपस्करं न्यसेत् स्थापयेत् । तान्याह अलिंजरालीं 'उत्रेवडि' इति भाषा ॥ वितानं चंद्रोदयं कोष्ठादिकं धान्यकोष्ठादिकं तल्पमहानसस्थितिं शय्यास्थानं चुल्लिस्थानादिकं कैः तिष्यः पुष्यः ईशः आर्द्रा नासत्यमश्विनी शयो हस्तः श्रवणः स्थिरसंज्ञानि तैः ॥ २६ ॥

न दर्शरिक्ताकुयुगीश्वरांगजाः कृत्स्नक्षयोपस्करसाधने हिताः ॥
खट्वांगमृद्दारुतृणादिचुल्हिका नयेन्न वा वासवपंचके कुलम् ॥ २७ ॥

अथ गृहोपस्करसाधनशुद्धिमाह—न दर्शेति ॥ कृत्स्नक्षयोपस्करसाधने समस्तगृहसामग्रीसाधने दर्शरिक्ताकुयुगीश्वरांगजा हिता न स्युः । दर्शोऽमा रिक्तातिथयः कुयुग् द्युनं ईश्वरांगना भद्रा अथवा पक्षान्तरे गृहे वासवपंचके धनिष्ठापंचके खट्वांगमृद्दारुतृणादिचुल्हिकाः कुलं गृहं न नयेत् । द्विकर्मकत्वानुक्तान् कुलमिति अधिकरणे कर्म ॥ खट्वांगानि उ°

ध्यादीनि मृत्कार्यं तृणकाष्ठादिसंग्रह इति कोऽर्थः अविष्ठोत्तरार्द्धादिपाणिपर्यंतमेषु पूर्वमत्रगर्हितमिदमपि वा पश्चात्तरेण धनिष्ठादिपंचके इति विशेषः ॥ २६ ॥

मघामृगैनेज्यकुशर्क्षधीरभादितेयमैत्रेषु च वासवद्वये ॥
कवीज्यसोमेष्वुदकुंभ्यधिक्रिया भद्राख्यरिक्तान्यतिथौ जलोदये॥२७॥

अथ गृहे जलस्थानस्थापनमाह—मघेति ॥ उदकुंभ्यधिक्रिया जलकुंभाधिकरणं पानीयाधारणं स्थापनं स्यात् केषु मघा मृगो मृगशिरः ऐनं हस्तः ऐज्यं पुष्यः कुशर्क्षं नक्षत्रं पूर्वाषाढा धीराणि ध्रुवाणि आदितेयं पुनर्वसु मैत्रमनुराधा एषां द्वंद्वे एषु च पुनर्वासवद्वये धनिष्ठायुग्मे पुनः कस्मिन् कविः शुक्रः इज्यो गुरुः सोमः एषां वारे पुनर्भद्राख्यरिक्तातिथिभ्योऽन्यतिथौ पुनर्जलोदये जलराशिलग्ने ॥ २७ ॥

नवेऽमरस्थापनमामरे दिनेऽथो मंदिरे दृष्टसितार्यमंडले ॥
उत्सृष्टविश्वर्क्षमघार्यवासरे समाचरेद्राजबले दले सिते ॥ २८ ॥

अथ गृहे देवमूर्तिस्थापनशुद्धिमाह—नव इति ॥ अथानंतरं नवे नूतने मंदिरे सुधीरमरस्थापनं समाचरेत् कुर्यात्। कस्मिन् आमरे दिने उत्तरायणे पुनर्दृष्टसितार्यमंडले शुक्रगुरूदये सति पुनः उत्सृष्ट त्यक्तं विश्वर्क्षमुत्तराषाढा मघा च आर्यवासरश्च येन स तस्मिन् उत्तराषाढामघागुरुदिनवर्जिते सिते दले शुक्लपक्षे राजबले चंद्रबले सति ॥ २८ ॥

रिक्ताशिवापक्षतिदर्शमुक्तैर्लघुध्रुवादित्यमृगांत्यमैत्रैः ॥
सकर्णयुग्मैर्गुरुसौम्यवारे नरोदये स्थापनमिष्टमस्य ॥ २९ ॥

अथ कृष्णमूर्तिस्थापनमाह—रिक्तेति ॥ अः कृष्णस्तस्य स्थापनमिष्टं शुभं अथवा इष्टा मा लक्ष्मीर्यस्य स इष्टमो नारायणस्तस्य स्थापनं कर्तव्यमिति कैः रिक्तातिथयः, शिवा तिथिः पक्षतिः प्रतिपत् दर्शोऽमा एषां द्वंद्वे एभिर्मुक्तैर्लघूनि ध्रुवाणि आदित्यं पुनर्वसु मृगो मृगशिरः अंत्यं रेवती मैत्रमनुराधा एषां द्वंद्वे एतैः किंभूतैः सकर्णयुग्मैः श्रवणधनिष्ठायुक्तैः पुनः कस्मिन् गुरुसौम्यवासरे पुनर्नरोदये नृराश्युदये ॥ २९ ॥

संस्थापयेत्स्थाणुमिहाभिजिच्छ्रवोभूतेशभाचार्यहिमांशुभीरुभिः ॥
ऐनीनजीवज्ञुषु भूभुवि क्वचिद्यमा२८कुयोगैर्जितुमोदयेऽनिशम्॥३०॥

अथात्र शिवलिंगस्थापनमाह—संस्थापयेदिति ॥ अनिशं मदा सुधीरिह गृहे स्थाणु शिवं संस्थापयेत् ॥ काभि अभिजित् श्रवणः भूतेश ईश्वरस्तस्य भमार्द्रा आचार्य. पुष्यः हिमांशुभीरवस्तारा इत्यर्थः ताभिः पुनः केषु ऐनिः शनिः इनः सूर्यः जीवो गुरुः एषां ज्ञषु पुन. केष्वंमाकुयोगैः अमाकुयोगरहितैः पुनर्मिथुनोदये मिथुनलग्ने क्वचित्स्थाने भूभुवि भौमवारे स्थाणुस्थापनमुक्तम् ॥ ३० ॥

तिष्याभिजित्तामरसोदयाजभैर्विकर्तनाचार्यविदामहर्गतैः ॥
संस्थापितोऽजस्तनुते चतुर्विधं निपोदये वर्गफलं व्ययोगकैः ॥३१॥

अथ ब्रह्मस्थापनमाह—तिष्येति ॥ अजो ब्रह्मा चतुर्विधं वर्गफलं धर्मार्थकाममोक्षसं-ज्ञं विधि तनुते विस्तारयति किंभूतः संस्थापितः कैः तिष्यः पुष्यः अभिजित् तामरसोदयः कमलजो ब्रह्मा रोहिणी अजभं श्रवणः एषां द्वंद्वे एतैः किंभूतैर्विकर्तनः सूर्यः आचार्यो गुरुः विद् बुधः एषां अहर्गतैर्दिनप्राप्तैः पुनः किंभूतैर्व्ययोगकैः कुयोगरहितैः पुनः कस्मिन् निपोदये 'कलशः कलसो निपः' इति हेमोदये ॥कुम्भोदये ॥ ३१ ॥

रुहृत्तमागे शिवभे शिफाया श्रुतौ शये शक्तिगणप्रतिष्ठा ॥
शस्ता रवावाङ्गिरसेऽर्यमे वा शरुर्यंगनाऽजितमरविसारलग्ने १२॥ ३२ ॥

अथ भवान्या गणस्थापनामाह—रुहृत्तमेति ॥ शक्तिगणप्रतिष्ठा देवीगणस्थापना शस्ता शुभा स्यात् कस्मिन् रुहृत्तमागे मृगशीर्षे शिवभे आर्द्रायां पुनः शिफायां मूले पुनः श्रुतौ श्रवणे शये हस्ते पुनः रवौ वारे आङ्गिरसे गुरौ यमे शनौ वा पुनः शरुः धनुः अंगना कन्या नितम मिथुन विसारो मीन एषां लग्ने ॥ ३२ ॥

नृभोदये पाणिजिच्छ्रुत्सु बलाननोपेंद्रगणान्प्रतिष्ठयेत् ॥
शुभे दिनेऽथैषु च भाग्यरेवतीमित्रार्यमर्क्षेषु रविं रवौ हरौ ॥ ३३ ॥

अथ रामकृष्णादिगणस्थापनामाह—नृभोदय इति ॥ सुधीर्बलाननोपेंद्रगणान् बलभद्रप्रमुखकृष्णगणान् प्रतिष्ठपेत् कस्मिन् नृभोदये नृराश्युदये वा पुनः पाणिर्हस्त अभिजित् श्रुत् श्रवणः एषु पुनः शुभे दिने ॥ अथ सुधी रविं सूर्यं स्थापयेत् केषु एषु विष्णुगणप्रतिष्ठावारभेषु पुनः भाग्य पूर्वाफाल्गुनी रेवती मित्रोऽनुराधा अर्यमा उत्तराफाल्गुनी एतेषु पुनः रवौ सूर्यदिने हरौ सिंहलग्ने ॥ ३३ ॥

पौष्णार्द्रयोरंशुसिताशुजन्मना वारेषु वाजाग्नियुगेऽसृजि क्वचित् ॥
गुहाखुयानादिपिनाकभृद्गणानास्थापयेद्युग्ममरुद्भोदये ॥३४॥

अथ स्कंदगणेशादिगणस्थापनामाह—पौष्णेति ॥ सुधीर्गुहाखुयानादिपिनाकभृद्गणान् स्कंदगणेशादिशंकरगणान् आस्थापयेत् कयोः पौष्णार्द्रयो रेवत्यार्द्रयो पुनः केषु अंशुः सूर्यः सितः शुक्रः अशुजन्मा शनिरेषां वारेषु वा पुनः क्वचित्स्थाने आजाग्नियुग अजपाद्युग पूर्वाभाद्रपदा उत्तराभाद्रपदा एतयो असृजि भौमवारे पुनर्युग्म मिथुन मरुदो भ्रमरो वृश्चिकः अनयोरुदये लग्ने ॥ ३४ ॥

महानिलर्क्षश्रुतिशेषदोर्भगे संस्थापनं त्वद्यतरं हनूमतः ॥
प्रभाकरादित्रिदिनेषु वा गुरौ स्थिरोदयेऽत्रैव मरुद्गणस्य च ॥३५॥

अथ हनूमत्स्थापनमाह—महेति ॥ हनूमतो वज्राङ्गस्य संस्थापनं त्वद्यतरं श्रेष्ठतरं स्यात् । किंभूतं संस्थापनं महानिलर्क्षे वायुभं स्वाती श्रुतिः श्रवणः शेषस्य यद्दोर्दर्भ एषु गते

पुनः केषु प्रभाकरादित्रिदिनेषु सूर्यादित्रयाणां वारेषु वा पक्षांतरे च पुनर्मरुद्गणस्य देवगणस्य संस्थापनं शुभं स्यात् । कस्मिन् अत्र हनूमत्स्थापनमुहूर्ते पुनर्गुरौ वारे स्थिरोदये ॥ ३५ ॥

सप्तर्षिसंस्थोडुषु संप्रतिष्ठामृषिव्रजस्याहुरजेज्यभे वा ॥
जीवान्हि वा जीव९।१२गृहोदये सत्केंद्रे क्वचित्सोमदिनेऽपि संतः॥३६॥

अथ ऋषिगणप्रतिष्ठामाह—सप्तर्षीति ॥ संतः सज्जनाः ऋषिव्रजस्य संप्रतिष्ठामाहुः कथयंति केषु सप्तर्षिसंस्थोडुषु सप्तर्षीणां संस्था प्रतिष्ठा तस्यां यानि उडूनि तेषु वा पुनरजेज्यभे अजः कृष्णस्तस्यभं श्रवणः इज्यभं पुष्यः पुनर्वा जीवान्हि गुरुदिने वा पुनर्जीवस्य गुरोर्गृहं धनुर्मीनश्च तयोरुदये किंभूते सत्केंद्रे क्वचित्स्थाने सोमदिनेऽपि ॥ ३६ ॥

सरोहिणेयाहनि वासवर्क्षे संस्थापयेद्योषिति लोकपालान् ॥
सितत्र्यहःशैवशिफासु शस्ता चरे च यक्षादिगणप्रतिष्ठा ॥ ३७ ॥

अथ लोकपालस्थापनमाह—सरोहिणेयेति ॥ सुधीर्लोकपालान् संस्थापयेत् कस्मिन् वासवर्क्षे धनिष्ठायां किंभूते वासवर्क्षे सरोहिणेयाहनि बुधयुक्तदिने पुनः कस्यां योषिति कन्यालग्ने ॥ पुनर्यक्षादिगणप्रतिष्ठा शस्ता शुभा स्यात् कासु सितात् शुक्रात् त्र्यहः शुक्रशनिः आदित्यः एषामहर्दिनं शैवमार्द्रा शिफा मूलं एषां द्वंद्वे आसु च पुनश्चरे लग्ने ॥ ३७॥

न्यंकूत्तमांगश्रुतितिष्यहस्तैरब्जार्ययोः सर्वसुरप्रतिष्ठा ॥
अर्हा सभूपैरपदोषदोषैर्जीवेक्षिते वारणवैरिलग्ने ॥ ३८ ॥

अथ समुच्चयदेवप्रतिष्ठामाह—न्यंकूत्तमेति ॥ सर्वसुरप्रतिष्ठा अर्हा शुभा स्यात् कैः न्यंकूत्तमागं मृगशीर्षं मृगभेदा रुरु न्यंकु, इति हैमः॥ श्रुतिः श्रवणः तिष्यः पुष्यः हस्तः एषां द्वंद्वे एभिः किंभूतैः सभूपैः सुयोगसहितैः पुनः किंभूतैरपगता दोषाः कुयोगा एव दोषा राः त्रिर्वैर्भ्यस्तानि तैः पुनः कयोरब्जार्ययोश्चंद्रगुरुदिनयोः पुनर्वारणवैरिलग्ने किंभूते जीवेक्षिते गुरुणा दृष्टे ॥ ३८ ॥

मघाशतानंदभसौम्यशार्ङ्गिभैः संस्थापितः पितृगणः प्रजाश्रिये ॥
शूरौषधीशामरवंद्यवासरे रिक्ताविमुक्तैर्व्यलिधीरभोदये ॥ ३९ ॥

अथ पूर्वजगणस्थापनमाह—मघेति ॥ पितृगणः पूर्वजगणः संस्थापितः प्रजाश्रियै संतानलक्ष्म्यै स्यात् । कैः मघा शतानंदो ब्रह्मा रोहिणी 'स्थविरः शतानंदः पितामहः' इति हैमः ॥ सौम्यं मृगशीर्षं शार्ङ्गी श्रवणः एषां द्वंद्वे एभिः पुनः कैः शूरः सूर्यः औषधीशश्चंद्रः अमरवंद्यो गुरुः एषां वासरैः किंभूतैः रिक्ताविमुक्तैः रिक्तातिथिरहितैः पुनः कस्मिन् व्यलिधीरभोदये वृश्चिककर्कहितस्थिरलग्नोदये ॥ ३९ ॥

चैत्येऽथ जैनप्रतिमास्थलं न्यसेच्चरे चरर्क्षोदयवत्यनेहसि ॥
जयासु पूर्णासु बुधे सिते विधौ क्वचिच्च चित्राश्विनभेऽपि वा रवौ॥४०

अथ जैनबिम्बप्रतिष्ठाशुद्धिमाह—चैत्य इति ॥ सुधी चैत्ये जिनसद्मनि जैनप्रतिमास्थल जिनप्रतिमाया स्थलं यवासणादिप्रासादिकं न्यसेत् । कस्मिन् चरे चरलग्ने चरर्क्षोदये चरराशु वययुक्तेऽनेहसि काले पुन कासु जयासु पूर्णासु तिथिषु पुन कस्मिन् बुधे सिते शुक्रे विधौ वा च पुनश्चित्राश्विनभे वा पक्षान्तरे क्वचित् स्थाने रवौ सूर्यवारेऽपि ॥ ४० ॥

यस्यामरस्य क्रियते प्रतिष्ठा वारे तिथौ भे च भवेत्तदीये ॥
सुयोगलग्ने शुभराशिलग्ने लग्ने सुशुद्ध्योदितमासकालके ॥४१॥

अथ यस्य प्रतिष्ठा क्रियते तस्य देवस्य वारादिग्राह्यतामाह—यस्येति ॥ यस्यामरस्य देवस्य प्रतिष्ठा क्रियते तदिये तस्य देवस्य सम्बन्धिनि वारे तिथौ भे नक्षत्रे च पुन कस्मिन् सुयोगलग्ने शुभयोगप्राप्ते पुन शुभराशिप्राप्ते एवंविधे लग्ने पुन सुशुद्ध्योदितमासकालके शुद्ध्या निर्दोषेण प्रोक्तमासकाले ॥ ४१ ॥

स्वाम्नायभेदोदितहोमकर्मणा दानैरिभाघ्न्याश्वतुलारसाननैः ॥
शास्त्रागमज्ञो ननु कालवेदिनः संतोष्य विप्रानिह देवता न्यसेत् ॥४२॥

अथ देवगृहे देवस्थापनमाह—स्वाम्नायेति ॥ ननु निश्चितं शास्त्रागमज्ञ इह देवगृहे देवता न्यसेत् । केन स्वाम्नायभेदः स्वसम्प्रदायभेदस्तेन उदितं प्रोक्तं होमकर्म तेन किंकृत्वा कालवेदिनो दैवज्ञान् विप्रान् च संतोष्य कैरिभा हस्तिन आघ्न्या गाव अश्वास्तुला रसा भूमि प्रमुखानि येषु तैर्दानै ॥ ४२ ॥

अनेकदेवायतनानि भारते कृतानि येनाप्तशकोऽधिदेवतः ॥
संस्थापिता वेदविधानदानतः श्रीविक्रमार्कोऽवनिपो विराजताम् ॥४३॥

इतिश्री कविकालिदासोदिते ज्योतिर्विदाभरणे नवगृहप्रवेशदेवताप्रतिष्ठाध्यायः सप्तदश ॥

अथोपसंहारेण विक्रमनृपं वर्णयति—अनेकेति ॥ येन विक्रमार्केण भारते भरतक्षेत्रेऽनेकदेवायतनानि देवगृहाणि कृतानि पुनर्येनाधिदेवता देवेश्वरा संस्थापिता प्रतिष्ठापिता स विक्रमार्कोऽवनिपो भूमिपतिर्विराजतां भातु । किंभूत आप्तशकः प्राप्तशक अपशक इति पाठे अपगता शका म्लेच्छा यस्मात्स स्वीकृतम्लेच्छ इत्यर्थ । अथवागपत शको यस्मात् पूर्वशकनिवृत्तिकृत् निजशकप्रवृत्तिकृत् इत्यर्थ ॥ ४३ ॥

इति श्रीपौर्णिमागच्छाधिराजभट्टारकपुरन्दरश्रीमहिमाप्रभसूरिचरणाराधक
टीकायमानाद्यम्भवरत्नविरचिताया श्रीकालिदासकृतज्योतिर्विदाभरणस्य सुखबो-
धिकायां नवगृहप्रवेशनामसप्तदशाध्यायः सप्तदश ॥ १७ ॥

अग्न्याधानादि विशेषसंस्कारप्रकरणम् ।

भूत्वा गृही वन्हिपरिग्रहं चरेत्स दारकालेंऽशुभदुत्तरायणे ॥
दायाद्यकालेऽप्युत सोमपग्रहावनस्तगौ स्तो ननु चेद्दजुर्गुरुः ॥ १ ॥

अथ गृहप्रवेशानंतरं अग्निसेवनं घटतेऽतोऽग्न्याधानाख्यसंस्कारमाह—भूत्वेति ॥ गृही भूत्वा गृहस्थतां प्राप्य स नरो वन्हिपरिग्रहमग्न्याधानं चरेत् कुर्यात् कस्मिन् दारकाले विवाहकाले पुनरंशुभदुत्तरायणे उत्तरायणगते सूर्ये पुनर्दायादे भवो दायाद्यो भ्रातृणा धनविभागस्तस्यकाले समयेऽपि उत चेत् सोमपग्रहौ द्विजग्रहौ गुरुशुक्रौ अनस्तगौ स्तो भवत अस्तरहितौ इत्यर्थः ननु निश्चितं चेत् गुरुः ऋजुरवक्रः स्यात्तदा ॥ १ ॥

स्ववेदशाखोदितकर्मकालो मुख्योऽथ दक्षैरिह मानितः स्यात् ॥
तच्छाखिनोऽसौ क्वचिदंतकाशेऽयनेऽपि वा तद्विपयानुकूलः ॥ २ ॥

अथाग्न्याधाने समयं दर्शयति—स्ववेदेति ॥ अथेह अग्न्याधानविधौ दक्षैर्निपुणैः स्ववेदशाखोदितकर्मकालो निजवेदशाखाप्रोक्तकृत्यसमयोऽसौ मुख्यो मानितोऽगीकृतः स्यात् । कस्य तच्छाखिनस्तस्य वेदस्य शाखिनो नरस्य क्वचित्स्थाने वा पक्षांतरेऽंतकाशेऽयने दक्षिणायनेऽपि तद्विषयानुकूलस्तस्य कालस्य गोचरानुकूलः स्यात् ॥ २ ॥

सदारकालोऽभिहितश्चतुर्थीकर्मोत्तरस्तत्र परिग्रहोऽग्नेः ॥
दायाद्यकः सोदरसारभागस्त्वुपासिताग्नौ जनकेऽग्रजे च ॥३॥

अथ दारादिकालेऽग्न्याधानमाह—सदारेति ॥ चतुर्थीकर्मोत्तरो विवाहतश्चतुर्थदिने होमविधानादूर्ध्वं सदारकालः शुभदारकालो विवाहकालोऽभिहितः प्रोक्तः । तु पुनः सोदराणा भ्रातृणा सारभागो द्रव्यविभागो दायाद्यकोऽभिहितः प्रोक्तस्तत्र सदारकाले दायाद्यकाले वाऽग्नेः परिग्रहोऽग्न्याधानं स्यात् । कस्मिन् उपासिताग्नौ सेविताग्न्याधाने जनके पितरि अग्रजे भ्रातरि च सति ॥ ३ ॥

तदाज्ञया वाग्निपरिग्रहोऽस्मिन्सौम्यायने भूषणभाजि काले ॥
कलौ स्वशाखाद्दतकर्मसिद्धो यथावकाशे तदसंभवत्वात् ॥ ४ ॥

अथ आज्ञयाग्निपरिग्रहं दर्शयति—तदेति ॥ वा पक्षांतरे कलौ अस्मिन् दारकाले वा दायाद्यकाले तदाज्ञया पितृभ्रात्राज्ञयाग्निपरिग्रहः स्यात् । कस्मिन् भूषणभाजि निर्दोषे गुरुसितविकृतचाररहिते काले ॥ अथ तदसंभवत्वात्तयोर्जनकज्येष्ठभ्रात्रादेरभावत्वाद्यथावकाशे यथाप्राप्तकाले स्वशाखाभिर्निजशाखाभिरादृतं कर्म तेन सिद्धो निष्पन्नोऽग्निपरिग्रहः स्यात् ॥ ४ ॥

रिक्तातिरिक्ते रविसूनुमुक्ते भद्रोज्झिते पक्षयुगे व्ययोगे ॥
धूमध्वजाधानमुशंति संतः संतोषभूपाः सति सोमवीर्ये ॥ ५ ॥

अथाग्निपरिग्रहे कुयोगान्निषेधति—रिक्तेति ॥ सतोषभूपा संतोषभूपणा सतो धूमध्वजाधानमग्निपरिग्रहमुशंति वाञ्छंति कस्मिन् रिक्तातिरिक्ते रिक्ततिथिवर्जिते रविसूनुमुक्ते शनिवर्जिते भद्रोज्झिते विष्टिवर्जिते व्ययोगे कुयोगवर्जिते एवंविधे पक्षयुगे पुनः कस्मिन् सति शुभग्रहे सोमवीर्ये सति ॥ ५ ॥

वृद्धश्रवोवन्हिभधीरभेषु वृद्धश्रवोवन्हिभजीवभेषु ॥
कुरंगमूर्द्धान्त्यभयोरशंसन्धनंजयाधानविधानमार्याः ॥ ६ ॥

अथाग्निपरिग्रहे भशुद्धिमाह—वृद्धेति ॥ आर्या आचार्या धनंजयाधानविधानकर्म अशंसन् अकथयन् केषु वृद्धश्रवा इन्द्रो ज्येष्ठा वन्हिभं कृत्तिका जीवभं पुष्य एषा द्वंद्वे एषु पुनः कयोः कुरंगमूर्द्धा मृगशीर्षं अन्त्यभं रेवती तयोः ॥ ६ ॥

वैरोचनादित्यभविश्वकर्मभैर्जगाद कश्चिद्धुतभुक्परिग्रहं ॥
एतेषु युक्तेष्वपि सर्वशाखिना नासौ क्षये मास्यधिके च हायने ॥७॥

वैरोचनेति॥कश्चित् हुतभुक्परिग्रहं जगाद केषु वैरोचनं रोहिणी आदित्यभं पुनर्वसु विश्वकर्मभं चित्रा एषां द्वंद्वे एभिर्युक्तेषु एतेषु पूर्वोक्तयोगेषु केषां सर्वशाखिना सर्ववेदशाखिना विप्रा-णां । अथासौ वन्हिपरिग्रहो न स्यात् कस्मिन् क्षये मासि अधिके मासि च हायने वर्षे॥७॥

निषे११कुली रे४शकलि१२न्युतोदये मृगे१०तदंशेऽपि विभावरीविभौ॥
निर्मंथदारुप्रभवस्तनूनपाच्छमं समीयादिति कोविदा विदुः ॥ ८ ॥

अथ कुम्भादिलग्ने नूतनाग्निपरिग्रहं निषेधति— निष इति ॥ निर्मंथदारुप्रभवो मथनकाष्ठसंभवस्तनूनपात् अग्निः शममुपशांतिं क्षयमित्यर्थः समीयात् प्राप्नुयात् । कदाग्निसंभवस्तदाह उत वितर्के कस्मिन् निषे घटे कुलीरे कर्के शकलिनि मीने मृगे मकरे उदग्लग्ने तदंशे तेषां घटादीनां नवांशेऽपि विभावरीविभौ चन्द्रे सति इति कोविदा पंडिता विदुः ॥ ८ ॥

तपो९मनीषा५बल३लब्धि११केंद्रगो मित्रत्रयार्यौ तनुतोऽग्निसंग्रहे ॥
स्तोमश्रियं वा द्रविणा२य११मान१०धी५रंध्रपग३स्ताऽरकराजनंदनः॥[1]

अथाग्निपरिग्रहे वारादिशुद्धिमाह—तपइति ॥ मित्रत्रयार्यौ मित्रात् सूर्यात् त्रयः रवि सोमौ भौमश्चेति त्रय आर्यो गुरुः इमौ अग्निसंग्रहे स्तोमश्रियं यज्ञे शोभा बहुश्रियं तनुतो विस्तरयतः किंभूतौ मित्रत्रयार्यौ तपो नवमं ९ मनीषा पंचमं५ बलं तृतीयं ३ केंद्र

1 वृद्धश्रवा इन्द्रः वन्हिभमग्निः उभ मित्र वा । द्वंद्वेवताकत्वेन विशाखा धीरभानि मृदवर्गकारं धवा विष्णुः श्रवणं वन्हि कृत्तिका जीवभं पुष्येति

१।४।७।१० एघु गतौ ॥ वा पुनस्तारकराजनंदनो बुधः स्तोमश्रियं तनोति किंभूतो द्रविणं द्वितीयं २ आय एकादशं ११ मानो दशमं १० धीः पंचमं ५ बंधुश्चतुर्थं ४ एतद्भवनोपगतः ॥ ९ ॥

यज्वा गुरौ शङ्युदये ऽग्निसंग्रहे क्रिये १ ऽसृजि व्योम्नि १० मदे ७ च सत्फलं मित्रे विमानोपचये ३।६।११ त्रिनेत्रजे तथैव मंदे च विधुंतुदे भवेत् ॥ १० ॥

यज्वेति ॥ यज्वा यज्ञकृत् अग्निसंग्रही सत्फलः प्राप्तशुभफलो भवेत् कस्मिन् शङ्युदये चतुर्थस्थे गुरौ पुनः क्रिये मेषराशौ वा व्योम्नि दशमे वा मदे सप्तमभावेऽसृजि भौमे सति पुनर्विमानोपचये दशमभाववर्जिते उपचये ३।६।११ मित्रे सूर्ये सति तथैव मंदे शनौ सति च पुनर्विधुंतुदे राहौ सति ॥ १० ॥

वशा लयं याति लये ८ विधौ खले नरश्च साधावुभयोरिहामयः ॥ नीचे जितेऽसाधुभिरुद्गमप्रभावधोगतिं याति कृशानुकोपतः ॥ ११ ॥

वशेति ॥ लयेऽष्टमभावे विधौ चंद्रे सति वशा स्त्री लयं क्षयं याति च पुनर्लये खले ग्रहे सति नरो लयं याति पुनरिह लग्नेऽष्टमभावस्थे साधौ सौम्यग्रहे सति उभयोर्दंपत्योरामयो रोगः स्यात् । पुनर्नीचे नीचभावस्थेऽसाधुभिः खलग्रहैर्जिते वा एवंविधे उद्गमप्रभौ लग्नस्वामिनि सति नरोऽधोगतिं नरकगतिं याति कस्मात् कृशानुकोपतः आहिताग्निकोपप्रभावात् ॥ ११ ॥

स्वनीचगैरंशुमदंशुसंकुलैः सुत्राममंत्रीद्विजराजमंगलैः ॥ स्वपर्ययस्थातृगृहोपवर्तिभिर्नवानलाधानमिने मधावजे ॥ १२ ॥

स्वनीचेति॥ अनलाधानं अग्न्याधानं नैव स्यात् कैः सुत्राममंत्री इंद्रगुरुः द्विजराजश्चंद्रः भौम एषां द्वंद्वे तैः किंभूतैः स्वनीचगैर्निजनीचराशिगतैः पुनः किंभूतैः अंशुमदंशुसंकुलैः सूर्यकिरणलुप्तैः पुनः किंभूतैः स्वपर्ययस्थे निजरिपुः अस्ताष्टमभावः अनयोर्गृहोपवर्तिभिः स्वशत्रुगृहमृत्युगृहगतैः पुनः कस्मिन् मधौ चैत्रेऽजे मेषस्थे इने सूर्ये सति ॥ १२ ॥

दिनावसानप्रहरोदयो दयां द्यति द्विजस्याहितकृष्णवर्त्मनः ॥ तमी तदाधानविधौ मरुत्तमी तदा समस्तागमतात्रदायता ॥ १३ ॥

अथाग्निपरिग्रहे कालशुद्धिमाह—दिनेति ॥ दिनावसानप्रहरोदयश्चतुर्थप्रहरलग्नं द्विजस्य दयां द्यति खंडयति किंभूतस्य द्विजस्य आहितकृष्णवर्त्मनः स्थापिताग्नेः तथा तदाधानविधौ मरुत्तमी देवरात्रिर्दक्षिणायनं तमी दक्षिणायनरजनी अत्ता नाशस्तस्यादायता अत्रदायता आयुर्दायका इत्यर्थः । समस्तागमता सर्वशास्त्रप्रमाणता स्यात् ॥ १३ ॥

हुताशनोपासनकालवत् क्वचिद्याम्यायनं सत्समुदीरितं हि तत ॥ श्रुतिप्रमाणान्यतया न तद्वचः प्रमाणमस्मादुतमुत्तरायणम् ॥ १४ ॥

अथात्र कस्यचिन्मतं दूषयति–हुताशनेति ॥ क्वचित्स्थाने हि यस्मात् तत् याम्यायनं शुभं समुदीरितं प्रोक्तं ।किंभूतं याम्यायनं हुताशनोपासनकालवत् अग्न्याधानसेवनकालयुक्तं, तद्वचः प्रमाणं न स्यात् कथं श्रुतिप्रमाणान्यतया वेदप्रमाणतो वैपरीत्येन अस्मात् कारणात् उत्तरायणं कृतं सत्यं स्यात् ॥ १४ ॥

कृतावसथ्यावनिदेवताभिः स्ववेदभेदोदितकालसाध्याः ॥
तत्पाकयज्ञाश्च हविष्यसंस्थाः सप्तैव सप्तानु च सोमसंस्थाः ॥१५॥

अथ संस्थानां त्रिकं सेव्यमाह—कृतेति ॥ कृतावसथ्यावनिदेवताभिर्विहिताग्न्याधानस्थानविप्रैस्तत्पाकयज्ञास्तस्यावसथ्यस्य पाकयज्ञाः सप्त च पुनर्हविष्यसंस्था घृतयज्ञसंस्था सप्त अनु पश्चाच्च सोमसंस्थाः संस्कारविशेषयज्ञाः सप्त एवं स्ववेदवेदोदितकालसाध्या निजनिजवेदशाखावेदोक्तकालेन साधनीयाः ॥ यतः॥ अग्न्याधेय. १ अग्निहोत्र २ दर्शपूर्णमास्यौ ३ चातुर्मास्यानि वैश्वदेवपर्व वरुणप्रघासपर्व शाकमेधपर्व शुनासीरीयपर्व ४ पशुबंध. ५ सौत्रामणी६ पाकयज्ञ७इति सप्त हविर्यज्ञसंस्थाः १॥ श्रवणाकर्म१ आश्वयुजी कर्म२ आग्रहायणी ३ अपूपाष्टका ४ मांसाष्टका ५ शाकाष्टका ६ वर्षाष्टका ७ इति पाकयज्ञसंस्थाः सप्त ॥ अग्निष्टोमः१ अत्यग्निष्टोमः२ उक्थ्यः ३ षोडशी४ अतिरात्र.५ वाजपेयः ६ आप्तोर्याम ७ इति सोमसंस्थाः सप्त ॥ अथः आवसथ्यप्रसंगाद्वेदिकामानं लिख्यते ॥ *षडरत्निर्भवेत्पाशो मध्ये पंचसु चिन्हिता ॥ द्विरष्टेऽङ्गुलपट्टे च त्रिष्वष्टादशकेषु च॥१॥सार्द्धहस्ते च पाशः स्याद् वेदी स्यात्पौर्णिमासिकी। एवं रज्जुं विनिर्माय वेदिं कुर्यात्॥ तत्प्रकारस्तु 'सूत्रे प्राचि प्रसार्यान्त्यशंकोः पाशौ प्रमुच्य तौ ॥ षडंगुलगतं चिन्हमाकर्षेन्नैर्ऋतीं दिशं ॥ एवं कृते द्विहस्तान्ते शंकुमारोपयेत्ततः॥ षडंगुलगत चिन्हमाकर्षेद्वायुगां दिशं ॥३॥ तत्रापि द्विकरे चिन्हे शंकुमारोप्य तं त्यजेत्॥ कृत्वैव पश्चिमे श्रोणी अंसौ पूर्वे प्रसाधयेत् ॥ ४॥ तस्या रज्जोश्चतुर्थी कमाकर्षेद्दक्षिणां दिशं ॥ आकृष्य रज्जुगे चिन्हे पंचमे शंकुमानयेत् ॥ ५ ॥ एवमेवोत्तरे भागे आकर्षेदीशगां दिशं ॥ पञ्चाके शंकुरत्रापि तेषु सूत्राणि वेष्टयेत् ॥ ६ ॥ मध्ये संग्रहणार्थाय तत्रैव ॥ आनीय रज्जुं पूर्वार्द्धात् पश्चार्द्धं यावदेव तु ॥ द्विगुणीकृत्य तां रज्जुमन्ते नयात्पुरः कुक्षौ ॥ ७॥भ्रामयेत्तेन मानेन तया रज्ज्वाष्टभागया॥ वा पृथुत्वतुरीयेण मध्येनालिख्य संग्रहः ॥८॥ अथवा ॥ वेदिश्रोण्यंशयोर्मध्ये तया रज्ज्वाष्टभागया । विलिखेन्मध्यतो वेदौ संग्रहं मध्यसंग्रहः ॥९॥अपरामिता वा वेदिं कुर्यात् ॥ त्रिचतुष्टादिमानं उत्सृज्य गार्हपत्याहवनीययोरन्तरालं षोढा सप्तधा वा गंतुमर्मं त्रेधा विभज्यापरत्रितृतीयलक्षणेन दक्षिणायन्य नाभिप्रान्तिर्वा पर्यास्योत्तरास उत्करः॥ अरत्निश्चतुरस्रस्तु पूर्वस्याग्नेः खरो भवेत् ॥ रथचक्राकृतिः पश्चाच्चन्द्रार्द्ध इव दक्षिण ॥१॥ अग्रेऽदर् सार्द्धबाहुके मध्य वृत्तो लिखेद्वृत्तमेकं न.विदाद्या प्राची या मध्यगा भवेत् ॥ उदगर्द्धे विपर्यासं स्यान् रेखा दाक्षिणस्य तु ॥ गार्हपत्यपदे सार्द्धत्रयोदशाङ्गुलमितसूत्रभ्रमेण निष्पादनीयं। गार्हपत्यस्य पुरस्तादष्टमुष्टकमेष्वेकादशसु द्वादशसु मत्या गाहवनीय इत्यल ॥ १५ ॥

* आकृति नंबर १७

दैत्यादितेयार्चितमौढ्यकालस्तथोपरागक्षयवृद्ध्यनेहाः ॥
संक्रांतिराद्दुष्यति पाकयज्ञानेष्वन्यदोषप्रकरो न दुष्टः ॥ १६ ॥

अथ शुक्रास्तादिदुष्टकाले पाकयज्ञानाह—दैत्येति ॥ दैत्यादितेयार्चितमौढ्यकालः शुक्रगुर्वोरस्तकालस्तथा उपरागो ग्रहणं तथा क्षयवृद्ध्यनेहाः क्षयाधिकमासादिस्तथा संक्रांतिः पाकयज्ञान् दुष्यति पुनरेषु पाकयज्ञेषु अन्यदोषप्रकरो न दुष्टः स्यात् ॥ १६ ॥

मघौ निदाघे शिशिरे च मेनिरे बुधा हविःसोमविधानमादरात् ॥
श्रितानलाधानदिनोडुयुग्गणं स्फुरत्तनौ वेदविभौ द्विजगृहे ॥१७॥

मघाविति ॥ बुधा आदरात् सोमविधानं मेनिरे बुबुधिरे कस्मिन् मघौ वसंते निदाघे उष्णकाले शिशिरे च सति पुनर्द्विनौ गुरुशुक्रौ तयोर्गृहं धनुर्मीनौ वृषतुले जातित्वादेकवचनं तस्मिन् द्विजगृहे वेदविभौ वेदस्वामिनि किंभूते वेदविभौ स्फुरत्तनौ अस्तरहिते किंभूतं सोमविधानं श्रितानलाधानदिनोडुयुग्गणं प्राप्ताग्न्याधानदिननक्षत्रयोगगणं ॥ १७ ॥

सौम्यायने दूषणमुक्तवासरेऽनिशं महाहोमविधिं समाचरेत् ॥
पूर्णाजयानंदवतीनसद्दिनैः सुगोचरे वैकृतकालवर्जिते ॥ १८ ॥

अथ होमविधानशुद्धिमाह—सौम्येति ॥ अनिशं सदा सुधीर्महाहोमविधिं समाचरेत् कुर्यात् कस्मिन् सौम्यायने उत्तरायणे किंभूते दूषणमुक्तवासरे दोषवर्जितदिने पुनः किंभूते सुगोचरे शुभग्रहगोचरे पुनः किंभूते विकृतौ भवो वैकृतः कालस्तेन वर्जिते पुनः कैः पूर्णास्तिथयः जयास्तिथयः नंदवत्यो नंदास्तिथयः इनसद्दिनानि सूर्यशुभग्रहदिनानि एषां द्वंद्वे एतैः ॥ १८ ॥

हुताशनाधानहितर्क्षवर्गे शैवश्रवोऽजांघ्रिशयान्वितेऽस्मिन् ॥
विदुर्महारुद्रमुखाननेकान् होमानभिज्ञा हि सुयोगयोगे ॥ १९ ॥

अथ होमे भशुद्धिमाह—हुताशेति ॥ हि अवधारणे अभिज्ञाः पंडिताः अनेकान् महारुद्रमुखान् होमान् विदुः कस्मिन् अस्मिन् हुताशनाधानहितर्क्षवर्गे अग्न्याधानशुभकारकनक्षत्रसमूहे किंभूते शैवमार्द्रा श्रः श्रवणः अजो रोहिणी अंघ्रिः पूर्वाभाद्रपदा शयो हस्तः एषां द्वंद्वे एभिरन्विते युक्ते पुनः किंभूते सुयोगयोगे शुभयोगे शुभयोगप्राप्ते ॥ १९ ॥

पूर्णाहुतिः पुण्यतमा सदाहुतौ पूर्णातिथौ पुण्यधिया प्रशस्यते ॥
नंदाजयास्वावभृतं निमज्जनं पूर्णासु वा सन्नृदये सदक्षयगि ॥२०॥

अथ कृताहुतौ यज्ञांतस्नानशुद्धिमाह—पूर्णेति ॥ पुण्यधिया पवित्रबुद्धिना नरेण पूर्णाहुतिः पुण्यतमा अतिशयेन पुण्या प्रशस्यते कस्यां सदां शुभदशायां आहुतिर्यस्यां पूर्णातिथौ । नंदाजयासु यज्ञांतस्थितिन् भवभृतं निमज्जनं स्नानं प्रशस्यते कामु ने-

राजयासु तिथिषु वा पूर्णासु तिथिषु सदन्हन्यपि शुभग्रहदिनेऽपि ।किंभूतं निमज्जनं सता नृणां शुभनरराशीनामुदयो लग्नं यस्मिंस्तत् ॥ २० ॥

उदीरितं चावभृताभिषेचने नृपाभिषेके वलयत्रयं क्रमात् ॥
विराजि सम्राजि च राज्यदस्तथा हयाधिपे सिंधुरपे नराधिपे ॥२१॥

अप यज्ञांतस्नाने राजमुद्राचक्रं दर्शयति—उदीरितमिति ॥ अवभृथाभिषेचने नृपाभिषेके च वलयत्रयं कलशचक्रत्रयमुदीरितं प्रोक्तं कस्मिन् विराजि विशेषेण राजते इति विराट् तस्मिन् तथा सम्यक्प्रकारेण राजते इति सम्राट् तस्मिन् राजते इति राट् तस्मिंश्च क्रमात् क्रमेण हयाधिपेऽश्वपतौ सिंधुरपे गजाधिपतौ नराधिपे चादश्चक्रत्रयं प्रोक्तं ॥ यतः 'अग्निहोत्रादिकर्ता यो ब्राह्मणो राट् प्रकीर्तितः ॥ सम्राड् वै वाजपेयेन विराट् तत्पूर्वयज्ञत.' ॥ १ ॥ इति यज्ञाते विप्राणां भूपानामभिषेके चेद चक्रत्रयं ज्ञेयमिति हार्द ॥२१॥

एतक्रमेणोत्तरपूर्वयाम्यगं भपंचनाडीपरिभिन्नमालिखेत् ॥
सदैव नासत्यमघाशिफादिकत्रिभेदतारापटलावहं त्वदः ॥२२॥

अथ तच्चक्रत्रये नक्षत्रस्थापनं दर्शयति—एतक्रमेति ॥ सुधीः क्रमेण उत्तरपूर्वयाम्यग उत्तरपूर्वदक्षिणदिग्गतं भपचनाडीपरिभिन्नमेतच्चक्रत्रयमालिखेत् पुनः सुधीरदश्चक्रत्रय सदैव नासत्यमश्विनी मघा शिफा मूलमित्यादिकेन अश्विन्यादिप्रथमेन त्रिभेदतारापटलावहं भेदत्रयेण नक्षत्रसमूहभृत लिखेत् । कोऽर्थः प्रथममश्वपतिच्छत्रचक्रं नक्षत्रपचनाडिकाविद्धं तत्र प्रथमं मस्तकेऽश्विनी देया ततो भरणी कृ रो मृ आ.पु पु.अ. इति । एवं द्वितीयं गजपतिच्छत्रचक्र तत्र प्रथमं मस्तके मघा दातव्या तत पू.उ.ह चि स्वा.वि.अ.ज्ये. इति। तृतीयं नरपतिच्छत्रचक्र तत्र प्रथमं मस्तके मूल दातव्य ततः पू.उ.श्र.ध.श.पू.उ.रे. इति वलयत्रय ॥ २२ ॥

अतोऽपरेषु क्षितिपेषु यज्वसु स्वकीयनामाक्षराभादिकं त्विदं ॥
आधारनामासनपट्टसिंहवत् सिंहासनानीत्यपि भेदपंचकं ॥२३॥

अथ विशेषत पचभेदं सिंहासनत्रयचक्रमाह—अत इति । यज्वसु यज्ञकर्तृषु अश्वपति अश्वपतिगजपतिनरपतिषु इद च त्रयं साधारनामासनपट्टसिंहवत् ४ सिंहासनमपि आधारः आसनं पट्टः सिंहः सिंहासनमित्यपि ईदृशमपि भेदपंचकं सिंहासनत्रयं चक्रं भवति । तु पुनः अतोऽश्वपादिभ्योऽपरेषु क्षितिपेषु राजसु स्वकीयनामाक्षरभादिकं नृपनामनक्षत्रतः स्थापनीयमिति चक्र स्यात् ॥ तथाचोक्त 'आदौ चक्रं समालिख्य छत्रत्रयमुशोभनं । अश्विन्यादि न्यसेत्तत्र सप्तविंशानि भानि च ॥ १ ॥ अश्विन्याद्यं मघाद्यं च मूलाद्यं च क्रमेण च । उत्तरे पूर्वदक्षिणे एतच्छत्रत्रय मत ॥२॥ प्रतीचीमध्यरेखाया ईशानात् हयाधिप । आग्नेयात गजाधीशस्तदने च नराधिप.॥३॥अश्वाध्यक्षगजाध्यक्षनराध्यक्षाः क्रमेण च । पूर्वा

छत्रविभागेन ज्ञातव्यं च शुभाशुभं ॥ ४ ॥ अमीषां भूभृतामृक्षं यत्र-छत्रे व्यवस्थितं । तच्छत्रं तस्य भूपस्य शुभाशुभफलप्रदं ॥ ५ ॥ चामरं कलशं वीणां छत्रं दंडं पतद्ग्रहं । आसनं कीलकं रज्जुर्नव भेदाः प्रकीर्तिताः ॥६॥ यस्य छत्रे स्थितः सौरिर्भंगं तस्य विनिर्दिशेत् ॥ इत्यादि फलं ज्ञेयमिति ॥ अथातः संप्रवक्ष्यामि चक्रं सिंहासनत्रयं । येन विज्ञातमात्रेण क्रियते राज्यनिर्णयः ॥ १ ॥ सप्तविंशतिऋक्षैस्तु एकैकं च नवात्मकं । अश्विनीमघमूलाद्यं पंचनाडीविभेदकं ॥ २ ॥ अश्विन्याद्युत्तरे भागे मघाद्यं पूर्वतः स्थितं । मूलाद्यं दक्षिणे चापि ज्ञातव्यं नृपतित्रयं ॥ ३ ॥ इतरेषु च राज्येषु नृपनामर्क्षतो वदेत् । शुभाशुभमिदं सर्वं यस्य यत्यासनस्थितं ॥ ४ ॥ नाडिकापंचभेदेन एकैकस्यासने भवेत् । आधारमासनं पट्टं सिंहं सिंहासनं तथा ॥ ५ ॥ आधारादिफलं सर्वमेकैकस्य वदाम्यहं । ग्रहवेधवशाज्ज्ञेयं सौम्यक्रूरैः शुभाशुभं ॥६॥ नृपस्याधारमाचर्क्षे यदा पट्टोऽभिषेचितः । पराधीनगतो राज्यं कुरुते नात्र संशयः ॥७॥ आसनस्थेन ऋक्षेण नीतियुक्तो भवेन्नृपः । प्रधानपुरुषादेशी प्रजाशांतिकरो भवेत् ॥ ८ ॥ पट्टऋक्षे यदा राजा चोपविष्टो य आसने । पूर्वराज्यस्थितेस्तुल्यां चिरं पालयते महीं ॥९॥ सिंहरू‍ी भवेद्राजा सिंहऋक्षासने स्थितः । संग्रामस्य प्रियो नित्यमसाध्यो मंत्रिणामपि ॥ १० ॥ सिंहासने गते ऋक्षे तेजस्वी भीषणाकृतिः । चलचित्तो महाक्रोधी प्रजापीडाकरो नृपः ॥ ११ ॥ इत्याद्यत्र ग्रहाणामपि फलं ज्ञेयं ॥ २३ ॥

यज्वा च राजा गतधर्मलक्ष्मीराधारनामोडुनि नीतिसंपत् ॥
इहासनर्क्षेऽनु च पट्टधिष्ण्ये प्रजाप्रियो भेऽर्थबलोऽस्ति सिंहे ॥२४॥

अथात्र चक्रे स्थितनक्षत्रफलमाह—यज्वेति॥ इह चक्रे आधारनामोडुनि आधारस्थिते ऋक्षे यज्वा राजा च गतधर्मलक्ष्मीः परहस्तगतराज्यलक्ष्मीर्भवेत्। एवमासनर्क्षे सति नीतिसंपद् नीतियुक्तो भवेत् । अनु पश्चाच्च पट्टधिष्ण्ये सति प्रजाप्रियो भवेत् । सिंहे भे सिंहऋक्षे सति अर्थबलोऽस्ति ॥ २४ ॥

सिंहासने शासनलोकशोको धिष्ण्ये भवेदत्र विपापवेधे ॥
तत्कालचंद्रोडुनि साध्ववस्थेऽभिषेकितोऽसौ सुखभृन्नृलग्ने ॥ २५॥

सिंहेति ॥ सिंहासने धिष्ण्ये सति शासनलोकशोकः प्रजादुःखकारको नृपो भवेत् । असौ नृपः सुखभृत् सुखकारकः स्यात् किंभूतेऽत्र विपापवेधे पापग्रहवेधवर्जिते साध्ववस्थे शुभावस्थाया स्थिते तत्कालचंद्रोडुनि अभिषेकचंद्रनक्षत्रे नृलग्ने वाभिषेकितः सन् ॥ २५ ॥

भद्रासनेऽसद्व्यधगेऽभिषेकभे सदन्विते वेतशिवोध्वरी नृपः ॥
भद्रासने सद्व्यधगेऽभिषेकभे सदन्विते वेतशिवोध्वरी नृपः ॥ २६ ॥

अथात्र चक्रे पापग्रहविद्धफलमाह–भद्रेति ॥ भद्रासनेऽसद्व्यधगे पापग्रहवेधप्राप्तेऽसदन्विते पापग्रहयुक्तेऽभिषेकभे सति अध्वरी यज्वा नृपो वा इतं निर्गतं शिवं कल्याणं यस्मात् स एवंविधः स्यात् ॥ वा पुनर्भद्रासने सद्व्यधगे शुभग्रहवेधप्राप्ते सदन्विते शुभग्रहयुक्तेऽभिषेकभे इतं प्राप्तं शिवं कल्याणं येन स एवंविधः स्यात् ॥ २६ ॥

सिंहासनाख्यवलयं क्वचिदेतदेवं राज्याभिषेकविषयं किल केवलं स्यात्
नैत्याध्वरांतसमयस्नपनं प्रसिद्धं जैना जगुर्निगमकर्मविरोधभावात् २७

अथ वसंततिलकेन यज्ञकर्मविनाप्यदश्वक्र विलोक्यं तदाह—सिंहेति॥ किलेति संभावनायां एतत् वाहासनाख्यवलय पुन्नपुंसक वलय चक्र कर्तृपद क्वचित् स्थाने एव पूर्वरीत्या स्यात् राजाभिषेकविषय सिंहासनाख्यवलय केवल स्यात् । इति हेतोर्जैना अध्वरांतसमयस्नपनं प्रसिद्ध प्रकट अवभृथस्नान न जगु न ऊचु कस्मात् निगमकर्म निश्चयकर्म वेदकर्म वा तस्य विरोधभावात् ॥ २७ ॥

तुरंगमेशस्य तुरंगमे च गजाधिपस्येति गजे भशुद्धिः ॥
नराधिपस्यानसि चिंतनीया विराजि सम्राजि च राजि यज्ञात् ॥ २८॥

अथाश्वाधिपादीनां 'अग्निहोत्रादिकर्ता यो ब्राह्मणो राट् प्रकीर्तितः ॥ सम्राड् वै वाजपेयेन विराट् तत्पूर्वयज्ञत ' मुख्यशुद्धिमाह—तुरगमेति ॥ तुरगमेशस्याश्वाधिपतेस्तुरगमे भशुद्धिर्नक्षत्रशुद्धिश्चिंतनीया ॥ चपुनर्गजाधिपे गजे भशुद्धिश्चिंतनीया ॥ नराधिपस्यानसि शकटे भशुद्धिश्चिंतनीया कस्मात् विराजि सम्राजि राजि च यज्ञात् यज्ञत अग्निहोत्रादिकर्तेत्यादिश्लोक ॥ २८ ॥

गंधर्वचक्रे लपनाक्षकश्रवःशिरांसि लुनांघ्र्युदराणि पृष्ठकं ॥
न्यसेद्भचक्रं द्वि२यम२द्वि२दो२र्भुजा२गजे८पु५बाणा-
५ नुमभागमश्वमात् ॥ २९ ॥

अथ तुरगचक्रे भानि स्थापयति—गंधर्वेति॥ सुधीर्लपनं वदन अक्षके नेत्रे श्रवसी कर्णौ शिरो मस्तक एषा द्वंद्वे एतानि लून पुच्छ अंघ्रय पादा उदरमेषा द्वंद्वे एतानि पृष्ठकमिति गंधर्वचक्रे भचक्रे भचक्र नक्षत्रगण न्यसेत् कस्मादश्वभात् तुरंगमनामनक्षत्रात् किंभूत भचक्रं द्वौ २ यमौ २ द्वौ २ दो २ भुजौ २ गजा ८ इषु ५ बाणा ५ एषां द्वंद्वे एभिरनुमीयते स चासौ भागश्च तं॥२९

शुभप्रदेशा मुखनेत्रगर्भाः सपेरसौम्यास्त्वपरप्रदेशाः ॥
शुभांशगेऽत्रातिजनौ समग्रं गांधर्वकृत्यं वरमाद्दतर्क्षैः ॥ ३० ॥

अथाश्वचक्रगतभफलमाह—शुभमिति ॥ सपेरश्वस्य मुखनयनोदराणि शुभप्रदेशा स्यु । तु पुनरपरप्रदेशा अवयवा असौम्या अनिष्टा स्यु ॥ आद्दतर्क्षैः प्रोक्तनक्षत्रैः समग्र गंधर्वकृत्य घोटककार्यं वरं श्रेष्ठ स्यात् ॥ अत्रिकपिस्तस्मात् इत मासो जनिर्जन्म येन स चंद्रस्तस्मिन् शुभांशगे शुभनवांशगते सति ॥ ३० ॥

दुष्टांशगेऽश्व यदि हेल्यपत्यं तदाश्वकृत्यं पटबंधनं त्यजेत ॥
मखाभिषेको हयहन्नृपघ्नं बलक्षयं तत्र हरः क्रमात् स्यात ॥ ३१॥

अथाश्वावयवे शनिफलमाह— दुष्टांशग इति ॥ यदि दुष्टांशगेऽश्वे हेलपत्यं शनिःस्यात्तदा क्रमात्क्रमेण अश्वकृत्यं तुरंगमकार्यं हयहृत् तुरंगक्षयकृत् स्यात्॥ मखाभिषेकस्त्वत्र हरःकुलांतकृत्स्यात् ॥ 'तंत्रंशास्त्रंकुलं तंत्रं' इत्याद्यनेकार्थध्वनौ ॥ तथाच॥ अथातस्तौरगं चक्रं कथयामि सुरेश्वरि ॥ इंगितं निपुणं ज्ञात्वा हयानां राजवाहनं ॥१॥ अश्वाकारं लिखेच्चक्रमश्वधिष्ण्या-दितारकाः ॥ वदनात् सृष्टिगा देया अष्टाविंशतिसंख्यया ॥ २ ॥ मुखाक्षिकर्णशीर्षेषु पुच्छांघ्रिषु युगं युगं ॥ पंचपंचोदरे पृष्ठे सौरिर्यत्र फलं ततः ॥ ३॥ मुखाक्ष्युदरशीर्षस्थो यदा सौरिस्तुरंगमे ॥ तदारिर्भंगमायाति रणेऽन्यत्र पराजयः ॥४॥ कर्णांघ्रिपुच्छपृष्ठस्थो यदा यस्य हयस्य च॥ विभ्रमं भंगहानी च करोत्यन्यो महाहवे॥५॥ एतत्स्थानस्थितः सौरिर्यदा काले हयस्य च ॥ पट्टबंधे गमे युद्धे वर्जयेत्तं हयं नृपः ॥ ६ ॥ इत्यादि फलं ज्ञेयं ॥ ३१ ॥

अथास्यशुंडांबककर्णमौलिपदांगुलपृष्ठोदरगं न्यसेदिभे ॥
गजर्क्षतो द्विरद्विरयमरद्विरदोरगज८द्विरवेद४वेदा४नुमम्रक्षपंजरं३२॥

१ अथ गजचक्रे भानि स्थापयति—अथास्येति ॥ अथाश्वचक्रानंतरं सुधीरिभे गजे ऋक्षपंजरं नक्षत्रगणं न्यसेत् स्थापयेत् । कस्मात् गजर्क्षतो गजनामनक्षत्रात् किंभूतं ऋक्षपंजरं मुखं शुंडा शुंडा अंबके नेत्रे कर्णौ मौलिः शीर्षं पादौ लांगूलं पुच्छं पृष्ठं उदरं एषां द्वंद्वे एषु गतं पुनः किंभूतं द्वौ २ द्वौ २ यमौ २ द्वौ २ दोः २ गजा अष्टौ८ द्वौ २ वेदाश्चत्वारः ४ वेदाश्चत्वारः ४ एषां द्वंद्वे एभिरनुमीयते इति अनुमं प्रमितमिति मुखे २ शुंडायां २ नेत्रयोः २ कर्णयोः २ शीर्षे २ चरणेषु ८ पुच्छे २ पृष्ठे ४ उदरे ४ इति स्थापनीयं ॥ ३२ ॥

भवेयुरत्रास्य१शिरो२क्षि३संधिनी४गर्भा५वरांशास्त्वपरेऽशुभांशकाः ॥
शुभप्रदेशे करिकर्म भेश्वरे प्रियं सदोदीरितभैरुदीरितम् ॥ ३३ ॥

अथ गजचक्रगतभफलमाह—भवेयुरिति ॥ अत्र गजचक्रे आस्याशिरोक्षिसंधिनी-गर्भा मुखमस्तकनेत्रशुंडोदराणि वरांशाः शुभावयवा भवेयुः । तु पुनरपरेऽशुभांशका अन्येऽवयवा अशुभाः स्युः ॥ शुभप्रदेशे गजशुभावयवे भेश्वरे चंद्रे सति सदा करिकर्म गजकार्यं प्रियं श्रेष्ठमुदीरितं प्रोक्तं वैरुदीरितभैः प्रोक्तनक्षत्रैः ॥ ३३ ॥

गजे कुदेशे यदि हंससंततिर्न वाजपेयादिमखांतमज्जनात् ॥
पट्टाभिषेकादनु चैति संगरात्सम्राडिलेशश्च यशो जयश्रियम् ॥ ३४ ॥

अथ गजचक्रे शनिफलमाह —गज इति ॥ यदि चेत् गजे गजचक्रे कुदेशे दुष्टावयवे हंससंततिः सूर्यपुत्रः शनिः स्यात्तदा सम्राट् इलेश्वरो भूपो यशो जयश्रियं नैति न प्राप्नोति कस्मात् वाजपेयादिमखांतमज्जनात् संज्ञाविशेषयज्ञप्रमुखयज्ञांतस्नानात् । अनुपश्चात् पट्टाभिषेकात् च पुनः संगरात् संग्रामात् ॥ तथा चोक्तं ॥ अथातः संप्रवक्ष्यामि चक्रं मातंगनामकं ॥ येन विज्ञातमात्रेण यात्रायुद्धे जयो भवेत् ॥१॥ गजाकारं लिखेच्चक्रं सर्वावयवसंयुतं । अष्टाविंशति

आकृति नंबर २६

ऋक्षाणि देयानि सृष्टिमार्गतः ॥२॥ मुखशुंडाग्रनेत्रेषु कर्णशीर्षांघ्रिपुच्छके । द्विकं द्विकं च दातव्यं पृष्ठोदरे चतुश्चतुः॥३॥ इत्यादि ज्ञेयं ॥ ३४ ॥

देयं रथे भानुमदृक्षपूर्वं भपंजरं तन्नवभागसंस्थं ॥
रथाग्रमध्यावधिगं च सौम्यं रथांगमध्येष्वपरेष्वसत्स्यात ॥३५॥

अथ रथचक्रे भानि स्थापयाति–देयमिति ॥ सुधीभी रथे रथचक्रे भानुमदृक्षपूर्वं सूर्याक्रांतनक्षत्रादिकं भपंजरं नक्षत्रवृंदं देयं स्थापनीयं । किंभूतं भपंजरं तन्नवभागसंस्थं तस्य रथस्य नवसु भागेषु स्थितं ॥ अथ रथागमध्यावधिगं चक्रमध्यमर्यादागतं भं सौम्यं शुभ स्यात् । च पुनरपरेषु रथागमध्येषु रथावयवेषु गतं भमसत् नेष्टं स्यात् ॥ ३५ ॥

रथिनो यदि नामभं शुभांगे हरिजस्तत्स्थलगो मखाभिषेकः ॥
न समाहितवन्हिना च राज्ञा क्रियते पट्टरथाधिरोहणम् ॥ ३६ ॥

अथ मालभारिण्याम्र रथचक्रे शनिफलमाह—रथिन इति ॥ यदि चेत् शुभांगे रथचक्रशुभावयवे रथिनो रथिकस्य नामभं स्यात् । पुनस्तत्स्थलगो रथिकनामनक्षत्रस्थानस्थितो हरिजः शनिः स्यात्तदा समाहितवन्हिना अग्निहोत्रिणा राज्ञा मखाभिषेको यज्ञांतस्नानं च पुनः पट्टरथाधिरोहणं न क्रियते दूषणत्वादिति ॥ ३६ ॥

इति सत्रविराममज्जनं त्युदितं यल्लिखितं मयैतदत्र ॥
त्रिविधावनिपाभिषेककाले त्रिविधैतद्बलपेक्षणोपयोगः ॥ ३७ ॥

अथ पद्योपसंहारेणाह—इति मेति ॥ सत्रविराममज्जनं यज्ञांतावभृथस्नानमुदितं प्रोक्तं मया एतच्चित्रं यत् यस्माल्लिखितं तस्माद्धेतोरत्रावसरे त्रिविधावनिपाभिषेककाले त्रिप्रकारभूपाभिषेकसमये त्रिविधं चैतद्बलं च तस्य ईक्षणं विलोकनं तस्य उपयोगः स्यात् ॥ ३७ ॥

विहितेषु महामखव्रतेषु प्रविदायापरसुप्तिकालमास्त्यं ॥
कविमार्यमगौषधीशतारेऽपरसंस्कारविधिं च सर्वकाले ॥ ३८ ॥
लघुधीरभधूर्नरेंद्रमांत्यश्रुतिपुग्मामरमृड्भिस्त्वरण्यं ॥

आर्द्रा इंदुभं मृगशीर्षं आंत्यं रेवती श्रुतियुग्मं श्रवणधनिष्ठे अमरसूरेर्भमतो तस्या उडु पुनर्वसु एषां द्वंद्वे एभिः पुनः कैः सदहोभिः शुभग्रहदिनैः ॥ ३८ ॥३९॥

शिरसोदयभाजि कंटके सन्निहिते दीक्षण९धीस्थ५ले विदीज्ये ॥
विपिनाश्रममादरेण भिक्षुं खलु वैखानसमीरयेदजस्रम् ॥ ४० ॥

अथात्र लग्नशुद्धिमाह—शिरस इति ॥ खलु निश्चितमजस्रं निरंतरं विपिनाश्रमं कर्तृपदमादरेण वैखानसं वानप्रस्थं भिक्षुं सन्यासिनमीरयेत् प्रेरयेत् कस्मिन् शिरसोदयभाजि शीर्षोदयलग्नयुक्ते सन्निहिते शुभग्रहव्याप्ते कंटके सति पुनर्दीक्षणं दीक्षाधर्मः नवमं धीः पंचमं एतयोः स्थाने विदीज्ये बुधधिषणे सति अनयोः समाहारैकत्वं आश्रमशब्दः पुंनपुंसकः ॥ ४० ॥

संन्यासः श्रुतियुगले शये शिवर्क्षे वैरंचे रुरुशिरसींद्रपूजितर्क्षे ॥
नीरिक्ते स्थिरसदनेऽपवर्गसिद्ध्यै सोमेज्यज्ञखरकरेषु चोत्तरासु॥४१

अथ महर्षिण्या संन्यासे नक्षत्रादिशुद्धिमाह—संन्यासेति ॥ संन्यासोऽपवर्गसिद्ध्यै मोक्षप्राप्तये स्यात् कस्मिन् श्रुतियुगले श्रवणे धनिष्ठायां शये हस्ते शिवर्क्षे आर्द्रायां वैरंचे रोहिण्यां रुरुशिरसि मृगशीर्षे इंद्रपूजितर्क्षे पुष्ये नीरिक्ते निर्गतो रिक्तः कुंभो यस्मात् कुंभराशिवर्जिते स्थिरसदने स्थिरराश्युदये सति च पुनः सोमश्चंद्र इज्यो गुरुः ज्ञो बुधः खरकरः सूर्यः एषां द्वंद्वे एषां दिने उत्तरासु च ॥ ४१ ॥

एतद्भेष्वदितियुतेष्वभर्गभेषु त्वाधत्ते नरभवनोदये सभूपे ॥
सद्दीक्षामुदितदिनेषु साधुमर्त्यः सन्मास्यातुरपुरुषोऽनु सर्वकाले॥४२॥

अथ दीक्षाग्रहणशुद्धिमाह—एतद्भेष्विति ॥ हि निश्चितं साधुमर्त्यः उत्तमनरः सद्दीक्षामाधत्ते गृह्णाति केषु एतद्भेषु उक्तनक्षत्रेषु अदितियुतेषु अभर्गभेषु आर्द्रारहितेषु सत्सु पुनर्नरभवनोदये नृराश्युदये सभूपे शुभग्रहयोगविलोकिते पुनरुदितदिनेषु प्रोक्तवासरेषु पुनः सन्मासि शुभे मासे अनु पश्चात् चेत् आतुरपुरुषो दीक्षाग्रहणे शीघ्रस्तदा सर्वकाले दीक्षां धत्ते ॥ ४२ ॥

पूर्वावारुणसुरवैद्यभेषु दीक्षा मैत्रर्क्षेष्वदितीभवासवेनभेषु ॥
ऐनीनज्ञसितदिनैस्तु वीतरागाः शस्ता पुंसि चरणजे विपर्वरिक्तैः ॥४३

पूर्वेति ॥ चरणजे शूद्रे पुंसि विषये वीतरागा निर्गतरागद्वेषलक्षणा दीक्षा शस्ता शुभा स्यात् । केषु पूर्वात्रयं वारुणं शततारा सुरवैद्यभमश्विनी एषां द्वंद्वे एषु पुनर्मैत्रर्क्षेषु मैत्रसंज्ञभेषु पुनरादितिभं पुनर्वसु वासवं धनिष्ठा इनभं हस्तः एषां द्वंद्वे एषु तु पुनः कैः ऐनिः शनिः इनः सूर्यः ज्ञो बुधः सितः शुक्रः एषां दिनैः किंभूतैर्विपर्वरिक्तैः पर्वरिक्तातिथिवर्जितैः ॥ ४३ ॥

दयार्द्रभावेन सुधर्मकर्मणामारंभमूचुर्लघुमैत्रधीरैभैः ॥
शयेशभादित्यभवासवैर्विशो रिक्ताकुयुङ्मुक्तपतंगसद्द्युषु ॥४४॥

अथ धर्मकर्मण आरंभमाह—दयेति ॥ सुधियो विशां नृणां दयार्द्रभावेन सुधर्मकर्मणामारंभमूचुर्जगुः कैः लघूनि मैत्राणि धीराणि एषां द्वंद्वे एभिः पुनः कस्मिन् शयो हस्त ईशभं आर्द्रा आदित्यभं पुनर्वसु वासवं धनिष्ठा एषां द्वंद्वे एभिः पुनः केषु रिक्तास्तिथयः कुयुग् दुष्टयोगः एभिर्मुक्त पतंगसद्द्युषु वर्जितसौरशुभग्रहदिनेषु ॥ ४४ ॥

पारायणं वेदपुराणपद्धतेरमंदवारेषु वरं विदारुणैः ॥
व्युग्रैश्च भैर्मुक्तगलग्रहैर्भवेदारंभितं सद्वृषधीन्दुभोदये ॥ ४५ ॥

अथ समग्राऽध्ययने वारादिशुद्धिमाह—पारायणमिति ॥ वेदपुराणपद्धतेः आगमपुराणपद्धतेः पारायणं साकल्येन सामस्त्येन वचनमध्ययनमिति 'साकल्यवचनं पारायणं' इति हेमचन्द्रात् केषु अमन्दवारेषु शनिवर्जितसर्ववारेषु पुनः कैर्विदारुणैर्भैर्दारुणनक्षत्ररहितनक्षत्रैः पुनर्वेदपुराणपद्धतेराऽभिनं प्रारम्भणं सत् शुभं भवेत्। कैर्व्युग्रैर्भैरुग्रसंज्ञवर्जितनक्षत्रैः किंभूतैर्मुक्तगलग्रहे पुनः कस्मिन् वृषधीन्दुभोदये नवमपञ्चमभावस्थे नृराश्युदये ॥ ४५ ॥

रिक्ताविमुक्तासु तिथिष्वसृग्यमैर्वारैः पुराणोत्थकथाश्रुतिः श्रियै ॥
मृदुस्थिरक्षिप्रचलत्रिपूर्विकाकीर्णेषु सत्केंद्रचरोदये भवेत् ॥ ४६ ॥

अथ पुराणकथाश्रवणशुद्धिमाह—रिक्तेति ॥ पुराणोत्थकथाश्रुतिः पुराणोद्भववार्ताश्रवणं श्रियै भवेत् केषु रिक्तविमुक्तासु रिक्तातिथिवर्जितासु तिथिषु पुनः कैरसृग् भौमः यमः शनिस्ताभ्यां वर्जितैर्वारैः किंभूतासु तिथिषु विरिक्तासु मृदूनि स्थिराणि क्षिप्राणि चलानि त्रिपूर्विका एषां द्वंद्वे एभिराकीर्णेषु युक्तेषु पुनः कस्मिन् सत्केंद्रचरोदये शुभग्रहकेंद्रचरराश्युदये ॥ ४६ ॥

पुष्यस्नानं कृत्वा सस्नपनमुपविधिपं जुलः शुद्धकाले कार्ष्णपादे
नभस्थे त्रिपमलमपहाय दुमंत्रपूर्नविनं ॥ वारे धिष्ण्ये च सौर्ये
धवलयुदिवसे धपगे दारुणोग्रहस्तमूर्ध्वेभ्रंररिक्ते भवति कृयुतिवि-
ष्टयुद्धिझते सौम्यलग्ने ॥ ४७ ॥

एतेषु कृत्येष्वखिलेषु मंत्रिणं कविं किलास्तं विधुमंगिरोहारिं ॥ विकर्तनं चाप९तिमि१२स्थितं तथा क्षयाधिमासद्युसमाः परित्यजेत्॥४८॥

इति श्रीकविकालिदासोदिते ज्योतिर्विदाभरणेऽग्न्याधानादिविशेषसंस्काराध्यायोऽष्टादशः ॥ १८ ॥

अथोपसंहारमाह—एतेष्विति ॥ किलेति सत्ये सुधीः मंत्रिणं गुरुं कविं शुक्रमास्तमस्ते गतं तथा विधुं चंद्रं तथांगिरोहारिं सिंहगुरुं तथा चापतिमिस्थितं धनुर्मीनस्थं विकर्तनं सूर्यं तथा क्षयाधिमासद्युसमाः क्षयाधिकमासं क्षयाधिकदिनं क्षयाधिकवर्षं परित्यजेत् केषु अखिलेषु एतेषु पूर्वोक्तेषु कृत्येषु कर्मसु ॥ ४८ ॥

इति श्रीकविकालिदासकृतज्योतिर्विदाभरणसुखबोधिकायामग्न्याधानविशेषसंस्कारपुण्यसाधनाध्यायोऽष्टादशः ॥ १८ ॥

मिश्रप्रकरणम्।

हुताशनाधानविधेरनंतरं वदामि मिश्रव्यवहारकर्मणाम् ॥
कृषिस्वगोपण्यसरःक्रियावतां नयं हि लोकव्यवहारवृत्तये ॥ १ ॥

अथाग्न्याधानविधेरनंतरं मिश्रव्यवहारकर्म घटतेऽतो मिश्रव्यवहारकर्माध्यायसंधानमाह—हुताशेति ॥ हुताशनाधानविधेरग्न्याधानविधानादनंतरं हि युक्तार्थे मिश्रव्यवहारकर्मणां साधारणव्यवहारकार्याणां कृषिः कर्षणं स्वं धनं गौर्धेनुः पण्यं विक्रेय सरो जलाशय एषां द्वंद्वे एषां क्रियावतां क्रियायुक्तनराणां नयं निर्णयं वदामि कथयामि कस्यै लोकव्यवहारवृत्तये जनव्यवहारप्रवर्तनाय ॥ १ ॥

क्रियाविधानेऽनु च वक्ष्यमाणे दुष्टा हि विष्टिः क्षयकायराजा ॥
रिक्ताकुयोगाखिलपर्वकालो दुष्टस्तथा राजविरुद्धराशिः ॥ २ ॥

अथ क्रियाविधानशुद्धिमाह—क्रियेति ॥ नु वितर्के हि युक्तार्थे वक्ष्यमाणे क्रियाविधाने विष्टिर्दुष्टा स्यात्। तथा च क्षयकायराजा क्षीणचंद्रस्तथा रिक्ताकुयोगाखिलपर्वकालस्तथा राजविरुद्धराशिर्दुष्टचंद्रराशिश्च दुष्टोऽशुद्धः स्यात् ॥ २ ॥

सदन्हि कीर्णे लघुवारुणांत्यभादितेयशक्राग्निभशाक्रवासवैः ॥
शस्ता समस्तानडुही क्रिया तथा वत्सक्रिया वत्सलयोगवर्धिनी॥३

अथ गवां कर्मशुद्धिमाह—सदन्हीति ॥ समस्ता सर्वानडुही क्रिया गोक्रिया गर्भिणी स्वतंत्रा नवप्रसूता वृद्धा वंध्या इत्यादिभेदाना गवां कर्म इत्यर्थः शस्ता शुभा स्यात् ॥ तथा वत्सक्रिया शस्ता स्यात् किंभूता वत्सक्रिया वत्सलयोगवर्द्धिनी स्नेहसंयोगवर्द्धिनी कस्मिन् सद-

ग्हि शुभमहादिने लघूनि वारुणं शतभिषक् आस्यभ रेवती आदित्यं पुनर्वसू शक्राग्निभं वि॰ शाखा शक्रो ज्येष्ठा वासव धनिष्ठा एषां द्वंद्वे एभिः कीर्णे व्याप्ते ॥ ३ ॥

सनातनर्क्षाजभविश्वकर्मभोत्तरात्रये भूत१४दिनेऽष्ट८मीतिथौ ॥
दर्शे३०निवेशश्च विनिर्गमो रवौ चतुष्पदानां क्रयविक्रयौ न हि ॥ ४

अथ चतुष्पदानां प्रवेशादिकर्म निषेधति—सनातनेति ॥ चतुष्पदानां गवादीनां निवेश प्रवेशस्तथा विनिर्गमो गृहाद्बहिर्निष्कासनं तथा क्रयविक्रयौ नहि स्युः कस्मिन् सनातनो विष्णुस्तस्य ऋक्षं श्रवणं अजभं रोहिणी विश्वकर्मभं चित्रा उत्तरात्रयं एषां द्वंद्वैकत्वेऽस्मिन् पुनर्भूतदिने चतुर्दश्यां पुनरष्टमीतिथौ पुनरमावास्यायां दर्शे रवौ सूर्यवारे ॥ ४ ॥

पूर्वाविशाखांत्यशिफेंद्वार्यभैः सवासवादित्यभपाशपाणिभैः ॥
क्षिप्रैश्च सोमेनसितांगिरोदिनैरजाविकालीप्रविधानमर्थकृत् ॥ ५ ॥

अथाजादीनां कृत्यशुद्धिमाह—पूर्वेति ॥ अजा प्रतीता अविर्मेषी काली महिषी आसां प्रवि धानमुत्कृष्टकार्यमर्थकृत् संपदाकृत् स्यात् । कैः पूर्वात्रयं विशाखा आत्यं रेवती शिफा मूलं ऐंदवं मृगशीर्षं आर्यभं पुष्य एषां द्वंद्वे एतैः किंभूतैर्वासवं धनिष्ठा आदित्यभं पुनर्वसु पाशः पाणौ यस्य स पाशपाणिर्वरुणस्तस्य भं शततारा एषां द्वंद्वे एभिश्च पुनः क्षिप्रैः पुनः कैः सोम इन सितः शुक्रः अंगिरा गुरुरेषां दिनैः ॥ ५ ॥

कराद्यपर्जन्यमृदूडुपावनं सकाश्यपीदैवतमाह पेशलम् ॥
वामीगरुत्मत्खरनौक्रियाविधौ कश्चिच्छनींदूष्णगुकाव्यवासरे ॥ ६ ॥

अथ वडवादीनां कर्मशुद्धिमाह—करेति ॥ कश्चित् सुधी करादिभं पेशलं मनोहरमाह कथयति । करो हस्तः आद्यमश्विनी पर्जन्यस्य इंद्रस्येदं पार्जन्यं ज्येष्ठा मृदूनि पवनस्येदं पावनं स्वाती एषां द्वंद्वैकत्वं किंभूतं सकाश्यपीदैवं पुनर्वसुसहितं यस्मिन् वामी वडवा गरुत्मतो विधेऽस्येति गरुत्मान् पक्षी कुक्कुटादिः 'पक्षो गरुच्छदश्चापि' इति हैमः ॥ खरो रासभः नौः नाविकी आसां क्रियाविधिः तस्मिन् शनिः इंदुः ऊष्णगुः सूर्यः काव्यः शुक्रः एषां वासरे ॥ ६ ॥

क्रयोऽश्वनोर्विक्रय एव देवमूर्द्वगानुराधांत्यमघाजटाहिभैः ॥
द्विदैवपूर्वासु समृद्धये भवेन्नंदासु पूर्णासु च काव्यजीवयोः ॥ ७ ॥

अथ क्रयविक्रयप्रकरणशुद्धिमाह—क्रय इति ॥ अश्वपूर्वे क्रयो विक्रयश्चैव समृद्धये भवेत् कैः देवमूर्द्धमाः पुनर्वसु मृगो मृगशीर्षं अनुराधा अंत्य रेवती मघा मघा पूर्वाफाल्गुनी एभिः आर्द्रा एषां द्वंद्वे एभिः पुनः कासु द्विदैवं विशाखा पूर्वात्रयं आसु पुनर्नंदासु पूर्णासु च पुनः काव्यजीवयोः शुक्रगुर्वोर्वारे ॥ ७ ॥

प्राचेतसादित्यभवेज्यपराधापानीय शरिरजनायश्रविष्ठाः ॥
कालारवाप्युनुसे च यामा नीगराये सोमसितार्यवारः ॥ ८ ॥

अथ तटाकादिजलाशयानां करणशुद्धिमाह—प्राचेतसेति ॥ कासारस्तडागो वापी अंधुः कूप इत्यादौ नीराशये जलाशये विषये प्राचेतसादितारा वामाः श्रेष्ठाः स्युः। प्राचेतसं शततारा आदित्यं पुनर्वसु मघा ऐज्यं पुष्यः राधा विशाखा पानीय पूर्वाषाढा धीरसंज्ञानि अब्जस्य चंद्रस्येद आब्जं मृगशीर्षं शयो हस्त श्रविष्ठा धनिष्ठा एताश्च पुनः सोमसितार्यवाराश्चंद्रशुक्रगुरुवाराः श्रेष्ठाः स्युः 'विशाखेंद्राग्निदेवता राधा', इति हैमः ॥ ८ ॥

पुराद्धुताशानिलराक्षसाशामुक्तान्यकाष्ठासु सुवारिदोऽधुः ॥
वानीरदूर्वाकुशवामलूरक्षोण्यां भवेत्स्वादुजलं च शीघ्रम् ॥ ९ ॥

अथ कूपकरणे दिक्शुद्धिमाह—पुरादिति ॥ अंधुः कूपः सुवारिदः स्वादुजलदायको भवेत् कासु पुरात् नगरात् ग्रामात् वा हुताशो वन्हि अनिलो वायु राक्षस एषामाशां दिशं मुक्त्वा अन्यकाष्ठासु च पुनः शीघ्र स्वादु जलं भवेत् कस्यां वानीरो वेतसवृक्षः दूर्वा कुशः वामलूरो वल्मी कूटं एषा क्षोण्या भूमौ ॥ ९ ॥

आद्यार्जुनोदुंबरसिंदुवाराः पर्णप्रवालातिसुशालशाखाः ॥
वल्मीकपार्श्वाः स्युरगा हि यत्र तत्राशु निर्देश्यमलं समाशु ॥ १० ॥

अथ शीघ्रजलव्यनजकदेशमाह—आद्येति ॥ यत्र स्थानेऽगा वृक्षा एवंविधाः स्युः किंभूताः आद्या अर्जुनः ककुभवृक्ष उदुंबरः सिंधुवीतारी निर्गुंडी एषा ते ते पुनः किंभूता, पर्णप्रवालैः पत्रकिसलयैरतिसुशाला. सुशोभमाना' शाखा एषा ते ते पुन. किंभूताः वल्मीकः कृमिपर्वतस्तस्य पार्श्वे सामीप्यं एषा ते हि अवधारणेऽलं पूर्णं समाशु शीघ्रतरं तत्र स्थानेऽम्बु मळं निर्देश्यं कथनीयम् ॥ १० ॥

योष्मातिशीतलवसत्तृणपुष्टिरुर्वी सा स्वादुसांद्रसलिला
किल शीघ्रवार्दा ॥ इत्थं विलोक्य वसुधामिह
कूपवापीकासारकुंडखननं विदधीत शश्वत् ॥ ११ ॥

योष्मेति ॥ या उर्वी भूमिरुष्मातिशीतलवसत्तृणपुष्टि उष्मणि ग्रीष्मकालेऽतिशीतले न वसंति उद्गच्छति तृणानि तेषां पुष्टिर्यस्या सा एवंविधा स्यात् किलेति भावनायां सा भूमिः शीघ्रवार्दा ज्ञातेति जलदायिनी स्यात्। किंभूता भूमि स्वादुसांद्रसलिला मिष्टगंभीरपानीया शश्वत् सदा सुधीरित्थं वसुधा भूमिं विलोक्य इह भूमौ कूपवापीकासारकुंडानि एषां खननं विदधीत कुर्वीत ॥ ११ ॥

सिंधुप्रतानमरुकार्णवगौडगेंशेऽनिमं धरांतरगमंबु निसर्गभावात् ॥ क्षाराम्लकुंठतरुवद्भुवि निस्तृणोर्व्यां तद्वद्धनं विकृतिमण्ड्माहुरार्याः ॥ १२ ॥

अथ नीचगतजलदेशमाह—सिंध्विति ॥ सिंधुप्रताने सिंधुनदीतटे मरुको देशः अर्णवः समुद्रः गौडो देश एषु गर्तेऽशभागे एतेषां भूम्येकदेशभागे धरातरगं भूमितलगतमंबु जलं निमग्नभावात् स्वभावात् निम्नं नीचतलगं स्यात् ॥ आर्या आचार्याः क्षारो वृक्षः आम्लवृक्षः कुंठतरुः पल्लवादिवर्जिततरु एतद्वती भूस्तस्यां तद्वत् निस्तृणोर्व्यां तृणरहितभूमौ वन जलं विकृतिमद्गुणं रोगकरस्वभावमाहुः ॥ १२ ॥

ग्रामादुदीरितहरित्युशनोऽब्जभागे क्षेत्रे भमंडलवि-
भागवति प्रशस्तं ॥ वाच्यं वनं तदिह गर्भकवींदुभागे
निम्नार्द्रभूमितटिनीनगदिक्शिराभिः ॥ १३ ॥

अथ शुभजलज्ञानमाह—ग्रामादिति ॥ वनं जलं प्रशस्तं शुभं वाच्यं वक्तव्यं क ग्रामात् उदीरितहरिति प्रोक्तदिशि क्षेत्रे किंभूते उशनोऽब्जभागे शुक्रचंद्रस्थितिप्रदेशे पुन. किंभूते भमंडलविभागवति नक्षत्रगणविभागयुक्ते पुन किंभूते गर्भकवींदुभागे मध्यगतशुक्रचंद्रविभागे इह स्थाने पुनः काभि निम्ना नीचा आर्द्रा भूमिस्तटिनी नदी नग पर्वत एषां द्वंद्व एषां दिक्शिराभिस्तद्दिग्गतजलशिराभि कृत्वा ॥ १३ ॥

सूरे सुधाशनदिने वितिमीनकाले धिष्ण्योपधीशधि-
पणोदयभाजि कूप• ॥ वापी सरो भवति हेल्यलिमार्ग-
योगे कुंडं तथा क्वचिदपाधिकहीनमासे ॥ १४ ॥

अथ कूपादिकरणे कालशुद्धिमाह—सूर इति ॥ वितिमीनकाले मीनकालविवर्जितकाले धिष्ण्योपधीशधिषणोदयभाजि शुक्रचंद्रगुरूदययुक्ते सुधाशना अमृतभोजिनो देवास्तेषां दिने उत्तरायणे सूरे सूर्ये सति कूपस्तथा वापी तथा सरस्तडागो भवेत् । क्वचित् हेल्यलिमार्ग योगे रविवृश्चिकमकरसंक्रांतिमार्गशीर्षयोगे कुंड भवति किंभूते हेल्यलिमार्गयोगे अपाधिकहीनमासे निर्गताधिकक्षयमासे सति ॥ १४ ॥

स्याद्रोहिणीवदनतारकमंडलाख्यं मध्याद्यपूर्वमुख-
दिक्षु सवांधुचक्रे ॥ केंद्रांतकेशमरुता नवधा विभक्तं
दिक्षु स्थितं तदिह चेत्कचारि मृते ॥ १५ ॥ ०

अथ कूपचक्रे भानि स्थापयति—स्याद्रोहिणीति ॥ सदाम्बुचक्रे कूपचक्रे रोहिणीवदनता-रकमंडलाख्य रोहिणीमुखनक्षत्रगण चतुर्दश मध्याद्यपूर्वमुखदिक्षु मध्य आदि यासां तासु पूर्वादिदिक्षु क्रमात् स्यात् । किंभूत रोहिणीवदनमंडलाख्य नवधा विभक्त नवभागेषु कूपचक्रमध्ये प्रथम रोहिणीतिस्रं देय तत पूर्वादिषु

१ इदं नास्ति ख

सर्वमभमंडलं त्रिकं त्रिकं देयमित्यर्थः । तदु रोहिण्यादिभमंडलं कर्तृपदं वैकृतवारि दुष्टजलं सूते जनयति किंभूतं तद् इह केंद्रांतकेशमरुतां दिक्षु संस्थितं सत् कस्य जलस्येंद्रः स्वामी वरुणः अंतको यम ईशानो मरुत् वायुरेषा दिक्षु ॥ १५ ॥

कोष्ठे धिष्ण्यचतुष्टयं विधिभतो नाभिस्तथा हृद्गले
नेत्रे वाममवामकं भयुगलं तद्वच्च पादौ पराः ॥
अष्टौ राजवशाः सदैषु फलता सत्पुष्करं वा द्युतिर्धीनाशः
स्थिरता कलिर्द्रविणतानर्थो हि वाप्यां क्रमात् ॥ १६ ॥

अथ वापीचक्रे भानि संस्थाप्य फलमाह—कोष्ठ इति ॥ वाप्या वापिकायां कोष्ठे विधिभतो रोहिणीतो धिष्ण्यचतुष्टयं नक्षत्रचतुष्कं स्यात् ॥ पुनस्तथा नाभितथा हृत्तथा गलस्तथा, नेत्र वाममवामकं तद्वच्च पादौ एषु स्थानेषु राजवशाश्चंद्रास्त्रियस्तारा: फलदा स्थिता इत्यर्थः ॥ यथा नाभौ चत्वारि भानि हृदि भचतुष्कं गले चत्वारि भानि नेत्रयोः सव्यापसव्ययोर्भयुग्मं पादयोर्भचतुष्कं ॥ अथ फलमाह ॥ तदा हि अवधारणे सदा एषु कोष्ठादिस्थानेषु क्रमात् क्रमेण सत्पुष्करादि फलं स्यात् । कोष्ठे सत्पुष्करं शुभजल वाऽथवा द्युतिर्मलवेगता स्यात् नाभौ धीनाशो बुद्धिविनाशो हृदि स्थिरता गले कलिर्नेत्रयोर्द्रविणता धनत्वं पादयोरनर्थः स्यात् ॥ १६ ॥

कासारे कमलासनोडुवदनो नंदांशमो दीयते मध्यैं-
द्रादिहरित्सु पेशलमिदं मध्यापरा यातुदिक् ॥ कुंडे
धिष्ण्यगणः कभत्रिकतले काष्ठाचतुष्को विदिग्युग्मः
स्याद्द्रविणेशयातुदहनांतस्थः शुभो भांशकः ॥ १७ ॥

अथ तडागचक्रे भानि स्थापयति— कासार इति ॥ कासारे तटाकचक्रे कमलासनो ब्रह्मा तस्योडु रोहिणी सा वदनं प्रमुखं यस्य स नंदांशमो नवत्रिकसप्तविंशतितुल्यभागो दीयते कासु मध्यैंद्रादिहरित्सु मध्यतः पूर्वतः सर्वदिक्षु ॥ अथ फलमाह—अत्र मध्यो मध्यभागो ऽपरा पश्चिमा दिक् यातुदिक् नैर्ऋतदिक् एतत्त्रयस्थानगतमिदं धिष्ण्यत्रिकं पेशलं मनोहरं स्यात् । अथ कुंडचक्रे भानि स्थापयन्फलमाह । को ब्रह्मा तस्य भत्रिकं रोहिणीत्रिकं तले यस्य पुनः काष्ठाचतुष्कः चतुर्षु दिक्षु चतुश्चतुष्कं पुनर्विदिग्युग्मश्चतुर्षु विदिक्षु युग्मचतुष्कं एवं धिष्ण्यगणः स्थाप्यः । तत्र द्रविणेशयातुदहनांतस्थः उत्तरनैर्ऋताग्निदिग्मध्यस्थितो भांशको नक्षत्रभागः शुभः स्यात् ॥ १७ ॥

परिखापरिखातखारिणां खननं निम्नुमुखैररोहिताश्वैः ॥
वियमारादिनैः सजैष्णवेशैरपविष्टयादिकयुग्मलग्नहाख्यैः ॥१८॥

आकृति नंबर ४६ आकृति नंबर ४

अथ परिखादिखनने भशुद्धिमाह—परिखेति ॥ परिखा परिखातः समस्तखात अथ खारिका मानविशेषप्राप्ता आसा खनन स्यात् ॥ कैर्निम्नमुखैरधोमुखनक्षत्रै किंभूतैररोहिताभैः रोहिताश्वोऽग्निस्तस्येद भं कृत्तिका तया वर्जितैः पुन किंभूतैर्वियमारदिनै शनिभौमदिनरहितै पुन किंभूतै सजैष्णवेशे ज्येष्ठार्द्रायुक्तै पुनरपविष्टयादिकुयुगुगलग्रहाख्यैर्वोष्टि कुयोगगलग्रहवर्जितै ॥ १८ ॥

मिहिराकुलितर्क्षतो विचिंत्याः परिखायां हरितो हि षोडशर्क्षाः ॥
विदिशोऽष्टमभास्त्रिगर्भतारा न शुभा यातुयमानिलानलाशाः ॥१९॥

अथ परिखाचक्रे भानि स्थापयति—मिहिरेति ॥ हि अवधारणे मिहिराकुलितर्क्षतो रविभात् परिखाया खातिकाया सुधीभि षोडशर्क्षा षोडशनक्षत्राणि यासु ता हरितो दिशो विचिंत्या पुनरष्टमानि अष्टमितानि भानि यासु ता विदिशो विचिंत्या पुनस्त्रिगर्भतारा मध्ये त्रितारा विचिंत्यास्तत्र यातुर्निर्ऋति यमः अनिलो वायुरनलोऽग्निरेषामाशा. शुभा न स्युः॥ १९॥

रविभादिह पंच पंच दिक्षु प्रमदाः शीतलगोस्तले च सप्त ॥
तलपूर्वकुबेरदिग्गताराः सफलाः सन्ति सदैव खारिकायाम् ॥ २० ॥

अथ खारिकाया भानि स्थापयति—रविभादिति ॥ इह खारिकाया शीतलगोश्चन्द्रस्य प्रमदास्तारा दिक्षु पच पच तले मध्ये सप्त देया कस्मात् रविभात् सदैव खारिकाया तले मध्य पूर्वदिक् कुबेरदिक् आसु गतास्तारा सफला सति ॥ २० ॥

न तिमीनयुतौ शुचौ नभस्ये नभसि स्यात्परिखा च खारिकाख्या ॥
क्षयरोचिषि राजनीह तद्वच्छुभभान्योदयकेंद्रदुष्टतायाम् ॥ २१ ॥

अथ मीनार्कादौ खारिकादिकर्म निषेधति—नतिमीति ॥ परिखा खारिका च न स्यात् तिमीनयुतौ मीनार्कयोगे शुचौ आषाढे नभस्ये भाद्रपदे नभसि श्रावणे क्षयरोचिषि क्षीणकान्तौ राजनि चन्द्रे तद्वत् शुभभेभ्य शुभराशिभ्योऽन्योदयस्यान्यग्रहस्य केंद्रदुष्टताया सत्यामिह॥२१॥

नंदा च भद्रा घटनेऽर्कसदिनं भवेद्यगेश्चरभोदयैः शुभैः ॥
मूलायतिष्याजमृदुश्रवोद्वयादितियवातैर्घटयेत्तरीं तथा ॥२२॥

अथ घटनकर्मशुद्धिमाह—नंदेति ॥ घटने घटनकर्माणि नदातिथिभद्रातिथिरर्क सद्दिन सूर्यशुभग्रहाणा दिन च भवेत् वैरयोगे सुयोग विनापि। तथा सुधीस्तरीं नाव घटयेत् कारयेत् कस्मिन् चरभोदये चरराश्युदये पुन कै शुभै सुयोगै, मल आयमश्विनी तिष्य पुष्य मृदूनि श्रवोद्वय श्रवणधनिष्ठे आदितेय पुनर्वसु वात स्वाती एषा द्वन्द्वे एतै ॥२२॥

लघुश्रवोवासवमैत्रराजभैर्निवेशयेद्वारि दिनैर्विवित्सताम् ॥
जयासु पूर्णासु सचंद्रिकाद्रिकास्विमां नावं नवामिंदुबले जलोदये ॥२३

आहुति नंबर ४८ आकृति नंबर ४९

अथ जले तरीमोचनशुद्धिमाह—लब्धेति ॥ इंदोश्चंद्रस्य बलं यस्य स इंदुबलो नरो नवां नूतनां नावं तरीं वारि जले निवेशयेत् प्रवेशयेत् कैर्लघूनि श्रवः श्रवणः वासवं धनिष्ठा मैत्रमनुराधा राजभं मृगशीर्षं एषां द्वंद्वे एतैः पुनः कैर्विनिरस्ततां बुधवर्जितशुभग्रहाणां दिनैः पुनः कासु जयासु तिथिषु पूर्णासु तिथिषु सचंद्रिकासु ज्योत्स्नायुक्तासु पुनर्जलोदये जलराशिलग्ने ॥ २४ ॥

लग्नेऽलिमुक्ते धिषणे बुधे वा खलैरसारैश्च सिते नभस्थे ॥
निशीथिनीशे जलचारिराशौ जलेऽखिलं कर्म तदिष्टयंत्रैः ॥२४॥

अथ लग्नादिना नौकायंत्रणशुद्धिमाह—लग्न इति ॥ जले तदिष्टयंत्रैस्तस्या नाव इष्टयंत्रणैरखिलं समस्तं कर्म स्यात्। कस्मिन् अलिमुक्ते वृश्चिकरहिते लग्ने धिषणे गुरौ बुधे वा च पुनरसारैर्बलरहितैः खलैः क्रूरग्रहैः पुनर्नभस्थे दशमस्थे सिते शुक्रे पुनर्जलचारिराशौ निशीथिनीशे चंद्रे ॥ २५ ॥

कूपाग्रगं सैष्यगतं च सेनभं मध्ये षडास्ये त्र्युडु भत्रयं त्वहृदि ॥
पाठाणमेकं परतस्त्रयं त्रयं सुपाणगं मध्यभषट् सदंतरम् ॥२५॥⊛

अथ नौकाचक्रे भानि स्थापयति—कूपेति ॥ सैष्यगतं एष्यमाणनक्षत्रयुक्तं सेनभं सूर्याक्रांतनक्षत्रं एतावता नक्षत्रयुग्मं कूपाग्रगं कूपस्तंभाग्रगतं स्यात्। च पुनर्मध्ये षट् भानि स्युः। आस्ये मुखे त्र्युडु त्रयं स्यात्। हृदि भत्रयं स्यात्। पाठाणमेकं भं स्यात्। परतोऽग्रतस्त्रयं स्यात्। सुपाणगं त्रयं स्यात्। मध्यभषट् मध्ये भषट्कं स्यात्। अथ फलमाह। अत्र चक्रे अंतरं विचालगतद्वादशनक्षत्रं सत् शुभं स्यात् ॥ २९ ॥

प्राचेतसोमेशरमेशभोत्तराः सरोहिणीवासववासवार्च्यभाः॥
वरा विरिक्तेनयमारवासरा नवे तरीकूपकपट्टबंधने ॥ २६ ॥

प्राचेति ॥ नवे नवीने तरीकूपकपट्टबंधने मंगिनीकूपस्तंभपट्टबंधने प्राचेतसादयस्तारा वराः श्रेष्ठाः स्युः। प्राचेतसं शततारा उमेश ईश्वर आर्द्रा रमेशो विष्णुस्तद्भं श्रवणः उत्तरा उत्तरात्रयं किंभूताः रोहिणी वासवं धनिष्टा वासव इंद्रस्तस्याच्यों गुरुस्तस्य भं पुष्य एभिः सहिताः पुनः किंभूताः विगता रिक्तातिथिः इनः सूर्यः यमः शनिः आरो भौम एषां वासराश्च याभ्यः स्ताः ॥ २६ ॥

पूर्णाजयानंदवतीषु सद्द्युभिः प्रपूरयेन्नावमनेकवस्तुभिः ॥
स्थिरे मृदुक्षिप्रजयास्वसौ भवेद् बृहद्धमानेहसि मंगिनीगमः ॥२७॥

अथ नौकायां वस्तुप्रपूरणशुद्धिमाह—पूर्णेति ॥ वणिक् अनेकवस्तुभिर्नावं प्रपूरयेत्। केषु पूर्णातिथिः जयातिथिः नंदवती नंदातिथिः आसां द्वंद्वे आसु पुनः कैः सद्द्युभिः

⊛ आकृति नंबर ५०

शुभग्रहवासरेः ॥ असौ मंगिनीगमस्तरीप्रयाणं भवेत् कस्मिन् स्थिरे स्थिरसंज्ञभे मृदूनि क्षिप्रा नयातिथिः आसां द्वंद्वे आसु पुनर्बृहद्गमानेहसि बृहत्प्रयाणकालेऽतिदूरगमनकाले ॥ २७ ॥

सवारिवारीशतमीशतारकालघुध्रुवाधोक्षजभाववासवान् ॥
यमार्यमार्यास्फुजितो निराकुलानुशंत्यविद्वान्नवसेतुबंधने ॥ २८ ॥

अथ जले सेतुबंधनशुद्धिमाह—सवारीति ॥ सुधियो नवसेतुबंधने जले नूतसेतुबंधने यमादीन् उशंति वाछंति । यमः शनिः अर्यमाः सूर्यः आर्यो गुरुः आस्फुजिच्छुक्रः एषा द्वंद्वे इमान् किंभूतान् सवारीति वारि जलं पूर्वाषाढा वारीशो जलस्वामी शतभिषक् तमीशश्चंद्रस्तस्य तारका मृगशीर्ष लघूनि ध्रुवाणि अधोक्षजो विष्णुः श्रवणः भवस्य ईश्वरस्येदं भावमार्द्रा वासव धनिष्ठा एषा द्वंद्वे एभिः सहितान् पुनः किंभूतान् निराकुलान् सूर्याक्रमणवर्जितान् पुनरविद्वान् ग्रहैरभिन्नमंडलान् ॥ २८ ॥

पादेऽशुभात्पंच तु पंच चांसे ससोदरे पंच परांसके स्युः ॥
पादे सदा पंचमिताः परस्मिंस्तारा वराः सेतुसमूर्ध्वसंस्थाः ॥२९॥

अथ सेतुबंधचक्रे भानि स्थापयति—पाद इति ॥ अंशुमात् सूर्यमात् पादे पंच ताराः स्युः । तु पुनरंसे स्कंधे पंचताराः स्युः । च पुनरुदरे मध्ये सप्त ताराश्च पुनः परांसकेऽपरस्कंधे पंचताराः स्युः । परस्मिन् पादे परपादे पंचमितास्ताराः स्युः । सदा सर्वकाले सेतुसमूर्ध्वसंस्थाः सेतुचक्रे उपरितनास्तारा वराः श्रेष्ठाः स्युः ॥ २९ ॥

लेये तिमौ तावुरिभे निपेऽश्विणि द्विपुंसि लग्ने ससदंबरायने ॥
चतुष्टये विक्रमवैरिलाभगैरसाधुभिः सेतुनिबंधनं श्रिये ॥ ३० ॥

अथ सेतुबंधने लग्नशुद्धिमाह—लेय इति ॥ सेतुबंधनं पानीयपंक्तिबंधनं श्रिये स्यात् क लेये सिंहे तिमौ मीने तावुरिभे वृषराशौ निपे कुंभे अश्विणि धनुषि द्विपुंसि मिथुने लग्ने चतुष्टये केंद्रे किंभूते ससदंबरायने शुभग्रहे सहिते पुनः कैरसाधुभिः खलग्रहैर्विक्रमस्तृतीयं ३ वैरी षष्ठ ६ लाभ एकादशं ११ एतद्गवनगतैः ॥ ३० ॥

मघाशिफोपार्यभदंदशूकत्रिपूर्विकावारुणभेषु वामं ॥
सदन्हि सूरे जलयंत्रकर्मारिक्तेऽब्जदीप्तौ जलभोदयेऽब्जे ॥३१॥

अथ अरहट्टकबंधनकर्माह—मघेति ॥ जलयंत्रकर्म अरहट्टकयंत्रणं वामं श्रेष्ठं स्यात् केषु मघा शिफा मूलं उपार्यो रजनीशश्चंद्रो मृगशीर्षभं दंदशूकं दंदशूकस्य सर्पस्येदमश्लेषा त्रिपूर्विकाः पूर्वात्रयं वारुणभं शतभिषक् एषा द्वंद्वे एषु सदन्हि शुभग्रहवारे सूरे रविवारे अरिक्ते रिक्तातिथिवर्जिते अब्जदीप्तौ चंद्रज्योत्स्नायां शुक्लपक्ष इत्यर्थः । जलभोदये जलराश्युदयेऽब्जे चंद्रे सति ॥ ३१ ॥

आकृति नंबर ५१ आकृति नंबर ५२

सौम्यायने क्ष्मामरखेटदर्शने सहस्यपीज्यालयतोऽन्यराशिगे ॥
विकर्तने शंबरयंत्रसाधनं न बाधते कूपवनश्रियं क्वचित्॥३२॥

अथ अरघट्टकयंत्रे मतमाह—सौम्येति ॥ क्वचित्स्थाने शंबरयंत्रसाधनं जलयंत्रकर्म कर्तृपदं कूपवनश्रियं कूपजललक्ष्मीं न बाधते न पीडयति क्व सौम्यायने उत्तरायणे क्ष्मामरौ द्विजौ गुरुशुक्रौ च तौ खेटौ च तयोर्दर्शनेऽस्तरहिते सहसि मार्गशीर्षेऽपि पुनरिज्यो गुरुस्तदाया-लयौ धनुर्मीनौ ताभ्यामन्यराशिगे विकर्तने सूर्ये सति ॥ ३२ ॥

यंत्रे शिरःपंजरगर्भकाग्रमालातलेषु क्रमतोऽशुधिष्ण्यात् ॥
पंचाक्षमाः पंच च पंच सप्त तारा वराः स्युस्तलमौलिसंस्थाः ॥३३॥

अथारघट्टचक्रे भानि स्थापयति—यंत्र इति ॥ यंत्रेऽरघट्टचक्रेंऽशुधिष्ण्यात् सूर्यनक्षत्रात् क्रमतः शिरो मस्तकं पंजरं गर्भः काग्रं मस्तकाग्रं मालातलं एषु पंच अक्षमाः पंच च पुनः पंच सप्त ताराः स्युः कोऽर्थः द्विपार्श्वतो मस्तकयोः पंच पंच भानि घटमालिकामध्ये पंच-भानि घटमालिकामस्तके पंच भानि घटमालिकातले सप्त भानि इति॥ अथ फलमाह॥ तलमौ-लिसंस्थास्तारा वराः स्युः ॥ ३३ ॥

शुद्धिस्त्वियं सलिलयंत्रविधावशेषे नेयांधुचक्रवलये
भगणांक ९ भागाः ॥ मध्येंद्रदिङ्मुखहरित्सु विलेखनीया
दुष्टांशकाः श्वसनयातुयमाग्निदिक्स्थाः ॥ ३४ ॥

अथ कूपचक्रे दुष्टांशकान् दर्शयति—शुद्धिरिति ॥ अशेषे समस्ते सलिलयंत्रविधौ जलयं-त्रकार्ये इयं शुद्धिर्नेया ज्ञेया सुधीभिरंधुचक्रवलये कूपचक्रमंडले भगणांकभागा नक्षत्रगण-विभागा विलेखनीयाः कासु मध्ये मध्यभागे इंद्रदिङ्मुखहरित्सु पूर्वप्रमुखकाष्ठासु अत्र श्वसनो वायुः यातुर्निर्ऋतिर्यमः कालोऽग्निरेषां दिक्स्थाः दुष्टांशका अशुभभागाः स्युः ॥ ३४ ॥

आद्यांत्यपाणिद्वयमैत्रयुग्मे सवासवादित्यभपैष्णवे स्यात् ॥
सदन्हि रिक्ताशुभयोगमुक्ते तत्सिद्धये तैलिकयंत्रकर्म ॥३५॥

अथ तैलिकयंत्रशुद्धिमाह—आद्यमिति ॥ तैलिकयंत्रकर्म कर्तृपदं तत्सिद्धये तैलिनः संपदे स्यात् । आद्यमश्विनी आंत्यं रेवती पाणिद्वयं हस्तः चित्रा मैत्रयुग्मं अनुराधा ज्येष्ठा एषां द्वंद्वैकत्वे किंभूते आद्यांत्यपाणिद्वयमैत्रयुग्मे वासवं धनिष्ठा आदित्यभं पुनर्वसु पैष्णं पुष्य एभिः सह वर्तमाने सदन्हि शुभग्रहदिने किंभूते सदन्हि रिक्तातिथिः अशुभयोगा एभिर्मुक्ते वर्जिते ॥ ३५ ॥

शृंगांतस्तलकर्णदारुयुगसंभारेषु भास्वद्भतः सप्त७अग्नि३
द्वय२ग७वन्हि३ सायक५मितास्तारा न्यसेयुः क्रमात् ॥

संपच्छोकविपद्धनर्द्धिसुखता यच्छंति तास्तैलिके यंत्रे-
ऽन्यत्र रसक्रियेऽपि शुभभे लग्ने ससत्कंटके ॥ ३६ ॥

अथ शार्दूलविक्रीडितेन तैलिकयंत्रचक्रे भानि स्थापयति-शृंगांतइति ॥ तैलिके यंत्रे सुधियो भास्वद्भतः सूर्यनक्षत्रात् क्रमात् सप्त ७ अग्नित्रयः३ द्वौ२ अगाः सप्त ७ वन्हित्रयः३ सायकाः पंच ५ एभिर्मितास्तारा न्यसेयुः स्थापयेयुः । केषु शृंगं अंतर्मध्यं तलः कर्णः दारुयुगं संभाराः एषां द्वंद्वे एषु । ताः सप्तादितारा: संपत् ७ शोकः ३ विपत् २ धनं७ ऋद्धिः ३ सुखं ५ एषां भावे तांतामिति यच्छंति ददति कस्मिन् शुभभे शुभराशौ किंभूते शुभभे ससत्कंटके शुभग्रहयुक्तकेंद्रे सति अन्यत्र रसक्रिये इक्षुरसादियंत्रकर्मण्यपि इदं ज्ञातव्यं ॥ ३६ ॥

दिक्षु ताराश्चतस्रो विदिक्षु त्रयं हेलिभादीशकोणात्सभाशासने ॥
सृष्टिमार्गाच्च शून्यस्थिती वन्हिभीर्धीश्च भी राजशं चौरभीः शं क्रमात्३७

अथ स्रग्विण्या चउरो (चबुतरुं) इत्यादिभाषा चक्रे भानि स्थापयति—दिक्ष्विति ॥ हेलिभात् सूर्यनक्षत्रात् सृष्टिमार्गात् सभाशासने आस्थानसभायां (चबुतरो) इति भाषायां चतस्रस्ताराः स्थाप्याः । च पुनरीशकोणात् ईशानकोणात् विदिक्षु त्रयं भत्रयं देयं । क्रमात् नक्षत्रचतुष्के शून्यं एवं त्रये स्थितिः अनयोर्द्वंद्वः चतुष्के वन्हिभीरग्निभीतिः त्रये धीर्बुद्धिः चतुष्के भीर्भयं त्रये राजशं भूसुखं चतुष्के चौरभीः चौरभयं त्रये शं सुखं स्यात् ॥ ३७ ॥

दारुणोग्राण्यमूलानि मिश्राण्यवाःपित्र्यभान्यांत्यवातादितेयानि च ॥
प्रोज्झ्य शेषेषु भेष्वर्कसद्वासरे सत्तिथौ सत्सभालिंदमासाधयेत् ॥३८॥

अथालिंदकृत्यशुद्धिमाह—दारुणेति ॥ पुमान् सत्सभालिंदं शुभसभाप्रघाणमासाधयेत् कुर्यात् किंकृत्वा दारुणोग्राणि दारुणसंज्ञभानि उग्रसंज्ञभानि अमूलानि मूलवर्जितानि मिश्राणि द्वे कृत्तिकाशब्दो बहुवचनात्तत्वाद्बहुवचनं घटते अवाःपित्र्यभानि वार्जलं पूर्वाषाढा पित्र्यभं मघा आभ्यां वर्जितानि पितॄणामिदं पित्र्यमन्यथा छंदोभंगः आंत्यं रेवती वातः स्वाती आदितेयं पुनर्वसु एषां द्वंद्वे एतानि च प्रोज्झ्य विहाय शेषेषु भेषु अर्कसद्वासरे सूर्यदिने शुभग्रहदिने सत्तिथौ ॥ ३८ ॥

द्विशयमिश्रभपावनदारुणान्युपलदारुविदारणकर्मणि ॥
विपुरसिद्धिवसाननमातिथीश्चपलराश्युदयेऽन्त्वसदन्विते ॥३९॥

अथ पाषाणकाष्ठविदारणशुद्धिमाह—द्विशयेति ॥ उपलाः प्रस्तराः दारु काष्ठ एषां विदारणकर्मणि द्विधाकरणकार्ये द्विशयो हस्तयुग्मं हस्तचित्रे मिश्रभानि पावन स्वाती दारुणानि दारुणसंज्ञानि एषां द्वंद्वे इमानि स्युः । च पुनर्विगतं नष्टं पुरं शरीरं यस्मात्स्य वा विपुरोऽनंगः कंदर्पस्त्रयोदश १३ सिद्धयोऽष्टौ ८ वसवः शंभुः एकादश ११ सः सूर्या द्वादश

१२ आः स्वयंभूस्तस्याननानि मुखानि चत्वारि एभिर्मीतीति एतन्मिता तिथिः त्रयोदशी अष्टमी एकादशी द्वादशी चतुर्थी चेति शुभा स्यात्। 'वो वाते वरुणे रुद्रे' इति 'सः सूर्ये च परोक्षे च' इति 'विरिंचौ आश्च पुल्लिंग' इत्येकाक्षरकोषे ॥ पाठांतरेणापि यदुक्तं लोकभाषायां 'तरेसि अष्टमी चौदशी चोथि नवमीति हिंपाहाणटंकणदारणकज्जिघारिपुनिमइळहइकल्याण' १ इति फांकटं ॥ कस्मिन् चपलराश्युदये किंभूतेऽसदन्विते खलग्रहयुक्ते ॥ ३९ ॥

रविभतो भुजयानुशरैस्ततो मुहुरिहोपचयेन विगर्हितम्॥
यदुडु तज्जिनदिक्प्रमितं तथा दृषदयोमणिदारुविदारणे ॥४०॥

अथ पाषाणादौ विदारणे भानि चिंतयति—रविभत इति ॥ सूर्यनक्षत्रात् भुजया हस्तेन नक्षत्रयुग्मेन अनु पश्चात् शरैर्नक्षत्रपंचकेन ततो मुहुर्वारं वारं उपचयेन पुनः पुनः पंचवृद्धिविधानेन यत् उडु जिनदिक्प्रमितं चतुर्विंशतितमं दशमं च स्यात्तथा तन्नक्षत्रं चतुर्विंशं दशमं च विगर्हितं त्याज्यं कस्मिन् दृषत् पाषाणः अयोमणिर्लोहमणिः रत्नं दारु काष्ठं एषां विदारणे भिन्नकरणे ॥ ४० ॥

चित्राजमित्राजभराजरेवतीसावित्रसुत्रामककाश्यपीज्यभैः ॥
सदन्हि सौरर्क्षदशेंद्रभान्यभैः पटक्रिया यंत्रविधौ नृभोदये ॥ ४१ ॥

अथ वस्त्रक्रियायंत्रविधौ भादिशुद्धिमाह—चित्रेति ॥ यंत्रविधौ 'ताणो चढाववो' इति भाषा पटक्रिया स्यात् कैः चित्रा अजो विष्णुः श्रवणः मित्रोऽनुराधा अजो ब्रह्मा तस्य भं रोहिणी राजा चंद्रो मृगशीर्षं रेवती सावित्रं सविता सूर्यस्तस्येदं भं हस्तः सुत्रामा इंद्रो ज्येष्ठा को वायुः स्वाती काश्यपी पुनर्वसु इज्यभं पुष्यः एषां द्वंद्वे एभिः पुनः कैः सौरक्षात् सूर्यभात् दश दशमं इंद्रभं चतुर्दशं नक्षत्रं आभ्यामन्यभैः सूर्यनक्षत्राद्दशमचतुर्दशमितनक्षत्रवर्जितनक्षत्रैः क सदन्हि शुभग्रहदिवसे नृभोदये नरराश्युदये ॥ ४१ ॥

आदित्यभादित्यमृदूग्रधन्वभं सांत्याजवाताजभमर्कसद्युगम्॥
चरोदये वारिचरोदयेनजे सत्कंटके हारि कुलालकर्मणि ॥४२॥

अथ कुंभकारकर्मणि भादिशुद्धिमाह—आदित्येति ॥ कुलालकर्मणि कुंभकारकार्ये आदित्यादिनक्षत्रं हारि शुभं स्यात्। आदित्यं पुनर्वसु आदित्यभं हस्तः मृदूनि उग्रधन्वा इंद्रस्तस्य भं ज्येष्ठा किंभूत आंत्यं रेवती अजो विष्णुस्तस्य भं श्रवणः वातः स्वाती अजो ब्रह्मा रोहिणी एभिः सहितं पुनः किंभूतं अर्कमद्युगं सूर्यशुभग्रहदिनयुक्तं पुनः कस्मिन् चरोदये चरलग्ने वारिचरोदयेनजे जलचरलग्नयुक्तशनौ सत्कंटके ॥ ४२ ॥

अधः समाशापरिधौ निपस्थले दंडे सचंडच्छविभाद्रमंडलं ॥
कुलालचक्रे क्रमतो नगांशमं घटापरोदक् च तदेतदर्थकृत् ॥४३॥७

अथ कुलालचक्रे भानि स्थापयति—अथ इति ॥ कुलालचक्रे सचडच्छविभात् सूर्ययुक्त नक्षत्रात् नगाश्रम सप्ताना चतुष्कमितेन अष्टाविंशतिभिमडल स्थाप्य कस्मिन् क्रमात् अथ समाशाग्निरिगौ अथ स्थाने शंकुस्थाने समदिक्षु परिधौ निपस्थले कुंभस्थाने दंडे च अत्र घटापरोदक् कुंभस्थानगत पश्चिमदिग्गत उत्तरदिग्गत तत् एतत् नक्षत्र अर्धकृत् कुंभकारस्य सत्कर स्यात् ॥ ४३ ॥

शैलूषारोहयंत्रे तपनविधिमतोऽब्धेशमं मूर्ध्नि मध्ये
पूर्वाद्याशा वरत्रास्वनु तलविषये तारकामंडलं स्यात् ॥
वामं वेणाववामं त्वपरमिह सदैतत्कलाकर्तृरार्द्राचित्रा-
धीराच्युतर्क्षत्रितयधिपणभैः सत्सदर्कैः सुलग्ने ॥४४॥

अथ स्रग्धरया वंजाणिकाना वशारोहणयन्त्रचक्रे भानि स्थापयति—शैलूषेति ॥ शैलूषो नटस्तस्यारोहयंत्रे वशस्थापनयन्त्रणे तपनाविधिमतो रविनक्षत्रात् अब्धशम सप्ताना चतुष्कमितेन सप्तविंशतिस्तारकामडल मूर्ध्नि मस्तके मध्य गर्भे पूर्वाद्याशावरत्रासु पूर्वप्रमुखदिग्रज्जुषु वाम अवाम सव्यापसव्येन गत अनु पश्चात् तलविषये वशतले स्यात् । इह वेणौ वशे मस्तकमध्यतलाना त्रये आर्द्राचित्राधीराणि अच्युतर्क्षत्रितय श्रवणत्रय धिषणभ पुष्यः एषा द्वंद्वे एभि सत् शुभ स्यात् । कस्यैतत्कलाकर्तुर्नटस्य कै सदर्कैं शुभग्रहमूर्यै सुलग्ने सति च पुनरपरं सव्यापसव्यरज्जुषु गत नक्षत्र इह कामविनाशकं स्यात् ॥ ४४ ॥

विडलभाडलभैरपहस्तितैरसदहानि युतान्यसदुद्गमे ॥
त्रियुगदारुणमिश्रशयद्वयैरुपलदारुविदारणकर्मणि ॥४५॥

अथोपलदारुविदारणे वीरादिशुद्धिमाह—विडलेति ॥ उपलदारुविदारणकर्मणि पाषाणकाष्ठभेदनकायऽसदहानि खलग्रहदिनानि स्यु किंभूतानि असदहानि युतानि युक्तानि कैरपहस्तितैर्हस्तवर्जितैर्विडलभाडलभै विडल नक्षत्रयोगैराडलनक्षत्रयोगै त्रियुग पूर्वात्रय उत्तरात्रयं दारुणसज्ञानि मिश्रसज्ञे शयद्वय हस्तश्चित्रा एषा द्वंद्वे एतै कासदुद्गमेऽशुभग्रहाणा लग्ने ॥४५॥

शयमृगश्रुतिमूलपुनर्वसुश्वसनभेशभवासववासवैः ॥
निचितनिर्जरवर्द्धकिभिर्भवेद्विदि च चर्मविधानमहो सिते ॥४६ ॥

अथ चर्मकार्ये भादिशुद्धिमाह—शयेति ॥ चर्मविधान चर्मकार्यं भवेत् कै शयो हस्त मृगो मृगशिर श्रुति श्रवण मूल पुनर्वसु श्वसनो वायुस्तद्भ स्वाती ऐशभ आर्द्रा वासव धनिष्ठा वासव इंद्रो ज्येष्ठा एषा द्वंद्वे एभि किंभूतैर्निचित नियुक्त निर्जरवर्द्धकिर्देवसूत्रधारस्तद्भ चित्रा एषु ते पुन क विदि बुधे पुनरहो सूर्ये सिते शुक्रे वारे ॥ ४६ ॥

नवकमडलुपूर्वपयोग्रहो वरतरो गुरुराजसितेषु च ॥
वरुणवातमृगाश्विनधीरभैर्वसुभमूलमघादितिजीवभैः ॥४७॥

अथ नवीनकमंडलौ जलभरणशुद्धिमाह—नवेति ॥ नवकमंडलुपूर्वपयोग्रहो नूतनकमंडलौ प्रथमपानीयग्रहणं वरतरः शुभः स्यात् केषु गुरुराजसितेषु गुरुचंद्रशुक्राणां वारे च पुनः कैः वरुणः शतभिषक् वानं वनस्य जलस्येदं पूर्वाषाढा मृगो मृगशिरः आश्विनमश्विनी धीरभानि एषां द्वंद्वे एभिः पुनः कैः वसुभं धनिष्ठा मूलं मघा अदितिः पुनर्वसु जीवो गुरुस्तद्भं पुष्य एषां द्वंद्वे एतैः ॥ ४७ ॥

प्रपादिपानीयविधानमेवं विहाय विष्टिक्षयसोमरिक्ताः ॥
जलोदये राजनि वांबुगे तच्छुद्धे त्रिकोणाष्टचतुष्टये स्यात् ॥४८॥

अथ जलकार्यशुद्धिमाह—प्रपेति ॥ तत् प्रपादिपानीयविधानं जलशालादि जलकार्यमेवं स्यात् किंकृत्वा विष्टिं भद्रां क्षयसोमरिक्ताः क्षीणचंद्रं रिक्तातिथीन् विहाय कस्मिन् जलोदये जलराशौ राजनि चंद्रे वाथाबुगे चतुर्थभावगते चंद्रे वा त्रिकोण ९।५ अष्ट-चतुष्टये १।४।७।१०। त्रिकोणाष्टमकेंद्रे शुद्धे सति ॥ ४८ ॥

मृदुध्रुवक्षिप्रशिफाविशाखाप्राचेतसांभोभगणो वरेण्यः ॥
वल्लीवसानद्रुमरोपणे स्यात्सौम्योदयः सत्तिथिवारसूरः ॥४९॥

अथ वल्ल्यादिरोपणे वारादिशुद्धिमाह—मृद्विति ॥ वल्लीवसानद्रुमरोपणे वल्लीना वसानं आच्छादनं वल्लीमंडपरोपणं वृक्षरोपणं च द्वंद्वैकत्वे तस्मिन् सौम्योदयः शुभलग्नं सत्तिथिवारसूरः शुभतिथिः सूर्यवारः पुनर्मृद्वादिनक्षत्राणां गणो वरेण्यः शुभः स्यात्। मृदूनि ध्रुवाणि क्षिप्राणि शिफा मूलं विशाखा प्राचेतसं शतभिषक् अंभो जलं पूर्वाषाढाभं एषा द्वंद्वे एषां गण इति ॥ ४९ ॥

हलप्रवाहे जनजीवनोद्यमे कृषीवलो मंगलविद्यमांस्त्यजेत् ॥
कृपीटयोन्यंतकभीमभोगिभात्रिपूर्विकैंद्राणि चतुष्टयुक्तिथिः॥५०॥

अथ हलप्रवाहे वारादिशुद्धिमाह—हलेति ॥ हलप्रवाहे सीरकर्षणे जनजीवनोद्यमे जीवनमाजीविका तस्योद्यमे कृषीवलः कुटुंबी कर्तृपदं मंगलो भौमः विद् बुधः यमः शनिः एषां द्वंद्वे इमान् च पुनः कृपीटयोनिर्वह्निः कृत्तिका अंतको भरणी भीमो भर्ग आर्द्रा भोगी सर्पोऽश्लेषा त्रिपूर्विका ऐंद्रं ज्येष्ठा एषा द्वंद्वे इमानि पुनर्दुष्टयुक्तिथिः कुयोगतिथीस्त्यजेत् वर्जयेत् ॥ ५० ॥

नैवाडले भे द्विकलोनमंडले वार्मण्डले लांगलवाहमारभेत् ॥
कुटुंबिराशावपराजसत्फले ज्येष्ठादिमार्द्धं च तथैव भद्रया॥५१॥

अथाडलादौ हलकर्षणं निषेधति—नैवेति ॥ कुटुंबी लांगलवाहं हलप्रवाहं नैवाचरेत् न कुर्यात् कस्मिन् अडले भे अडलयोगनक्षत्रे पुनर्द्विकलोनमंडले द्विकलाभ्यामूनं हीनं मंडलं यस्य स तस्मिन् कलाशब्देन तिथिः द्विकलोनमंडले इति कोऽर्थः द्विकलाः समसं-

स्ट्यादितिथय २।४।६।८।१०।१२।१४ इति। यत पाठांतरेणाप्युक्त ॥ दशम्येकादशी चैव तृतीया च त्रयोदशी। सप्तमी पचमी चैव प्रतिपच्च सुखावहा ॥१॥ इति शुभफलमाश्रित्य प्रोक्तमिति तासु वार्मिडले चद्रे सति 'मृगाको जलमडल' इति ब्रह्मसिद्धांत जलस्वरूपत्वात् ॥ पुनरपगत राज्ञश्चद्रस्य सत्फल यस्मात् सोपराजसत्फलो गतचद्रबलस्तस्मिन् कुयविरामो कार्मुकनामराशौ सति पुनर्ज्येष्ठादिमार्द्धे ज्येष्ठमासपूर्वार्द्धस्तस्मिन् पुनस्तथैव भद्रया विष्ट्या ॥५१॥

ससूरतारादिभतस्त्रयं त्रयं त्रयं शरोन्मं त्रितयं तु पंचकं ॥
त्रिकं द्विकं तारकमंडलं क्रमादसच्छुभं सीरविमध्यफालदिक् ॥५२॥

अथ हलचक्रे भानि स्थापयति—ससूरेति ॥ ससूरतारादिभत सूर्याक्रांतनक्षत्रात् त्रय ३ त्रय३ त्रय३ शरैरुन्मीयते इति शरोन्म बाणमित ५ त्रितय ३ तु पुन पचक ५ त्रिकं ३ द्विक २ इति हलचक्रे तारकमडल स्यात्तत्र क्रमादसत् शुभं च स्यात्। कोऽर्थ योक्रांत त्रयमशुभ त्रय शुभ त्रयमशुभ पंच शुभ त्रयमशुभमिति। पुन सीरविमध्यफालदिक् हलस्य मध्यभाग प्रोह्य फालदिग् हलस्य द्वयो प्रांते शुभ मध्ये नेष्टमित्यर्थ ॥ ५२॥

न कंदमूलादिकृपावनिष्टः सीरप्रवाहे भगणाशकः क्वचित् ॥
शंपागतस्तन्मतमुद्धतं वा सर्वत्र शस्तं हि मदुक्तमेव ॥ ५३ ॥

अथात्र कस्याचिन्मत दूषयन् स्वमत द्रढयति—न कदेति ॥ कदमूलादिकृपौ कदमूले खनने क्वचित् शम्पागत शमल' इति भाषा तत्र गतो भगणाशको हलप्रवाहे न इष्ट स्यात् वा इति पक्षांतरे तन्मत तस्य ज्योतिर्विदो मतमुद्धतमनर्गल हि युक्तार्थे मदुक्त मया प्रोक्तम सर्वत्र शस्त शुभ ज्ञेयमित्यर्थ ॥ ५३ ॥

तमीश्वराश विनयेद्धलं सदा केदारमादौ सनलक्षभैरित ॥
सीरोत्तराग्रोतसुरेंद्रदिङ्मुखी मृगांकदिक्शुद्धिवतीह सत्फला ॥५४

अथ क्षेत्रकर्षणविधिमाह—तमीति ॥ सदा निरतर आदौ कटुकी हल केदार क्षेत्रतमाश्व राश चद्रदिशमुत्तराशागत विनयेत् प्राप्नुयात्। द्विकमकत्वात् केदारमित्याधारे कर्म। किंभू हल सनलक्षभैरित नक्षत्रनक्षत्रराशिप्रेरित इह क्षेत्रे मृगांकदिक् उत्तराशा सत्फल शुभफलदायिनी स्यात्। किंभूता मृगांकदिक् शुद्धिवती कुयोगरहिता पुन किंभू सीरोत्तर अग्रे सुरेन्द्रदिङ्मुखी सीरेण हलेन उत्तरा स्यात्। उत्तरादग्रत ओत प्रो सुरेंद्रदिङ्मुख पूर्वदिङ्मुख यस्या सा सीरोत्तराग्रोतसुरेंद्रदिङ्मुखी इति। सानोत्तरा पाठ [illegible] [illegible] शुभ तथैव ॥ यत सौम्यां दिश प्रति [illegible] नयनन प्र रेखा उत्पद्यते ॥ यथा प्रथमगमननैका आवननन द्वितीया पुनरुत्तरा प्रति द्वितीयगम नेन तृतीया पुनरावर्तनेन चतुर्था पुनरुत्तरा प्रति तृतीयगमनेन [illegible] रेखा उत्पद्यतेऽभित

आकृति नंबर ५०

न कार्या तथा चोक्तं ॥ शस्तासु चंद्रतारासु शुचिः शुक्लेन वाससा । स्नात्वा गंधैश्च पुष्पैश्च पूजयित्वा विशेषत् ॥१॥ पृथीवीं ग्रहसंयुक्तं पूजयित्वा प्रजापतिं। अग्निं प्रदक्षिणीकृत्य दातव्या च प्रदक्षिणा ॥२॥ कृष्णो वृषौ नियोक्तव्यौ नवीनैश्च युतेन वा ॥ हेमकूटहलाग्रेण छिन्नरेखा न कारयेत् ॥ ३ ॥ उत्तराभिमुखो भूत्वा क्षीरेणार्घं प्रदापयेत् । विरलं छिन्नलांगूलं कपिलं वृषभं त्यजेत् ॥ ४ ॥ हलप्रवाहणं कार्यं नीरोगैर्वृषकर्षकैः । हलं दिग्भिर्दृढैः क्षेमं कुट्टकं न शुभं भवेत् ॥ ५ ॥ वृषभा यदि युद्धेयरन् तस्य विघ्नं सदा भवेत् । तस्य सर्वप्रकारेण निर्विघ्नं कारयेत्तदा ॥ ६ ॥ एका जयकरी रेखा तृतीया चार्थवृद्धिदा । पंचमी च भवेद्रेखा बहुसस्यफलप्रदा ॥ ७ ॥ अत ऊर्ध्वं न कर्तव्या महादोषस्ततो भवेत् । स्मर्तव्या वमन. शुक्र. पृथुनामा सचंद्रमाः ॥ ८ ॥ पराशरो हली चैव सर्वविघ्नोपशांतये ॥इति॥ अत्र दुर्निमित्तानि तत्रैवोक्तानि ॥ हले प्रवाह्यमाणे तु कूर्मं उत्पद्यते यदि। गृहिणो मृत्युरेतस्य ततोऽग्नेश्च भयं भवेत् ॥ ९ ॥ इषाभंगो यदा कुर्यात् संतापो जीवितस्य च । सुतनाशो युगे भग्ने समाने म्रियते शिशुः ॥ १० ॥ योक्त्रच्छेदे तु व्यासंगः सस्यहानिश्च जायते ॥११॥ हले प्रवाह्यमाणे तु गौरेक. प्रपतेद्यदि। प्रपतेद्युक्तमात्रस्तु बंधनं च प्रयच्छति ॥ १२ ॥ ज्वरातिसाररोगेण कृषिभंगं विनिर्दिशेत् । प्रवहेद्युक्तमात्रस्तु ततो गौः खनते यदि ॥ १३ ॥ नहेन युक्तमात्रस्तु तदा सस्य चतुर्गुणमिति ॥ ५४ ॥

योक्त्रादिकोपस्करसाधनेऽनसो हलस्य वा स्युः सशुभेनवासराः ॥
पूर्णाजयानंदवतीयुता व्यमा मृदुस्थिरक्षिप्रजटाचराचिताः ॥५५॥

अथ योक्त्रादिसाधनशुद्धिमाह—योक्त्रेति ॥ अनसः शकटस्य वा योक्त्रादिकोपस्करसाधने योक्त्राद्युपस्करकार्ये सशुभेनवासराः शुभग्रहयुक्तसूर्यादिनानि स्युः । किंभूताः सशुभेनवासराः पूर्णाजयानंदवतीयुताः पूर्णातिथिः जयातिथिः नंदातिथिः आभिर्युक्ताः पुनः किंभूता व्यमा अमावास्यावर्जिता पुनः किंभूता मृदूनि स्थिराणि क्षिप्राणि जटा मूल चराणि एतानि उडूनि एतैराचिताः व्याप्ताः ॥ ५५ ॥

मैत्रेष्वलोलेषु लघुष्विहानले मूलश्रविष्ठाग्रजभेषु सद्दिने ॥
रिक्ताविमुक्तेऽशुभदन्हि वापने समस्तबीजोप्तिरभीष्टसिद्धये ॥५६॥

अथ बीजवापने भादिशुद्धिमाह—मैत्रेष्विति ॥ समस्तबीजोप्तिः समस्तबीजवापनमभीष्टसिद्धये वाञ्छितकार्याय स्यात् क मैत्रेषु मेषु ध्रुवेषु मृदुलघुतमेषु उडुषु आनले कृत्तिकायां मूले श्रविष्ठा धनिष्ठा अग्रजो विष्णुस्तस्य भं ध्रुवाणः एतानि उडूनि एषु सद्दिने शुभग्रहदिने वापने इह पूर्णवारे रिक्तादिमुक्ते रिक्तातिथिवर्जिते पुनः ... [illegible]

कूपांबुसिद्धान्नकृतापने काचिन्मघाद्यायवंशुविदो निगंहिता ।
समाहृतं वारिभमत्र केनचिद्बीजोप्तिरिष्टाभिमतसत्रूमोदये ॥ ५७ ॥

अथ कूपनकूपकार्ये मनमाह—कूराति ॥ क्वचित् स्थाने कूरानुसिद्धान्तक ऊपने कूपजलेन नि षा राजन्यत्रापने मघाशयो मघाहस्तो अनुविद्यो सूर्यत्रयौ विगर्हितौ वर्जितौ । अत्र केनचित् वारिम पूर्वाषाढा समाहृतमगीकृत । पुनर्बीजोप्तिर्वीजवापनमिष्टा श्रेष्ठा स्यात् कस्मिन् आर्द्रि तत्समृगोदये शुभग्रहयुक्त नृराश्युदये ॥ ५७ ॥

शिरस्त्रिमा राममिता गलोऽर्कमा गर्भश्च रस्रोऽनु च लूनकं पराः ॥
पुच्छाग्रमिंदुप्रमदाःपिचंडगा वराः पृदाकोरुडुतोऽन्नवापने ॥५८॥

अथ बीजवापविषये फणिचक्रमाह—शिर इति ॥ पृदाको सर्पस्य राहोरित्यर्थः । यतो राहोस्तु फणीति नाम प्रयातरमसिद्धमेवेति तस्योडुतो नक्षत्रात् इदुमनक्षत्रार ।त्रिमत्रय मिता शिर स्यात् । एव राममितास्त्रयमिता गल स्यात् । अर्कमा द्वादशमिता गर्भो मध्य भाग स्यात् । अनु पश्चाच्च रस्रो लूनकं पुच्छ स्यात् । परा अग्रेतनास्ताराः पुच्छाग्र स्यात् अथाहिचक्रे पिचडगा उदरगास्तारा वरा श्रेष्ठा स्यु 'पिचडो जठरोदरे' इति हैम ॥ ५८ ॥

सीरप्रवाहशुभशुद्धकाले गोदारणारंभणमाहुरार्याः ॥
क्षेत्रे च बीजोप्तिभघस्रशुद्धौ गृहे नयेत्सीत्यचयं कुटुंबी ॥५९॥

अथ धान्यच्छेदनशुद्धिमाह—सीरेति ॥ आर्या पडिता गोदारणारभण कुद्दालकृत्यमाहु कथयंति 'गोदारण तु कुद्दाल' इति हैम । कस्मिन् सीरप्रवाहशुभशुद्धकाले हलप्रवाहस्य दिनन क्षत्राणा शुद्धकाले च पुन कुटुंबी सीत्यचय धान्यपुजं गृहे नयेत् प्राप्नुयात् 'धान्य तु सस्य सीत्य च' इति हैमः । कस्या बीजोप्तिभघस्रशुद्धौ बीजवापनस्य नक्षत्रदिननिर्दिष्टायाम्तस्या॥५९

विधूलयंत्यावकरैः करीषैः सधूलिभिः क्षेममलं विशश्चेत् ॥
सदन्हि शुद्धेऽतिशुभं चराद्यं क्रव्यादभावाजपदस्रपुष्यैः ॥ ६० ॥

अथ क्षेत्रे करीषादिक्षेपणमाह—विधूलेति ॥ चेत् यदि अलमवधारणे विश कुटुंबिन क्षेत्रं विधूलयति धूलियुक्त कुर्वंति (खातर नाखवु) इति भाषा कै करीषै शुष्कगोमयगणैः किंभूतै करीषै अवकरै सकरै भवा आवकरास्तै पुन किंभूतै सधूलिभि धूलियुक्तैः कस्मिन् सदन्हि शुभग्रहाणा दिने किंभूते सदन्हि शुद्धे निर्दोषप्राप्ते कै चराद्यानि चरनक्षत्रयुक्तानि क्रव्यादो राक्षसो मूल भवस्येदं भावमार्द्रा अजपदस्र अजपादभ पूर्वभाद्रपदा पुष्य एषा द्वद्वे एतै किंभूतं क्षेत्रं अतिशुभ ॥ ६० ॥

आजीविमिच्छत्यपि ना यदा यो गोधान्यभूमिव्यवहारतोऽसौ ॥
चरेच्चरक्षिप्रमृदुध्रुवर्क्षैस्तदुदयनं सत्तिथिवारकीर्णैः ॥ ६१ ॥

अथ गवादीना व्यवहारशुद्धिमाह—आजीविमिति ॥ यदा चेत् यो ना पुमान् आजीव आजीविकामिच्छति वाछति' आजीवो जीवन वार्ता' इति' हैम । कस्मात् गाँगो धान्य भूमि-

क्षेत्रादिः आसां द्वंद्वे आसां व्यवहारतो व्यापारात्तदानीं नरस्तद्वर्यम् तेषु गवादिषु उपक्रमं चरेत् कुर्यात्। कैः चराणि क्षिप्राणि मृदूनि ध्रुवाणि एषां द्वंद्वे एतद्वे. किंभूतैः सत्तिथिवारकीर्णैः शुभतिथिवारव्याप्तैः ॥ ६१ ॥

नवोक्षगोकर्म समेत्य शुद्धे द्वीशादितैंद्रलघुश्रविष्ठाः ॥
सवारुणांत्याः सशुभद्युयोगाः शीर्षोदये प्रापयति प्रियार्थम् ॥६२॥

अथ नूतनवृषस्य कृत्यमाह—नवोक्षेति। शुद्धे निर्दोषकाले नवोक्षगोकर्म नूतनवृषभस्य कर्म कर्तृपदं प्रियार्थं वाञ्छितपदार्थं प्रापयति किंकृत्वा द्वीशं विशाखा आदितेयं पुनर्वसु ऐंद्रं ज्येष्ठा लघूनि श्रविष्ठा धनिष्ठा आसां द्वंद्वे एतास्ताराः प्रति समेत्य प्राप्य किंभूताः सवारुणात्याः शतभिषक्रेवतीसहिताः पुनः किंभूताः सशुभद्युयोगाः शुभग्रहदिनयोगयुक्ताः क शीर्षोदये शीर्षलग्ने ॥ ६२ ॥

मूलादितेयद्वयवारुणांत्यत्रिपूर्विकाक्षिप्रमृगश्रविष्ठाः ॥
सद्वीश्वरा वृष्ण्यजकासरीणां क्रियासु सेनास्फुजिदेनिसोमाः ॥६३॥

अथ मेषादिना कृत्यशुद्धिमाह—मूलादीति ॥ वृष्णिर्मेषः अजश्छागः कासरी महिषी आसां क्रियासु कर्मसु मूलादिताराः स्युः। मूल आदितेयद्वय पुनर्वसु पुष्यः वारुणं शतभिषक् आंत्यं रेवती त्रिपूर्विका पूर्वात्रय क्षिप्राणि मृगो मृगशीर्षं श्रविष्ठा धनिष्ठा आसां द्वंद्वे इमास्ताराः किंभूता इमाः सद्वीश्वरा विशाखायुक्ता पुनः किंभूताः सेनेति इन सूर्यः आस्फुजित् शुक्रः ऐनिः शनि सोम एषां द्वंद्वे एभिः सहवर्तमानाः ॥ ६३ ॥

अथोष्ट्रवामीखरकर्म पाणौ पौरंदराद्यानिलमैत्रवर्गे ॥
पुनर्वसौ हंससितैनिवारे गरुत्मतां कर्म समृद्धये तु ॥ ६४ ॥

अथेति ॥ अथानंतरं उष्ट्रवामीखरकर्म उष्ट्रवेसरगोटकखराणां कर्म तु पुनर्गरुत्मतां पक्षिणां कर्म कर्तृपदं समृद्धये संपदार्थं स्यात्। क पाणौ हस्ते पौरंदरं ज्येष्ठा आद्यमश्विनी आनिलं स्वाती मैत्रमनुराधा एषां वर्गे गणे पुनः पुनर्वसौ अदितिभे पुनर्वसुशब्दः एकवचनातोऽप्यत्र पुनः हंसः सूर्यः सित शुक्र ऐनिः शनि एषां द्वंद्वे एषां वारे ॥ ६४ ॥

अमा३०ष्टमी८भूत१४दिनानि भास्करं चित्रोत्तराधोक्षजभाजभानि च॥
परित्यजेन्निर्गमने निवेशने सदा पशूनां स्थितितोऽर्कसंक्रमम् ॥६५॥

अथ पशूनां निर्गमनवेशशुद्धिमाह—अमेति ॥ सदा पुमान् पशूनां स्थितितः स्थानात् निर्गमने निवेशने प्रयाणे प्रवेशने एतानि त्यजेत्तान्याह ॥ अमा अमावसी अष्टमी ८ भूतदिन चतुर्दशी एषां द्वंद्वे एतानि न पुनर्भास्कर रविदिनं च पुनश्चित्रा उत्तरा अधोक्षजो विष्णुस्तद्भं श्रवणः अजो ब्रह्मा रोहिणी एषां द्वंद्वे इमानि भानि पुनरर्कसंक्रममिति कर्मदानि॥६५

लघुश्रवोवासववासवांत्यभैस्तिष्यादितेयद्विपविश्वकर्मभैः ॥
जीवस्वधात्वंबरधान्यवस्तुजः क्रयस्तथा विक्रय एव सद्युनि ॥६६

अथ क्रयविक्रयशुद्धिमाह—लघ्विति ॥ जीव पशु स्व धन धातुर्लोहादि अंबर वस्त्र धान्य एषा द्वंद्वे इत्यादीना वस्तूना क्रयस्तथा विक्रय एव स्यात् । कै लघूनि श्रव श्रवणः वासव धनिष्ठा वासव इंद्रो ज्येष्ठा आत्य रेवती एषा द्वंद्वे एतद्भैः पुन कैः तिष्यः पुष्य आदितेय पुनर्वसु द्वीप द्विस्वामिक विशाखा विश्वकर्मभ चित्रा एषा द्वंद्वे एभिः पुनः सद्द्युनि शुभग्रहाणा दिने ॥ ६६ ॥

एभिश्च यादोऽर्यतमीशभोत्तराभूतेशभैर्द्वीश्वरजैष्णवोझ्झितैः ॥
विविद्यमारज्ञुपुत्र स्थिरोदये सत्कंटके वस्तुविनीमयो वरः ॥ ६७ ॥

अथ वस्तूना विनिमय (पालटण) शुद्धिमाह—एभिश्चेति ॥ वस्तुविनीमय एक वस्तु दत्वान्यवस्तुग्रहो वर. श्रेष्ठ स्यात् कैरेभि पूर्वोक्तलघ्वादिनक्षत्रै किंभूतैरेभि द्वीश्वर विशाखा जैष्णव ऐंद्र ज्येष्ठा आभ्यामुज्झितैर्वर्जितैश्च पुनर्य दोऽर्यो जलस्वामी वरुण शतभिषक् तमीशश्चंद्रो मृगशीर्षभ उत्तरात्रय भूतेशभमार्द्रा एषा द्वंद्वे एते पुन केषु विगता निर्गता विद् बुध यम शनिः आरो भौमश्चैते येभ्यस्तेषा ज्ञुपु रविचंद्रगुरुशुक्रादिनेषु पुनः स्थिरोदये स्थिरलग्ने सत्कंटके शुभग्रहयुक्त कटके ॥ ६७ ॥

अलोलसाधारणदारुणोग्रैर्धनं प्रदत्तं कुसिदेहया यत ॥
हृतं बलान्यस्तमिदं च दैवान्न याति पाणिं पुनरेव तत्स्वम् ॥६८

अथ कालांतरधनार्पणशुद्धिमाह—अलोलेति॥ दैवात् कुसीदो वृद्धिजीवन तस्या ईहा इच्छा तया कालांतरेच्छया कृत्वा यत् धन प्रदत्त च पुनर्यत् धन हृत चौरेण इति शेषः पुनरथवा बलान्यस्त भूमौ क्षिप्त 'बला लक्ष्मीरिला मही' इति अनेकार्थ ॥ तत् इद स्व धन कर्तृपद पाणिं नायाति हस्तगत न भवति तन्नक्षत्रेष्विति शेष । कुसीदामत्र ह्रस्व इकार शब्दभेदात् दृश्यते ॥६८॥

भद्रा२।७।१२तिथौ मंगलसौरिमंत्रिणि त्रिपुष्करः स्याद्द्विपमाग्निभं यदा ॥
वृद्धौ विनष्टे च हृते मृते फले योगस्तदासौ त्रिगुणप्रवृद्धिकृत् ॥ ६९ ॥

अथात्र त्रिपुष्करयोग दर्शयति—भद्रेति ॥ यदा भद्रातिथौ मग सौरिमंत्रिणो भौमशनि गु॰ [illegible] तत्र च स्युस्तदा त्रिपुष्करनामा योग स्यात् । असौ त्रिपुष्करो वृद्धा प्रवर्द्धने फल विनष्टे नाशे फले हृते चारादिना हारिते फले मृते मरणे फल त्रित्रिगुण प्रवृद्धिकृत् शुभ त्रिगुण शुभ अशुभे त्रिगुणमशुभ स्यात् ॥ ६९ ॥

ध्रुवलघुमृदुलोलैर्जीवकाव्येंदुवारैः कुयुतिशजानिरिक्ता-
मा३०विमुक्तैर्नृलग्ने ॥ नवकुसुमफलाना वादरार्द्रोपधीनां
रसकृपिकणिशाना संग्रहो भोगसिद्ध्यै ॥ ७० ॥

अथ नवीनपुष्पादीनां संग्रहमाह—ध्रुवेति ॥ नवकुसुमफलानां पुष्पं दरः, कार्मिः आर्द्रौषधयः आसा पुना रसो घृतादयः कपिः कणिशं धान्यशिरः एषा द्वंद्व एषा संग्रहो भोगवृद्धये सुखभोगप्रवर्द्धनाय स्यात् । कैः ध्रुवाणि मृदूनि लघूनि लोलानि एषा द्वंद्वे एतैः पुनर्जीवो गुरुः काव्यः शुक्र इंदुश्चंद्र एषा वारैः किंभूतैः कुयुतिः कुयोगः शः शंभुस्तस्माज्जातिर्जन्म यस्याः सा भद्रा रिक्तातिथिः अमामावासी आभिर्विमुक्तैर्वर्जितैः ॥ ७० ॥

नवसलिलफलान्नप्राशनं सज्जनानां श्रुतिशयकभपौ-
ष्णादिद्वयेषूत्तरासु ॥ सरविशुभदिनेष्वेवानुराधासु
शस्तं जितुम३घट७ककुद्मलेय५कन्या६९त्रिलग्ने ॥ ७१ ॥

अथ नवीनजलादीना प्राशनमाह—नवेति ॥ नवसलिलं नूतनजलं नूतनफलं नवीनान्नं एषां प्राशनं खादनं शस्तं शुभं स्यात् । केषां सज्जनाना नृपादीना क श्रुतिः श्रवणः शयो हस्तः को वायुस्तद्रं स्वाती पौष्णं रेवती आदिद्वयं अश्विनी भरणी एषां द्वंद्वे एषु पुनः उत्तरासु उत्तरात्रये पुनः सरविशुभदिनेषु रविवारे शुभग्रहवारे पुनरनुराधासु पुनर्जितुमं मिथुनं घटः कुंभः ककुद्मान् वृषभो वृषराशिः लेयः सिंहः कन्याऽस्त्री धन्वी धनुरेषा लग्न एव निश्चितं ॥ ७१ ॥

कृष्णाभयानागरपूर्वसेवनारंभो विधेयो लघुभेंऽत्यभे मृगे ॥
श्रवस्त्रयेऽर्केंदुसितेज्यवासरैः पूर्णाजयानंदवतीषु धीमता ॥ ७२ ॥

अथ हरीतक्यादिसेवनशुद्धिमाह—कृष्णेति ॥ धीमता विदुषा कृष्णा पिप्पली अभया हरीतकी नागर शुंठी एषा पूर्वसेवनारंभः प्रथमं खादनमारंभो विधेयः कर्तव्यः क लघुभे लघुसंज्ञनक्षत्रेऽत्यभे रेवत्या मृगे मृगशीर्षे श्रवस्त्रये श्रवणधनिष्ठाशतभिषासु पुन कैः अर्कः सूर्य इंदुश्चंद्र सितः शुक्र इज्यो गुरुरेषा वासरैः पुन क पूर्णातिथिर्जयातिथिर्नंदवती नंदातिथिः आसा द्वंद्वे आसु ॥ ७२ ॥

मृगांकसूतादिरसांगसाधनं मिश्राद्यमूलैशमृगेंद्रवासवैः ॥
शये कुजार्केज्यजया३।८।१३स्वमौढ्ययोर्जीवारयोरीज्यगृहान्यगेहरौ७३

अथ रसागसाधनशुद्धिमाह—मृगेति ॥ मृगाकः सूतः पारद इत्यादि रसागसाधनं स्यात् कैः मिश्रसंज्ञानि आद्यमश्विनी मूल ऐशमार्द्रा मृगो मृगशीर्षं इंद्रा ज्येष्ठा वासवं धनिष्ठा एषा द्वंद्वे एतैः पुनः क शये हस्ते पुनः कुजो भौमः अर्कः इज्यो गुरु जयातिथिः आसा द्वंद्वे आसु पुनः क जीवारयोर्गुरुभौमयोरमौढ्ययोरस्तवर्जितयोः पुनरीज्यगृहे गुरोर्गृहे धनुर्मीनौ आभ्यामन्यगे हरौ सूर्ये धनुरर्कमीनार्कवर्जिते इत्यर्थः ॥ ७३ ॥

लोले मृदुक्षिप्रगणे,च पूर्णया सनंदयाब्जेज्यासितांशुमच्छुभिः ॥
युते नृलग्ने भिषजोषधप्रिये पूर्णे विधौ हारि रसांगसेवनम् ॥७४॥

अथ रसांगसेवनमाह—लोल इति ॥ रसांगसेवनं हारि श्रेष्ठं स्यात् क लोले चरनक्षत्रे पुनः मृदूनि क्षिप्राणि एषां गणे समूहे च पुनर्नंद्या तिथ्या २।७।१२ किंभूतया भद्रया सनंद्या नंदातिथियुक्तया १।६।११ पुनः क अब्जः इंदु इज्यो गुरुः सितः शुक्र अंशुमान् सूर्य एषां द्वंद्वे एषां द्युभिर्दिनैर्युते युक्ते नृलग्ने नरराश्युदये किंभूते नृलग्ने भिषजा वैद्यस्य औषध तस्य प्रिये इष्टे पुनः क पूर्णे समग्रकलायुक्त विधौ चंद्रे भिषग् भिषज भिषणजा' इति शब्दप्रभेदः अथवा ओषधमिव नरे इत्यपिशब्दार्थः ॥ ७४ ॥

हुताशरेताः पुरहूतकुंडलीप्रभंजनर्क्षैरधिकत्रिपूर्विकैः ॥
अवाप्य योऽपाटवमेत्यसंशयं स्ववैद्यरक्षोऽपि नरो यमालयम् ॥७५

अथ रोगोत्पत्तौ तद्गतमफलमाह—हुताशेति ॥ य स्ववैद्यरक्षोऽपि देववैद्ययो रक्षा यस्य स स्यात् स पुमान् असंशयं निश्चितं यमालयं मृत्युमेति प्राप्नोति किंकृत्वापाटवं रोगमवाप्य प्राप्य कैः हुताशरेता शंभुरार्द्रा 'वन्हिरेता शिवोऽस्थिधन्वा' इतिहैमः ॥ पुरुहूत इंद्रो ज्येष्ठा कुंडली सर्पोऽश्लेषा प्रभंजनर्क्षं स्वाती एषां द्वंद्वः एभि किंभूतैरधिकत्रिपूर्वके पूर्वात्रयेण पूर्णे ॥ ७५ ॥

मृगेशसाधारणवारुणोग्रैः सवासवव्यालभपापवारैः ॥
षष्ठीचतुर्थीनवमीतवारै रोगी नरोऽत्तारमुपैति सत्यम् ॥ ७६ ॥

मृगेति ॥ रोगी नरः सत्यं निश्चितमत्तारं मृत्युमुपैति प्राप्नोति कैः मृगो मृगशीर्षं ऐशमार्द्रा साधारणं मिश्रसंज्ञं वारुणं शततारा उग्रसंज्ञानि एषां द्वंद्व एभिः किंभूतैर्वासवं धनिष्ठा व्यालभमश्लेषा पापवारा एषां द्वंद्व एभि सह वर्तमाने पुनः किंभूतैः षष्ठी चतुर्थी नवमी आसां द्वंद्व आसु तिथिषु इतः प्राप्ता वारोऽवसरा यस्ते तैः वेलावारावसर ' इति हैमः ॥७६

मैत्रेंऽत्यभे कृच्छ्रतया निरामयो नरोऽनुमासेन मृगाख्यवैश्वयो ॥
मघासु पक्षैर्नखमैर्द्युमैस्तथा द्विदैवतब्रह्मभवासवेष्वपि ॥ ७७ ॥

अथ रोगोत्पन्नभेषु रोगावधिमाह—मैत्रे इति ॥ मैत्रेऽनुराधायां अंत्ये रेवत्यां नरः कृच्छ्रतया कष्टेन निरामयो रोगी भवेत् । अनु पश्चादेव मृगाख्यवैश्वयोर्मृगशीर्षे उत्तराषाढायां मासेन निरामयो भवेत् । मघासु नखमैर्वेमैर्विंशतिदिनैर्निरामयो भवत् ॥ ७७ ॥

नवशुभिर्यातुभकृत्तिकाश्विभिर्याम्यश्रवोवारुणविश्वकर्मभे ॥
एकादशाहोभिरजेज्यकाश्यपीतारार्यभे सप्तदिनैरुपांत्यभे ॥ ७८ ॥

नवेति ॥ यातुभं मूलं कृत्तिका आश्विनमश्विना एषां द्वंद्वं एभिः कृत्वा नवशुभिर्नवदिनैर्निरामयो भवेत् । याम्यं भरणी श्रव श्रवणं वारुणं शतभिषक् विश्वकर्मा तद्भं चित्रा एषां द्वंद्वे एभिः कृत्वा एकादशाहोभिरेकादशदिनैर्नीरोगी भवत् । अजो ब्रह्मा रोहिणी इज्य पुष्य काश्यपी तारा पुनर्वसु अर्यभं उत्तराफाल्गुनी एषां द्वंद्व एभि किंभूते उपांत्यभे उत्तराभाद्रपदासहिते सप्तदिनैर्नीरोगी भवत् ॥ ७८ ॥

कार्शानवेंद्राग्निभराजमौलिभैर्मघाशिफाशामनदंदशूकभैः ॥
दष्टो नरो यः श्वसनाशनेन वै स तार्क्ष्यसख्योऽपि जहाति जीवितम् ७९॥

अथ सर्पदष्टे तद्व्रतभफलमाह—कार्शानवेति ॥ वै निश्चितं यो नरः श्वसनाशनेन सर्पेण दष्टः स्यात् कैः कार्शानवं कृत्तिका इंद्राग्नी तद्भं विशाखा राजमौलिश्चंद्रशेखरः शिव आर्द्रा एषां द्वंद्वे एतद्भैः पुनर्मघा शिफा मूलं शामनं भरणी दंदशूकभं सर्पभं आश्लेषा एषां द्वंद्वे एभिः स पुमान् जीवितं आयुर्जहाति त्यजति किंभूतः स तार्क्ष्यसख्योऽपि गरुडमित्रोऽपि ॥ ७९॥

पौष्णद्वये दोस्त्रितये मृगे चले विमारुते धैपणमैत्रयातुभे ॥
मंत्रीनसोमद्युषु सत्तिथौ भवेद्भैषज्यकर्म त्युपतापमुक्तये ॥ ८० ॥

अथ रोगिभ्य औषधदानमाह—पौष्णेति ॥ भैषज्यकर्म औषधकृत्यं भवेत् किमर्थं नुः नरस्य उपतापो रोगस्तस्य मुक्तये विनाशाय, 'उपतापो गदः समाः' इति हेमः॥ क पौष्णद्वये रेवत्यामश्विन्या दोस्त्रितये हस्तत्रये मृगे मृगशीर्षे पुनर्विमारुते स्वातीरहिते चले चरसंज्ञभे पुनर्धैषणं पुष्यः मैत्रमनुराधा यातुभं मूलं एषां द्वंद्वैकत्वे पुनर्मंत्री गुरुः इनः सूर्यः सोम एषां द्युषु दिनेषु पुनः सत्तिथौ शुभतिथौ ॥ ८१ ॥

साधारणे वारुणदारुणाश्विनत्वाष्ट्रत्रिपूर्वासु चलाजहंसयोः ॥
हुताशशस्त्राद्युपचर्ययामयो व्रणोद्भवो याति विनाशमाशु च ॥८१॥

अथ क्षिप्रप्रतिक्रियामाह—साधारेति ॥ व्रणोद्भव आमयो रोगो हुताशशस्त्राद्युपचर्यया अग्निपरिणतशस्त्रादिप्रतिक्रियया क्षिप्रादिक्रियया आशु शीघ्रं विनाशं क्षयं याति क साधारणे मिश्रनक्षत्रे च पुनर्वारुणं शतभिषक् दारुणसंज्ञभं आश्विन त्वाष्ट्रं चित्रा त्रिपूर्वा आसां द्वंद्वे आसु पुनर्चला भूमिस्तज्जो भौमः हंसः सूर्य अनयोर्द्वंद्वे ' उपचर्योपचार्यौ च ' इति हैमः ॥ ८१ ॥

दुष्टे विधौ पंचकलोनविंबे राशौ महोराशिमहीजवारे ॥
रिक्ताद्यचित्रानलवासवाढ्ये मुक्तोपतापस्य नुराप्लवः स्यात्॥ ८२ ॥

अथ रोगमुक्तस्नानमाह—दुष्ट इति ॥ मुक्तोपतापस्य त्यक्तरोगस्य नुर्नरस्य आप्लवः स्नानं स्यात् क दुष्टे दुष्टराशिगते विधौ चंद्रे पुनः पंचकलाभिरूनं हीनं बिंबं यस्य स तस्मिन् राशौ क्षीण चंद्रराशौ सति पुनर्महसां तेजसां राशिर्महोराशिः सूर्यः महीजो भौमः अनयोर्वारे किंभूते रिक्ता तिथिः आद्यमश्विनी चित्रा अनलः कृत्तिका वासवं धनिष्ठा एषां द्वंद्वे एभिराढ्ये युक्ते॥८२॥

चलोदये व्याधिखले सदंवरे खलाहिते मज्जनमंगिनो वरं ॥
गदावसाने त्वशुभद्युनि क्वचित्स्थिरांत्यपत्रानिलसार्पभान्यभैः ॥ ८३ ॥

चलोदेति ॥ अंगिनो नरस्य गदावसाने रोगमाते मज्जनं वरमस्ति क चलोदये चरलग्ने व्याधिखलेऽष्टमभागतक्रूरग्रहे सदंबरे दशमभागगतशुभग्रहे पुनः खलाहिते षष्ठभावगतखल-

ग्रहे पुनरशुभद्युनि अशुभग्रहाणां दिने कश्चित् स्थिराणि भानि आत्यं रेवती पैत्र मघा आनिल स्वाती सार्पमश्लेषाम एषां द्वंद्वे एभ्यो भेभ्योऽन्यभैरन्यनक्षत्रैः ॥ ८३ ॥

शयैंदवानुश्रुतितिष्यवासवादितेयनासत्यभसंहतौ भवेत् ॥
आतंकमुक्तस्य नुरोकसो बहिर्गमो वरः सद्द्युनि मस्तकोदये ॥८४

अथ रोगमुक्तनरस्य बाह्यगमनशुद्धिमाह—शयैंदवेति ॥ आतङ्कमुक्तस्य रोगमुक्तस्य नुर्नरस्य ओकसो गृहात् बहिर्गमो वरो भवेत् क शयो हस्त ऐंदव मृगशीर्षं अनु श्रुति श्रवण तिष्य पुष्यो वासव धनिष्ठा आदितेयं पुनर्वसु नासत्यभमश्विनी एषां द्वंद्वे एषां संहतौ गणे सति पुन सद्द्युनि शुभग्रहदिने पुनर्मस्तकोदये शीर्षोदयलग्ने ॥ ८४ ॥

पापे दिने काव्यदिने सदामिषं निषेवणं मादकवस्तुमद्ययोः ॥
विपर्वकाले शततारकोग्रभे सदारुणे तावदुदग्रवीर्यकृत् ॥ ८५ ॥

अथ मांससेवनमाह—पाप इति ॥ तावत् प्रथम पापे दिने खलग्रहदिने काव्यदिने शुक्रवारे आमिष मांससंबधि निषेवण सत् शुभ स्यात् । पुनर्मादकमद्ययोर्वल्लिछवस्तुमदिरयो निषेवण उग्रवीर्यकृत् उत्कटवीर्यकर स्यात् क शततारका शतभिषक् उग्रभ उग्रसंज्ञभ एषां द्वंद्वेक्त्वे किंभूते विपर्वकाले दर्शादिवर्जिते पुन किंभूते सदारुणे दारुणसंज्ञनक्षत्रयुक्ते ॥८५॥

चराचरेंदूडुलघूडुचित्रा विषाशने भानुकवींदुभौमान् ॥
य ईहतेऽनेकविधानि तावत्स कालकूटानि सदैति वै ना ॥८६॥

अथ विषाशने भादिशुद्धिमाह—चरेति ॥ वै निश्चित यो ना पुमान् सदा निरंतरमनेकविधानि कालकूटानि विषाणि ईहते भक्षणाय वाछति स ना पुमान् तावत्प्रथम विषाशने कालकूटादिखादने चरादितारांश्च पुनर्भान्वादिवारान् एति प्राप्नोति चरादीनाश्रित्य भक्षयतीत्यर्थ । अथवा यस्तावत्प्रथम विषाशने विषभक्षणे निमित्त अनेकविधानि कालकूटानि एति भक्षयतीत्यर्थ स सदा निरतर चरादितारा भान्वादिवारान् ईहते वाछति विषाशनमूर्ते गृण्हातीत्यर्थ । चराणि चलसंज्ञानि अचरसंज्ञानि इंदूडु मृगशीर्षं लघूडूनि चित्रा आसां द्वंद्वे एता प्रति पुनर्भानु कविः शुक्र इंदुर्भौम एषां द्वंद्वे इमान् ॥ ८६ ॥

अज्ञातजातिगुणरूपविधानकानामन्नादिबीजरसपुष्पफलौषधीनां ॥
संसेवनं सुकृतसौख्ययशोभिवृद्ध्यै निःसशयं नरवरैर्विदधीत नात्र॥८७

अथ निघण्ट्वादिप्रोक्तव्यतिरिक्तानां द्रव्याणां भक्षण निषेधति—अज्ञातेति ॥ निःसशय निश्चित नरवर सत्पुमान् अत्र लोके सुकृतसौख्ययशोभिवृद्ध्यै पुण्य सुख कीर्ति आसां वर्द्धनाय अन्नादिबीजरसपुष्पफलौषधीनां संसेवन न विदधीत न कुर्यात् किंभूतानामन्नादीनां अज्ञात अविदित जाति गुण रूप विधान च जातिर्द्रव्य गुणोऽशुभाशुभरूप सद्भाव विधानक कृत्यं येषां तानि तेषां ॥ ८७ ॥

दि१०ग्विश्व१३दो२रग७नवां९ग६खराम३०घस्राः सूर्यारमंत्र्युशनसां दिवसा न शस्ताः ॥ निःशाक्रदारुणमघान्तकमिश्रतारास्तैलाभिमज्जनविधौ किल पर्वकालाः ॥ ८८ ॥

अथ दशम्यादिषु तैलस्नानं निषेधति—दिग्विश्वेति ॥ किल संभावनायां तैलाभिमज्जनविधौ तैलमर्दनपूर्वकस्नानकार्ये एते न शस्ता न शुभाः स्युस्तानाह ॥ दिग् दशमी विश्वे त्रयोदशी दोर्द्वितीया उरग सप्तमी नव नवमी अग षष्ठी खरामोऽमावास्या एतत्सख्यायुक्तघस्रा दिवसाः पुनः सूर्यः आरो भौम मंत्री गुरुरुशना शुक्र एषां दिवसाः पुनर्निःशाक्रं ज्येष्ठावर्ज्यं दारुणसज्ञम मघा अंतको भरणी मिश्रताराः आसां द्वंद्वे एताः पुनः पर्वकालाः पर्वणां समयाः ॥ ८८ ॥

अभ्यंगदूषितदिनेष्वपि जन्मघस्रे पाणिग्रहे च विजयामुनितर्पणाह्नि ॥ होलाविरामदिवसे बलिवासरे स्यादभ्यंग ईरितशिवो नियतं नराणाम् ॥ ८९ ॥

अथ जन्मादिदिने स्नान निर्दोषमाह—अभ्यंगेति ॥ नियत निश्चित नराणां पुंसां ईरित प्रेरित शिव कल्याण येन स ईरितशिवोऽभ्यगस्तैलविमर्द स्यात् । अभ्यंगदूषितदिनेषु तैलमर्दनदोषदिनेष्वपि जन्मघस्रे जन्मदिने च पुनः पाणिग्रहे उद्वाहे पुनर्विजयामुनितर्पणाह्नि विजयादशम्यां ऋषितर्पणदिने पुनर्होलाविरामदिवसे होलिकांते रज.पर्वणि पुनर्बलिवासरे बलिपुजनदिने त्रयोदश्यादिदीपालिकादिनत्रये ॥ ८९ ॥

दुष्टे यमे भवति तैलनिमज्जनं यन्नित्यं विदन्हि च यमान्हि न दुषितं तत् ॥ निंद्येऽप्यनेहसि सदाखिलवासरेषु संसेवितुं प्रसववासिततैलमर्हम् ॥ ९० ॥

अथ क्रूरग्रहे नित्य स्नानमाह—दुष्ट इति ॥ दुष्टे यमे दुष्टराशिगते शनौ सति नित्य यत्तैलनिमज्जन तैलस्नान भवति तत् स्नान न दूषित स्यात् क विदन्हि बुधवारे च पुनर्यमान्हि शनिवारे इति । अथ वासिततैल निर्दोषमाह । सदा प्रसववासिततैल चंपकादिपुष्पवासिततैल सेवितुमर्हं योग्य स्यात् केषु निंद्येऽनेहसि दुष्टकाले अपि अखिलवासरेषु ॥ ९०

शीर्षं कपालकमथांत्रिकवल्कचर्मबैल्वानि चामलकमत्र परान्नमद्यात् ॥ नैवाष्टमीप्रभृतिचांद्रदिनेषु शश्वद्दर्शे तु मंथनजपद्मघातनं वा ॥ ९१ ॥

अथाष्टम्यादितिथौ नालिकेरादिभक्षणं निषेधति—शीर्षमिति ॥ शश्वत् निरंतरं नरोऽष्टमीप्रभृतिचाद्रदिनेषु शीर्षादिकं नैव अद्यात् न भक्षयेत् । अष्टम्यां शीर्षं नालिकेरं नवम्यां कपालकं तुबकं अथ पुनर्दशम्यां आंत्रिकं नालीशाकं एकादश्यां वल्लं नख इति तत्रान्तरे वालुंकि इति द्वादश्यां चर्म कदलीफलं त्रयोदश्यां विल्वं विल्वफलं एषा वृद्धिः एतानि च पुनश्चतुर्दश्यां आमलकं पूर्णिमायां परान्नं न भक्षयेदत्र लोके इति तु पुनर्दर्शेऽमावास्यायां मथनं गोरसमथनं जपो मंत्रजपः द्रुमघातनं वृक्षच्छेदनं वा एषा वृद्धैकत्र ॥ ९१ ॥

धूमध्वजद्रुहिणपर्वतराजपुत्रीलंबोदराहिगुहहंसपिनाकिदुर्गाः ॥ कीनाशविश्वहरिकाममहेशसोमा दर्शांततः सुकृतिभिर्गदिता नराणाम् ॥ ९२ ॥

अथ तिथीशानाह—धूमेति ॥ कृतिभिः शुभपंडितैर्दर्शांततः प्रतिपत्त तिथिपाला धूमध्वजादयस्तिथीशा गदिताः प्रोक्ताः ॥ धूमध्वजो वह्निः १ द्रुहिणो ब्रह्मा २ पर्वतराजपुत्री गौरी ३ लंबोदरो गणेशः ४ अहिः सर्पः ५ गुहः स्कंद ६ हंस सूर्य ७ पिनाकी शंभु ८ दुर्गा ९ कीनाशो यम १० विश्वे ११ हरिर्विष्णुः १२ कामः कंदर्पः १३ महेश ईश १४ सोमश्चंद्र १५ एषा वृद्धि एते ॥ ९२ ॥

स्थाणुः शिवा गुहजिनौ विधिविष्णुकालास्तुष्टौ रवेर्निगदिता ग्रहवारपालाः ॥ यस्यामरस्य तिथिवारभकालसाध्यं तस्य व्रतादि जपभोजनहोमदानम् ॥ ९३ ॥

इति श्री कविकालिदासोदिते ज्योतिर्विदाभरणे मिश्रकाध्याय एकोनविंशतितम ॥ १९

अथ सप्तवाराणां स्वामिन आह—स्थाणुरिति ॥ पंडितैः रवेः सूर्यात् स्थाण्वादयो ग्रहपाला वारनायका निगदिताः प्रोक्ताः ॥ सूर्यस्य स्थाणु १ च शिवा गौरी २ म गुह स्कंदः ३ बु जिन कृष्ण ४ इमौ वृ विधिर्ब्रह्मा ५ शु जिष्णुरिंद्रः ६ श काला यम ७ एषा वृद्धे एते यस्यामरस्य देवस्य व्रतादिजपभोजनहोमदानं क्रियते तदा तस्यामरस्य तिथिवारभकालसाध्य व्रतादितुष्टये सतोषाय स्यात् ॥ ९२ ॥

इतिश्री पार्णिमीयगच्छाधिराजभट्टारकपुरंदरश्री महिमाप्रभसूरीश्वरचरणसरोरुहचंचरीकायमानशिष्यभावरत्नावरचितायां श्रीकालिदासकृत ज्योतिर्विदाभरणस्य सुखबोधिकायां मिश्राध्याय एकोनविंशतितम ॥ १९ ॥

र्णाश्रमकर्मसाधनप्रकरणम्।

कासारदेवायतनादिकर्मणामुत्सर्गकालस्य विनिर्णयं तथा ॥
अनेकवर्णाश्रमकर्मसाधनं ब्रुवेऽहमत्राखिलवर्गसाधनम् ॥ १ ॥

अथ मिश्राध्यायकथनानंतरं कर्मसाधनं वक्तेऽतोऽनेकवर्णाश्रमकर्मसाधनाध्यायसंधान माह—कासारेति॥अत्राध्यायेऽहं कासारदेवायतनादिकर्मणां तटाकदेवगृहकृत्यानामुत्सर्गकालस्य नीलोद्वाहदानविशेषस्य विनिर्णयं निश्चयं ब्रुवे। तथा पुनरनेकवर्णाश्रमकर्मसाधनं चतुर्वर्णानां कृत्यविधानं ब्रुवे किंभूतं अनेकवर्णाश्रमसाधनं अखिलवर्गसाधनं समस्तधर्मार्थकाममोक्षाणां साधनमुपायः 'साधनं सिद्धिसैन्ययोः ॥ उपायो' इत्यादि हेमोऽनेकार्थः ॥ १ ॥

सूरे चरत्यैलबिलाशमादृता कासारकूपादिजलाशयेऽयनं ॥
जलप्रतिष्ठा च नवे महर्षिभिः प्रासादिकोत्सर्गविधिस्तथोदितः॥ २ ॥

अथ जलाशयानां प्रतिष्ठामाह—सूरेति ॥ महर्षिभिः कासारकूपादिजलाशये नवे नवीने जलप्रतिष्ठा आदृता अंगीकृता कस्मिन् ऐलबिलं धनदमश्नुते प्राप्नोति इति ऐलबिलाशं उत्तरादिक् प्राप्तमयनं चरति गच्छति शतृप्रत्यये सूरे सूर्ये सति तथा पुनः प्रासादो देवगृहं कं जलं अनयोरुत्सर्गविधिर्नीलोद्वाहविधानं उदितः प्रोक्तः ॥ २ ॥

शुभैव सा फाल्गुनमाधवाख्ययोर्मध्या सहस्ये च तपस्युदीरिता ॥
शुक्रेऽधमा शुद्धसमाद्यनेहसा शुद्धेऽभिरूपैः श्रुतिधर्ममानिभिः ॥३॥

अथात्र प्रतिष्ठायां मासशुद्धिमाह—शुभैवेति ॥ श्रुतिधर्ममानिभिर्वेदधर्मविद्भिरभिरूपैः पंडितैः फाल्गुनमाधवाख्ययोः फाल्गुनवैशाखयोः सा प्रतिष्ठा शुभा उदीरिता प्रोक्ता। एवं च पुनः सहस्ये पौषे तपसि माघमासे सा मध्या। पुनः शुक्रे ज्येष्ठमासे साऽधमा पुनः आद्यनेहसा प्रथमकालेन शुद्धे सति सा शुद्धतमा इति ॥ ३ ॥

कल्प्या क्वचिन्मार्गशिरस्यलीनगे युग्मेनयोगे मलधारिणा शुचौ ॥
घनप्रसूनामरधामसंस्कृतिर्विगर्हिता साप्यधमाधमा बुधैः ॥ ४ ॥

अथात्र मतं दर्शयन्नाह—कल्प्येति ॥ क्वचित् मार्गशिरसि मासेऽलीनगे वृश्चिकराशिगतसूर्ये घनप्रसूनं जलं अमरधाम देवगृहं अनयोः संस्कृतिः प्रतिष्ठा कल्प्या कर्तव्या 'मेघपुष्पकमलान्यापः पयः पाथसि' इति हैम। मलधारिणा मलिनवेषधारिणा दर्शनारेण युग्मेनयोगे मिथुनसंक्रांतिसूर्ययोगे सा प्रतिष्ठा कल्प्या बुधैः सा प्रतिष्ठाऽधमाऽधमा-विगर्हिता तिरस्कृता ॥ ४ ॥

नीचे द्विपारौ च गुरौ प्रतिष्ठा प्रासादवाराशययोरजस्रं ॥
जीवालये जीवसितास्तकाले कार्या विधौ दुष्टतरेन कर्त्रा ॥ ५ ॥

अथ सिंहगुर्वादौ प्रतिष्ठा निषेधति—नीच इति ॥ अजस्रं निरंतरं कर्त्रा नरेण प्रासादवाराशययोः देवगृहजलाशययोः प्रतिष्ठा न कार्या क नीच नीचराशिगते द्विपारौ सिंहराशिगते गुरौ जीवे सति पुनर्जीवालये धनुरर्के मीनार्के सति पुनर्जीवसितास्तकाले गुरुशुक्रास्तसमये पुनर्दुष्टतरे विधौ चंद्रे सति ॥ ५ ॥

विहाय दर्शोदरवारपंचकं रिक्तारमंदान् यमघंटमाडलं ॥
भद्रामशेषे समये मठांभसामलं प्रतिष्ठाखिलवर्गसिद्धये ॥ ६ ॥

अथ प्रतिष्ठाया तिथ्यादिशुद्धिमाह—विहायेति ॥ मठांभसा छात्रादिगृहाणां जलानां च प्रतिष्ठाखिलवर्गसिद्धये स्यात् किं कृत्वा दर्शोदरवारपंचकं द्विपार्श्वतोमावासीमध्यगतदिनपंचकं १३।१४।३०।१।२। च पुना रिक्तातिथिः आरो भौम मदः शनिः इमान् पुनर्यमघंट प्रतीतं पुनः आडल योगं भद्रा विष्टिं च विहाय त्यक्त्वा अशेषे समये समस्तकालेऽलमित्यर्थः ॥ ६ ॥

श्रवत्रयादित्यमृदुध्रुवोडुषु क्षिप्रेष्वविद्धेषु सभूषणेष्वपि ॥
तडागवाप्यादिमठप्रतिष्ठया प्रतिष्ठितः स्यादनुराजसंसदि ॥ ७ ॥

अथ प्रतिष्ठाया भादिशुद्धिमाह—श्रव इति ॥ श्रवत्रय श्रवणत्रयं आदित्य पुनर्वसु मृदूनि ध्रुवाणि मृगशीर्ष एषां द्वंद्वे एषु पुन. क्षिप्रेषु क्षिप्रसंज्ञनक्षत्रेषु किंभूतेषु अविद्धेषु ग्रहैरभिन्नमंडलेषु पुन किंभूतेषु सुभूषणेषु शुभयोगयुक्तेषु सत्सु तडागवाप्यादिमठप्रतिष्ठया कृत्वातु पश्चात् स नरो राजसंसदि भूपसभाया प्रतिष्ठित शोभायुक्तः स्यात् ॥ ७ ॥

जलालयस्थे जलचारिराशौ जलप्रतिष्ठा जलगोलमूर्तौ ॥
लग्ने सुकेंद्रे शुभदाथवा स्याच्छीर्षोदये वारिविधौ शुभे खे ॥ ८ ॥

अथ जलप्रतिष्ठाया लग्नशुद्धिमाह—जलेति ॥ जलप्रतिष्ठा शुभदा स्यात् क जलालयस्थे जलराशिगते जलगोलमूर्तौ चंद्रे सति जलचारिराशौ जलचरराशियुक्ते लग्ने पुन सुकेंद्रे शुभग्रहयुक्तकेंद्रेऽथवा पक्षांतरे शीर्षोदये लग्ने वारिविधौ चतुर्थभावगते चंद्रे खे शुभे दशमभावगतशुभग्रहे सत्येवं स्यात् ॥ ८ ॥

सुरप्रतिष्ठा गदितैव पूर्वं विष्णुप्रतिष्ठोडुषु वा प्रशस्ता ॥
तथापि कोत्सर्गविधानकालेऽखिलप्रतिष्ठापि न दोषदात्री ॥ ९ ॥

अथ नीलोद्वाहमाश्रित्य प्रतिष्ठामाह—सुरेति ॥ पूर्वं सुरप्रतिष्ठा गदितैव प्रोक्ता एव । वाथवा विष्णुप्रतिष्ठोडुषु जनार्दनप्रतिष्ठानक्षत्रेषु प्रशस्ता शुभा तथापि कस्य जलस्योत्सर्गविधानकाले नीलोद्वाहसमयेऽपि अखिलप्रतिष्ठा सर्वसुरप्रतिष्ठा दोषदात्री दोषदायिनी न स्यात् ॥ ९ ॥

वर्णक्रियारंभणमादारादहं तत्कर्मसाधारणसाधनप्रियं ॥
वदाम्यथो येन समस्तवर्णजक्रियाफलस्यापि विनिश्चयो भवेत् ॥१०॥

अथ चतुर्वर्णानां कृत्यसंधानमाह—वर्णेति ॥ अथो आनंतर्येऽहं आदरात् तत् वर्णक्रियारंभणं चतुर्वर्णानां कृत्यानां प्रारमणं वदामि कथयामि । किंभूतं वर्णक्रियारंभणं तत्कर्मसाधारणसाधनप्रियं कर्मणा सामान्योपायप्रियं येनारंभणेन समस्तवर्णक्रियाफलस्यापि चतुर्वर्णजाता क्रिया तस्याः फलस्यापि विनिश्चयो भवेत् ॥ १० ॥

द्विजो भुजाभूर्विडिमे द्विजातयस्तुरीयवर्णोऽग्रिज एव कीर्तितः ॥ परेंऽत्यजा ये त्वपरे शकादिका मनीषिभिः संकरजातयः स्मृताः ॥ ११ ॥

अथ वर्णविवेकमाह—द्विज इति ॥ द्विजो विप्रः भुजाभूः क्षत्रियः विड् वैश्यः इति एते त्रयो द्विजातयः स्युः । अग्रिजः शूद्रः तुरीयवर्णः शूद्रः कीर्तितः प्रोक्तः । तु पुनः परे शूद्रेभ्यो ऽत्यजाः स्मृताः प्रोक्ता मनीषिभिर्बुधैरपरे ये शकादिका म्लेच्छादयस्ते संकरजातयः स्मृताः प्रोक्ताः ॥ ११ ॥

अध्यापनं चाध्ययनं च याजनं दानं द्विजे स्युर्यजनं प्रतिग्रहः ॥ कर्माणि षड्वै यजनापवर्जने त्रिकर्मवानध्ययनं तथेति राट् ॥ १२ ॥

अथ विप्रकृत्यमाह—अध्यापनमिति ॥ वै निश्चितं अध्यापनं पात्रेभ्यो विद्यासमर्पणं १ अध्ययनं प्रतीतं २ याजनं अन्येषां यज्ञकरणं ३ स्वयं दानं ददाति ४ दानं प्रतीतं स्वयं यजति यजनं प्रतीतं ५ प्रतिग्रहः अन्यस्य दानग्रहः ६ चेति षट्कर्माणि द्विजे विप्रे स्युः । अथ क्षत्रियकृत्यमाह । तथा यजनापवर्जने यजनं यज्ञकरणं दानं अध्ययनं चेति त्रिकर्मवान् त्रैकर्मयुक्तो राट् क्षत्रियः स्यात् ॥ १२ ॥

वैश्यः सदा प्रापणिकोऽग्रिजन्मा द्विजन्मसेवारतिरेतदीयं ॥
कर्मेत्यकृत्यव्यवहारजानि कर्माण्यनेकान्यपरांत्यजानाम् ॥ १३ ॥

अथ वैश्यकृत्यमाह—वैश्य इति ॥ सदा वैश्यः प्रापणिको व्यवहारज्ञ इति एतदीयं कर्म । अथ शूद्रकृत्यमाह—अग्रिजः शूद्रो द्विजन्मसेवारतिः विप्रसेवारक्तः इत्येतदीयं कर्म । अथ अत्यजादीनां कृत्यमाह । तु पुनः अपरात्यजानां अत्यजम्लेच्छादीनां अकृत्यव्यवहारजानि कुकर्मव्यवहारजातानि अनेकविधानि कर्माणि स्युः ॥ १३ ॥

यद्वर्णकर्माणि तदेककाले संसाधितान्येव हि यांति सिद्धिं ॥
तत्स्वस्वकर्मव्यवहारकालं नयेन्मनीषी युगपन्नयार्द्धम् ॥१४॥

अथ स्ववर्णे स्वकृत्यसिद्धिं दर्शयति—यद्वर्णइति ॥ हि निश्चितं तदेककाले तस्मिन् एककाले संसाधितानि सम्यक्क्रमकारेण विहितानि यद्वर्णकर्माणि येषां वर्णानां कृत्यानि सिद्धिं निष्पत्तिं यांति प्राप्नुवंति । इणोधातोरूपं । मनीषी बुद्धिमान् तत्तत्स्ववर्णव्यवहारकाले एषा स्वकीयस्वकीयवर्णानां व्यवहारकालं युगपन्नयार्द्धे समकालन्यायसंपदं नयेत् प्राप्नुयात् द्विकर्मत्वात् ॥ १४ ॥

शमो दमः सत्यमथार्जवं क्षमा शौचं तपो ज्ञानकथामरार्चनं ॥
तीर्थं तथास्तिक्यमभिज्ञसंगतिः स्वभावकर्माग्रजनेर्मखव्रतम् ॥१५॥

अथ विप्राणां स्वभावकृत्यमाह—शम इति ॥ शमः शांतिः दमः पंचेंद्रियनिग्रहः सत्यं प्रतीतं आर्जवं मायात्यागः क्षमा शांति शौचं पावित्र्यं तपो ज्ञानकथा अमरार्चनं देवपूजा तीर्थं गोदावर्यादि तथा आस्तिक्यं श्रद्धात्वं अभिज्ञसंगतिः पंडितसंगमः मखव्रतं यज्ञव्रतं इति अग्रजनोर्विप्रस्य स्वभावकर्म निसर्गकृत्यं स्यात् ॥ १५ ॥

शौर्यं बलं धैर्यधृतिर्धृतिर्मृधं विद्या सुदीक्षेश्वरतापवर्जनं ॥
क्षमाभृतः कर्म निसर्गजं विशो वाणिज्यगोजीवनकर्षणंविती॥१६॥

अथ क्षत्रियाणां स्वभावकृत्यमाह—शौर्यमिति ॥ शौर्यं शूरत्वं बलं धैर्यधृतिर्धैर्यधारणं धृतिः संतोषो मृधं संग्रामः विद्या सुदीक्षा ईश्वरता अपवर्जनं दानं इति क्षमाभृतः क्षत्रियस्य निसर्गजं स्वाभाविकं कर्म स्यात् ॥ अथ वैश्यानां निसर्गकृत्यमाह—वाणिज्यगोजीवनकर्षणमिति ॥ विशो वैश्यस्य निसर्गजं कर्म स्यात् ॥ 'वाणिज्यं पाशुपाल्यां च कर्षणं च' इति व्रतय इति हैमः ॥ १६ ॥

द्विजातिसेवावनिदेवताज्ञया धर्मो विधिः शूद्रनिषेककर्म च ॥
स्वभावकर्म प्रविहाय योऽन्यथा स्वयं चरेत्सोऽत्यजकर्मनर्मभाक् ॥१७॥

अथ शूद्राणां निसर्गकृत्यमाह—द्विजेति ॥ द्विजातिसेवा विप्रसेवा पुनरवनिदेवताज्ञया विप्राज्ञया धर्मो विधिश्चेति शूद्रनिसर्गकर्म शूद्राणां स्वाभाविकं कर्म स्यात् ॥ अथांत्यजानां कुकृत्यमाह ॥ यः स्वभावकर्म प्रविहाय त्यक्त्वाऽन्यथा नीचत्वं स्वयमात्मना चरेत् कुर्यात् सोऽत्यजकर्मनर्मभाक् अत्यजकार्यक्रीडासेवी स्यात् ॥ १७ ॥

तिष्याजपाणिश्रुतिराजविश्वभैर्वरं समारंभितमग्रजन्मनः ॥
कर्मेनकाव्येज्यभवारशुद्धयोररिक्तयोरार्यसितद्युनार्भवेत् ॥१८॥

अथ विप्रकृत्ये भादिशुद्धिमाह—तिष्येति ॥ अग्रजन्मनो विप्रस्य कर्म समारंभितं भारम्भे वरं श्रेष्ठं स्यात् कैः तिष्यः पुष्यः अजो ब्रह्मा रोहिणी पाणिर्हस्तः श्रुतिः श्रवणः राजा चंद्रो मृगशीर्षं विश्वभं उत्तराषाढा एषां द्वंद्वे एभिः पुनः कयोः आर्यसितद्युनोर्गुरुशुक्रवासरयोः सतोः किंभूतयोः इनः सूर्यः काव्यः शुक्रः इज्यो गुरुः एषां भवारौ राशिवारस्तेन शुद्धौ निर्दोषौ तयोः पुनः किंभूतयोररिक्तयो रिक्तातिथिवर्जितयोः ॥ १८ ॥

साधारणैंद्रेनशतोत्तराश्रवोदास्रांत्यमैत्रानिलभेष्वकीर्तयन् ॥
क्षत्रक्रियारंभणमंशुमंत्र्यसृक्सोमैः सपूर्णासु जयासु युक्परैः ॥१९॥

अथ क्षत्रियकार्यारंभे भादिशुद्धिमाह—साधरणेति ॥ बुधाः क्षत्रक्रियारंभणं क्षत्रियकर्मप्रारंभणमकीर्तयन् कथयामासुः केषु साधारणे मिश्रसंज्ञे ऐंद्रं ज्येष्ठा ऐनं हस्तः शतं शतभिषक् उत्तरात्रयं श्रवः श्रवणः दास्रमश्विनी आंत्यं रेवती मैत्रमनुराधा अनलभं कृत्तिका एषां द्वंद्वे एषु पुनः कैः अंशुः सूर्यः मंत्री गुरुः असृग् भौमः सोमश्चंद्रः एषां द्वंद्वे एतैः पुनः कासु जयासु तिथिषु किंभूतासु जयासु सपूर्णासु पूर्णातिथियुक्तासु पुनः कैः युक् परैः श्रेष्ठयोगैः ॥१९॥

श्रवोद्वयादित्ययुगैंदवाश्विनैः सविश्वकृन्मित्रभयातुभैर्भवेत् ॥
सितेंदुसौम्यांगिरसेषु सत्तिथावयोगमुक्तेषु च वैश्यकर्म सत् ॥ २० ॥

अथ वैश्यकार्यारंभे भादिशुद्धिमाह—श्रव इति ॥ वैश्यकर्म सत् शुभं स्यात् कैः श्रवोद्वयं श्रवणयुग्मं आदित्ययुगं पुनर्वसु पुष्यः ऐंदवं मृगशीर्षं आश्विनमश्विनी एषां द्वंद्वे एतैः किंभूतैः सविश्वेति विश्वकृत् चित्रा मित्रोऽनुराधाभं यातुभं मूलभं एषां द्वंद्वे एभिः सहवर्तमानैः पुनः क्व सितः शुक्रः इंदुश्चंद्रः सौम्यो बुधः आंगिरसो गुरुः एषां द्वंद्वे एषु किंभूतेषु अयोगमुक्तेषु कुयोगवर्जितेषु पुनः क्व सत्तिथौ ॥ २० ॥

त्रियुग्मताराश्विनहारचित्रामित्रर्क्षमूलानिलवासवांत्याः ॥
विदिंदुशुक्रान्हि विपर्वरिक्ते शूद्रस्य कर्मण्युदितास्तदृद्ध्यै ॥ २१ ॥

अथ शूद्रकर्मारंभे भादिशुद्धिमाह—त्रियुग्मेति ॥ शूद्रस्य कर्माणि त्रियुग्मादितारास्तदृद्ध्यै शूद्रस्य संपदार्थे उदिताः प्रोक्ताः । त्रियुग्मताराः त्रयाणां पूर्वाणां उत्तराणां युग्मं भानि आश्विनमश्विनी हरस्येदं हारमार्द्रा चित्रा मित्रर्क्षमनुराधा मूलं अनिलः स्वाती वासवं धनिष्ठा आंत्या रेवती आसां द्वंद्वे एताः कस्मिन् विद् बुधः इंदुश्चंद्रः शुक्रः एषामन्हि दिने किंभूते विपर्वरिक्ते पर्वरिक्तातिथिवर्जिते ॥ २१ ॥

स्वकर्मवारांबरचारिभिर्युतं दृष्टं नृलग्नं निजकर्मसिद्धये ॥
उताय११ दुश्चिक्य ३ जिघांस्वसद्ग्रहःशीर्षोदयः साधुचतुष्टयस्तथा॥२२

अथ स्वकार्यलग्नशुद्धिमाह—स्वकर्मेति ॥ स्वकर्मवाराऽम्बरचारिभिर्ग्रहैर्युतं दृष्टं उत नृलग्नं नरलग्नं निजकर्मसिद्धये स्यात् । तथा आय एकादशं ११ दुश्चिक्यं तृतीयं जिघांसुः षष्ठं ६ एषु भवनेषु असंतोऽशुभा ग्रहा यस्य स पुनः साधु चतुष्टयः शुभग्रहयुक्तकेंद्र एवंविधः शीर्षोदयः शीर्षोदयलग्नं निजकर्मसिद्धये स्यात् ॥ २२ ॥

शयाश्विने तिष्यमघाजवासवत्वाष्ट्रानुराधाम्रगरेवतीशिफाः ॥
कृषीवलानामखिलक्रियोद्यमे सद्वारमाहुर्नृदये च सत्क्रमम् ॥ २३ ॥

अथ हलिना कार्ये मादिशुद्धिमाह—शयेति॥सदा बुधा कृषीवलाना कुटुंविनाम-खिलक्रियोद्यमे समस्तप्रारंभे शयादीनि आहु कथयति शयो हस्त आश्विनमश्विनी अनयो-र्द्वंद्वे तिष्य पुष्य मघा अजो ब्रह्मा रोहिणी वासव धनिष्ठा त्वाष्ट्र चित्रा अनुराधा मृगो मृगशिर रेवती शिफा मूल आसा द्वंद्वे एतास्तारा सद्वार शुभग्रहाणा वासर पुनर्नृदय नरराशिलग्न किंभूतं सत्कख शुभग्रहा के सुखे चतुर्थभावे खे दशमभावे च यस्य तत् इति सर्वाण्यपि कर्मपदानि॥२३॥

चित्रादिभे पाणिमृगौ पुनर्वसुद्वयं वलेशोडुयुगं च पूषभं॥मैत्र समेत्येति सदन्हि सत्तिथौ महत्फलं प्रापणिकः स्वकर्मणि॥२४॥

अथ वणिक्कार्ये भादिशुद्धिमाह—चित्रेति॥प्रापणिको नैगमः स्वकर्मणि महत्फलमेति प्राप्नोति किंकृत्वा चित्राआदिममश्विनी अनयोर्द्वंद्वे पाणिमृगौ हस्तमृगशीर्षे अनयोर्द्वंद्वे इमौ पुनर्वसुद्वय पुनर्वसु पुष्य बला लक्ष्मी तस्या ईश स्वामी विष्णुस्तस्योडुयुग श्रवणधनिष्ठे च पुन पूषभ रेवती मैत्रमनुराधा समेत्य प्राप्य क सदन्हि शुभग्रहाणा दिने पुन सत्तिथौ शुभतिथौ॥२४॥

चतुष्टय १।४।७।१० स्थे धिषणे धने २ बुधे
सत्याय ११ गेऽसत्यरि ६ गे सदुद्गमे॥भवेदिदं
कर्षककर्म सत्तिथौ वैदेहकर्मापि च लेखकक्रिया॥२५॥

अथ कर्षकादिकर्मसु लग्नशुद्धिमाह—चतुष्टयेति॥इद कर्षककर्म वैदेहकर्म सार्थवाहकर्म लेखकक्रिया च भवेत्।चतुष्टयस्थे केंद्रगत १।४।७।१० धिषणे गुरौ सति पुनर्धनभावे बुधे पुन सत्यायगे शुभग्रहे एकादशभावगते पुनरसत्यरिगे खलग्रहे षष्ठभावगते पुनरेवंविधे सदुद्गमे शुभग्रहलग्ने सति॥२५॥

चलमूलदोरमरवार्धकितारा भावजैवसहिता हि हिताय॥कविजीवबोधनदिने नरलग्ने विगलग्रहा लिपिकरस्य विधाने॥२६॥

अथ लिपिकरकार्ये भादिशुद्धिमाह—चलेति॥लिपिकरस्य वार्णिकस्य विधाने कर्मणि चलादितारा हिताय शुभाय स्यु। चलसंज्ञानि मूल दोर्हस्त अमरवार्द्धकिश्चित्रा तारा आसा द्वंद्वे एता कर्तृपद किंभूता मृगो मृगशीर्ष भवस्येश्वरस्येद भावमार्द्रा जिनस्य कृष्णस्येद जैन श्रवण एषा द्वंद्वे एतद्भि सहिता युक्ता पुन किंभूता विगलग्रहा गलग्रहवर्जिता क कवि शुक्र जीवा गुरु बोधनो बुधः एषा दिने नरलग्ने॥२६॥

श्रवणत्रये त्रिदशमूडुलघूडुद्वयमरेषु जैष्णवमृगाजपदांत्यैः॥विदशीतवृष्णिसितवृष्णिदिने स्यान्निरमा ३०१८मीक्युजि वत्सकर्म॥२७॥

अथ गोपकर्मारंभे भादिशुद्धिमाह—श्रवणेति॥वत्सकर्म गोपकार्यं स्यात्। 'गोपगोमस्यवत्सवाः' इति हैम। कस्मिन् श्रवणत्रये श्रवणधनिष्ठाशतभिषक् त्रिदशमूर्द्धमात

तस्या वह्नि पुनर्वसु लघूनि भ्रमरं शाक्राग्नी विशाखा एषां द्वंद्वे एषु वैष्णवं ज्येष्ठा मृगो मृगशीर्ष अजरद्दा पूर्वाभाद्रपदा आंत्यं रेवती एषा द्वंद्वे कृत्वे पुनर्विंदू बुधः अशीतवृष्णिगरुगरश्मिः सूर्यः सितवृष्णिः श्वेतांशुश्चंद्रः एषां दिने किंभूते निः निर्गता अमाष्टमी कुयुक् यस्मात् स तस्मिन् ॥२७॥

लघुलोलमृदजवृद्धभशाक्र्यमरेषु सद्धरिदिने परिभाति ॥
जयनंदपूर्णवति वित्रिकलग्ने रथकारकर्म सकलं विहितं सत् ॥२८॥

अथ रथकारकर्मारंभे मादिशुद्धिमाह—लघ्विति ॥ रथकारकर्म सकलं संपूर्णं सत् निरंतरं परिभाति राजते। किंभूतं रथकारकर्म सकलं कुशायुक्तं परिभाति इति पाठे रथकारकर्म परिभाति कृतं सत् शुभं स्यात्। शेषं तथैव क लघूनि भानि लोलानि मृदूनि अमरवृद्धो ब्रह्मा तद्भं रोहिणी ' सुरज्येष्ठो विरंचिरः ' इति हेमः ॥ शाक्रं ज्येष्ठा भ्रमरं विशाखा एषां द्वंद्वे एषु पुनः क सद्धरिदिने शुभग्रहाः हरिः सूर्यं एषां दिने किंभूते जया जयातिथिः पूर्णा पूर्णातिथिः अस्त्यर्थे वतुप्प्रत्ययः आभिरितिविभियुक्ते पुनर्वित्रिकलग्ने बुधगुरुशुक्राणां लग्ने ॥ २८ ॥

चरमिश्रदेवरथकारभराज्यैर्लघुमिश्रमुष्टिकविधानमुशंति ॥
द्विजराजखेचरदिनेषु तदीये ह्युदये बुधा गुरुसुधाघृणिसक्ते ॥२९॥

अथ स्वर्णकारकार्यारंभे मादिशुद्धिमाह—चरेति ॥ हि निश्चितं बुधा मुष्टिकविधानं स्वर्णकारकर्म उशंति वाञ्छंति 'कलादो मुष्टिकश्च स' इति हेमः ॥ कैः चलसंज्ञानि मिश्रे द्वे देवरथकारं चित्रा राज्यं मृगशीर्षं एषां द्वंद्वे एभिर्भैश्च पुनर्लघुभिर्भैः पुनर्द्विजराजखेचरदिनेषु गुरुशुक्रसूर्यसौमभवासरेषु पुनस्तदीये उदये गुरुशुक्रसूर्यसौमलग्ने किंभूते गुरुः सुधाघृणिश्चंद्र आभ्यां सक्ते युक्ते ॥ २९ ॥

रुचिरं च वैकटिककर्म कृतं सयमकृष्णवर्त्मवसुजिष्णुभवातैः ॥
विधिविश्वकृच्छिवभमूलविशाखासहितैरसाध्वहनि धीरविलग्ने ॥ ३० ॥

अथ मणिकारकर्मारंभे मादिशुद्धिमाह—रुचिरमिति ॥ वैकटिकस्य मणिकारस्य कर्म कृतं रुचिरं मनोहरं सन्निरंतरं स्यात्। कैः यमो भरणी कृष्णवर्त्मा वन्हिः कृत्तिका वसवो धनिष्ठा जिष्णुरिंद्रस्तद्भं ज्येष्ठा वातः स्वाती एषां द्वंद्वे एते किंभूतैः विधिर्ब्रह्मा रोहिणी विश्वकृत् चित्रा शिवभमार्द्रा मूलं विशाखा एषां द्वंद्वे एभिः सहितैः क असाध्वहनि अशुभग्रहदिने पुनर्धीरविलग्ने स्थिरलग्ने ॥ ३० ॥

सदा दिवाकीर्तिजनक्रियाकला चलेंद्रचित्रालघुपौष्णराजभा ॥
सौम्योदये सौम्यदिने सदाचिते सुतारयोपासमयोज्झिते भवेत् ॥३१॥

अथ नापितकर्मारंभे मादिशुद्धिमाह—सदेति ॥ सदा दिवाकीर्तिजनस्य नापितस्य क्रियाकला क्रियाविज्ञानं भवेत् । किंभूता दिवाकीर्तिजनक्रिया कला चलानि चरसंज्ञानि द्वंद्वे ।

ज्येष्ठा चित्रा लघूनि पौष्णं रेवती राधा चंद्रो मृगशीर्ष एषा द्वंद्वे इमानि भानि यस्यां सा क सौम्योदये 'शुभग्रहलग्ने किंभूते सद्याचिते शुभग्रहव्याप्ते पुनः क सौम्यदिने शुभग्रहवारे किं भूते उपासग्रयोझिते निशांतकालवर्जिते पुनः कया सुतारया शुभतारकया ॥ ३१ ॥

अर्णोभलोलाश्विनतिष्यपितृभत्वाष्ट्रैंदवैरिंदुकवीज्यवासरैः ॥
भवेदिदं मालिककर्म सुश्रियै नरोदये कंटकमुक्तकंटके ॥ ३२ ॥

अथ मालिककर्मारंभे भादिशुद्धिमाह—अर्ण इति ॥ इदं मालिककर्म सुश्रियै स्यात् कैः अर्णो जलं तद्भं पूर्वाषाढा लोलानि आश्विनं तिष्यः पुष्य पितृभं मघा त्वाष्ट्रं चित्रा ऐंद्वं मृगशीर्ष एषा द्वंद्वे एतैः पुनः कैः इंदुः कविः शुक्रः इज्यो गुरुः एषां वासरैः पुनः क नरोदये नरलग्ने किंभूते कंटकैः पापग्रहैर्मुक्तकंटके त्यक्तकेंद्रे ॥ ३२ ॥

आदित्यभादित्यमृदूग्रधन्वभैः सांत्याजवाताजभकर्म सद्गुणं ॥
चरोदये वारिचरोदयेनजे सत्कंटके हारि कुलालकर्मणि ॥ ३३ ॥

आदित्यमिति ॥ इदं काव्यं मिश्राध्याये द्वाचत्वारिंशत्तम तत्र व्याख्यातं अत्र प्रस्तावाछिखितमतस्ततो व्याख्या ज्ञेया ॥ ३३ ॥

विकर्तनैकांतरवासरो ध्रुवं चित्राश्रवःक्षिप्रनगारिभांत्यभं ॥
स्थिरोदयः साधुपयो नभ १० स्थलो भवेच सिद्ध्यै पलगंडकर्मणि॥३४॥

अथ चुनाराणां कर्मारंभे भादिशुद्धिमाह—विकर्तनेति ॥ विकर्तनात् सूर्यादेकांतरवासरः सूर्यः भौमः गुरुः शनिः एषां वासरे इत्यर्थः। पुनर्ध्रुवं स्थिरसंज्ञभ पुनश्चित्रा श्रवः श्रवणः क्षिप्रसंज्ञभानि नगारिरिंद्रो ज्येष्ठा आंत्या रेवती एषा द्वंद्वैकत्व पुनः स्थिरोदयः स्थिरलग्नं किंभूतः स्थिरोदयः साधुपयोनभ स्थलः शुभग्रहयुक्तचतुर्थभावो दशमभावश्च समुच्चयार्थे इत्यादि कर्तृपदं पलगंडस्य लेपकनः कर्मणि सिद्ध्यै भवेत् 'पलगंडस्तु लेपकन्' इति हैमः ॥ ३४ ॥

चरे मृदुक्षिप्रकभोग्रधन्वभे कुर्विदकृत्यं विदधीत धीमता ॥
रवीज्ययुग्मद्युनि साधुभोदये तथैव भे सूचिककर्म सद्दिने ॥३५॥

अथ तंतुवायकार्यारंभे भादिशुद्धिमाह—चर इति ॥ धीमता कुर्विदस्य तंतुवायस्य कृत्यं विदधीत । अत्र उक्तिश्चित्या कस्मिन् चरे चरसंज्ञभे मृदूनि क्षिप्राणि को ब्रह्मा तद्भं रोहिणी उग्रान्त्या इद्रस्तस्य भ ज्येष्ठा एषा द्वंद्वैकत्वे पुनः क रवीज्यौ सूर्यजीवौ तयोर्युग्म रविचंद्रौ गुरुशुक्रौ एषा द्युनि वासरे पुनः साधुभोदये शुभग्रहाणा राशिलग्ने॥ अथ सूचिककर्माह ॥ तथैव भे उक्तनक्षत्रे सूचिकस्तंतुवायस्तस्य कर्म स्यात् ॥ क सद्दिने शुभग्रहवासरे ॥ ३५ ॥

क्षिप्रादित्यांभोभचित्रानुराधासामीरेष्वंत्यार्यकर्णत्रयेषु ॥
रंगाजीवो रंजयत्येव लोकान्सोमांश्वोर्वा कर्मणा स्वेन शुक्रे॥३६॥

अथ चित्रकारकार्ये भादिशुद्धिमाह—क्षिप्रेति ॥ रंगाजीवश्चित्रकृत् स्वेन कर्मणा निज कृत्येन लोकान् रंजयति रागीकरोति 'रगाजीवस्तौलिकश्चित्रकृत्' इति हैमः । क क्षिप्राणि आदित्य पुनर्वसु अंभोभ पूर्वाषाढा चित्रा अनुराधा सामीरं स्वाती ओषध्यार्य ओषधीनाथश्चद्र-स्तस्येद् मृगशीर्ष कर्णत्रय श्रवणत्रिक एषा द्वद्वे एषु पुन क सोमश्चद्र अशु सूर्य अन योर्द्वद्वे तयोर्दिनयोः वाथवा पुन शुक्रे शुक्रदिने एव निश्चित ॥ ३६ ॥

धीरादित्यश्वासनादित्यतिष्यै राधाकर्णद्वंद्वपौष्णैंदवाढ्यैः ॥
सद्वारैः स्यात्कर्म निर्णेजकस्य प्राग्र्यं पर्वप्रोज्झितैः पुंसि लग्ने ॥३७॥

अथ रजकस्य कर्मारंभे भादिशुद्धिमाह—धीरेति ॥ निर्णेजकस्य रजकस्य कर्म प्राग्र्य श्रेष्ठ स्यात् कै धीराणि आदित्य हस्त श्वासन स्वाती आदित्य पुनर्वसु तिष्य पुष्यः एषां द्वद्वे एतै. किंभूतैः राधा विशाखा कर्णद्वद्व श्रवणधनिष्ठे पौष्ण रेवती ऐंदव मृगशीर्ष एषा द्वंद्वे एभिराढ्यै पूर्णै पुनः कैः सद्वारै शुभग्रहवारै किंभूतैः पर्वप्रोज्झितै दर्शादिव-र्जितै पुन क पुंसि लग्ने ॥ ३७ ॥

सौम्ये पूर्वास्वांत्यभे द्वीशभे वा शाक्रे शैवे यातुभे वासवे स्यात् ॥
पाणौ चित्रायामभीष्टं च शुक्रे सूरे सौरे पादुकाकारकर्म ॥ ३८ ॥

अथ चर्मकारकार्ये भादिशुद्धिमाह—सौम्य इति ॥ पादुकाकारकर्म चर्मकारकृत्यमभीष्ट श्रेष्ठ स्यात् क सौम्ये मृगशीर्षे पूर्वासु पूर्वात्रये आत्ये रेवत्यां द्वीशभे विशाखाया वाथवा शाक्रे ज्येष्ठायां शैवे आर्द्रायां यातुभे मूले वासवे धनिष्ठाया पाणौ हस्ते चित्राया शुक्रे सूरे सूर्ये सौरे शनौ वारे ॥ ३८ ॥

जायाजीवो वल्लवश्च प्रकुर्याल्लोले धीरे मैत्रचित्रैंदवेषु ॥
शैवे तिष्ये नैऋपेये स्वकर्म ब्रघ्नेन्द्रेज्यैंदुशनोभिः सुलग्ने ॥ ३९ ॥

अथ नरविशेषकर्मारंभे भादिशुद्धिमाह— जायेति ॥ जायाजीवो नरः वल्लवो गोपश्च स्वकर्म निजकृत्य प्रकुर्यात् क लोले चरसज्ञभे धीरे स्थिरसज्ञे मैत्रमनुराधा चित्रा ऐंदव मृगशीर्ष एषा द्वंद्वे एषु शैवे आर्द्रायां तिष्ये पुष्ये नैऋपेये मूले पुन ब्रघ्न सूर्य इंद्रेज्यो गुरु उशना शुक्र एषां द्वंद्वे एभिः सुलग्ने शुभलग्ने ॥ ३९ ॥

व्याधो दाशः कौटिकोऽत्यावसायी पूर्वावातद्वीशवारीशकालैः ॥
तीक्ष्णैः पापाहन्यथात्मीयकर्म स्वार्थं कुर्यात्पापलग्नेऽमदाये ॥ ४० ॥

अथ व्याधादीना कार्ये भादिशुद्धिमाह—व्याध इति ॥ व्याधो मृगव्याजीवी पुन दाशो धीवर पुन कौटिकः 'मासिक कौटिकश्चाय' इति हैम ॥ खाटकी इति भाषा । पुन अत्यावसायी चाडालश्च आत्मीयकर्म कुर्यात् किमर्थं स्वार्थं निजार्थं वा कै पूर्वात्रय

अनेकवर्णोदितधर्मकर्मणा समानधर्मस्य नयं नयंत्यपि ॥
परे जनावाप्तुमलं क्रियाफलं स्वधर्मसत्यो लभते जनः श्रियम् ॥४५॥

अथ स्वधर्मं द्रढयन् विक्रमार्कवर्णनं संदधाति—अनेकेति ॥ अलमित्यवधारणे परेऽपरे जनाः क्रियाफलमात्रं प्राप्तुं नयं नीतिं नयंति प्राप्नुवंति कस्य समानधर्मस्य तुल्यधर्मस्य केन अनेकवर्णोदितधर्मकर्मणा स्पष्टं। वा पुनः पक्षांतरे स्वधर्मसत्यो लोकप्रवाहयुक्तो निजधर्मरक्तो जनः श्रियं लभते प्राप्नोति 'सत्यस्तु लोकभित्' इति हैमः ॥ अर्थांतरन्यासेन श्रीविक्रमादित्य उक्तः स च सत्यमुक्तवान् तमेव वर्णयितुमाह ॥ ४५ ॥

कांबोजगौडांध्रकमालवाननाः श्रीविक्रमार्कस्य सुराज्यगौर्जराः ॥
स्ववर्णधर्मक्रिययोज्वलीकृतं यशोऽभिगायंत्यधुनापि ते जनाः॥४६

इति श्रीकविकालिदासोदिते ज्योतिर्विदाभरणे वर्णकर्मधर्मनिरूपणाध्यायो विंशतितमः॥

कांबोजेति ॥ अधुनापि कांबोजदेशप्रमुखाः सुराज्यगुर्जराद्या जना लोका श्रीविक्रमार्कस्य यशः कीर्तिमभिगायंति किंभूतं यशः स्ववर्णधर्मस्य निजनिजवर्णधर्मस्य क्रियया उज्वलीकृतं निर्मलीकृतं ॥ ४६ ॥

इतिश्री पौर्णिमीयगच्छाधिराजभट्टारकपुरंदरश्रीमहिमाप्रभसूरीश्वरचरणसरोरुहचचरी-
कायमानशिष्यभावरत्नविरचितायां श्रीकालिदासकृतज्योतिर्विदाभरणस्य
सुखबोधिकायां विंशतितमोऽध्यायः ॥ २० ॥

कालनिर्णयप्रकरणम्।

वर्णक्रियासंकथनादनंतरं वदामि कालव्यवहारनिर्णयं ॥
येनैव वेदस्मृतिकर्मसाधनं समेति सिद्धं प्रतिवेलमादरात्॥१॥

अथ पूर्वोक्तं समयसाधनीयं स्यादतः कालव्यवहाराध्यायसंधानमाह—वर्णेति ॥ वर्णानां विप्रादीनां क्रियासंकथनात् अनंतरं अहमादरात् कालव्यवहारनिर्णयं वदामि कथयामि येन कालनिर्णयेन वेलां प्रति इति प्रतिवेलं वेदस्मृतिकर्मसाधनं कर्तृपदं समेति प्राप्नोति ॥१॥

मधौ शुचौ माघ इषे युगक्रमं सितादिरात्र्या नवरात्रिकं व्रतं ॥
देवीप्रसादं वशया विशाखिलैः कृतं चतुर्वर्गफलप्रदं युगैः ॥ २॥

अथ नवरात्रिव्रतमाह—मधाविति॥ मधौ चैत्रे शुचौ आषाढे माघे इषे आश्विने युगक्रमं कृतादिचतुर्युगानामनुक्रमेण सितादिरात्र्याः चैत्राषाढमाघाश्विनानां शुक्लपक्षप्रथमां रात्रिमारभ्य नवरात्रिकं व्रतं कर्तृपदं विशा नरेण वशया स्त्रियाऽखिलैर्युगैःकृतं सत् चतुर्वर्गफलप्रदं स्यात् । किंभूतं व्रतं देव्याः प्रसादो यस्मिन् तत् देवीप्रसादं ॥२॥

अमांतरात्रावुत पक्षतौ घटं संस्थापयेल्लेय५तुला७घटो११क्ष२भे॥
लग्ने तथा द्विप्रकृतौ शुभैर्ग्रहैस्त्रिकोणलग्नेषु खलैरिरिस्थितैः ॥३॥

अथात्र व्रते घटस्थापनमाह—अमांतेति ॥ सुधीः घटं संस्थापयेत् क अमांतरात्रौ अमावा- स्यावसानरजन्या उत पक्षतौ प्रतिपदि पुनः क लेय सिंह. तुला घट. कुंभः उक्षा वृष. एषा भे राशौ तथा पुनर्लग्ने द्विप्रकृतौ द्विस्वभावराशौ लग्ने तथा त्रिकोण लग्नेषु ५।९।१ शुभैर्ग्रहैः तथारिरिस्थितैः षष्ठभावगतैः खलैः क्रूरैः ॥ ३ ॥

पृदाकुभाजांघ्रिभविश्वकर्मभान्यपास्य वा चेदिह नोऽर्कभद्युमं ॥
पातद्वयं वै कलशोऽष्टमे क्षणे संस्थापितः स्थापयति श्रियोऽखिलाः॥४॥

अथ कुम्भस्थाने भादिशुद्धिं तर्कयति—पृदेति ॥ वै निश्चित चेत् यदि यत् अर्कभ सूर्यनक्षत्रं तदेव शुभ दिननक्षत्र न स्यात् । पातद्वय व्यतीपातवैधृतौ न भवत. इति या प्रतिपत् स्यात्तस्यां अष्टमे क्षणे मुहूर्ते संस्थापित कलशोऽखिलः समस्ताः श्रियो लक्ष्मीः स्थापयति स्थिरीकरोति किंकृत्वा पृदाकु. सर्पस्तद्भमश्लेषा अजांघ्रिभं पूर्वाभाद्रपदा विश्वकर्मभं चित्रा एषा द्वद्वे इमानि अपास्य त्यक्त्वा ॥ ४ ॥

होमे तदीये नवमीयुताष्टमीं नयेत्सदैवेह तदीयपारणां ॥
वृद्धौ नवम्यां समभावतस्तथा क्षये दशम्यां च विशारदैः स्मृता॥५

अथात्र व्रते होमपारणाशुद्धिमाह—होम इति ॥ तदीये होमे नवरात्रिकव्रतहोमे नवमी- युताष्टमी स्यात् । सदैव सुधीरिह नवमीयुत प्रम्या तदीयपारणा तस्य व्रतस्य पारणा नयेत् कुर्यात् । वृद्धौ तिथिवृद्धौ तथा समभावतस्तुल्यप्रमाणतो नवम्या पारणा नयेत् । च पुन क्षये तिथौ सति दशम्या विशारदैः पडितै पारणा स्मृता ॥५॥

होमे व्रतेऽन्यत्र करग्रहादिके वै सन्मंगले पौष्णयमाहियातुभैः ॥
त्रिन्नाग्निपूर्वाभिरिनात्मजान्हि वा न स्थापयेत्कुंभमसत्तिथौ निशि ॥६॥

अथ रेवत्यादिषु होमादिसप्तर्षिकुंभस्थापनं निषेधति—होम इति ॥ सुधीः होमे व्रते- ऽन्यत्र करग्रहादिके सन्मंगले शुभकार्ये वा कुंभं घटं न स्थापयेत् । कैः पौष्णं रेवती यमो भरणी अहिरश्लेषा यातुभं मूलं एषा द्वद्वे एतैः पुन कामि चित्रा त्रिपूर्वाः आर्द्रा द्वद्वे आभिः पुनः क इनात्मजान्हि शनिदिने पुन. क असत्तिथौ अशुभतिथौ सति पुन निशि रात्रौ ॥ ६ ॥

आस्ते कवावांगिरसे गुरौ हरौ क्षयेऽधिके मासि च हायने तथा॥
एतद्व्रतं न प्रथमं समारभेदन्यच्च कांताव्रतमप्यनादृतम् ॥ ७ ॥

अथ गुर्वस्तादिदोषे नवरात्रिकव्रतारंभ प्रथम निषेधति—आस्त इति ॥ सुधीरिदं नवरात्रिकं व्रतं प्रथमं न समारभेत् न प्रारभेत् क कवौ शुक्रे आंगिरसे गुरौ आस्ते

सति पुनः हरौ सिंहे गुरौ सति पुनः क्षयेऽधिके मासि मासे हायने वर्षे च तथा च पुनः अन्यत् कांताव्रतं स्त्रीव्रतमपि अनादृतं त्यक्तमित्यर्थः ॥ ७ ॥

व्रतं हि भद्रादिविरुद्धकाले नित्यं न दुष्यत्यबलाजनस्य ॥ नैमित्तिकं स्यात् प्रथमं सदोषं कालस्थिरं नित्यमनित्यमन्यत् ॥ ८॥

अथ नित्यानित्यव्रतविवेकमाह—व्रतमिति ॥ हि अवधारणे भद्रादिविरुद्धकाले वि-ष्ट्यादिदुष्टकालेऽबलाजनस्य स्त्रीजनस्य नित्यं व्रतं न दुष्यति । प्रथमं नैमित्तिकं कारणिकं व्रतं सदोषंभद्रादिविरुद्धकाले दूषणयुक्तं स्यात् । कालस्थिरं अस्मिन् काले इदं व्रतमवश्यं कर्तव्यमेव इति नित्यं व्रतं स्यादन्यत् अनित्यं व्रतं स्यादिति विवेकः ॥ ८ ॥

माघे निशीथानुगता चतुर्दशी पक्षे परे या शिवरात्रि-संज्ञिका ॥ भवेदुपोष्या सजया१३पि वामर३०या युता च रिक्तां प्रविहाय पारणा ॥ ९ ॥

अथ शिवरात्रिकालशुद्धिमाह—माघ इति ॥ माघे मासे परे कृष्णे पक्षे या निशीथानुगता मध्यरात्रिगता चतुर्दशी स्यात् सा शिवरात्रिसंज्ञिका उपोष्या उपोषणीया भवेत् । किंभूता सजया त्रयोदशीयुक्ताऽपि वाऽथवा किंभूता अमया अमावास्यया युता युक्ता च पुना रिक्ता तिथिं विहाय पारणा स्यात् ॥ ९ ॥

यदा निशीथद्वयगामिनी भवेच्चतुर्दशी सा परपूर्वगा क्रमात् ॥ वृद्धिक्षयत्वादुत मुक्तत‌द्वया बव्ही विधेया किल कालवेदिभिः॥१०

अथात्र न्यूनाधिकतिथौ विवेकमाह—यदेति ॥ यदा या निशीथद्वयगामिनी मध्यरात्रिद्वयगामिनी परपूर्वगा उत्तरमध्यरजनीत आगामिकमध्यरजनी यावत् गता प्राप्ता चतुर्दशी भवेत् सा शिवरात्रिश्चतुर्दशी भवेत् । किंच संभावनाया उत कालवेदिभिर्दैवज्ञैर्बव्ही बहुकालतिथिश्चतुर्दशी विधेया किंभूता चतुर्दशी क्रमात् वृद्धिक्षयत्वात् मुक्तद्वया वृद्धिर-हितभावात् वर्जितवृद्धिघटीतिथिः ॥ १० ॥

देव्या व्रतेऽन्यत्र च वन्हिरेतसो व्रते सपर्यादिविधौ चतुर्दशी ॥ त्रयोदशीविद्धवती तथाष्टमी ग्राह्या नवम्या सहितातताऽधिका॥११

अथ देव्यादिव्रते तिथिशुद्धिमाह—देव्येति ॥ देव्या व्रते भवानीव्रतेऽन्यत्र च वन्हिरे-तस ईश्वरस्य व्रते सपर्यादिविधौ पूजादिकर्मणि च त्रयोदशीविद्धवती त्रयोदश्या विद्धा चतुर्दशी तथा नवम्या सहिता अष्टमी च ग्राह्या ततोऽधिका ग्राह्या ॥ ११ ॥

सहोऽपरा मुख्यतमा चतुर्थिका व्रते गणेशस्य विधूदयाश्रया ॥ एवं चतुर्थ्यो निखिलाश्च तद्व्रते भवंति सिद्ध्यै किल कृष्णपक्षजाः॥१२

अथ गणेशचतुर्थीव्रतशुद्धिमाह—सह इति ॥ गणेशस्य व्रते सहो मार्गशीर्षमासस्त स्यापरा कृष्णा मुख्यतमा श्रेष्ठतमा चतुर्थिका चतुर्थी ग्राह्या । किंभूता चतुर्थी विधूदया-श्रया चंद्रोदयव्यापिनी च पुनरेव किलेति संभावनायां तद्व्रते तस्य गणेशस्य व्रते निखिलाः समस्ताश्चतुर्थ्यः सिद्ध्यै भवन्ति किंभूताश्चतुर्थ्यः कृष्णपक्षजा कृष्णप क्षजाता. ॥ १२ ॥

दशम्यविद्धा समुपोषयेदिमामेकादशीं द्वादशिकां च पारयेत् ॥
क्षणावराद्धर्या दशमी भमक्षणावमोत्तरा चेदपि तामुपोषयेत्॥१३॥

अथैकादशीव्रतमाह—दशमीति ॥ बुध इमां दशम्यविद्धा एकादशीं समुपोषये च्च पुनर्द्वादशिका पारयेत् । उत चेत् यदि भमक्षणावमा भैर्नक्षत्रैर्मीयते ते भमाश्च ते क्षणाश्च सप्तविंशतिक्षणैश्चतुरंचाशन्मितघटिकाऽवमा हीना दशमी तदा सा एकादशी क्षणावरा-र्धया क्षणे श्रेष्ठा भवेत्तदा सुधीस्तामुपोषयेत् ॥ १३ ॥

क्षणाधिका चेद्दशमी भमक्षणाऽधिकावमैकादशिकाऽधिका परा ॥
उपोषिता स्यादपरा फलप्रदा त्रयोदशी पारणयापि वा तदा॥१४॥

अथाधिकावमतिथौ एकादशीविवेकमाह—क्षणेति ॥ चेत् यदि क्षणाधिका मुहूर्ताधिका भमक्षणा सप्तविंशतिमितमुहूर्तास्तेभ्योऽधिका वमा एवंविधा दशमी पुनरेकादशिकाधिका तदापरा द्वितीया एकादशी उपोषिता सती परा प्रकृष्टफलप्रदा स्यात् । वेति पक्षांतरे पारणयापि त्रयोदशी फलप्रदा स्यात् ॥ १४ ॥

एकादशी चेत्स्पृशति त्रिवासरास्तदा शुभं तद्द्वयमप्युपोषितं ॥
सवैष्णवैर्मस्करिसाग्निकैस्तथाऽपरः समेकामपरामुपोषयेत् ॥ १५ ॥

अथैकादश्या विशेषमाह—एकेति ॥ चेत् यदि एकादशी त्रिवासरान् दिनत्रयं स्पृशति तदा मस्करिसाग्निकैर्दण्डिभिर्योगिभिः अग्निहोत्रिभिः किंभूतैर्मस्करिसाग्निकैः सवैष्णवैर्वैष्णव-युक्तैस्तद्द्वयं तस्या एकादश्या द्वयमुपोषितं शुभं स्यात् । तथाऽपरः कश्चित्समेका शुभा एका परां अग्रेतना एकादशीमुपोषयेत् ॥ १५ ॥

चेद्द्वादशी षष्ठ्यधिका ६० तदा भवेदुपोषयेत्तामपि पश्चिमां बुधः ॥
संपारयेद्द्वादशिका परा क्वचिन्नंदा च भद्रा समुपोषणोचिता ॥ १६ ॥

चेदिति ॥ चेत् यदि षष्ठ्यधिका षष्टिघटिकाभ्योऽधिका द्वादशी स्यात्तदा बुधः पश्चिमां षष्टिघटिकामितां तामपि द्वादशीमुपोषयेत् परामग्रेतनां द्वादशिकां संपारयेत् । पुनः क्वचित् स्थाने नंदा एकादशी भद्रा द्वादशी समुपोषणे हिता शुभा स्यात् ॥ १६ ॥

भद्रावमेतां समुपोष्य पारयेत्त्रयोदशीं वारुणकालतोऽधिका ॥
यातामिह द्वादशिकादि यद्धरेरहस्तदुल्लंघ्य सदैव पारणा ॥ १७ ॥

अथास्या विशेषमाह—भद्रेति ॥ या भद्रा द्वादशी अरुणकालतः सूर्योदयात् प्राक् चतुर्घटिकात्मकोऽरुणोदयकालस्तस्मात् अवमेता अवमं क्षयं इता प्राप्ता वाऽरुणकालेऽधिका तदा तां द्वादशीं समुपोष्य त्रयोदशीं पारयेत्। इह हरेः कृष्णस्य तत् द्वादशीकादि यत् द्वादश्याः प्रथमचरणमेवंविधमहरुल्लंघ्य प्रोज्झ्य सदैव पारणा स्यात् ॥ १७ ॥

चेद्द्वादशी पारणया हि लभ्या पूर्णान्वितैकादशिकां न पारयेत् ॥
वृद्धौ क्षये वापि तदन्यरूपं भनिर्णये तत्क्रमनीतिभावतः ॥ १८ ॥

चेद्द्वादशीति ॥ हि अवधारणे चेत् पारणया द्वादशी लभ्या प्राप्या स्यात्तदा सुधी पूर्णान्वितैकादशिकां दशमीयुक्तामेकादशीं न पारयेत् भोजनं न कारयेदुपोषयेदित्यर्थः । तद्धेतुमाह वृद्धौ क्षये वा तिथौ सति भनिर्णये नक्षत्रनिश्चयेऽपि तदन्यरूपं तस्या ईप्सिततिथ्या अन्यरूपमन्यस्वरूपं स्यात् । कस्माद्धेतोः क्रमनीतिभावतः तिथ्यादिक्रमन्यायभावात् ॥ १८ ॥

वृद्धिक्षयौ स्तः परमौ तिथौ सदा व्यर्धा रसाः सांघ्रिरसाश्च नाडिकाः ॥
सनेमतर्काः सपदर्णवास्तु भे निस्त्र्यंशदोषौ द्विरदा युतौ क्रमात् ॥ १९ ॥

अथ तिथिनक्षत्रयोगानां वृद्धिक्षयनियमाह—वृद्धिरिति ॥ तिथौ तिथिविषये सदा व्यर्धा रसा विगतं अर्धं येभ्यस्ते एवंविधा रसाः षड्नाडिकाः सार्धपंचघटिकाः ५।३० च पुनः सांघ्रिरसाश्चरणसहिता षण्नाडिकाः सपादषड्घटिकाः ६।१५ क्रमेण वृद्धिक्षयौ परौ उत्कृष्टौ स्तो भवतः । तु पुनर्भे नक्षत्रविषये सनेमतर्काः सार्धषड्घटिकाः ६।३० सपदर्णवाः सपादचतुष्कघटिकाः ४।१५ क्रमेण वृद्धिक्षयौ स्तः ॥ पुनर्युतौ योगविषये निस्त्र्यंशदोषौ निर्गतस्तृतीयभागो यस्मात् एवंविधौ दोषौ भुजौ द्वौ एतावता त्र्यंशयुक्ता एकघटिका १।४० द्विरदा गजा अष्टघटिकाः ८ क्रमात् वृद्धिक्षयौ स्तः ॥ १९ ॥

मैत्रं शुचौ चेच्छ्रवणं नभस्ये पौष्णं तथोर्जेऽर्कमघस्रयोगं ॥
तत्पारणा हंत्यपि धर्मभाजां पुराकृतैः पुण्यमशेषमेव ॥ २० ॥

अथ नक्षत्राश्रितद्वादशीं दर्शयति—मैत्रमिति ॥ चेत् यदि शुचौ आषाढमासे मैत्रमनुराधा नभस्ये भाद्रपदे श्रवणः तथा ऊर्जे कार्तिके पौष्णं रेवती स्यात् । किंभूतं मैत्रादिमं अर्कमघस्रयोगं अर्कैर्द्वादशभिर्मीयते इति अर्कमश्चासौ घस्रो वासरश्च द्वादशी इत्यर्थः । तस्य योगः संयोगो यस्मिंस्तदिति तदा तत्पारणा तस्या द्वादश्या पारणा धर्मभाजां प्राणिनां पुराकृतमशेषमपि एवं पुण्यं हंति सा उपोष्या तदा शुभमित्यर्थः ॥ २० ॥

तथापि पादं प्रथमं विमुक्त्वा मैत्रे च मध्यत्रिलवं श्रुतौ हि ॥
पौष्णेऽन्त्यपादं हरिवासराख्यं तत्पारणा धर्मफलाप्तये स्यात् ॥ २१ ॥

अथात्र नक्षत्रचरणगतविशेषं दर्शयति—तथेति ॥ हि अवधारणे तथा मैत्रेऽनुराधायाः

यत्त्वं हरिवासराख्यं विहाय पौष्णांत्यपादं रेवत्या अंत्यचरणं हरिवासराख्यं विहाय तत्पारणा तस्या द्वादश्या पारणा धर्मफलाप्तये स्यात् ॥ २१ ॥

चैत्रे सिता द्युदलगा नवमी व्रते स्याच्छ्रीरामजन्मसमये तदुपोषणं सत् ॥ वृद्धौ च सा दिनदलद्वयगा परा चेत्पूर्वा क्षये द्विदिनमध्यगतान्यथा न ॥ २२ ॥

अथ रामनवमीमुपोष्यामाह—चैत्र इति ॥ चैत्रे मासे सिता शुक्ला द्युदलगा दिनार्द्ध गता नवमी व्रते स्यात् । श्रीरामजन्मसमये तदुपोषणं तस्या नवम्या उपवासः स्यात् । चेत् यदि वृद्धौ सत्यां सा नवमी दिनदलद्वयगा दिनार्द्धयुग्मगता परा अग्रेतना स्यात् । क्षये सति द्विदिनमध्यगता दिनद्वयमध्यप्राप्ता पूर्वा स्यात् । अन्यथा उक्तविपरीतेन स्यात् ॥ २२॥

रिक्तां समुज्झ्य दशमी किल पारणायामायुःप्रजास्ववृपवागपवर्गदा स्यात् ॥ श्रीरामजन्मसममन्यमहाव्रताख्यं नोपोषितं ननु महोत्सवगीतमेतत् ॥ २३ ॥

अथास्याः पारणादिनमाह–रिक्तामिति ॥ किल संभावनायां रिक्तां नवमीं समुज्झ्य विहाय पारणायां दशमी आयुःप्रजास्ववृपवागपवर्गदा दीर्घजीवितसतानधर्मसरस्वती मोक्षप्रदा स्यात् । ननु वितर्के महोत्सवगीतं महताडंबरेण गीतं स्तुतं वा उपोषितं सत् एतत् श्रीरामजन्मसमं व्रतमन्यमहाव्रताख्यं नास्ति ॥ २३ ॥

अष्टमी नभसि मासि यापरा रोहिणीसहितमध्यरात्रिगा ॥ कृष्णजन्मसमयोत्सवव्रता सर्वकामफलदा ह्युपोषिता ॥ २४ ॥

अथ गोकुलाष्टमीव्रतमाह—अष्टमीति ॥ नभसि श्रावणे मासे यापरा कृष्णा रोहिणीसहितमध्यरात्रिगाष्टमी भवति हि अवधारणे साष्टमी उपोषिता सती सर्वकामफलदा स्यात् । किंभूताष्टमी कृष्णजन्मसमयोत्सवाय व्रतं यस्यां सा स्पष्टमिति ॥ २४ ॥

रोहिणीसहितमष्टमीदिनं चेन्निशीथसमयद्वयं स्पृशेत् ॥ तच्चयापचयतः परं पुरा तत्र वा यदि ततस्तथान्यथा ॥ २५ ॥

अथात्र वृद्धौक्षये उपोषणं तर्कयति—रोहिणीति ॥ चेद्यदि अष्टमीदिनं कर्तृपदं रोहिणीसहितं निशीथसमयद्वयं मध्यरात्रियुग्मं स्पृशेत् तद्दिनं चयापचयतो वृद्धिक्षयत्वात् क्रमेण वृद्धौ सत्यां परमग्रेतनमुपोष्यं स्यात् । वाथवा क्षये सति पुरा पूर्वं दिनं उपोष्यं स्यात् । यदि चेत्ततोऽन्यथा तदा तत्र स्यात् ॥ २५ ॥

रोहिणीविरहिताष्टमीं नयेन्मध्यरात्रिसमयानुगामिह ॥ केवलामनुतिथिक्षयेऽथवा तां गतक्षणनिशीथगामपि ॥ २६ ॥

रोहिणीति॥ इह व्रते सुधीः केवला रोहिणीविरहिता रोहिणीनक्षत्रवर्जिता अष्टमी मध्यरात्रिसमयानुगा चेत् तां उपोषयेत्। अनु पश्चात् तिथिसंयोगे सति सा गगनगानिशीथगा मुहूर्तमात्रहीनमध्यरात्रिगतामपि उपोषयेत्॥ २६ ॥

सोमसौम्यसहिताष्टमी कृभा केवलाप्युत शुभा ह्युपोषिता ॥
भौमवासरवती तथोदयाद्बहुभीष्टफलदोत्सभवात् ॥ २७ ॥ ॥

सोमेति ॥ हि अवधारणे सोमसौम्यसहिता चन्द्रबुधयुक्ता कृभा कस्य ब्रह्मणो भं नक्षत्रं यस्या सा कृभा रोहिणीयुक्ता उत विकल्पे केवलापि अष्टमी उपोषिता सतीति शुभा स्यात्। उदयात् भौमवासरवती भौमदिनयुक्ता तथा उत्सवभवात् किंचिन्न्यूनत्वयोगात् बहुभीष्टफलदा स्यात् ॥ २७ ॥

अष्टमी भवति सप्तमीयुता गर्हिता व्रतविधौ यथा न तु ॥
वासुदेवजननोत्सवे तथा सा निशीथसमया समादृता ॥ २८ ॥

अष्टमीति॥ यथा सप्तमीयुताऽष्टमी व्रतविधौ उपोषणकर्मणि गर्हिता निंदिता न स्यात् तु अवधारणे तथा वासुदेवजननोत्सवे कृष्णजन्मोत्सवे साष्टमी निशीथसमया मध्यरात्रिगता समादृता आदृता ॥ २८ ॥

रोहिणी यदि जया क्षणोन्मिताष्टमीमुत सपेत्य रोहिणीं ॥
मध्यरात्रिसमयामुपोषयेत् निशीथनिकटानुगामपि ॥ २९ ॥

रोहिणीति ॥ यदि चेत् जया अष्टमी क्षणोन्मिता कलाप्रमिता रोहिणीं सपेत्य संयोगं प्राप्य भवेत्। उत रोहिणी क्षणोन्मिता अष्टमीं समेत्य भवेत्तदा सुधीर्मध्यरात्रिसमयां निशीथनिकटानुगां मध्यरात्रिगामपि तां अष्टमीमुपोषयेत् ॥ २९ ॥

प्राङ्निशीथमुपगम्य वैष्णवैर्नीयते परदिनाचिते तु ते ॥
पारणा तदवसानतो भवेद्वा वियोगसमयात्परं तयोः ॥ ३० ॥

अथात्र वैष्णवपक्षमाह—प्राङ्निशीथेति ॥ वैष्णवैः परदिनाचितेऽपरदिनव्याप्ते ते द्वेऽष्टमीरोहिण्यौ समेत्य प्राक् पूर्वमनु पश्चात् निशीथं मध्यरात्रिं नीयते प्राप्यते तदवसानतोऽष्टम्याः मानात् पारणा भवेत्। वाथवा तयोरष्टमीरोहिण्योर्वियोगसमयात् विश्लेषकालात् परमग्रे पारणा भवेत् ॥ ३० ॥

चतुर्दशी माधवमासि शुक्ला नृसिंहसंभूतिचतुर्दशी स्यात् ॥
निशामुखे सा समुपोषणार्हा जयायुता पूर्णिमया युता वा ॥ ३१ ॥

अथ नरसिंहजन्मचतुर्दशीमाह—चतुर्दशीति ॥ माधवमासि वैशाखमासे शुक्ला श्वेता नृसिंहसंभूतिचतुर्दशी नरसिंहजन्मचतुर्दशी स्यात् सा चतुर्दशी निशामुखे रजनीमुखे समुपोषणार्हा उपोषणाय योग्या स्यात्। किंभूता जयायुता त्रयोदशीयुता वाथवा पूर्णिमया युता ॥ ३१ ॥

अर्कास्तकालद्वयगा तु सा चेत्क्षयाधिकत्वात्प्रथमाऽपरा स्यात् ॥
तत्स्था नवा तद्विपरीतगार्हा वन्ही विधेयात्र सपारणा सा ॥ ३२ ॥

अथात्र वृद्धिक्षये विवेकमाह—अर्केति ॥ चेत् यदि अर्कास्तकालद्वयगा सूर्यास्तकाल-द्वयगता स्यात् सा क्षयाधिकत्वात् क्षेय प्रथमा अधिकेऽपरा अग्रेतना स्यात् । तत्स्था नवा इति द्वयपरमव्यय नवेति विकल्पार्थे तद्विपरीतगा तदात्र वन्ही विधेयार्हा तिथिस्तु योग्या किंभूता सा सपारणा पारण युक्ता ॥ ३२ ॥

इषांतदर्शो रजनीमुखाधिको दीपोत्सवोऽसौ गदितो बुधैरिह ॥
श्राद्धं विधाय द्युदलक्षणत्रयं सायं सदैवोल्मुकमाहृतं ततः ॥ ३३ ॥

अथ दीपमालिकामाह—इषांतेति ॥ य इषांतदर्शो आश्विनमासस्यांतदर्शो रजनीमुखाधिक स यातोऽधिक स्यादिह जातिः बुधैः सोऽसौ दीपोत्सवो गदितः प्रोक्तः । द्युदलक्षणत्रय मध्याह्नोपरि घटिका यावत् श्राद्धं विधाय कृत्वा ततः सायसन्ध्यायां सदैव उल्मुक 'मेराईआ' इति भाषा आहृतमगीकृत ॥ ३३ ॥

रिक्तानिशीथे किल विष्णुमायामभ्यर्च्य दीपोत्सवमप्यमायां ॥
कृत्वा बलेश्च प्रतिपद्यजस्य पूजानु गोक्रीडनमृद्धये स्यात् ॥ ३४ ॥

रिक्तेति ॥ किलेति सम्भवना या रिक्तानिशीथे चतुर्दश्या मध्यरात्रे विष्णुमाया लक्ष्मी मभ्यर्च्य संपूज्य अपि पुनरमायाममावस्यायां दीपोत्सवं दीपमालिका कृत्वा प्रतिपदि तिथौ बलेर्बलिराजस्य गेहमध्ये पूजा च पुनरुद्वाहेऽजस्य गोमयनिर्मितगोवर्धनस्य पूजाऽनु पश्चात् गोक्रीडन सतीनमृद्धये समृद्ध्यर्थे स्यात् ॥ ३४ ॥

अमा ३० यदा भूतदिने १४ऽपराण्हे प्रदृश्यते तद्दिवसेऽक्षयं स्यात् ॥
श्राद्धं पितृणां तदनन्तरमुल्काख्यं तमीमुखे लोकनृपार्थकारि ॥ ३५ ॥

अमेति ॥ यदा भूतदिने चतुर्दश्यामपराह्णेऽमा प्रदृश्यते तदा तद्दिवसे चतुर्दशी दिने पितृणां श्राद्धं तदनन्तरं ... पश्चात्तमीमुखे रजनीमुख उल्मुकाख्य 'मराईआ' लोकनृपार्थकारि जनानां नृपस्य च शुभदारक स्यात् ॥ ३५ ॥

प्रातश्च सगवश्चैव मध्यान्हः शारदस्तथा ॥
मध्यान्हमर्थोदयतः पंचांशो द्युमितेः क्रमात् ॥ ३६ ॥

अथ पञ्चधा दिनविभागमाह—प्रातरिति ॥ प्रातः प्रथम १ पुनः सगवः २ पुनः मध्यान्ह ३ पुनः शारद ४ तथा पुनः सायाह्न ५ मिति अर्द्धोदयतः सूर्यस्यार्द्धोदयतो दिनमितेर्दिनमितस्य क्रमात् पंचांश ॥ ३६ ॥

पचधा भागकालोऽसौ त्रिधा पूर्वाण्हकं ततः ॥
मध्यान्हमपराण्हं तु द्वेधा पूर्वापरार्द्धकं ॥ ३७ ॥

अथ त्रिधा कालमाह—पंचेति ॥ पंचधा भागकालोऽसौ कालस्त्रिधा पूर्वाण्हकं ततो मध्यान्हं ततोऽपराण्हं स्यात् । नु पुनः पूर्वापरार्द्धके पूर्वार्द्ध उत्तरार्द्ध द्वेधा कालः स्यात् ॥ ३७ ॥

दिनावसाने क्षणमास्त्यमा चेच्छ्राद्धं विधायोल्मुकमत्र कुर्यात् ॥
क्षयेऽथ वृद्धौ प्रतिपद्युपेते दर्शे ततोऽग्रे बलिपूजनं स्यात् ॥ ३८ ॥

दिनेति ॥ चेद्यदि दिनावसाने दिनान्तेऽमा क्षणमा मुहूर्तमात्रेणास्ति तदात्र श्राद्धं विधाय उल्मुकं कुर्यात् । अथ क्षये वृद्धौ उभे प्राप्ते दर्शे प्रतिपदि उल्मुकं स्यात्ततोऽग्रे बलिपूजनं स्यात् ॥ ३८ ॥

श्राद्धे कृते शारदगामि दर्शे नंदोल्मुकं दूषणकृन्न राज्ये ॥
तदा निशीथे सुरशक्तिपूजा दर्शेऽपि लोकेश्वरसौख्यदा स्यात् ॥ ३९ ॥

श्राद्धेति ॥ शारदगामि, दर्शे आश्विनामावास्यायां श्राद्धे कृते सति नंदोल्मुकं प्रतिपदि उल्मुकं राज्यदूषणकृन्न स्यात्तदा निशीथे मध्यरात्रिदर्शेऽपि सुरशक्तिपूजा लक्ष्मीपूजा लोकेश्वरसौख्यदा जननृपसुखदायिनी स्यात् ॥ ३९ ॥

सूर्यास्तकालोल्मुकमंगिकर्म स्यादंगकर्माण्यपराणि चात्र ॥
दर्शोदरः पंचदिनात्मकोऽसौ दीपोत्सवस्तद्व्यवहारसिद्धः ॥ ४० ॥

सूर्यास्तेति ॥ सूर्यास्तकालोल्मुकमंगिकर्म प्राणिकृत स्यात् । च पुनरत्रापराणि अंगकर्माणि स्युः ॥ दर्शोदरोऽमामध्यः पंचदिनात्मकः त्रयोदशी चतुर्दशी दर्शः प्रतिपत् द्वितीयात्मकोऽसौ दीपोत्सवः स्यात् । किंभूतो दीपोत्सवस्तद्व्यवहारेण श्राद्धादिकृत्यव्यवहारेण सिद्धः स्यात् । इति दीपमालिकाधिकारः ॥ ४० ॥

अथाश्विने या दशमी निशामुखे शुक्ला स्मृता सा विजया बुधैरिह ॥
अर्कान्वितां बोधियुतां शमीमुत क्षितीश्वरः सर्वजनश्च पूजयेत् ॥ ४१ ॥

अथ विजयादशमीमाह—अथेति ॥ अथानंतरमुत चेत् याश्विने शुक्ला दशमी निशामुखे रजनीमुखे स्यात् बुधैः सा विजयादशमी स्मृता प्रोक्ता । इह विजयायां क्षितीश्वरश्च पुनः सर्वजनः शमीं ऊशमाश्विनीं पूजयेत् । किंभूतां शमीं अर्कान्वितां अर्कतरुयुक्तां पुनर्बोधियुता अश्वत्थयुक्ता ॥ ४१ ॥

दिनावसानद्वयगामिनी यदा पूर्णा तदैवं विजया परा भवेत् ॥
न वेति दोषाननकैकटाहृता शम्यर्चने सर्वहरिज्जयाय सा ॥ ४२ ॥

दिनेति ॥ यदा दिनावसानद्वयगामिनी पूर्णा दशमी स्यात्तदा विजया परा परैव ग्राह्या वा यदा एवं न स्यात्तदा दोषाननैकदा रजनीमुखमात्रव्यापिनी आदृता इति सा विजया दशम्यर्चने शमीतरुपूजने सर्वहरिज्जयाय सर्वदिग्विजयाय स्यात् ॥ ४२ ॥

हुताशनीं फाल्गुनपूर्णिमास्यां निशीथपूर्वां ज्वलयेच्छुभार्थी ॥
पश्चात्तमीनज्वलने दिवा वा नृपश्रियं हंत्यपि पक्षतिर्वा ॥ ४३ ॥

अथ होलिकाधिकारमाह—हुतेति ॥ शुभार्थी हितकाङ्क्षी नरः फाल्गुनपूर्णिमास्यां निशीथपूर्वां मध्यरात्रितः आदिमां हुताशनीं ज्वलयेत् कुर्यात् । द्विकर्म च पुनः पश्चात्तमीतज्ज्वलने मध्यरात्रितोऽपरां रजनीं इत्यं प्राप्य तत् ज्वलनं च तस्मिन् अथवा दिवा दिने हुताशनी ज्वलने सति पक्षतिः प्रतिपद् वा नृपश्रियं राजलक्ष्मीं हंति ॥ ४३ ॥

सूर्यास्तकालावधिरेव पूर्णिमाधिकोनगा वा कलया तदा कृते ॥
श्राद्धे च तत्र ज्वलिता हुताशनी नंदातिथौ स्याद्रजसोत्सवः श्रियै॥४४

सूर्यास्तेति । यदा सूर्यास्तकालावधि सूर्यास्तसमयं यावत् पूर्णिमा एव निर्धारणे अथवा कलया अंशेन अधिका वा ऊना हीना स्यात्तदा कृते श्राद्धे सति तत्र ज्वलिता हुताशनी होलिका स्यात् । च पुनः रजसा रेणुना उत्सवः श्रियै स्यात् । तस्मिन् नंदातिथौ प्रतिपत्तिथौ ॥ ४४ ॥

रिक्तान्विताग्रद्युयुतोत पूर्णिमा नेयास्तगे तज्ज्वलने रवाविह ॥
विष्टिस्तु तन्नित्यतया न दोषकृत्तथोपरागं परिपूर्णिमारजः ॥ ४५ ॥

रिक्तेति ॥ तज्ज्वलने होलिकाज्वलने रिक्तान्विता चतुर्दशीयुक्ता उत अग्रद्युयुता प्रतिपदा युक्ता पूर्णिमा नेया । रवौ सूर्येऽस्तगे सति इह होलिकाया ज्वलनकारणे विष्टिर्भद्रा दोषकृत् न स्यात् । तथा तन्नित्यतया होलिकाया नित्यभावात्तथा उपरागं ग्रहणं दोषकृत् तथा परिपूर्णिमारजो दोषकृत् न स्यात् ॥ ४५ ॥

पूर्णास्तकालमभगाप्युत शारदाना या पूर्णिमा नभसि
संगवगा तु तस्यां ॥ विष्ट्या युतोत रहिता मुनित-
र्पणं स्याच्चेत्संक्रमो भवति वा ग्रहणं तदा न ॥ ४६ ॥

अथ पूर्णिमायां मुनितर्पणमाह—पूर्णेति ॥ नभसि श्रावणमासे पूर्णास्तकालमभगा नक्षत्रास्तकालमभगा अपि पुनः शारदाना शारदनक्षत्राश्रिता तु पुनः संगवगा संगव-कालव्यापिनी उत भद्रान्विता विष्टियुता उत रहिता विष्टिरहिता स्यात्तदा तस्यां पूर्णिमायां मुनितर्पणं स्यात् । चेत् यदि तत्र संक्रमः सूर्यसंक्रांतिर्वा ग्रहणं सूर्यचन्द्रोपरागो न स्यात्तदेति ॥ ४६ ॥

केचित्तमिच्छंति तदेव तर्पणं श्रुतौ च हस्ते श्रुतिशालिनो ग्रहे ॥
स्यात्संक्रमे वा सति मर्शशालिनां नत्तर्पणे श्रावणशुक्लपंचमी॥४७

अथात्र मतमाह—केचिदिति॥ केचित्तदेव तर्पणं श्रुतौ श्रवणे हस्ते च समिच्छंति सम्यक्प्रकारेण वांछंति कस्य श्रुतिशाखिनो वेदशाखिनः ॥ अथ ग्रहे सूर्यादिग्रहणे संक्रमे वा सति श्रावणशुक्लपंचमी सर्वशाखिनां सर्ववेदशाखिनां तर्पणे ऋषितर्पणे स्यात् ॥ ४७ ॥

सा संगवांतैवमुपाकृतौ स्यात् पूर्वान्विता वापि च पाकयज्ञे ॥
तथा सिता पंचदशी समुक्ता तथाष्टकैतत्समयाभिरूपैः ॥ ४८ ॥

सा संगवेति ॥ उपाकृतौ उपाकर्मणि सा श्रावणशुक्लपंचमी संगवांता संगवसंज्ञकालप्राप्ता एव वाथवा पूर्वान्वितापि स्यात् । न पुनः पाकयज्ञेऽभिरूपैः पंडितैस्तथा सिता शुक्ला पंचदशी पूर्णिमा समुक्ता प्रोक्ता। तथाष्टका श्राद्धविशेषभवा प्रोक्ता किंभूता एतत्समया उक्तकालप्रमिता ॥ ४८ ॥

अथ भाद्रपदादिपंचमी द्युदलांतामृषिपंचमी च सा॥
द्युदलद्वयगोत सा न चेदधिकासन्नगता हि तां नयेत् ॥ ४९॥

अथ ऋषिपंचमीमाह—अथेति ॥ अथ या भाद्रपदादिपंचमी सा ऋषिपंचमी स्यात् किंभूता ऋषिपंचमीउत चेत् द्युदलद्वयगा दिनार्द्धद्वयगता न चेत् अधिका आसन्नगता समीपगता तदा हि आचारणे सुधीः तां पंचमीं द्युदलांतां दिनार्द्धप्रांता नयेत् प्राप्नुयात् ॥ ४९ ॥

अपरा मुनिपंचमीदिनादुत पूर्वा मुनिचारशुद्धिगा ॥
हरितालयभिपूजनेऽष्टमी कथिता सातिजयाय योषिताम् ॥५०॥

अथ हरितालीपूजनमाह—अपरेति ॥ मुनिपंचमीदिनात् ऋषिपंचमीदिवसात् अपरा उत्तरा पूर्वा वा मुनिचारशुद्धिगा अगस्त्यचारशुद्धिं प्राप्ता याष्टमी भवति साष्टमी हरितालयभिपूजने भवानीपूजने योषितां स्त्रीणामतिजयाय कथिता प्रोक्ता ॥ ५० ॥

सिताष्टमी भाद्रपदस्य कीर्तिता दूर्वार्चनेऽस्ते सति कुंभजन्मनः ॥
सिंहे रवौ शारदकालगामिनी मध्यान्हवृद्ध्याप्युत रिक्तया युता॥५१॥

अथ दूर्वाष्टमीमाह—सिताष्टमीति ॥ भाद्रपदस्य सिता शुक्ला शारदकालगामिनी शारदसंज्ञकालप्राप्ता उत मध्यान्हवृद्ध्या रिक्तया नवम्या युता युक्ताष्टमी दूर्वार्चने कीर्तिता प्रोक्ता क कुंभजन्मनोऽगस्त्यस्यास्ते सति पुनः क सिंहे रवौ सति ॥ ५१ ॥

कन्यारवौ कुंभजनावनस्तगे दूर्वाष्टमी वास्ति नभोऽपराष्टमी ॥
नभास्सितापि क्वचिदादृता न सा मुनिव्रतासन्नविभेदभावतः ॥५२॥

अथात्र विभेदमाह—कन्येति ॥ कन्यारवौ कन्यासंक्रांतौ कुंभजनौ अगस्त्येऽनस्तगेऽस्तपर्यंते वा नभोऽपराष्टमी श्रावणस्यापरा अप्रेतनाऽष्टमी अस्ति क्वचिन्नभःसिता श्रावणस्य शुक्ला सापि पंचमी नादृता कस्मात् मुनिव्रतासन्नस्य ऋषिपंचमीनामसमीपस्य विभेदभावतो भिन्नभावात् ॥ ५२ ॥

त्रयोदशीपूर्वमहश्चतुष्टयं सतं जयापार्वतिकाभिधं व्रतं ॥
शुचौ सदोदीरितमेव योषितां नारंभयेत्तावदजह्नुविद्धवत् ॥ ५३ ॥

अथ पार्वतीव्रतमाह—त्रयोदशीति ॥ सदा निरंतरं शुचौ आषाढमासे सितस्य भावे मतं शौक्ले त्रयोदशीपूर्वमहश्चतुष्टयं दिनचतुष्टयं जयापार्वतिकाभिधं व्रतं सदा योषितां स्त्रीणामुदीरितं प्रोक्तं योषितां तावत्काले नारभयेत् न आरभयेत् यावत्कालमजह्नुविद्धवत् अजो विष्णुस्तस्य दिनं द्वादशी तस्या वेधयुक्तं स्यात् ॥ ५३ ॥

व्रतांतरात्राविह जागरादिकं समस्तसौभाग्यकरं तथा परं ॥
शुचेरमाया रजनीसमाचिता शुपक्षवत्सैवमहिव्रतं स्त्रियाम् ॥ ५४ ॥

व्रतान्तेति ॥ इह मते व्रतांतरात्रौ व्रतावसानरजन्यां जागरादिकं समस्तसौभाग्यकरं स्यात् । तथापरं शुचेराषाढस्य याऽमावास्या रजनीसमाचिता रजनीव्यापिनी स्यात् स्त्रियां महिलायां सा एवमहिव्रतं स्यात् । किंभूतं अहिव्रतं शुपक्षवत् दिनपक्षयुक्तं ॥ ५४ ॥

या स्यात्सिता सा नभसस्त्रिमा तिथिर्मधुप्रिया गौर्यभिपूजनोचिता ॥
चंद्रास्तकालानुगतादिगा क्षये वृद्धौ परा तद्द्वयगा न चान्यथा ॥ ५५ ॥

अथ गौरीतिथिमाह—या स्यादिति ॥ नभसः श्रावणस्य या सिता शुक्ला त्रिमा तृतीया तिथिः स्यात् सा गौरीतिथिर्भवति । किंभूता त्रिमा मधुप्रिया मद्यपानप्रिया पुनः किंभूता अभिपूजनोचिता पूजायोग्या पुनः किंभूता चंद्रास्तकालानुगता पुनः किंभूता क्षये आदिगा पुनर्वृद्धौ पराऽग्रेतना वा यथा तद्द्वयगा तदुभयव्यापिनी अन्यथा न स्यात् ॥ ५५ ॥

मध्यान्हकालेऽधिगतादिसप्तमी नभस्यथो शीतलसप्तमीव्रते ॥
नेया दशाभिर्नवमी सिता तथा त्रिधा विभक्ते किल नाकुलव्रते ॥ ५६ ॥

अथ शीतलसप्तमीमाह—मध्यान्हेति ॥ अथो दशाभिः स्त्रीभिः शीतलसप्तमीव्रते नभसि श्रावणे मध्यान्हकालेऽधिगता प्राप्ता आदिसप्तमी शुक्ला सप्तमी नेया कर्तव्या इत्यर्थः । तथा स्त्रीभिः त्रिधा विभक्ते नाकुलव्रते नकुलसंबन्धिव्रते सिता शुक्ला नवमी नेया किलेति संभावना ॥ ५६ ॥

नभस्यशुक्लेंदुदयाधिका च या ग्राह्या तृतीया खलु सात्र कज्जला ॥
तथा तृतीया हि नभस्यशुक्लजा सा गर्भसूताव्रतमत्रपास्तगा ॥ ५७ ॥

अथ कज्जलीतृतीयामाह—नभस्येति ॥ खलु निश्चितं नभसि श्रावणेऽशुक्ले कृष्णा उदयगा सूर्योदयगता च पुनरधिका या तृतीया स्यात् सात्र कज्जला ग्राह्या । अत्रा दर्शनात्पश्चिमस्य पुत्रोत्सवात् हि शुक्लार्थे । तथा नभस्यशुक्लजा भाद्रपदशुक्लतृतीया या स्यात् गर्भसूताव्रतं स्यात् । किंभूता क्षपाकरास्तगा अस्तं गते सति प्राप्ता ॥ ५७ ॥

मासि भाद्रपदे शुक्ला द्वादश्यभयसंज्ञिका ॥
संगवानुगता कार्या स्त्रीजनैः कामसिद्धये ॥ ५८ ॥

अथाभयद्वादशीमाह —मासीति ॥ स्त्रीजनैर्भाद्रपदे मासि शुक्ला संगवानुगता संगवसंज्ञ-कालप्राप्ता अभयसंज्ञिका द्वादशी कार्या कर्तव्या कस्यै कामसिद्धये वांछितनिष्पत्तये ॥५८॥

मध्यान्हकालांतगता चतुर्दशी सिता हि सा भाद्रपदे नृयोपिता ॥
बुधैरनंतव्रतमादृतं सदा तथा कलोनापि ततः फलाप्तये ॥ ५९ ॥

अथानंतव्रतमाह——मध्यान्हेति ॥ भाद्रपदे मासि सिता शुक्ला मध्यान्हकालांतगता मध्यान्हकालावसाने प्राप्ता या स्यात् बुधैः सा चतुर्दशी एव अनंतव्रतमादृतमंगीकृतं हि निश्चितं सदा तथा तेन प्रकारेण मध्यान्हावसानतः कलोना कलया हीनापि सा चतुर्दशी एव अनंतव्रतमादृतं कस्यै नरस्त्रीणां फलाप्तये ॥ ५९ ॥

रवेर्व्रतं भानुदिने सदादिमे यामे चरेदन्यदिनस्य संक्रमे ॥
पूजादिदानादिकभोजनादिभिः प्रजायुरारोग्यधनादिसिद्धिकृत् ॥६०॥

अथ सूर्यव्रतमाह——रवेरिति ॥ सुधीः हंसदिने सूर्यदिने रवेः सूर्यस्य व्रतं चरेत् कुर्यात्। संक्रमेऽन्यदिनस्यादिमे यामे प्रथमप्रहरे चरेत्। किंभूतं पूजादिदानादिकभोजनादिभिः कृत्वा प्रजा संततिः आयुः आरोग्यं धनादिः एषां वृद्धे एषा सिद्धिकृत् ॥ ६० ॥

तथैव सर्वद्युचरव्रते भवेत्स्ववासरो वा निजसंक्रमः सदा ॥
स्वहोमदानार्चनभोजनक्रियो ग्रहस्तदीयोऽपि मिथस्तदिष्टकृत ॥६१॥

अथ चंद्रादिग्रहाणा व्रतमाह—तथैवेति ॥ सदा स्ववासरो निजसंक्रमो वा तथैव सूर्यवत् सर्वद्युचरव्रते चंद्रादिग्रहाणां व्रते भवेत् । अपि पुनस्तदीयस्तस्य नरस्यायं ग्रहो मिथस्तदिष्ट-कृत् स्यात् । किंभूतः स्वहोमदानार्चनभोजनानां क्रिया यस्मिन् सः ॥ ६१ ॥

रवौ रवे राजदिने च राज्ञो यदोपरागो त्वुत संक्रमे स्यात् ॥
शतोपरागप्रममेव पुण्यमेतद्द्वयेऽनंतफलं जपादौ ॥ ६२ ॥

अथ सूर्यादिग्रहणे पुण्यफलमाह—रवाविति ॥ यदा रवौ रविवारे उत संक्रमे रविसंक्रमे रवेः सूर्यस्य उपरागो ग्रहणं स्यात् । च पुना राजदिने चंद्रवासरे चंद्रसंक्रमे वा राज्ञश्चंद्रस्य उपरागः स्यात्तदा शतोपरागप्रमं शत ग्रहणप्रमितमेव पुण्यं स्यात्। एतद्वये वारसंक्रमणद्व-यग्रहणे जपादौ जपविधौ अनंतफलं स्यात् ॥ ६२ ॥

स्पर्शे विधाय स्नपनं जपाद्यं कुर्यात्सुरार्चां हवनं च मध्ये ॥
विमुच्यमाने निजशक्तिदानं स्नानं विमुक्ते तरणौ विधौ तु ॥६३॥

स्पर्श इति ॥ तपने सूर्ये तु पुनर्विधौ चंद्रे स्पर्शे राहुणा स्पृष्टे स्नपनं स्नानं विधाय जपाद्यं कुर्यात् पुमान् इति शेषः । च पुनर्मध्ये मध्यस्पृष्टेसुरार्चां देवपूजां हवनं न कुर्यात्। विमुच्यमाने निजशक्तिदानं कुर्यात् । विमुक्ते सति स्नानं कुर्यात् ॥ ६३ ॥

गर्भान्विता पश्यति चेन्नितंबिनी वैकल्यसूतिर्ग्रहणद्वयं हि सा ॥
न सूतकं जातमृतोद्भवं भवेद्यावच्छशांकार्कविधुंतुदेक्षणम् ॥ ६४ ॥

अथ गर्भवत्या ग्रहणावलोकनं सदोषमाह—गर्भेति ॥ या नितंबिनी स्त्री चेद्यदि ग्रहणद्वयं चंद्रसूर्यग्रहणं पश्यति हि अवधारणे सा वैकल्या ग्रांथिला सूतिः संततिर्यस्याः सा ग्रथिलसंततिः स्यात् । यावत्कालं शशांकार्कविधुंतुदेक्षणं चंद्रसूर्यराहुविलोकनं स्यात्तावत् जातमृतोद्भवं जन्मजं मृतजं सूतकं न भवेत् ॥ ६४ ॥

ग्रस्तौ रवींदू व्रजतो यदास्तकं न भोजयेदुद्गम ईक्षिते पुनः ॥
भोक्तव्यमाद्यप्रहरद्वयं विधोरपास्य वै यामचतुष्टयं रवेः ॥ ६५ ॥

ग्रस्ताविति ॥ यदा रवींदू सूर्यचंद्रौ ग्रस्तौ सन्तौ अस्तकं व्रजतो गच्छतस्तदा सुधीर्न भोजयेत् । उद्गमे उदये ईक्षिते दृष्टे सति पुनर्भोजयेत् ॥ विधोश्चंद्रस्य आद्यं प्रहरद्वयमपास्य विहाय भोक्तव्यं रवेः सूर्यस्य ग्रहणे यामचतुष्टयमपास्य भोक्तव्यमिति। इदं ग्रहणसामान्ये॥६५॥

जाते मृते रोगरजोग्रहादिके न सूतके यावदुदेति भानुमान् ॥
तत्पूर्वमेव ह्यु नयेन्निशीह या तात्कालिकी सा तिथिरादृता विधौ ॥ ६६

अथ सूतकादौ तिथिशुद्धिमाह—जात इति ॥ यावत् भानुमान् सूर्यो न उदेति उद्गच्छति तावज्जाते जन्मनि मृते रोगरजोग्रहादिके रोगे रजसि आर्तवे सूर्यादिग्रहणादिके सूतके पूर्वमेव ह्यु दिनं नयेत् गृह्णीयात् किंतु निशि रात्रौ तात्कालिकी तत्समयव्यापिनी तिथिः सा तिथिरिह विधौ विधाने आदृता गृहीता सुधीभिरिति शेषः ॥ ६६ ॥

घटीचतुष्केनमितः क्षणः क्वचित्प्रातः ससेकस्त्वरुणोदयः स्मृतः ॥
सैकस्तथोपासमयो घटीद्वयं शेषं खरांशूदय एव कर्मणि ॥ ६७ ॥

अथ क्षणादिकालसंज्ञानमाह—घटीति ॥ घटिचतुष्केनमितो घटिकाचतुष्केन ऊनो हीनो निशावसानसमये क्षणः क्षणसंज्ञकाल स्यात् । क्वचित्प्रातःकालः स्यात् । तु पुनः सैकः एकेन सहितः स कालोऽरुणोदयः स्मृतः कथितः । तथा सैकः एकेन सहितोऽरुणोदय उषासमयः स्मृतः । 'उषा निशान्तेऽल्पे विनिन्' इति हैम. ॥ शेषं घटीद्वयं खरांशूदयः सूर्योदय एव स्मृतः कर्मणि ॥ ६७ ॥

यज्ञादिदेवकार्येषु नेयमेतन्मनीषिभिः ॥
पितृकार्ये च सर्वत्र त्रिपंचभागवर्जितम् ॥ ६८ ॥

अथ श्राद्धे कालनियामकमाह—यज्ञादीति ॥ यज्ञादिदेवकार्येषु पितृकार्येषु सर्वत्र मनीषिभिः पंडितैरेतत् मदुक्तं नेयं ज्ञेयं किंभूतं एतत् त्रिपंचभागवर्जितं त्रिभागं पंचभागं कालं विहाय ॥ ६८ ॥

नीलोद्वाहोंऽगवच्छ्राद्धं यथाकालहितं गतं ॥
यतोंऽगिगो विवाहः स्यात्तदारब्धक्रमानुगम् ॥ ६९ ॥

अथ श्राद्धे त्रिपंचभागकालो नेष्ट उक्तः नीलोद्वाहादिश्राद्धेष्वनियामकमाह—नील इति ॥ नीलोद्वाहः अंगवच्छ्राद्धं पित्रादीनां श्राद्धं यथाकालहितं यथोपलब्धकाले हितं गतं प्राप्तं यतोंऽगिगो विवाहः स्यात् । कथमारब्धक्रमानुगं प्रारब्धानुक्रमणानुगतं स्यात् यथा भवति तथेति क्रियाविशेषणं । कोऽर्थः यथावसरे नीलोद्वाहादि कार्यं क्रियते तत्संभ्रमेव श्राद्धं कर्तव्यमवश्यमेव अंगं नीलोद्वाहादि सोऽस्य श्राद्धस्यास्ति इति अंगिश्राद्धं नीलोद्वाहाद्यनुगतमेव भवति न स्वतंत्रं अतः कालनियामकता नास्ति ॥ ६९ ॥

नित्यं श्राद्धमनित्यं स्यान्नीलोद्वाहांगवन्मिथः ॥
प्रादुर्भावे प्रवृत्ते वै नैवासौ तदनेहसि ॥ ७० ॥

नित्यमिति ॥ वै निश्चितं नित्यश्राद्धं नीलोद्वाहागवत् श्राद्धं मिथः परस्परमनित्यं स्यात् ॥ कोऽर्थः त्रिपंचभागवर्जितकालः श्राद्धे उक्तः अत्र नित्यश्राद्धे नीलोद्वाहादिश्राद्धे नासौ नियमः । प्रादुर्भावे प्रवृत्ते नीलोद्वाहादिकार्ये प्रवृत्ते तदनेहसि नीलोद्वाहादिकार्यसमयेऽसौ त्रिपंचभागवर्जितकालो न स्यात् ॥ ७० ॥

नासत्यपैत्रानलविश्वकर्मभद्विदैवतर्क्षाभिधमासपूर्णिमाः ॥
पितृक्षयाहाश्च सुतीर्थसंगमाः पुण्या वृषोत्सर्गविधानतः स्मृताः ॥ ७१ ॥

अथ नीलोद्वाहस्थलमाह—नासत्येति ॥ नासत्यमश्विनी पैत्रं मघा आनलं कृत्तिका विश्वकर्मभं चित्रा द्विदैवतर्क्षं विशाखा एषां नक्षत्राणामभिधा नाम येषां ते च ते मासाश्च तेषां पूर्णिमाः आश्विनमाघकार्तिकचैत्रवैशाखमासानां पूर्णमास्यः च पुनः पितृक्षयाहाः पित्रोः क्षयदिनानि पुनः सुतीर्थसंगमा पुण्या धर्मयोग्याः स्मृताः कस्मात् वृषोत्सर्गविधानतः नीलोद्वाहादिकार्येण ॥ ७१

न सिंहगेऽस्ते च गुरौ सितेऽस्तगेऽधिके क्षये मासि च हायने तथा ॥
नीलोक्षकोत्सर्गविधिं विदुर्गयां गोदावरीं च प्रथमाब्दिकं विना ॥ ७२ ॥

अथ गुर्वस्तादिदोषे नीलोद्वाहं निषेधति—न सिंहेति ॥ सिंहगेऽस्ते च गुरौ सति अस्तगे सिते शुक्रे तथाऽधिके क्षये मासि हायने वर्षे च सति बुधाः नीलोक्षगोत्सर्गविधिं न विदुर्न कथयंति । गयां गोदावरीं प्रथमाब्दिकं प्रथमश्राद्धं विना एतानि विहायेत्यर्थः ॥ ७२ ॥

क्षयाधिमासावुदितौ पुरा मया क्षयाधिकाब्दस्य च रूपमुच्यते ॥
क्षयाधिका मार्गवतो गुरोः समा द्विसंक्रमा या क्रमतो विसंक्रमा ॥ ७३

अथ क्षयाधिकलक्षणमाह—क्षयेति ॥ पुरा पूर्वं मया क्षयाधिमासौ उदितौ प्रोक्तौ च पुनरथ क्षयाधिकाब्दस्य क्षयाधिकवर्षस्य रूपं स्वरूपमुच्यते कथ्यते । मार्गवतो गुरोर्मार्गि गीष्पतेर्यां द्विसंक्रमा द्वौ संक्रमौ यस्या सा समा वर्षः सा क्षया क्षयवर्षं स्यात् ॥ या समा विसंक्रमा गुरुसंक्रमणरहिता सा शरत् अधिका स्यात् क्रमतः ॥ ७३ ॥

द्विचारवक्रांतरकालमैंदवं वर्षं तदंतर्गतमीज्यहायनं ॥
क्षुब्धं तदैज्याब्दसमं त्वनेहसं विहाय शेषे समयेस्तुमंगलम् ॥७४

अथ क्षयवर्षे त्याज्यकालनियममाह—द्विचारेति ॥ तु पुनर्यत् ऐंदवं वर्षं चान्द्रवर्षं द्विचारो द्विवारचारः वक्रश्च तयोरंतरकालं तदंतर्गतं चान्द्रवर्षांतरगतमेवविधमीज्यहायनं गुरुवर्षं स्यात्तदैज्याब्दसमं तद् बृहस्पतिवर्षतुल्यं क्षुब्धं क्षयमनेहसं कालं विहाय शेषे समयेऽत शेषकाले मंगलकार्यमस्तु ॥ ७४ ॥

मार्गी पुरोधा गदितोग्रधन्वनो द्विराशिचारं कुरुते यदा तदा ॥
लुप्ता शरत्सापि निषादिकं चरेच्चतुष्टयं मंगलसाधिनी भवेत् ॥७५॥

अथ मार्गिगुरोर्लुप्तवर्षे कुंभादौ मंगलकार्यमाह—मार्गीति ॥ उग्रधन्वन इंद्रस्य पुरोधा गुरुर्मार्गी सन् यदा द्विराशिचारं कुरुते कोऽर्थो मिथुनादौ राशौ महातिचारेण समागतः सन् पश्चात् कियद्भिर्दिनैर्वक्रितो यदा पूर्वराशिं भुक्तराशिं एति गच्छति तदा लुप्ता शरत् गदिता प्रोक्ता । अपि पुनः सा लुप्ता शरत् निषादिकं कुंभादिचतुष्टयं कुंभमीनमेषवृषमिथुनानि चरेत् गच्छेत्तदा सा शरत् मंगलसाधिनी भवेत्कुंभादिचतुष्कयुक्ते लुप्तवर्षे मंगलं स्यादित्यर्थः ॥ ७५ ॥

क्षणद्वयं यत् द्युदलोदरं स्मृतं सदादिजेभ्यः कुतपाख्यकालवत् ॥
दर्शक्षयाहाख्यनवान्नपक्षजश्राद्धेषु पिंडान् कुतपे प्रदापयेत् ॥ ७६ ॥

अथ श्राद्धकालशुद्धिं दर्शयति—क्षणेति ॥ यत् द्युदलोदरं दिनदलगर्भं क्षणद्वयमस्ति तत् कुतपाख्यकालवत् श्राद्धकालतुल्यं स्मृतं येभ्यः सदा निरंतरमादिजेभ्यः पितृभ्यो दर्शक्षयाहाख्यनवान्नपक्षजश्राद्धेषु सुधीः कुतपे पिंडान् प्रदापयेत् । 'श्राद्धकालस्तु कुतपोऽष्टमो भागो दिनस्य च' इति हैमः ॥ ७६ ॥

तिथिस्तदीया कुतपद्वये यदा पूर्वक्षये स्यादपरा च वृद्धितः ॥
न तद्द्वये तन्निकटानुगा क्षये वृद्धौ विभातादुतयास्ति चल्पापि ॥७७॥

तिथिरिति ॥ यदा तदीया तिथि श्राद्धतिथि कुतपद्वये स्यात्तदा क्षये पूर्वा स्यात् ॥ वृद्धिश्चेत परा[illegible] स्यात्तद्द्वये कुतपद्वये तिथिर्न स्यात्तदा तन्निकटानुगा श्राद्धकालसमीपगा स्यात् । उत [illegible] [illegible] पूर्वादिगात् क्षये वृद्धौ [illegible] [illegible] अस्ति [illegible] श्राद्धा ॥ ७७ ॥

श्राद्धे तिथिं यामनुपाक्षिके क्वचित्तत्पंचधा भक्तदिनत्रिभागगां ॥
नयेद्युगादी सितपक्षजौ सदा द्विभागगौ प्रागुदितानि चोक्तवत् ॥७८

श्राद्ध इति ॥ सुधीः क्वचित् अनुपाक्षिके मासपक्षादिके श्राद्धे या तिथिस्तां पंचधा भक्तदिनत्रिभागगां पुनः सितपक्षजौ श्वेतपक्षजातौ युगादितिथी सदा द्विभागगौ च पुनः प्रागुक्तानि उक्तकालवन्नयेत् ॥ ७८ ॥

श्राद्धेषु संकल्पविधिं परेष्विह क्वचित्तदारम्य समापयत्परं ॥
निमित्तजान्यानि तदाप्तकालगान्यन्हीष्टकाद्याभ्युदयानि पूर्वगे ॥७९

श्राद्धेष्विति ॥ सुधीरिह परेषु श्राद्धेषु क्वचित्तदारम्य परमग्र्यं समापयेत् । निमित्तजान्यानि तदा सकालगानि इष्टकाद्याभ्युदयानि यज्ञाद्यभ्युदयश्राद्धानि पूर्वगेऽन्हि पूर्वाण्हे समापयेत् ॥ ७९ ॥

यागद्युपूर्वं किल पर्व साग्निकैर्नेयं यदींदोरुदयो नहीष्टये ॥
भूतादिपद्दर्शपदत्रयं समं वृद्धचन्ययोः षोडशघस्रमोऽध्वरः ॥ ८० ॥

इति श्री कविकालिदासोदिते ज्योतिर्विदाभरणे कालनिर्णयाध्याय एकविंशतितमः॥ २१॥

यागेति ॥ किलेति संभावनायां साग्निकैः पूर्वकृषिभिर्यागद्युपूर्वं पर्व यत् यस्मात् कारणात् हि अवधारणे इंदोरुदये चंद्रोदये इष्टये यज्ञाय भूतादिपद्दर्शपदत्रयं चतुर्दशीप्रथमचरणं दर्शचरणत्रयं समं न नेयं । वृद्धचन्ययोः षोडशघस्रमोऽध्वरः स्यात् ॥ सप्तदशप्रमितदिने चतुर्दशप्रमितादिने चंद्रोदये च यज्ञो न स्यादित्यर्थः ॥ अत्र विशेषतस्तारतम्यं संप्रदायाज्ज्ञेयम् ॥ ८० ॥

इति श्री ज्योतिर्विदाभरणस्य सुखबोधिकायां एकाधिकविंशतितमोऽध्याय. ॥ २१ ॥

ग्रंथाध्यायनिरूपणप्रकरणम्

अथेह पर्वव्रतकालनिर्णयादनंतरं ग्रंथनिरूपणक्रमं ॥
ब्रुवे तथा विक्रममेदिनीविभोरभिप्रजानंदकरस्य वर्णनम् ॥१॥

अथ सर्वनिर्णयाध्यायकथनानंतरं बीजकाध्यायो घटतेऽतो ग्रंथनिरूपणक्रमस्य विक्रमार्कवर्णनस्य चाध्यायं संदधाति—अथेति ॥ अथ मागल्ये इह द्वाविंशेऽध्याये पर्वव्रतकालनिर्णयानंतर अहं ग्रथनिरूपणक्रम ब्रुवे कथयामि । तथाभिप्रजानंदकरस्य अभीष्टलोकहर्षकारकस्य विक्रममेदिनीविभोः श्रीविक्रमादित्यराज्ञश्च वर्णनं ब्रुवे ॥ १ ॥

मानान्ययोगशुभयुग्गुणरूपसंज्ञाः पंचांगजाः करणरूपगुणावबोधः ॥
वातायनभ्रमणगोचरसर्वभेदाः संस्कारकालनयशुद्धिरिपान्निपेकात् ॥२॥

अथ बीजकमाह—मानेति ॥ प्रथमाध्याये मानानि नवधा कालमानानि प्रोक्तानि इति ॥ १ ॥ द्वितीयेऽध्याये पंचांगजास्तिथिप्रमुखपंचांगजाता अयोगशुभयुग्गुणरूपसंज्ञाः कुयोगाः शुभयोगा एषां गुणरूपसंज्ञाः प्रोक्ता इति ॥ २ ॥ तृतीयेऽध्याये करणरूपगुणाः प्रोक्ता इति ॥ ३ ॥ चतुर्थेऽध्यायेऽवबोधो ज्ञानं पर्वज्ञानं पर्वाध्याय' प्रोक्त इति ॥ ४ ॥ पंचमेऽध्याये वातायनभ्रमणगोचरो ग्रहगोचरः प्रोक्त इति ॥ ५ ॥ षष्ठेऽध्याये सर्वभेदाः सर्वोत्पाताः प्रोक्ता इति ॥ ६ ॥ सप्तमेऽध्याये निषेकात् गर्भाधानकालात् ईषत् स्तोकमात्रं संस्कारकालनयशुद्धिः गर्भाधानादिसंस्कारकालनिर्णयनिर्दोषता प्रोक्ता इति ॥ ७ ॥

षट्कर्मबाहुजविशामुपवीतकर्म विद्याजपव्रतविधेः समुपक्रमश्च ॥
राजाभिषेकवदनाखिलराजसत्तादिग्भेदवद्गमननीतिरशेषरीतिः ॥ ३ ॥

षट्कर्मेति ॥ अष्टमेऽध्याये षट्कर्मा विप्रः बाहुजः क्षत्रियः विट् वैश्यः एषामुपवीतकर्म यज्ञसूत्रकृत्यं प्रोक्तमिति ॥ ८ ॥ च पुनर्नवमेऽध्याये एषां विप्रादित्रयाणां विद्याजपव्रतविधेःसमुपक्रमः विद्याजपव्रतविधानप्रारंभः प्रोक्त इति ॥ ९ ॥ दशमेऽध्याये राजाभिषेकवदनाखिलराजसत्ता भूपाभिषेकप्रमुखसमस्तराज्यांगानि प्रोक्तानीति ॥ १० ॥ एकादशेऽध्यायेऽशेषरीतिः समस्तभेदयुक्ता दिग्भेदवद्विभेदतुल्या गमननीति' प्रयाणनिश्चयः प्रोक्त इति॥११॥

अध्याययुग्ममुपयामविधानभेदं सर्वांबराभरणधारणमंगभाजां ॥
दुर्गं चतुर्विधमनेकविभेदरूपं चानेकभेदग्रहनिर्मितिरार्यरीत्या ॥४॥

अध्यायेति॥ द्वादशे त्रयोदशे चाध्याये उपयामविधानभेद विवाहविधानकृत्यं अध्याययुग्मं प्रोक्तमिति ॥१२॥॥१३॥ चतुर्दशेऽध्यायेंऽगभाजां प्राणिनां सर्वांबराभरणधारणं सकलवस्त्रभूषणधारण प्रोक्तमिति ॥ १४ ॥ पंचदशेऽध्यायेऽनेकविभेदरूप चतुर्विध दुर्गं साल प्रोक्तमिति ॥ १५ ॥ च पुनः षोडशेऽध्याये आर्यरीत्या धर्ममार्गेणानेकभेदगृहनिर्मितिःगेहकर्तव्यता प्रोक्ता इति ॥ १६ ॥

गेहप्रवेशननयादिसुरप्रतिष्ठा वन्हेः परिग्रहविधिर्बहुमिश्रकर्म ॥
वर्णक्रियाचरणधर्मनयोऽनु किंचित्सत्कालनिर्णयविधिर्व्यवहारसिद्ध्यै ५

गेहेति ॥ सप्तदशेऽध्याये गेहप्रवेशननयादिसुरप्रतिष्ठा गृहप्रवेशनिर्णयो देवप्रतिष्ठा च प्रोक्ता इति ॥ १७ ॥ अष्टादशेऽध्याये वन्हेरग्नेः परिग्रहविधिरग्न्याधानविधान प्रोक्तमिति ॥ १८ ॥ एकोनविंशतितमेऽध्याये बहुमिश्रकर्म प्रोक्तमिति ॥१९॥ विंशतितमेऽध्याये वर्णक्रियाचरणधर्मनय. अनेकवर्णानां क्रिया आचरण धर्म एषां निर्णयः प्रोक्त इति ॥२०॥ एकविंशतितमेऽध्यायेऽनु पश्चात् किंचित् सत्कालनिर्णयविधिः शुभकालनिर्णयविधानं प्रोक्तं ॥ २१ ॥ कस्यै व्यवहारसिद्ध्यै सर्वत्र योज्यमिति ॥ ५ ॥

अध्यायकर्मविनिरूपणरीतिरित्थमध्यायकेषु
कृतमाकृति २२ संमितेषु ॥ श्लोकैश्चतुर्दशशतैः
सजिनै १४२४ र्मयैव ज्योतिर्विदाभरणकाव्यविधानमेतत् ॥ ६ ॥

अध्यायेति ॥ द्वाविंशतितमेऽध्याये अध्यायकर्मविनिरूपणरीति प्रोक्ता इति ॥ २२ ॥ इत्थममुना प्रकारेण आकृतिसम्मितेषु द्वाविंशतिप्रमितेष्वध्यायेषु मया श्रीकालिदासेन एव एतज्ज्योतिर्विदाभरणकाव्यविधानं ज्योतिर्विदाभरणनाम कविकर्म कृत कैः सजिनैश्चतुर्विंशतियुतैश्चतुर्दशशतै १४२४ श्लोकै कृत्वा ॥ ६ ॥

वर्षे श्रुतिस्मृतिविचारविवेकरम्ये श्रीभारते खधृतिसंमितदेशपीठे ॥
मत्तोऽधुना कृतिरियं सति मालवेंद्रे श्रीविक्रमार्कनृपराजवरे समासीत् ७

अथ विक्रमार्कवर्णनं सदधाति ॥ वर्षे इति ॥ श्रुतिस्मृतिविचारविवेकरम्ये खधृति १८० समितदेशपीठेऽशीत्यधिकशतप्रमितदेशमंडले श्रीभारते वर्षे भरतक्षेत्रे मत्तः कालिदासात् अधुना साम्प्रतमियं कृतिः समासीत् जाता कस्मिन् मालवेंद्रे श्रीविक्रमार्कनृपराजवरे सति शुभे सति ॥ ७ ॥

शंकुः सुवाग्वररुचिर्मणिरंगुदत्तो जिष्णुस्त्रिलोचनहरी घटखर्पराख्यः ॥
अन्येऽपि संति कवयोऽमरसिंह्पूर्वा यस्यैव विक्रमनृपस्य सभासदोऽमी ८

अथ प्रथम नृपसभाया पंडितवर्गं वर्णयति—शंकुरिति ॥ यस्य विक्रमनृपस्यैव अमी शंकुप्रमुखा पंडिता सभासदः पारगद्याः सति । त्रिलोचनहरी इति द्वे इमा शेषं स्पष्ट ॥ ८ ॥

सत्यो वराहमिहिरः श्रुतसेननामा श्रीबादरायणमणित्थकुमारसिंहाः ॥
श्रीविक्रमार्कनृपसंसदि संति चैते श्रीकालतंत्रकवयस्त्वपरे मदाद्याः॥९॥

सत्य इति ॥ च पुनः श्रीविक्रमार्कनृपसंसदि सत्याचार्यादय एते पंडिताश्च पुनरपरे मदाद्या अहं कालिदास आद्यो येषां ते च ते श्रीकालतंत्रकवयः कालविधानशास्त्रज्ञाः सति ॥ शेषं स्पष्ट ॥ श्रुतसेननामा सिद्धसेनदिवाकरो जैनश्वेतांबरसत्कविरपरोनामिकुमदाचंद्र इति श्रीकल्याणमंदिरस्तोत्राख्यकाव्ये पठित ॥ अत्र सिद्धशब्दस्थाने छंदोभंगभयात्कविना श्रुतशब्दः प्रयोजित सिद्धशब्दस्य श्रुतशब्दपर्यायत्वात्॥यदुक्तं हेमानेकार्थ्यां 'सिद्धो व्याघ्रादिके देवयोनौ निष्पन्नमुक्तयो ॥ नित्ये प्रसिद्ध' इति ॥ 'ख्याते प्रतीतप्रज्ञातवित्तप्रथितविश्रुताः' इत्याभिधानचिंतामणौ ॥ अस्य संबंधो जैनशास्त्रात् ज्ञेय ॥ लेशेन सूचितो यतः ॥ दिदृक्षुभिक्षुः संयातो द्वारपाळो न मुंचति॥हस्ते न्यस्तचतु श्लोक उतागच्छतु गच्छतु॥१ दीयता दशलक्षाणि शासनानि चतुर्दश । हस्ते न्यस्तचतुश्लोक उतागच्छतु गच्छतु ॥२॥ सरस्वती स्थिता वक्त्रे लक्ष्मी करसरोरुहे॥ किर्ति किं कुपिता राजन् येन देशांतर गता ॥ ३ ॥ सर्वदा सर्वदोऽसीति मिथ्या संस्तूयसे बुधैः ॥ नारयो लेभिरे पृष्ठ न वक्ष परयोषित. ॥४ ॥ आहते तव निःस्वाने स्फुटितं रिपुहृद्घटै. ॥ गळित

तत्प्रियानेत्रे राजश्चित्रमिदं महत् ॥ ९ ॥ अपूर्वेयं धनुर्विद्या भवता शिक्षिता कुतः ॥ मार्गणौघ समभ्येति गुणा याति दिगंतरम् ॥६॥ इत्यादिना श्रीविक्रमार्कनृपसभायां प्राप्तगरिष्ठप्रतिष्ठ इत्यलं विस्तरेण ॥ ९ ॥

धन्वंतरिः क्षपणकामरसिंहशंकुवेतालभट्टघटखर्परकालिदासाः ॥ ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य १०

अथ पंडितनवकं वर्णयति—धन्वंतरिरिति॥ वै इति पादपूर्तौ शेषं स्पष्टं नवनिधानरत्नवत्ख्याता एते ॥ १० ॥

अष्टौ यस्य शतानि मंडलधराधीशाः सभायां सदा स्युः संसत्परिणाहकोटिसुभटाः सत्पण्डिताः षोडश ॥ दैवज्ञा दशपण्मितास्र भिपजो भट्टास्तथा दाढिनो वेदज्ञा रसचंद्रमा विजयते श्रीविक्रमः सोऽधिभूः॥११

अथ सभापरिजनान्वर्णयति ॥ अष्टाविति ॥ सदा यस्य श्रीविक्रमार्कस्य सभायां मंडलधराधीशा मुकुटवर्धनराजानोऽष्टौशतानि ८००स्युरेव संसत्परिणाहकोटिसुभटा संसद सभाया परिणाहो विशालता तस्मिन् कोटिप्रमितसुभटा स्युः ॥ षोडश सत्पंडिता स्युः ॥ दशषण्मिता दैवज्ञा ज्योतिर्विदः १६ स्युः ॥ तथा भिषजः १६ तथा तथा भट्टा १६ तथा दाढिनः १६ वेदज्ञा वेदपाठका रसचंद्रमा १६ स्युः ॥ स श्रीविक्रमोऽधिभूः स्वामी विजयते ॥ ११ ॥

यस्याष्टादशयोजनानि कटके पादातिकोटित्रयं वाहानामयुतायुतं च नवतिस्त्रिघ्ना कृति २४३०० र्हस्तिना ॥ नौकालक्षचतुष्टयं४००००० विजयिनो यस्य प्रयाणे भवत्सोऽयं विक्रमभूपतिर्विजयते नान्यो धरित्रीधरः ॥ १२ ॥

अथास्य सैन्यं वर्णयति—यस्येति ॥ यस्य विजयिनो विक्रमार्कस्य प्रयाणे कटके सैन्येऽष्टादशयोजनानि निरंतरं कोलाध्वनोर्नैरंतर्ये इति द्वितीया पादातिकोटित्रय ३०००० ०००मभवत् । वाहानामयुतायुतं १००००० ००च पुनर्नवते ९०कृति ८१००मां त्रिघ्ना क्रियते तदा २४३००हस्तिनां गजानां शतत्रयाधिकचतुर्विंशतिसहस्रमभवत् ॥ पुनर्नौकालक्षचतुष्टयमभवत् ॥ शेषं स्पष्टं ॥ १२ ॥

येनास्मिन्वसुधातले शकगणान्सर्वा दिशः संगरे हत्वा पंचनवप्रमा५५५५५५५५न्कलियुगे शाकप्रवृत्तिः कृता ॥ श्रीमद्विक्रमभूभुजा प्रतिदिनं मुक्तामणिस्वर्णगोसप्तीभाद्यपवर्जनेन विहितो धर्मः सुवर्णाननः ॥ १३ ॥

अथास्य शाकप्रवृत्तिं दर्शयति—येनेति ॥ येन श्रीविक्रमार्कभूभुजा कलियुगेऽस्मिन् वसुधातले संगरे सग्रामे सर्वा दिशः सर्वदिक्पर्यंतं पंचानां नवतैः पंचपंचाशत्कोट्यः पंचपंचाशल्लक्षाणि पंचपंचाशत्सहस्राणि पंचशतानि पंचपंचाशत् एभिः प्रमान् प्रमितान् ५५५५५५५५५शकगणान् म्लेंछान् हत्वा शाकप्रवृत्तिः कृता ॥ पुनः श्रीविक्रमादित्येन प्रतिदिनं मुक्ताफलं मणिः रत्न स्वर्ण हेम गौः सुरभिः सप्तिरश्वः इभो हस्ती इत्यादीनामपवर्जनेन दानेन सुवर्णाननः दानादिचतुर्विधो विप्रादिचतुर्वर्णात्मको वा धर्मो विहितः कृतः ॥ १३ ॥

उद्दामद्रविडद्रुमैकपरशुर्लाटाटवीपावको वेल्लद्वंगभुजंगराजगरुडो गौडाब्धिकुंभोद्भवः ॥ गर्जद्गुर्जरराजसिंधुरहरिर्धारांधकारार्यमाः कांबोजांबुजचंद्रमा विजयते श्रीविक्रमार्को नृपः ॥ १४ ॥

अथास्य दिग्विजयमाह—उद्दामेति ॥ स्पष्टम् ॥ १४ ॥

येनाप्युग्रमहीधराग्रविषये दुर्गाण्यसह्यान्यहो नीत्वा यानि नतीकृतास्तदधिपा दत्तानि तेषां पुनः ॥ इंद्रांभोध्यमरद्रुमस्मरसुरक्ष्माभृद्गुणेनांजसा श्रीमद्विक्रमभूभृताखिलजनांभोजेंदुना मंडले ॥ १५ ॥

अथास्य प्रभुत्वादिगुणान् वर्णयति—येनेति ॥ अंजसा शीघ्रं येन श्रीमद्विक्रमभूभृता राज्ञा उग्रमहीधरविषये पर्वत तुंगशृंगाग्रेऽसह्यानि गृहीतुमशक्यानि दुर्गाणि यानि अहो आश्चर्ये नीत्वा समादाय तदधिपास्तेषां दुर्गाणां स्वामिनो नतीकृता नम्रीकृताः पुनस्तेषां दुर्गाधिपानां तानि दुर्गाणि दत्तानि । किंभूतेन श्रीविक्रमार्केण इंद्रः अंभोधिः समुद्रः अमरद्रुमः कल्पतरुः स्मरः कामः सुरक्ष्माभृत् मेरुः एत गुणाः प्रभुत्वगंभीरत्वदातृत्वसुरूपत्वस्थिरत्वारुयः यस्मिन् स तेन । पुनः किंभूतेन मंडले देशे खलजना दुर्जनास्त एवांभोजानि कमलानि तेषु इंदुरिव इंदुस्तेन खलानां परामवकारकेन इत्यर्थः ॥ जलकमलानि चंद्रातपेन म्लानित्वं समागच्छंतीति रूढिः ॥ १५ ॥

यद्राजधान्युज्जयिनी महापुरी सदा महाकालमहेशयोगिनो ॥ समाश्रयिप्राण्यपवर्गदायिनी श्रीविक्रमार्कोऽवनिपो जयत्यपि ॥ १६ ॥

अथास्य पुरीं वर्णयति—यद्राजेति ॥ समाश्रितास्तत्रोषिता ये प्राणिनो लोकास्तेषामपवर्गदायिनी यद्राजधानी विक्रमस्य मूलनिवासनगरी उज्जयिनी यच्छन्दापेक्षया तच्छब्दोऽत्र ग्राह्यः शेषं सुगमं ॥ १६ ॥

यो रुंमदेशाधिपतिं शकेश्वरं जित्वा गृहीत्वोज्जयिनीं महाहवे ॥
आनीय संभ्राम्य मुमोचयत्त्वहो स विक्रमार्कः समसह्यविक्रमः ॥१७॥

यो रुम्मेति ॥ यो विक्रमार्को रुम्मदेशाधिपतिं शकेश्वरं म्लेछनायकं आहवे संग्रामे जित्वा गृहीत्वा च उज्जयिनीमानीय संभ्राम्य च तु पुनस्तं शकेश्वरं मुमोच अहो इति आश्चर्ये शेषं स्पष्टं ॥ १७ ॥

तस्मिन् सदा विक्रममेदिनीशे विराजमाने समवंतिकायां ॥
सर्वप्रजामंगलसौख्यसंपद्बभूव सर्वत्र च वेदकर्म ॥ १८ ॥

तस्मिन्निति स्पष्टं ॥ १८ ॥

शंक्वादिपंडितवराः कवयस्त्वनेके ज्योतिर्विदः सभमवंश्च वराहपूर्वाः ॥ श्रीविक्रमार्कनृपसंसदि मान्यबुद्धिस्तै-रप्यहं नृपसखा किल कालिदासः ॥ १९ ॥
काव्यत्रयं सुमतिकृद्रघुवंशपूर्वं पूर्वं ततो ननु कियच्छ्रु-तिकर्मवादः ॥ ज्योतिर्विदाभरणकालविधानशास्त्रं श्रीकालिदासकवितो हि ततो बभूव ॥ २० ॥

शंक्वादीति स्पष्टं ॥ २० ॥

वर्षैः सिंधुरदर्शनांबरगुणै३०६८र्याते कलौ संमिते मासे माधवसंज्ञिके च विहितो ग्रंथक्रियोपक्रमः ॥ नानाकालविधानशास्त्रगदितज्ञानं वि-लोक्यादरादूर्जे ग्रंथसमाप्तिरत्र विहिता ज्योतिर्विदां प्रीतये ॥ २१ ॥

अथ ग्रंथारंभसमाप्तिकालौ दर्शयति—वर्षैरिति ॥ सिंधुरो हस्ती ८ दर्शनानि षट् ६ अंबरं खं० गुणास्त्रय ३ एभिर्वर्षैः ३०६८ संमिते प्रमिते कलौ कलियुगे याते गते सति माधवसंज्ञिके वैशाखे मासे मया ग्रंथक्रियोपक्रमो ग्रंथकरणप्रारंभो विहितः कृत ॥ च पुनः ऊर्जे कार्तिकमासे ग्रंथसमाप्तिर्विहिता कृता कस्यै ज्योतिर्विदां दैवज्ञानां प्रीतये किंकृत्वा नानाकालविधानशास्त्रगदितज्ञानमादरात् विलोक्य दृष्ट्वा । अत्र ग्रंथांते मंगलमपि दर्शितं यतो ज्योतिर्विदां प्रीता प्रसन्ना चासौ या लक्ष्मीश्च प्रीतया तस्याः संबोधने हे प्रितये हे प्रसन्न-लक्ष्मी त्वमसि ॥ २१ ॥

इति श्रीकविकालिदासोदिते ज्योतिर्विदाभरणे ग्रंथाध्यायनिरूप-णक्रमनृपविक्रमवीरवर्णनो नाम द्वाविंशतितमः ॥ २२ ॥

अथ सुखबोधिकाटीकायाः प्रशस्तिमाह ॥ प्रस्तैकावहृद्भात स्याद्वाराशीनरश्मिना ॥ सन्नुता नकल्पेत जयताज्जैनदर्शनं ॥१॥ विद्युद्कनकगात्रो रत्नपात्रो गुणाढ्यो विविधकृतविद्याढ्य ममा...द्धान ॥ सकलसुरविभूना सेव्यसामीप्यदायी जयति सवनमर्हन् वर्द्धमान सुरद्रु॥

॥२॥ श्रीवर्द्धमानात्तु परंपराप्ते पदेऽभवत् सूरिवरः श्रियाढ्यः ॥ चंद्रप्रभाख्यो विधुकान्तिकीर्तिः श्रीपौर्णिमीयाभिधपक्षगच्छे ॥ ३ ॥ श्रीसिद्धराजसदसीह विजित्य सूरीन् वादं विधाय वत षण्मितमासकालं ॥ यः पूर्णिमां जिनवरागमसूक्तियुक्त्या सत्योद्धवार दृढधीरनवद्यनृत्यः ॥४॥ तत्पदे सुक्रियायुक्तो धर्मघोषस्ततो यतः ॥ खद्विचन्द्रमिता १२० जाताः शाखाः पौर्णिमिकाभिधाः ॥५॥ परंपराप्ते क्रमतस्ततः श्रीविद्याप्रभः सूरिवरोऽत्र पेदे ॥ बभूव शास्त्रार्थसुभासमुद्रप्रोल्लासने चंद्रसमानधर्मा ॥६॥ ललितप्रभसूरिकुंजरोऽजनि पेदे तत आश्रितः श्रियं ॥ विनयप्रभसूरिपुंगवोऽजनि पेदे तत आश्रितः श्रियं॥७॥ सप्तद्वपूर्वाचलमानुमंतो जयंति यश्चात्किल सूरिराजाः॥ नाम्नार्थतश्चापि गुणैरशेषैः सर्वोत्तमैः श्रीमहिमाप्रभाख्याः ॥ ८ ॥ एषां प्रतापतपनश्च यशःसितांशुर्मुर्व्यंबरे स्वरिसमस्तपदे जयातः॥ नित्योदयौ विदधतो खलराहुनाशं चित्रं ततो न महतामभितानुभावः ॥ ९ ॥ आप्तोक्तौ परिपूर्णनिर्मलमतिः शब्दानुशास्तौ प्रधीः काव्ये कर्कशतर्कशास्त्रकलने गाणित्यशास्त्रे तथा ॥ सांगे श्रीमहिमाप्रभाख्यसुगुरुः सूरीश्वरो राजते ख्यातः सर्वगणे परोपकरणाद् विद्यादिदानेन वै ॥ १० ॥ तच्छिष्योऽभूद्भावरत्नाभिधानस्तत्पादाब्जोपासनासक्तचित्तः ॥ एतत्सूक्त्या कालिदासस्य गुर्व्या ज्ञातार्थो यस्तद्गुरोर्ज्ञानलाभात् ॥११॥ तेनासौ सुखबोधिका सुललिता ज्योतिर्विदां तुष्टये शास्त्रस्यास्य कृता यथामति मया शोध्या सुधीभिर्यतः ॥ संश्लिष्टानि पदान्यनेकश इहैकैकाक्षराख्यान्यपि काठिन्यं कविना गिरां समुदितं त्याज्यं खलत्वात्पुनः ॥१२॥ परिश्रमोऽयं सफलो ममास्यास्ताद्वाच्यमानेन विलेखनेन ॥ सतां प्रसादाच्च ततो दधानैः खलैः खलत्वं जगतीह किं स्यात् ॥ १३ ॥ सज्जनेभ्यो नमो नित्यं खलेभ्योऽपि नमो नमः ॥ भवंत्येके गुणज्ञा यद्दोषज्ञास्त्वपरे दृढं ॥१४॥ उभयेषां कृपादृग्भिः कृतिर्मे यातु शुद्धितः ॥ अग्निक्षारे यथा हेम निर्दोषं च सुवानता ॥१५॥ श्रीविक्रमार्कादहिपड्हयोर्वीमिते गतेऽब्दे खलु राध १७६८। मासे ॥ शुक्ले तृतीयेऽप तिथौ गभस्तिवारे समाप्ता सुखबोधिकेयम् ॥ १६ ॥ इति श्रीपौर्णिमीयगच्छाधिराजभट्टारकपुरंदरश्री५श्रीमहिमाप्रभसूरीश्वरचरणसरोरुहचंचरीकायमानशिष्यभावरत्नविरचितायां श्रीकालिदासकृतज्योतिर्विदाभरणस्य सुखबोधिकायां ग्रंथाध्यायनिरूपणक्रमश्रीविक्रमार्कनृपवर्णनोनाम द्वाविंशतितमोऽध्यायः संपूर्णः ॥ २२ ॥ गच्छे श्रीमहिमाप्रभाख्यसुगुरोः श्रीपौर्णिमीयाभिधो शिष्यः सूरिवरस्य मांडणसुतो यो भावरत्नाभिधः ॥ वाल्हाकुलिसमुद्भवः सुकृतवान् श्रीपत्तने पत्तने छंदोव्याकरणाभिधस्मरणतोऽलंकारयुक्तामिमां॥१॥वक्रवाळधिमारूढो वरडाव्हो महाबली ॥ सुखाय क्षेत्रपालोऽस्तु राकापक्षकधारिणाम् ॥ २ ॥ अस्य मूलग्रंथस्य सर्वाध्यायराशीकृतवृत्तसंख्या १४२० श्लोकमानं तु २४२० अथ वृत्ते संख्या सप्तसहस्रा ७००० सूत्रवृत्तिमीलने ग्रं० ९४२० अनुष्टुब्भ्यः ॥ श्रीः

समाप्तम्.

आ० नं० १ पृ० ९७ श्लो० २८



आ० नं० २ श्लो० २४ पृ० १२३

मातृका चक्रम्



आ० नं० ३ पृ० १२६ श्लो० ३५

मनदेपशरीर

आ० नं० ४ पृ० १३१ श्लो० १४

सिंहासनचक्रं



आ० नं० ५ पृ० १३५ श्लोक ३३

गजचक्रम्



आ० नं० ८ पृ० १३८ श्लो० ४५

शिविका चक्रम्



आ० नं० ७ पृ० १३७ श्लो० ४१

रथचक्रम्

आ० नं० ६ पृ० १३६ श्लो० ३८

अश्वचक्रम्-

आ० नं० ९ पृ० १४५ श्लो० ७१

हत कालचक्रम्-

ई बु	पू	अ र वृ
उ		द
वा म श	प	नै चं शु

आ० नं० ११ पृ० १४८ श्लो० ८४



आ० नं० १० पृ० १४७ श्लो० ८० कोटचक्रम्



आ० नं० १२ पृ० १६८ श्लो० २८ आ० नं० १३ पृ० १६९ श्लो०

योगिनीचक्रम्

ई १५८	पू ११०	आ ३१११
उ ०१३१		द ०१३३
वा ३१३४	प ६१४	नै ४१३५

वारदिक्शूलचक्रम्

ई	पू शा ध	आ
उ म गु		द वृ
वा	प र ६६	नै

आ० नं० १४ पृ० १६५ श्लोक ३१

वार कालचक्रम्-

ई	पू शु·	आ श·
उ· र·		द गु·
वा चं·	प म·	बु· नै·

आ० नं० १५ पृ० १६५ श्लो० ३१

वार पाश चक्रम्-

ई बु·	पू· म·	चं· अ·
उ· बृ·		र· द
वा शु·	प श	नै·

आ० नं० १६ पृ० १६६ श्लो० ३२

चंद्र गृह चक्रम्-

ई·	पू· १।५।९	अ·
उ· ४।८।१२		द· ३।६।१०
वा	प· ३।७।११	नै·

आ० नं० १७ पृ० १६६ श्लो० ३४

तिथि पाश चक्रम्-

ई·	पू ४ २८ १२ २०	अ·
उ ६ १४ ६ २२		द २६२ १० १८
वा·	१२ प ३० २० २८	नै·

आ० नं० १८ पृ० १६६ श्लो० ३४

तिथि काल चक्रम्-

ई	७ पू २३ ८ १५ १६ २४	अ
१।२।९ उ २।१० १७।१८ २५।२६		५।२।२६।७ द ६।१४ २२।१३।२९
वा	३ प ३१ ४।१२ २८ ११ १९ १३ २०	नै

आ० नं० १९ पृ० १६८ श्लो० ४३

परिघदंडचक्रम्-



आ० नं० २०।२१ पृ० २०६ श्लो० ४५

फणिचक्रम्-





आ० नं० २४ पृ० २४४ श्लो० ८१

खड्गचक्रम्-



आ० नं० २५ पृ० २४५ श्लो० ८३

पट्टचक्रम्-



आ० नं० २२ पृ० २२१ श्लो० ४ अंशवेधचक्रम्.



आ० नं० २३ पृ० २२१ श्लो० ४ अंशवेध चक्रम्-



आ० नं० ३० पृ० २५७ श्लो० १७ अहिचक्रम्.

अहिचक्रम् आ० नं० २९



अहिचक्रम् आ० नं० २८



अहिचक्रम् आ० न० ३१ पृ २५८ श्लो० २०



प्रवोलीचक्रम् आ न ३२ पृ २६२ श्लो १७

२	६	२
४	३	४
२	४	२

दिग्वत्सचक्रम्
आ न ३३ पृ २६२ श्लो ३९

ई	पू ६।७ ८	आ
उ ३।४। ५		९।१०द १२
वा	११।१ २ प	नै

आ० न० ३५ पृ० २७० श्लो० १०

आ न ३४ श्लो ५२ पृ २६५



षोडशगृहभेदाः श्लो० ४२ पृ० २७८



आ० न० ३५ पृ० २७१ श्लो० १२



आ० न० ३६ पृ० २८० श्लो० ५५



आ० न० ३७ पृ० २८४ श्लो० ७



आ० न० ३ अ पृ० २९६ श्लो० १५



पृ० २९८ श्लो० २३ सिंहासनत्रयचक्रम् आ० न० ३९।४०।४१



राजमुद्राचक्रम्- आ॰ नं॰ ३८ श्लो॰ २२ पृ॰ २९८



कूपचक्रम्- आ॰ नं॰ ४५ पृ॰ ३०८ श्लो॰ १५



वापी चक्रम्- आ॰ नं॰ ४६ पृ॰ ३०९ श्लो॰ १६



तडागचक्रम्- आ॰ नं॰ ४७ पृ॰ ३०९ श्लो॰ १७



कुंडचक्रम्- आ॰ नं॰ ४७



कूपचक्रम्- आ॰ नं॰ ५२ पृ॰ ३१३ श्लो॰ ३४



रथारीचक्रम्- आ॰ नं॰ ४८ पृ॰ ३१० श्लो॰ २०



परिखाचक्रम् आ॰ नं॰ ४८ पृ॰ ३१० श्लो॰ १९



तैलिकयंत्रम्- आ॰ नं॰ ५३ पृ॰ ३१४ श्लो॰ ३६



नौकाचक्रम्
आ० न ५० पृ ३११ श्लो २५



सेतुवधचक्रम्
आ०न०५१ पृ ३१२ श्लो २१



आ न ५४ पृ ३१४ श्लो ३७ आ० न० ५४ अ पृ ३१६ श्लो ४३ आ न ५४ प पृ ३१६ श्लो ४४

ग्राममध्य चूपचक्रम्



कुलालचक्रम्



शैलुषचक्रम्





हलचक्रम्
आ० न० ५५ पृ० ३१८ श्लो० ५२